उत्तरनैषधचरितं

श्रीहर्षमहाकविविरचितं

श्रीनारायणपण्डितकृतटीकासहितं ।

श्रीमद्भारतवर्षाधिपतीनामर्थसहायेन

एषियाटिक् ससायिट्यध्यक्षमहोदयानामनुमत्या

श्रीडाक्तर् एड्वार्ड रोएर् साहवेन संस्कृत्य

कलिकताख्यराजधान्यां बाप्तिष्टमिशन्‌मुद्रायन्त्रे मुद्रितं
पूर्वार्द्धं सप्तदशसर्गान्तं ॥

शकाब्दाः १७७७ । इं० १८५५ साल् ।

PREFACE.

S'rí Harsha's Naishadha, a poem on the life of Nala, King of Nishadha, is divided into two parts, the Púrva and Uttara Naishadha, or the first and second Naishadha, each of them containing eleven cantos, a division, for which there is no apparent reason, as the second is a mere continuation of the first part, nor are the two separated by any remarkable turn in the narrative. The Púrva Naishadha was published in 1836, under the auspices of the General Committee of Public Instruction, by Premchander Pandit of the Calcutta Sanscrit College, and accompanied with a Commentary of his own. The present edition of the Uttara Naishadha was undertaken at the suggestion of Professor Lassen, and concludes the last of the six Mahákávyas* of the Hindus which remained unpublished.

A Mahákávya, or great poem, although belonging to the narrative kind, is not an epic poem, which treats of heroic characters and deeds: the Mahábhárata and Rámáyana best correspond with our idea of an heroic poem, and they are classed under the head of Itihása. The eminence denoted by the prefix "great" refers rather to the length and general excellence of a poem, and in one instance, Kálidása's Meghaduta, to its excellence alone. Tradition, resting on general consent, declares the six poems above enumerated, alone worthy of that distinguishing title.

The treatises on poetical composition give a more tangible account of this class of poetry. A Mahákávya, according to

* They are the following, the Raghuvans'a, the Kumára Sambhava and the Meghaduta, all three ascribed to Kalidása, the Kirátárjuníya by Bháravi, the S'is'upalabadha by Mágha, and the Naishadha by S'rí Harsha.

the definition of the Sáhitya Darpaṇa, one of those treatises, is a poem of many cantos; the hero is either a god, or a khsatriya of good family, and of firm and elevated character; or the subject of the poem may be, as in Kálidása's Raghu Vans'a, several princes of the same race: the principal qualities illustrated are, love, heroism and meekness: the narrative itself should be taken from an Itihása, as the Mahábhárata, or from some other approved authority; it should exceed eight cantos, each of moderate length, and be interwoven with descriptions of morning, of the sun, moon, night, the heavens, the city, sacrifice, war, travelling to another country, marriage, etc.

According to this definition, the form and mode of treatment are the test for deciding, whether or not a poem be a Mahákávya; consequently, the author of the Sáhitya excludes Kálidása's Meghaduta, and not only assigns the name of Mahákávya to others than those above mentioned, but gives it to some of his own composition. Notwithstanding the difference in the popular and the more learned definition of a Mahákávya, there is this common to both, that they are narratives of lofty or elevated style and aspire to the rank of the highest order of poetry in the language.

The Naishadha is one of those poems to which the name of Great is given par excellence; and certainly, as respects the subject matter of the poem, it is one of the most romantic and pathetic to be found in the literature of any language. It is the well known story of the love between Nala, king of Nishadha, and Damayantí, the daughter of Bhíma, the king of Vidarbha, which is briefly this: Nala was the most beauteous and high-minded of men, Damayantí, the loveliest of women—hearing everywhere of each other's virtues and accomplishments, they were reciprocally inspired with an ardent love, which they communicated to each other by the mediation of swans—the father, not aware of their mutual attachment, seeing the beauty of his daughter fading, resolved that she should marry, and, with this view invited the neighbour-

ing kings to Damayantí's Swayamvara, a festival, where, in accordance with the ancient Hindu rite, she was to choose her own husband—along with the princes came Indra, Agni, Yama and Varuṇa, the four Lokapálas, or divine guardians of the world, in the likeness of Nala to deceive Damayantí—having invoked those deities to aid her in recognising her lover, she selected the true Nala. The story proceeds to describe their marriage and happiness, the vengeance vowed to Nala by Kali (the personified deity of the present or fourth age), his getting hold of Nala, through an omission of a ceremony by the king, Nala's addiction to gambling under the evil influence of Kali, thereby his loss of the kingdom and banishment, his separation from the faithful Damayantí (who had borne him company through his reverses of fortune, when all had abandoned him), Nala's madness, their mutual sufferings and varied miseries, the final recovery of Nala from his mental malady, and his happy reunion with Damayantí. The love of Nala and Damayantí had been first related in the Mahábhárata, containing in the third part, the Vanaparva, the episode of Nala.* Since then, it has remained a favourite theme with Hindu poets, who have adorned it, as a triumphal arch, with their poetical festoons and garlands. The most celebrated of these productions are the Nalodaya† generally ascribed to Kálidása, which, owing to its continuous play upon words, is one of the most difficult of Sanscrit poems, the Nala Champú by Vikrama Bhaṭṭa, a narrative partly prose and partly verse, and S'rí Harsha's Naishadha.

* Bopp published a separate edition of the text with a Latin version under the title "Nalus Mahábhárati Episodium. Altera emendata editio. Berolini, 1832. Milman translated it into English "Nala and Damayantí, and other poems translated from the Sanscrit into English verse, by H. H Milman." There are German versions of the poem by Kosegarten, Ruckert and Bopp.

† Nalodaya, with the commentary of Prajnákaramisra, 1813, (Calcutta?). Nalodaya, una cum Pradschnakari Mithilensis scholiis ed., lat interpretatione atque annotationibus criticis instruxit F. Benary, Berol., 1836. Nalodaya, accompanied with a metrical translation by W. Yates, Calcutta, 1814.

The treatment of this subject in the Mahábhárata and Naishadha is wholly different. The Mahábhárata tells the whole story in simple, but vigorous and noble language. It is full of powerful descriptions of passion; the poet nowhere pays any undue attention to the mere form of language; his chief exertion is devoted to attract our sympathy to the qualities and passions which he represents. Refer, for example, to the deep pathos in the description of the grief of Damayantí, when abandoned by her husband in the solitude of the forest.

S'rí Harsha gives only a part of Nala's adventures and carries the story no further than the return of Nala to his capital with his bride Damayantí, and the description of their first unalloyed affection and happiness. It is poor in incident, the greater part of the long poem being occupied with descriptions of the kind mentioned before as indispensable in a Mahákávya. It does not exhibit, as the Mahábhárata does, a comparatively simple state of manners and society, but a highly artificial one, and mirrors the terrible social corruption existing at the time when the poet flourished. Instead of ennobling the affections, or appealing to the tenderest and most sacred feelings of man, the love which the poet describes is earth-born and sensual in a degree far exceeding the lasciviousness of some of the Roman poets. Scenes such as described in the feast of Dama (Canto 16, pp. 353—401) are degrading and revolting; nor are similar extravagancies confined to an episode like that just alluded to—the absence of decent shame pervades throughout, and pollutes even the hearts of the females, as is evident, for instance, from the speech of Damayantí's companions. (Canto 16, pp. 352—59). Even the love of Nala and Damayantí, although generally tender and delicate and adorned with all the graces of the poet's exuberant fancy, approaches often to unveiled sensuality, and may, in truth, in several places, be designated a practical illustration of the Kámas'ástra. And very well has the author himself described the basis upon which rested the fabric of a large portion of Hindu society in his day, in

the speech which he puts into the mouth of the Chárváka (Canto 17, pp. 435—74), the founder of an atheistical system, who admirably demonstrates the hollowness, absurdity, and moral turpitude of the Hindu pantheon—a speech, which, indeed, the gods attempt to refute, but their rejoinder is rather a confirmation.

With the structure or frame of the poem our delight is nearly unqualified. The language is highly elaborate, bearing the mirror's polish. It never becomes common-place, and bears throughout a sustained tone of sprightliness and elevation. Although we find a continual play upon words for many verses together, yet, not only is the sense not lost in a mere jingle of syllables, but the general effect is often much enhanced by the harmonious contrast of open and concealed meanings. The variety of metres are handled by the poet with admirable art and propriety; and the subject sparkles under his tread as gleams the ocean-track in a ship's wake, rich in imagery showered unceasingly from the cornucopia of the poet's mind. He draws upon the countless stores of Hindu mythology, weaves quaint and monstrous shapes, furnished by Heaven, Earth and Hell, into a rich string of arabesques, blending together their strange variety so that they harmonise. Yet may the whole be likened to dissolving views. Perfection of form and general effect are the poet's aim, not what we moderns consider real intrinsic excellence, that is, elevation of idea, power of invention and insight into human character, rather than skill in the mere structure of language and in the stringing together of imagery, truly a high but not the highest gift. The effort of the Sanscrit poet is brilliant—so brilliant as to blind the reader with its blaze, until he loses, or becomes unconscious of, any defined creation of the poet's fancy. Saraswati's description of the five Nalas is a ready instance of the characteristic peculiarities we have attempted to describe. The poet tells of the five Nalas: each verse has what we may term an overt and a sub-meaning or meanings, the former applying to Nala,

the latter to the god who had assumed Nala's form; and, in conclusion, the same collocation of words has a reference to the character and manifold attributes of the five Nallas. (Canto 13, pp. 146—148.) Among the best parts of the poem, I would name the whole 17th Canto, especially the powerful description of the personified deities of the chief vices, and the twenty-second, in which the description of the moon by Damayantí and Nala is in exquisite taste and sometimes pathetic, each verse containing a complete picture in itself, in which the rich and melodious flow of the language is in perfect harmony with the subject.

To sum up; in structure, force and elegance of diction, in propriety and graceful ease of vythou metre, in power of description and felicitous use of imagery—the Naishadha ranks high, and may enter the lists with any work of Sanscrit literature; but, to fit it for a place among the poems of the first order, it wants incident, action and dignity. The hero does not rouse our higher sympathies; he revels constantly in the gardens of Armida—not as a Rinaldo who lays by his armour for a while, but as one native to the place, whose soul never soars beyond its delusive pleasures.

The MSS. of the text and commentary which I have collated for the present edition, are the following,—

Of the Text.

A. No. 655, complete, belonging to the Calcutta Sanscrit College. It bears the date of 1711, and the name of the writer is A'nanda Parivrájaka. It is very correct.

B. Complete, it is the property of my Paṇḍit, S'rí Sakháráma S'ástrí, who, about 50 years ago, received it from his father. It is also a good copy, as may be expected, having been so long in the possession of Paṇḍits.

Of the Commentary.

C. No. 655, belonging to the Asiatic Society, procured from Benares. It is a commentary both on the Púrva and the Uttara Naishadha. It is, however, not complete, containing only

Cantos 12, 14 to 17 and 21, more or less complete. It has the date of Samvat 1815, and is tolerably correct.

D. No. 131, belonging to the Calcutta Sanscrit College. It contains parts of the 14 to 17 Cantos; the 18 to 20 Cantos are complete.

Text and Commentary.

E. This belongs to the Asiatic Society, and is copied from a MS. in the Library of the Sanscrit College at Benares. It is incomplete, containing Cantos 13 to 17 and 20 to 22. It is dated 1807, and is not very correct.

F. Nos. 128-130, belonging to the Calcutta Sanscrit College. It is without date, contains Cantos 12 to 16, 18 and 21, and is tolerably correct.

An edition of the text was urgently required; for even in S'rí Náráyaṇa's commentary, which according to a traditional account was written about 500 years ago, a great number of various readings are enumerated. The commentary itself is very good. S'rí Náráyana has a thorough appreciation of the beauties of his author, and is fully able to follow him into the labyrinthine windings whether of fancy or expression. He explains with accuracy and nicety all those passages which, from the double meanings of words or their rare use, from the elaborate structure of the sentence or the obscurity of allusion or circumstance, would otherwise remain unintelligible. Nor is he prolix, as is frequently the case with such commentators. The MSS. of the commentary would seem to have become very rare. I have not seen one that was complete; and those which have been at my disposal are very incorrect, evidently owing to the carelessness and misapprehension of the copyists, so that I have, in many instances, found it very difficult to restore the text of the commentary. I considered it, however, unnecessary to notice all the discrepancies among the MSS.; the greater part of them are palpable mistakes, and to enumerate or give an account of them would be to furnish, not various readings, but a list of mere clerical errata.

The text has been given in accordance with the reading approved of by the commentary; and although I have been frequently disposed to adopt a reading not favourably considered by the commentary, I have foreborne to do so, that I might maintain the uniformity of relation between the text and commentary.

CONTENTS

Twelfth Canto.

Thirteenth Canto.

Fourteenth Canto.

Damayántí adores the four gods and asks for power to recognise Nala, pp. 163-166. They grant her prayer; she recognises Nala by those characteristics which distinguish divine from human bodies, also by signs indicated in Saraswatí's description of Nala, pp. 177-181. She choses Nala as her husband by placing the bridal wreath on his neck, pp. 182-197. Nala and Damayanti's feelings on this occasion, pp. 198-205. The five deities re-assume their own forms, viz. Indra; pp. 206-208. Agni; pp. 208-209 Yama; pp. 209-211. Varuṇa; pp. 211-212. Saraswati; pp. 213-214. They bless Nala; pp. 214-233; also Damayantí; pp. 234-235. The deities prepare to return to heaven, and the kings to their camps; pp. 236-237. At the request of Damayantí, her father, Bhíma, gives her friends in marriage to the kings; pp. 237-238. Flowers are showered down from heaven upon Nala, while returning to his camp, p. 238. The deities part from Nala and Damayantí, p. 239. Bhíma closes the Swayamvara by a flourish of musical instruments, p. 240.

Fifteenth Canto.

Nala distributes presents among the bards, pp. 242-245. Bhíma enters with his daughter the apartments of the queen to inform her, that Damayantí has chosen Nala as her husband, p. 246. He makes preparations for the ceremony of marriage, pp. 247-250. Joy of the citizens on seeing Nala, pp. 250-255. The women of the royal palace adorn Damayantí for the ceremony, pp. 256-283 Nala is adorned for the ceremony, pp. 283-295. Nala's marriage procession, pp. 295-303. Nala proceeds to the royal palace Conversation of the town-women on the arrival of Nala, pp 304-316.

Sixteenth Canto.

Nala arrives at the gate of the palace and is received by Bhíma, pp. 318-325. Bhíma gives his daughter to Nala, pp. 325-326. Description of the marriage-ceremony, pp. 326-328. Bhíma's bridal

Seventeenth Canto.

Eighteenth Canto.

द्वादशः सर्गः ।

ॐ गणेशाय नमः ।

प्रियाङ्घ्रियालम्भ्य विलम्बमाविला
विलासिनः कुण्डिनमण्डनायितं ।
समाजमाजग्मुरथो रथोत्तमा-
स्तमासमुद्रादपरेऽपरे नृपाः ॥ १ ॥

इदानीं नूतनसमागतराजवर्णनार्थं द्वादशं सर्गमारभते ॥ प्रियेति ॥ अथो अनन्तरं अपरे अन्ये नृपा आसमुद्रात् समुद्रमवधीकृत्य दिगन्तेभ्यः सकाशादित्यर्थः । तं कुण्डिनस्य मण्डनायितं भूषणवदाचरितमलङ्कारकं समाजं स्वयम्वरसभामाजग्मुः । किम्भूताः प्रियाभ्यः स्वनायिकाभ्यः सकाशाद्या ह्रीः तासामनुरागजनितमुखदाक्षिण्येन कृत्वा विलम्बं दैर्घ्यमालम्ब्य आविलाः व्याकुलान्तःकरणाः । प्रियामुखदाक्षिण्यानुरोधेनास्माकं विलम्बे जाते भैमीस्वयम्वरो जातो माऽभूदिति बुद्ध्या नातिशीघ्रागाः । तथा विलासिनः शृङ्गारभङ्गीखचिताः । तथा रथोत्तमाः श्रेष्ठरथा इत्यनेन विलम्बे जातेऽपि शीघ्रागमनं सूचितं । विलासिनः वौकषलसेति घिनुण् (पा० ३ । २ । १४३ ।) रथैरुत्तमा इति समासः । अपरेऽपरे । वीप्सायां द्विरुक्तिः ॥ १ ॥

ततः स भैम्या ववृते वृते नृपै-
र्विनिःश्वसद्भिः सदसि स्वयम्बरः ।
चिरागतैस्तर्कितनद्विरागितैः
स्फुरद्भिरानन्दमहार्णवैर्नवैः ॥ २ ॥

चलत्पदस्तत्पदयन्त्रणेङ्गित-
स्फुटाश्रयामासयति स्म राजके ।
श्रमं गता यानगतावपीयमि-
त्युदीर्य्य धुर्य्यः कपटाज्जनीञ्जनः ॥ ३ ॥

तत इति । ततः सदसि समाजे स भैम्याः स्वयम्बरो ववृते । किम्भूते सदसि । भैम्याः स्वस्मिन् वैराग्येण विनिःश्वसद्भिर्विशेषेण मुक्तश्वासैश्चिरागतैः पूर्व्वमायातैर्नृपैर्वृते । तथा तर्किता ऊहितास्तेषु पूर्व्वागतेषु राजसु विरागिता अर्थाद्भैम्या यैस्तैः । स्फुरद्भिः शृङ्गारभङ्ग्या प्रकाशमानैः । तथा एतेन वृतान् स्वयम्बरशेषं प्राप्तानस्मानियं प्रायेण वरिष्यतीति बुद्ध्या आनन्दस्य महार्णवैरगाधसमुद्रैः प्रमुदिततरैर्नवैस्तत्कालमागतैर्नृपैर्वृते ॥ २ ॥

चलदिति । चलन्ति पदानि यस्य पुरस्तात् गच्छन् धुरं वहति धुर्य्यः शिविकादण्डवाही जनः जनीं भैमीं राजके राजसङ्घमध्ये आसयति स्म अस्थापयत् । किं कृत्वा । यानगतावपि शिविकारोहणेनापि गमने सत्यपि इयं भैमी श्रमङ्गता निःसहा जातेति कपटाद्व्याजात् उदीर्य्य उक्त्वा । किम्भूता शिविका पटाञ्चरितेन तत्पदेन भैमीचरणेन यद्यन्त्रणं यन्त्रणा वा पीडनं धुर्य्यजनस्य तदेव यदिङ्गितं अवस्थापनसूचिका चेष्टा

नृपानुपक्रम्य विभूषितासनान्
सनातनी सा सुषुवे सरस्वती।
विहारमारभ्य सरस्वतीः सुधा-
सरःस्वतीवार्द्रतनूरनूत्थिताः ॥ ४ ॥

वृणीष्व वर्णेन सुवर्णकेतकी-
प्रसूनपर्णा*दृतुपर्णमादृतं।

तेन स्फुट आशयो नवनृपदिदृक्षामात्रविषयोऽभिप्रायो यस्या-स्तां। जनीं। जायतेऽस्यां गर्भ इति जनिघसिभ्यां चेति औणा-दिक इ प्रत्यये जनिबध्योरिति (पा० ७।३।३५।) वृद्धिनिषेधे कृदिकारादिति (पा० ४।१।४१। सू० वार्तिकेन ङीष् ॥ ३ ॥

नृपान्निति। सा सनातनी नित्या सरस्वती देवता विभूषितं स्वीयसौन्दर्य्येणालङ्कृतमासनं यैस्तान्नृपानुपक्रम्योद्दिश्य सरस्व-तीर्वाचः सुषुवे उवाचेत्यर्थः। किम्भूता वाचः। सुधासरस्सु अमृ-तसमुद्रेषु विहारं जलक्रीडामारभ्य कृत्वातीवातितरामार्द्र-तनूः। तथाऽनु पश्चादविलम्ब्यैव उत्थितास्तस्मान्निर्गताः। अति मधुरा इत्यर्थः। सनाभवा। अव्ययत्वाट्‍‍‍युस्तुट् च ॥ ४ ॥

वृणीष्वेति। गौरत्वलक्षणेन वर्णेन सुवर्णकेतकीप्रसूनस्य गौरत्वलक्षणाद्वर्णादादृतं प्रेमास्पदीकृतं तस्मादधिकं वा अति गौरं सुकुमारशरीरं ऋतुपर्णनामानं नृपं त्वं वृणीष्व। अय-मवनीपतिः भवन्मयस्त्वदेकचित्तः सन् निजामात्मीयां पर-म्परायातां पावनीं पवित्रीकरणशीलां अयोध्यां मुक्तिपुरीमपि

* वर्णादिति टीकासम्मतः पाठः।

निजामयोध्यामपि पावनीमयं
भवन्मयो ध्यायति नावनीपतिः ॥ ५ ॥
न पीयतां नाम चकोरजिह्मया
कथञ्चिदेतन्मुखचन्द्रचन्द्रिका ।

न ध्यायति न स्मरति । परमानन्दरूपत्वान्मुक्तेस्सकाशादपि तव प्राप्तिरेतस्याधिकेत्यर्थः । अन्योऽपि विलासी गुणवतीमपि निजां प्रियामचिन्तयन्नन्यामेव ध्यायतीत्युक्तिः । त्वय्यतितरामनुरक्तोऽयमेतं वृणीष्वेति भावः । वर्णात् । पञ्चमी विभक्ते इति (पा° २ । ३ । ४२ ।) पञ्चमी । भवन्मयः । सर्व्वनाम्नो वृत्तिमात्रे स्त्रियाः पुंवत् (पा° ६ । ३ । ३४ । सू° वार्तिकेन पुंवद्भावः ॥ ५ ॥

नेति । हे भैमि चकोरजिह्मया एतस्य ऋतुपर्णस्य मुखमेवचन्द्रस्तस्य चन्द्रिका प्रसन्नतारूपा ज्योत्स्ना कथञ्चित्केनापि प्रकारेण न पीयतां नाम । चकोरजिह्मया सत्यं चन्द्रचन्द्रिका पीयते । इयं त्वलोकमुखचन्द्रिकेति पीयतां मा वा । अत्रास्माकमौदासीन्यमित्यर्थः । परन्तु चिरं भवन्मुखस्पृशी त्वदीयमुखसेवनतत्परे चकोरस्य चक्षुषी इमां एतन्मुखचन्द्रचन्द्रिकां किमिति न आचामयसे पाययसे अपि तु पायय । अलोकत्वात्तादृग्रसाभावात् चकोरजिह्मया पानेऽशक्तेऽपि तथा सुन्दरत्वात् वर्णनायामस्मदादीनामशक्तत्वेऽपि तादृगाह्लादकत्वस्य सौन्दर्यस्य च प्रत्यक्षेण द्रष्टुं शक्यत्वादेतन्मुखचन्द्रचन्द्रिकां चक्षुषी पाययस्वेत्यर्थः । अथ चकोरजिह्मया भवन्मुखसेवाया अशक्तत्वादेतन्मुखचन्द्रचन्द्रिकापानं कर्त्तुमशक्यमिति युक्तं । तदीयचक्षुर्भ्यां

इमां किमाचामयसे न चक्षुषी
चिरं चकोरस्य भवन्मुखस्पृशी ॥ ६ ॥

तु चिरकालमुत्तमस्य भवन्मुखस्य सेवनात् तयोरेतन्मुखचन्द्र-चन्द्रिकापानं युक्तं। उत्तमसेवया हि दुष्प्रापमपि वस्तु सुप्रापं भवतीत्याशयः। चिरकालमेतन्मुखकान्तिं सादरं किं न पश्यस्यपि तु पश्यैनं शृणोष्वेति भावः। यद्वा जिह्वाया अल्प एवास्वाद्ये सामर्थ्यादेतन्मुखचन्द्रचन्द्रिकायास्त्वातिबहुलाच्चकोरजिह्वयेयं कथञ्चिन्न पीयतां नाम। त्वन्मुखस्पृशोश्चकोरनेत्रयोस्तु पानं युक्तमल्पीयसोरपि नेत्रयोर्भूयसो विषयस्य ग्रहणे सामर्थ्यसद्भावात् किं पुनर्विशालयोरनयोरिति भावः। एते चकोरस्येव नेत्रे भवन्मुखं स्पृशत इति नेत्रयोरमणीयत्वं चन्द्रिकापानयोग्यत्वं विलोकनचातुर्य्यं च सूचितं। अत्र चमेः प्रत्यवसानार्थत्वाद्गतिबुद्धीत्यादिना (पा॰ १। ४। ५२।) चक्षुषोः कर्म्मत्वं। णिचश्चेति (पा॰ १। ३। ७४।) कर्त्रभिप्राये क्रियाफलविवक्षायामात्मनेपदे प्राप्तेऽपि निगरणचलनार्थेभ्यश्चेति (पा॰ १। ३। ८७।) परस्मैपदप्राप्तेराचामयस इति चिन्त्यं। एवं सति चकोरस्य चक्षुषी चिरं भवन्मुखस्पृशी वर्त्तेते। यतः त्वन्मुखसेवां बहुकालं कुर्व्वात इत्यर्थः। अत एवेमामेतन्मुखचन्द्रचन्द्रिकां किं नाचामयसे सामर्थ्याच्चक्षुर्भ्यामिति शेषः। इति समाधानं। आचमनमाचामः सोऽस्या अस्तीति आचामवती करोतीत्यर्थे तत्करोतीति (पा॰ ३। १। २६।) सूत्रस्थवार्तिकण्यन्तस्य लक्षणप्रतिपदोक्तपरिभाषया प्रतिपदोक्त-

अपां विहारे तव हारविभ्रमं
करोतु नीरे पृषदुत्करस्तरन्।
कठोरपीनोच्चकुचद्वयीतट-
त्रुटत्तरः सारवसारवोर्म्मिजः ॥ ७ ॥

प्रत्यवसानाभावात् निगरणादि (पा० १। ३। ८७।) सूत्रेणानु-
वृत्तपरस्मैपदसञ्ज्ञया परस्मैपदस्य विधानात्सञ्ज्ञापूर्व्वको वि-
धिरनित्य इति परिभाषयात्र परस्मैपदं न भवतीति वा।
आचाम इति न कम्यमिचमाम् इति मित्वनिषेधाद्ध्रस्वत्वा-
भावः ॥ ६ ॥

अपामिति। हे भैमि आरवेण सहिताः सारवाः सरय्वा
इमे सारवा एवम्भूता ऊर्म्मयस्तेभ्यो जातः पृषदुत्करो विन्दुस-
मूहः अपां विहारे अनेन सह जलक्रीडायां सत्यां तव हार-
विभ्रमं त्वत्सम्बन्धिहारविलासं करोतु। किम्भूतः। नीरे तरन्
प्लवमानः। तथा कठोराऽतिकठिना पीना उच्चा त्वदीया
कुचद्वयी स्तनद्वयी तस्यास्तटे परिसरे त्रुटत्तर अतिशयेन
त्रुट्यत् विशीर्य्यमाणतरः। जलक्रीडावशाद्विच्छिन्नस्त्वदीयो मुक्ता-
हार इव शोभतां। अथ च पश्यतो लोकस्य भैमीहारः कि-
मयमिति विशिष्टां भ्रान्तिं जनयतु। विगतहारे देशे हार-
विलास इति विरोधस्य। अथ च पृषदुत्करो हरिणसङ्घः क्रीडा-
प्रदेशे क्रीडां करोत्विति युक्तं। सरयूक्रीडाप्राप्त्यर्थं एनं वृणीष्वेति
भावः। देविकायां सरय्वां च भवेदाविकसारवावित्यमरः।
दाण्डिनायनादिसूत्रेण (पा० ६। ४। १७४।) साधुः ॥ ७ ॥

अखानि सिन्धुः समपूरि गङ्गया
कुले किलास्य प्रसभं स भंत्स्यते।
विलङ्घ्यते चास्य यशःशतैरहो
सतां महत्सम्मुखधावि पौरुषं॥ ८॥
एतद्यशःचौरधिपूरगाहि
पतत्यगाधे वचनं कवीनां।

अखानीति। अस्य कुले वंशे पूर्व्वजैः सगरपुत्रैः इन्द्रनीताश्वाहरणार्थं सिन्धुः समुद्रः पातालपर्य्यन्तं अखानि खातः। कपिलशापदग्धानां तेषामेवोद्धरणार्थं भगीरथेनानीतया गङ्गया समपूरि पूर्णीकृतः। तथा श्रीरघुनाथेन रावणवधार्थं प्रसभं हठेन स सिन्धुः भंत्स्यते बन्धनं नेष्यते किलेति पुराणप्रसिद्धमेतत्। स एवेदानीं अस्य यशःशतैः विलङ्घ्यते च। सर्व्वे समुद्रमेव प्रति पौरुषं किमिति कृतवन्त इत्यत आह अहो युक्तमेतत्। सतां महतां पौरुषं महतामेव सम्मुखं धावति प्रसरतीत्येवंशीलं। क्षुद्रान् कृपयोपेक्षत एवंविधा अस्य पूर्व्वजाः। श्रीरघुनाथस्य यस्मिन् वंशे समुत्पत्स्यते तस्मिन् वंशे समुत्पन्नोऽयं अस्य यशांसि समुद्रपारगामीति एनं वृणीष्वेति भावः। भंत्स्यते। बधेः कर्म्मणि ऌटि बध्नातेस्त्वले च रूपं॥ ८॥

एतदिति। एतस्य यशस एव चौरधेयः पूरः तं गाहते एवंशीलं एतदीययशोवर्धकं कवीनां वचनं आगधे अतलस्पर्शे स्थाने पतति निमज्जति। स्तोतुमसामर्थ्यादागगोचरोऽस्य यशःसमुद्र इत्यर्थः। अन्योऽपि समुद्रः प्रवाहावगाही अगाधे बुडति। तथा

एतद्गुणानां गणनाङ्कपातः
प्रत्यर्थिकीर्त्तीः खटिकाः चिणोति ॥ ९ ॥

भास्वद्वंशकरीरतां दधदयं वीरः कथं कथ्यता-
मध्युष्टापि हि कोटिरस्य समरे रोमाणि सत्त्वांकुराः ।
नीतः संयति वन्दिभिः श्रुतिपथं यन्नामवर्णावली-
मन्त्रः स्तम्भयति प्रतिक्षिति*भुजां दोस्तम्भकुम्भीनसान् ॥ १० ॥

एतस्य शौर्य्यादीनां गुणानां गणनार्थं अङ्कपातोऽङ्कविन्यासः प्रत्यर्थिनां वैरिणां कीर्त्तीरेव खटिकाः चिणोति हिनस्ति । बह्वङ्कविन्यासे हि खटिकाचयो भवति । एतद्गुणा अप्यतिभूयस्त्वाद्गणयितुमशक्याः । एतद्गुणानां पुरस्तादरिकीर्त्तिर्न प्रतिभासत इत्यर्थः । एनं वृणीष्वेत्यर्थः । चिणोति । लघूपधत्वात् (पा० ७।३।८६।) गुणप्रसक्तावपि सञ्ज्ञापूर्व्वकविधेरनित्यत्वाद्गुणाभावः ॥ ९ ॥

भास्वदिति । हे भैमि भास्वतो वंशस्तस्य करीरतां तदङ्कुरत्वं दधानः सूर्य्यवंशोत्पन्नो वयःसन्धौ वर्त्तमानः अथ च मुक्तायुक्तत्वाद्भास्वान्यो वंशो वेणुस्तदङ्कुरत्वं दधदतितेजस्वी अयमृतुपर्णनामा वीरः कथं केन प्रकारेण कथ्यतां वर्ण्यतां अपि तु वर्णयितुं न शक्यत इत्यर्थः । हि यस्मात् समरे वर्त्तमानस्यास्य अध्युष्टापि सार्द्धत्रयीति प्रसिद्धापि कोटिः सार्द्धत्रिकोटीनि मानुषशरीरे स्थितानि रोमाणि सत्त्वस्यान्तर्वीररसोत्सेकस्याङ्कुरा इवाङ्कुराः वीररसोत्साहेन सङ्ग्रामे रोमाञ्चयुक्तोऽयं भवतीत्यर्थः । तथा अस्य नामवर्णावलीमन्त्रः ऋतुपर्ण इति नामा-

---

* क्षितिभृतामिति टीकासम्मतः पाठान्तरः ।

तादृग्दीर्घविरिञ्चिवासरविधौ जानामि यत्कर्त्तृतां
शङ्के यत्प्रतिबिम्बमम्बुधिपयःपूरोदरे वाडवः।

चरपङ्क्तिरूपो मन्त्रः संयति बन्दिभिः श्रुतिपथं कर्णपथं नीतः प्रापितः सन् प्रतिक्षितिभृतां रिपूणां दोषो बाहव एव स्तम्भास्त एव क्रौर्य्यादिदोषाश्च ये कुम्भीनसाः सर्पास्तान् स्तम्भयति। एतन्नाममात्राकर्णनाद्भीतानां शत्रूणां बाहवो युद्धाय न प्रसरन्तीत्यर्थः। सिद्धवैदिकमन्त्रश्रवणाच्च फणिनां स्तम्भो भवति। अर्ब्बुदेति सार्द्धकोटित्रयस्य सङ्ख्या। अङ्कुरो नित्यपुंलिंगः। कुम्भीनसो लेलिहान इत्यमरः॥ १०॥

तादृगिति। हे भैमि अस्य राज्ञः स प्रताप एव तपनः सूर्य्यः कासाञ्चिरां पारं परतीरं न गाहते। कस्यापि वर्णयितुमशक्य इत्यर्थः। स कः। अहं तादृग्दीर्घं चतुर्द्दशमन्वन्तरपरिमितत्वान्महापरिमाणं विरिञ्चिवासरं ब्रह्मदिनं तस्य विधौ करणे यस्य यदीयक्षात्रतेजोरूपस्य सूर्य्यस्य कर्त्तृतां निर्म्मातृतां जानामि। सूर्य्यस्य दिवसकर्त्तृत्वाद् ब्राह्ममपि दिनं दिनत्वात् सूर्य्येण कर्त्तव्यं तच्चतुर्य्युगसहस्रपरिमाणत्वादेतद्दिननिर्म्मात्रा सूर्य्येण निर्म्मातुमशक्यमिति तद्विलक्षणेन चिरकालावस्थायिनाऽतिदीर्घेणैतदीयप्रतापतपनेनैव निर्म्मातुं शक्यं न त्वन्येनेत्यहमुत्प्रेक्ष इत्यर्थः। तथा अहं अम्बुधिपयसः पूरे प्रवाहमध्ये वाडवो वडवानलः यस्यैतदीयप्रतापतपनस्य प्रतिबिम्बरूप इति शङ्के। जलानलयोः सहावस्थानविरोधात् वाडवोऽग्निर्न भवति किन्तु प्रतापसूर्य्यस्य सलिले प्रतिबिम्बं भवति। किम्भूतः सः। व्योम-

व्योमव्यापिविपक्षराजकयशस्तारा: पराभावुक:
कासामस्य न स प्रतापतपनः पारङ्गिरां गाहते ॥ ११ ॥
द्वेष्याकीर्त्तिकलिन्दशैलसुतया नद्याऽस्य यद्दोर्द्वयी-
कीर्त्तिश्रेणिमयी समागममगाद्गङ्गा रणप्राङ्गणे ।
तत्तस्मिन्विनिमज्य बाहुजभटैरारम्भि रम्भापरी-
रम्भानन्दनिकेतनन्दनवनक्रीडादराडम्बरः ॥ १२ ॥

व्यापिन्यो विपक्षराजकस्य रिपुराजकस्योज्ज्वलायशांस्येव ताराः नक्षत्राणि स्वप्रभावेण पराभावुकः तिरस्कर्त्ता । सूर्य्येणापि व्योमव्यापिवैरिचन्द्रस्य चन्द्रिकारूपं यशो नक्षत्राणि च पराभूयन्ते । एतत्प्रतापसूर्य्यस्य पुरस्ताद्वैरियशांसि न प्रसरन्तीत्यर्थः । पराभावुकः । लषपतपदस्थाभूवृषेत्युकञ् । ३ । २ । १५४ ॥ तद्योगे न लोकेति षष्ठीनिषेधात् (पा० २ । ३ । ६९ ।) तारा इति द्वितीया ॥ ११ ॥

द्वेष्येति । अस्य राज्ञः दोर्द्वयी बाहुद्वयं तया जनिता कीर्त्तिश्रेणिः कीर्त्तिपरम्परा तन्मयी तद्रूपा श्वेतत्वाद्गङ्गा द्वेष्याणां रिपूणां पलायनाज्जनिताऽकीर्त्तिः सैव कलिन्दशैलसुता यमुना तया नद्या सह यद्यस्मात् रणप्राङ्गणे सङ्ग्रामभूमौ समागममगात् संयोगं प्राप तत्तस्मात् कारणात् तस्मिन् प्रयागसञ्ज्ञके गङ्गायमुनासङ्गमे बाहुजभटैः क्षत्रिययोधैः शूरतरैः विशेषेण निमज्य लक्षणया देहं त्यक्त्वा रम्भापरीरम्भानन्दस्य निकेते नन्दनवने देवोद्याने क्रीडायां यः आदर आसक्तिस्तस्याडम्बरो बाहुल्यं आरम्भि आरब्धं । योऽपि प्रयागे

इति श्रुतिस्वादितत‌द्गुणस्तुतिः*
सरस्वतीवाङ्मयविस्मयोत्थया ।
शिरःशिरःकम्पनयैव भीमजा
न तं मनोरन्वयमन्वमन्यत ॥ १३ ॥
युवान्तरं सा वचसामधीश्वरा
स्वरामृतन्यक्कृतमत्तकोकिला ।

निमज्जति सोऽपि सितासिते सरिते इत्यादि श्रुत्या* नन्दनवने रम्भाद्यप्सरोभिः सह क्रीडति । साङ्गजः पश्चिमो विराडित्यमरः । आरम्भि । रभेरशब्लिटोरिति नुम् (पा० ७।१।६३।) परीरम्भेति । उपसर्गस्य घञीति (पा० ६।३।१२२) दीर्घः ॥ १२ ॥

इतीति । भीमजा शिरसश्शिरःकम्पनयैव वक्रचालनयैव कृत्वा तं मनोरन्वयं सूर्य्यपुत्रं मनुवंशसमुत्पन्नम्तुपर्णं नान्वमन्यत नाङ्गीचकार । किम्भूता । इति पूर्व्वोक्तप्रकारेण श्रुतिभ्यां कर्णाभ्यां स्वादिता सादरमाकर्णिता तद्गुणस्तुतिर्यया । किम्भूतया । सरस्वत्या वाङ्मयेन जनिता विस्मय आश्चर्य्यं तस्मादुत्थयोत्पन्नया । शिरःकम्पनस्योभयस्वरूपकत्वादाश्चर्य्याभिनयकृतः कम्पस्तन्निराकरणार्थो जात इत्यर्थः । अस्य मनुवंशत्वात्तस्य सोमवंशे साभिलाषत्वात् कन्याभिलषितसौन्दर्य्याद्यवर्णनादाऽननुरागः ॥१३॥

युवेति । सा वचसामधीश्वरा सरस्वती निशाकरस्य शालिः

* सितासिते सरिते यत्र सङ्गते तत्राप्लुतासो दिवमुत्पतन्ति ।
ये वै तन्वं विसृजन्ति धीरास्ते जनासो अमृतत्वं भजन्ते ॥
इति काचिदृक् ॥

* गुणश्रुतिरिति पाठान्तरः । सं० मू० पू० ।

शशंस संसक्तकरैव तद्दिशा
निशाकरश्यातिमुखीमिमां प्रति ॥ १४ ॥
न पाण्ड्यभूमण्डनमेणलोचने
विलोचनेनापि नृपं पिपासति ।
शशिप्रकाशाननमेनमीक्षितुं
तरङ्गयाऽपाङ्गदिशा दृशस्त्विषः ॥ १५ ॥

सदृशं मुखं यस्यास्तां चन्द्राननामिमां प्रति युवान्तरं अन्यं वरं शशंस वर्णयामास । किम्भूता । स्वराम्टतेन न्यक्कृतस्तिरस्कृतः मत्तो वसन्तहृष्टः कोकिलो यया । तथा हि तद्दिशा यस्यां दिशि वर्णनीयो युवा तिष्ठति तद्दिशा तदीयया दिशाऽऽभिमुख्येन संसक्तकरैव सम्बद्धहस्ता हस्तेन तं निर्द्दिश्येति यावत् । सरस्वतीं वाणीं माधुर्य्येणैवाशठेणोन्नतु राजन्यनुरागेणेति स्वराम्टतपदेन सूचितं । ईश्वरेति । स्थेशेति वरच् (पा० ३ । २ । १७५ ।) अथ प्राणेश्वरीत्यादेः कथं साधुत्वं । अन्येभ्योऽपि दृश्यन्त इति (पा॰ ३ । २ । ७५ ।) ईशेर्वनिपि ङीब्रयोः सतोरित्यवेहि ॥ १४ ॥

नेति । हे एणलोचने म्टगाक्षि त्वं पाण्ड्यभूमण्डनं नेत्राभ्यां न पिपाससि परमेकेनापि न पाण्ड्यदेशस्य चूडामणिं मुकुटरत्नभूतं नृपं पिपाससि न न पश्यसि तावत् पातुमिच्छस्यपि नेत्यपेरर्थः । अनुचितमेतदित्यर्थः । अधरेण तावन्न पिपाससि परं विलोचनेनापि न पिपाससीति द्वाभ्यां नेत्राभ्यां न पिपाससि परमेकेनापि न पिपाससीति वा । तस्मात् त्वं शशिवत् प्रकाशं प्रसन्नं आननं यस्य तमेनं नृपं ईक्षितुं दृशस्त्विषः नेत्ररश्मीन्

भुवि भ्रमित्वाऽनवलम्बमम्बरे
विहर्त्तुमभ्यासपरम्परापरा।
अहो महावंशममुं समाश्रिता
सकौतुकं नृत्यति कीर्त्तिनर्त्तकी॥ १६॥
इतो भिया भूपतिभिर्वनं वना-

अपाङ्गदिशा नेत्रप्रान्तदेशेन तरङ्गय अतिसुन्दरमेनं कटाक्षै-र्विलोकयेति भावः॥ १५॥

भुवीति। हे भैमि महावंशं महाकुलीनं अमुं समाश्रिता एतदीयेति यावत् एवंविधा कीर्त्तिरूपा नर्त्तकी सकौतुकं यथा तथा धनाभिलाषराहित्येन नृत्यति अहो आश्चर्यं लोकगतं कौतुकं नर्त्तकीगतमिति न पौनरुक्तं। किम्भूता। पूर्व्वं भुवि भ्रमित्वा सकलं भूमण्डलं व्याप्येत्यर्थः। पश्चादनवलम्बं यथा तथाम्बरे गगने विहर्त्तुं चरणाभ्यासपरम्परायां परा आसक्ताऽभ्यासपरम्परया चापरोत्कृष्टा एतदीया कीर्त्तिर्भूलोकं पूर्व्वमभिव्याप्य लोकान्तरं व्याप्नोतीत्यर्थः। सेनाद्यनवलम्बनेन महोत्साहवन्तममुमिति वा। नर्त्तक्यपि पूर्व्वं भूमौ भ्रमित्वा निराश्रयं गगने नर्तितुं अभ्यासपरा सती महान्तं वेणुमाश्रित्य वेणोरुपरि सकौतुकं नृत्यति। अथच महान्तं पृष्ठवंशं आश्रिता नर्त्तकीति वा। या हि झटिति भूमावपि गन्तुं न शक्नोति सा निरालम्बं महान्तं वेणुमाश्रित्य नृत्यतीत्यतीव चित्रं इत्यादि ज्ञातव्यं। वंशो वेणौ कुले वर्गे पृष्ठस्यावयवेऽपि चेति विश्वः॥ १६॥

इत इति। इत अस्माद्राज्ञः सकाशात् भिया भयेन वनाद्

द्रटद्भिरुच्चैरटवीत्वमीयुषी।
निजापि साऽवापि चिरात्पुनः पुरी
पुनः स्वमध्यासि विलासमन्दिरं॥ १७॥
आसीदासीमभूमीवलयमलयजालेपनेपथ्यकीर्त्तिः
सप्ताकूपारपारीसदनजनघनोद्गीतचापप्रतापः।

भ्रान्त्वा रमटद्भिर्गच्छद्भिर्भूपतिभिरुच्चैरतिशयेनाटवीत्वमरण्यानी-त्वमीयुषी प्राप्ता सा प्रसिद्धा निजा स्वीयापि पुरी चिराद्वनान्त-रभ्रमात् पुनरवापि प्राप्तं। तथा तत्र पुर्य्यां स्वं स्वीयं विलास-मन्दिरं रतिगृहं पुनरप्यध्यास्यधिष्ठितं वनबुद्ध्यैवेत्यर्थः। राज्य-भ्रंशदशापेक्षया ऽनेकवारं तत्रागत्य पुनरन्यत्र गत्वा पुनस्तत्राग-च्छन्तीत्यर्थः। अनेन वैरिनगराण्युद्वासितानीति भावः। उपे-यिवानित्यत्र सूत्रे (पा० ३। २। १०९।) उपसर्गस्यातन्त्रत्वादी-युषीत्यत्र क्वसुः॥ १७॥

आसीदिति। हे भैमि अस्माद्वीरात्पर उत्कृष्टोऽन्यो वा क आसीद्भवेद्वा अपि तु एवंविधोऽयमेव नलान्यः कश्चिदित्यर्थः। किम्भूतः। सीमां समुद्रलक्षणां आ अभिव्याप्य सीमामभिव्याप्य भूमीवलयं तस्य मलयजालेपनं चन्दनाङ्गरागस्वरूपं नेपथ्यं भूषणं तदेव कीर्त्तिर्यस्य कीर्त्तिचन्दनधवलितसमुद्रमुद्रितभूमण्डलः। तथा सप्तानां अकूपारपारीणां समुद्रपरतीराणां समाहारः सप्ताकूपारपारी सैव सदनं निवासस्थानं यस्य सप्तसमुद्रपर-तीरवासी यो जनो लोकस्तेन घनमविच्छिन्नं उद्गीत उच्चैर्गीय-मानश्चापप्रतापो यस्य चापस्य प्रतापस्य वा यस्य सः। तथा

वीरादस्मात्परः कः पदयुगयुगपत्पातिभूपातिभूय-
श्चूडारत्नोडुपत्नीकरपरिचरणामन्दनन्दन्नखेन्दुः ॥१८॥
भङ्गाकीर्त्तिमषीमलीमसतमप्रत्यर्थिसेनाभट-
श्रेणीतिन्दुककाननेषु विलसत्यस्य प्रतापानलः।

पदयुगे चरणयुगले युगपत्समकालमेव पातिनः पतनशीला नमस्कारकारिणो भूपास्तेषामतिभूयांसि अतिबहूनि यानि चूडारत्नानि तान्येव वर्त्तुलत्वादुज्ज्वलत्वादुडुपत्न्यो नक्षत्ररूपा-स्तन्द्रस्त्रियः तासां कराणां किरणानां परिचरणं सर्व्वतः सञ्चरणं तेन अथ च तासां हस्तैर्यत्परिचरणं चरणसेवा तया हेतुनाऽमन्दं नन्दन्तोऽतितरां समृद्धकान्तयो नखा एवेन्द्रवश्चन्द्रा यस्य चरणपतितसकलराजशिरोमणिकिरणसंवर्द्धितनखकान्तिः। यशस्वी प्रतापवान् अत एव सर्व्वनृपतिवन्द्यचरणः एतादृशः कोऽपि नास्ति तस्मादेनं वृणीष्वेति भावः। अन्यो ऽपि पत्नीकरकृतचरणसंवाहनेन नन्दति ॥ १८ ॥

भङ्गेति। अस्य प्रतापानलः भङ्गेन पराजयेन जनिताऽकीर्त्तिः सैव श्यामलत्वान्मषी तया मलीमसतमा अतितरां मलिनीभूताः प्रत्यर्थिसेनाभटाः शत्रुसैनिकशूराः तेषां श्रेणी समूहः सैव श्यामलात्तिन्दुककाननानि तेषु विलसति विशेषेण दीप्यते। तस्मादेतदीयात्प्रतापानलादुत्पतिता उत्थिता भालाल्ललाटादुद्भूतं भवाक्षि हरतृतीयनेत्रं भानुः सूर्य्यः हुतभुग्वह्निः जम्भारेरिन्द्रस्य दृश्योऽलिर्व्वज्रः एते स्फुलिङ्गाः स्फुटं अग्निकणा इव जगदुत्सङ्गे जगतां भूम्यादीनां मध्ये स्फुरन्ति शोभन्ते।

तस्मादुत्पतिताः स्फुरन्ति जगदुत्सङ्गे स्फुलिङ्गाः स्फुटं
भालोद्भूतभवाक्षिभानुकृतभुग्जम्भारिदम्भोलयः ॥ १९ ॥
एतद्दन्तिबलैर्विलोक्य निखिलामालिङ्गिताङ्गीं भुवं
सङ्ग्रामाङ्गणसीम्नि जङ्गमगिरिस्तोमभ्रमाधायिभिः ।
पृथ्वीन्द्रः पृथुरेतदुग्रसमरप्रेक्षोपनम्रामर-
श्रेणीमध्यचरः पुनः क्षितिधरक्षेपाय धत्ते धियं ॥ २० ॥

तिन्दुकवनानि हि श्यामानि भवन्ति तत्र पतितोऽग्निः चटच-टाशब्दं कुर्व्वन् स्फुलिङ्गान् मुञ्चति। महत्स्वपि हरनेत्रादिषु स्फुलिङ्गत्वारोपेण प्रतापानलस्यातितरां माहात्म्यं सूचितं। यस्य कणा एवम्भूताः स कथम्भूतो भवतीति ॥ १९ ॥

एतदिति। हे भैमि एतस्य पाण्ड्यस्य उग्रसमरस्य प्रेक्षायै उपनम्रा समागताऽमरश्रेणी देवसङ्घः तन्मध्यचरः तस्य मध्ये विद्यमानो देवत्वं प्राप्त इति यावत् एवम्भूतः पृथुर्वैण्यः पृथ्वीन्द्रः पुनः क्षितिधराणां पर्व्वतानां क्षेपाय प्रोत्सारणाय धियं बुद्धिं धत्ते। किं कृत्वा सङ्ग्रामाङ्गणस्य सीम्नि मर्य्यादायां जङ्गमानां स्थानात् स्थानान्तरं गच्छतां गिरीणां स्तोमस्य भ्रमाधायिभिः भ्रान्तिं कुर्व्वाणैः चलदुच्चतरगिरितुल्यैः एतस्य दन्तिबलैः नि-खिलां भुवं आलिङ्गिताङ्गीं व्याप्तदेशां विलोक्य। पूर्व्वं पृथुना स्वधनुःकोट्या जङ्गमपर्व्वतानुत्सार्य्य क्षेत्रादिविभागः कृतः। एतद्गजान् दृष्ट्वा सङ्ग्रामदर्शनार्थमागतेन पृथुना एते पर्व्वता इति बुद्ध्या एतदुत्सारणे पुनरपि बुद्धिः कृतेत्यर्थः। उच्चतरग-जबाहुल्यं दारुणरणरसिकत्वञ्च सूचितं ॥ २० ॥

शशंस दासीङ्गितविद्विदर्भजा-
मितो ननु स्वामिनि पश्य कौतुकं।
यदेष सौधाग्रनटे पटाञ्चले
चलेऽपि काकस्य पदार्पणाग्रहः॥ २१॥
ततस्तदप्रस्तुतभाषितोत्थितैः
सदस्तदश्वेति हसैः सदःसदां।

शशंसेति। इङ्गितवित् भैम्यभिप्रायज्ञा काचिद्दासी विद-
र्भजां शशंस बभाषे। ननु हे स्वामिनि इतोऽस्यां दिशि त्वं कौतुकं
पश्य। किं तत्। सौधः सुधाधवलितगृहं तस्याग्रमूर्द्धदेशस्तत्र
वर्त्तमाने नटे चलत्वान्नर्त्तकतुल्ये वायुवशाच्चलेऽपि पटाञ्चले
पताकावसनाञ्चले यत् एष काकस्य पदार्पणे चरणस्थापने आ-
ग्रहः तत्रोपवेशनार्थं पौनःपुन्येन प्रवृत्तिर्निर्बन्धः तत्कौतुकं
पश्येति सम्बन्धः। अननुरक्तायां भैम्यां शृङ्गारचेष्टां भावयतः
पाण्ड्यस्यायं यथा पटाञ्चले उपवेशनार्थं काकस्याग्रहोऽनुचित-
स्तथा। एतस्य पाण्ड्यस्यायं भैम्यां दुरभिनिवेश इति सूचनार्थं
सरस्वतीकृततद्दर्शननिवारणार्थं वा इयमुक्तिः। इतः एतद्दर्श-
नकौतुकात् सकाशादिति वा॥ २१॥

तत इति। ततः तस्या दास्याः पूर्व्वोक्तमप्रस्तुतं भाषितं
वचनं तस्मादुत्थितैः सदःसदां सभ्यानां हसैः हास्यैः तत्सदः सा
सभा श्वेति श्वेतीकृतं। तद्वचनं श्रुत्वा सभ्या हसन्ति स्मेत्यर्थः।
अतः सदःश्वेतीकरणाद्धेतोरस्य भूपतेर्ग्लानिः लज्जा वैवर्ण्यं

स्फुटाऽजनि म्लानिरतोऽस्य भूपतेः
सिते हि जायेत शितेः सुलक्षता ॥ २२ ॥
ततोऽनु देव्या जगदे महेन्द्रभू-
पुरन्दरं सा जगदेकवन्द्यया।
तदार्जवावर्जिततर्जनीकया
जनी कयाचित्परचित्स्वरूपया ॥ २३ ॥

स्फुटा अजनि। अत्रार्थान्तरन्यासमाह। हि यस्मात् सिते शुभ्र-वस्तुनि शितेः कृष्णवर्णस्य सुलक्षता प्रकटता जायेत। सभ्यहा-स्यवशात् सोऽधिकविवर्णो जात इत्यर्थः। सः स्वत एव श्यामः सभ्यहास्यवशादधिकः श्यामो जात इति वार्थः। अस्येति। श्यितिङ् शौक्ल्ये इत्यस्मात् ण्यन्तात्कर्म्मणि लुङात्मनेपदं ॥ २२ ॥

तत इति। ततः कयाचिल्लोकोत्तरया अनिरूपितरूपया देव्या वाण्या महेन्द्रभुवः महेन्द्रनामकपर्व्वतसम्बन्धिनो देशस्य पुरन्दरं स्वामिनं अनु लक्षीकृत्य सा जनी स्वयम्वरा जगदे उक्ता। किम्भूतया जगतः एका देवतान्तरपरित्यागेन वन्द्यया। यतः परा श्रेष्ठा चिज्ज्ञानलक्षणं स्वरूपं यस्यास्तया। तथा तस्या भैम्या यदार्जवं ऋजुता तेनावर्जिता वर्णनार्थमूर्द्धीकृता तर्जनी यया। तस्मिन् वर्णनीये नृपे विषये वा देव्या एव वा यदार्जवं कृपा तया। जगदे कर्म्मणि तङ्। वाचंयमपुरन्दरौ चेति निपातनात् पुरन्दरः साधुः। तर्जनीकयेति नद्यृतश्चेति कप्। (पा॰ ५।४।१५३) अनुर्लक्षणे (१।४।८४) कर्म्मप्रवचनीय-त्वात् पुरन्दरमिति द्वितीया॥ २३ ॥

स्वयम्बरोद्वाहमहे वृणीष्व हे
महेन्द्रशैलस्य महेन्द्रमागतं ।
कलिङ्गजानां स्वकुचद्वयश्रिया
कलिङ्गजानां शृणु तत्र कुम्भयोः ॥ २४ ॥
अयं किलायात इतीरिपौरवाग्-
भयादयादस्य रिपुर्वृथा वनं ।

स्वयमिति । हे भैमि स्वयम्बर उद्वाहसम्पन्ने महे उत्सवे आगतं महेन्द्रशैलस्य महेन्द्रं स्वामिनं वृणीष्व । तत्र पर्व्वतोपलक्षिते देशे कलिङ्गदेशे जातानां गजानां कुम्भयोः स्वकुचद्वयश्रिया सह कलिं समानशोभाख्यद्रव्याभिलाषनिमित्तं कलहं शृणु । हस्तिकुम्भास्त्वत्कुचसाम्यमभिलषिष्यन्ति परं न प्राप्स्यन्तीति भावः । स्वयम्बरोद्वाह एव महः उत्सवो यस्यास्तत्सम्बुद्धिरिति वा ॥ २४ ॥

अयमिति । अयं कलिङ्गदेशाधिप आयातः किल श्रूयत इति ईरयन्तीति ईरिणः पौरास्तेषां वाक् तस्याः सकाशाद्भयं तस्माद्धेतोः अस्य रिपुर्यद्वनं अयात् पलाय्य गतवान् तद्वृथा । रिपुरिति जात्येकवचनं । वैयर्थ्ये हेतुमाह । तान्येव अयं समायात इत्येवंरूपाण्यक्षराणि यासु ताः अताः शुकैरेवाकर्षिताः तस्मैतदीयरिपोरुत्लापगिरः अतिशयितनिद्राप्रलापवाचः एकस्याप्यक्षरस्य व्यत्यासं विना पठद्भिः शुकैर्व्वनेऽपि स रिपुस्त्रासितः । पलाय्य वने गतानामपि रिपूणां उत्लापप्रलापि-

श्रुतास्तदुक्त्वापगिरस्तदध्वरा: *
पठद्भिरत्रासि शुकैर्वनेऽपि सः ॥ २५ ॥
इतस्त्रसद्विद्रुतभूभृदुज्झिता
प्रियाऽथ दृष्टा वनमानवीजनैः ।
शशंस पृष्टाद्भुतमात्मदेशजं
शशित्विषः शीतलशीलतां किल ॥ २६ ॥

तास्ता गिरो बहुशः पठद्भिः शुकैर्वनेऽपि त्रासिता वैरिणः स्थातुं न शक्नुवन्तीत्यर्थः । अतिशूरोऽयमिति भावः ॥ २५ ॥

इत इति । इत अस्माद्राज्ञः सकाशात्त्रसन्तो भीता अत एव विद्रुताः पलायिता भूभृतो राजानः तैरुज्झिता परित्यक्ता प्रिया स्वस्वप्राणेश्वरी वनमानवीजनैर्भिल्लिजनैर्दृष्टा। अथ पश्चात् आत्मदेशजं भवत्या देशे किमपूर्व्वमिति अद्भुतं पृष्टा सती शशित्विषश्चन्द्रस्य शीतलशीलतां किल प्रसिद्धौ हिमस्वभावत्वमेव स्वदेशजातमाश्चर्य्यं शशंस अकथयत्। स्वदेशे वियोगाभावाच्चन्द्रकराणां शीतलत्वं वने च वियोगादुष्णत्वमित्यर्थः । प्रियेति जात्येकवचनं। भर्तृत्यक्ता वियोगज्वरभराक्रान्ता सती वने चन्द्रकान्तिमुष्णामनुभवतीत्यर्थः ॥ २६ ॥

---

* पधीत्य युद्धान्तर एव तां गिरमिति पाठान्तरः। परन्तु एष न टीकासम्मतः ।

इतोऽपि किं वीरयसे न कुर्व्वतो
नृपान्धनुर्ब्बाणगुणैर्व्वशंवदान् ।
गुणेन शुद्धेन विधाय निर्भरं
तमेनमुर्व्वीवलयोर्व्वशी वशं ॥ २७ ॥
एतद्भीतारिनारी गिरिबिलविगलद्वासरा निःसरन्ती
स्वक्रीडाहंसमोहग्रहिलशिशुमृगप्रार्थितोन्निद्रचन्द्रा ।

इत इति । हे भैमि त्वं इतोऽपि राज्ञः सकाशात् किमिति न वीरयसे शूरा भवसि अपि तु तस्मादपि शूरा भव । किं वीरा न भवस्यपितु वीरा भवस्येवेति वा । किं भूतादितः । नृपान् शत्रून् धनुश्च बाणाश्च गुणश्च चापशरमौर्व्वीरूपैर्व्बहुभिरुपकरणैः कृत्वा वशंवदान् वश्यान् कुर्व्वतः । किम्भूता त्वं । उर्व्वीवलये उर्व्वशीरूपाऽतिसुन्दरी । किं कृत्वा । तमेनं बहुभिर्धनुरादिभिरुपकरणैर्व्विद्विषां जैत्रं शुद्धेन केवलेन चापादिलेशसंस्पर्शरहितेन सौन्दर्य्यादिना गुणेन मौर्व्या च कृत्वा निर्भरमतितरां आयासरहितं वा यथा तथा वशं विधाय । बहुसाधनैः पराजयतोऽस्यैकेनैव साधनेन जयकरणादित्यर्थः मौर्व्वीमात्रेण जयादाश्चर्य्यञ्च । अयं सर्व्वेभ्योऽपि वीरः अस्मादपि त्वमित्यपेरर्थः । वीरयसे । शूरवीरविक्रान्ताविति चुरादिः ॥ २७ ॥

एतदिति । एतस्माद्भीतानामरीणां नारी एतद्भीतारिनारी गिरिबिले पर्व्वतकन्दरायां विगलद्वासराऽतिवाहितदिवसा । तथा रात्रौ निःसरन्ती बिलाद्बहिर्निर्गच्छन्ती । तथा

आक्रन्दद्भूरि यत्तन्नयनजलमिलच्चन्द्रहंसानुबिम्ब-
प्रत्यासत्तिप्रहृष्यत्तनयविहसितैराश्वसीन्न्यश्वसीच्च ॥ २८॥
अस्मिन्दिग्विजयोद्यते पतिरयं मे स्तादिति ध्यायतो
कम्पं सात्त्विकभावमञ्चति रिपुक्षोणीन्द्रदारा धरा।

तदनन्तरं स्वः स्वकीयो मदीयः क्रीडाहंस एवायमिति मोहो भ्रान्तिस्तया ग्रहिलः मदीयमेनं हंसं देहीति आग्रहवान् शिशुस्तेन भृशं प्रार्थिता याचित उन्निद्रश्चन्द्रो यामेवंभूता सती चन्द्रदाने सामर्थ्याभावात् तदाग्रहशान्त्यभावात् दुःखवशाद्यस्माद्भूरि बहु आक्रन्दत् रुरोद तस्माद्धेतोर्बहुतरे नयनजले मिलन् प्रतिबिम्बरूपेण सङ्क्रममाणो यश्चन्द्ररूपो हंसस्तस्य योऽनुबिम्बः मिलन् यश्चन्द्रहंसस्यानुबिम्बो वा तस्य प्रत्यासत्त्या सामीप्येन मदीयः क्रीडाहंसोऽयमागत इति बुद्ध्या प्रहृष्यतो मोदमानस्य तनयस्य विहसितैर्हासैः कृत्वा तदाग्रहशान्तेराश्वसीत् आश्वासं प्राप। परित्यक्तस्वीयसम्पत्स्मरणात् कनकहंसे वृथैव भ्रान्तोऽसीत्यादि मनसि कृत्वा न्यश्वसीच्च शोकनिःश्वासं चामुञ्चत्। आश्वसीत्। लङि रुदश्च पञ्चभ्य इत्यपृक्तसार्व्वधातुकस्येडागमः। लुङि वा ह्यन्तक्षणेति वृद्धिनिषेधे रूपं। न्यश्वसीत्। लङि अड्गार्ग्यगालवयोरित्यपृक्तसार्व्वधातुकस्याडागमः (पा॰ ७। २।९९) ॥ २८॥

अस्मिन्निति। हे भैमि अस्मिन् राज्ञि दिग्विजयायोद्यते सति रिपवश्च ते क्षोणीन्द्रा राजानस्तेषां दाराः प्रिया वशवर्त्तिनी धरा पृथ्वी अयं राजा मे पतिः स्वामी स्याद्भूयादिति ध्यायती

अस्यैवाभिमुखं निपत्य समरे यास्यद्भिरूर्द्धं निजः
पन्था भास्वति दृश्यते बिलमयः प्रत्यर्थिभिः पार्थिवैः॥ २९ ॥
विद्राणे रणचत्वरादरिगणे त्रस्ते समस्ते पुनः
कोपात्कोऽपि निवर्त्तते यदि भटः कीर्त्त्या जगत्युद्भटः।
आगच्छन्नपि सम्मुखं विमुखतामेवाधिगच्छत्यसौ
द्रागेतच्छुरिकारयेण ठणिति छिन्नापसर्पच्छिराः॥ ३०॥

चिन्तयन्ती सती सात्त्विकेषु मध्ये कम्पलक्षणं सात्त्विकभावं अभ्युति गच्छति। अन्यस्वामिसूचकं भूकम्पलक्षणं भौममुत्पातं प्राप्नोतीत्यर्थः। एवमन्याप्येवं ध्यायती सात्त्विकं भावं प्राप्नोति। तथा समरे अस्यैवाभिमुखं शस्त्राघातैर्निपत्य ऊर्द्धं ऊर्द्धदेशमथवोत्तमं स्वर्गलोकं यास्यद्भिः गमिष्यद्भिः प्रत्यर्थिभिः पार्थिवैः भास्वति सूर्य्यमण्डलमध्ये निजः स्वीयो बिलमयः पन्था दृश्यते। द्वाविमौ पुरुषौ लोके सूर्य्यमण्डलभेदिनौ परिव्राड् योगयुक्तश्च रणे चाभिमुखो हत इति वचनात्। अथ च सूर्य्ये बिलरूपो ह्युत्पातोऽपि म्रियमाणैर्दृश्यते। अतिशूरोऽयमिति भावः॥ २९॥

विद्राण इति। त्रस्ते भीतेऽत एव रणचत्वरात् रणाङ्गणात् विद्राणे पलायिते समस्तेऽरिगणे मध्ये कोऽपि भटः शूरः कोपाद्यदि पुनर्निवर्त्तते। यतो जगति कीर्त्त्या यशसा उद्भटः ख्यातः असौ भटः अस्य सम्मुखमागच्छन्नपि विमुखतामेव विगतमुखत्वं प्राप्नोति अधिगच्छति। अथ च सम्मुखमागच्छन्नपि पराङ्मुखो जात इति विरोधाभासः। यतः। द्राक् शीघ्रं

ततस्तदुर्व्वीन्द्रगुणाद्भुतादिव
स्ववक्त्रपद्मेऽङ्गुलिनालदायिनी।
विधीयतामाननमुद्रयेति सा
जगाद वैदग्ध्यमयेङ्गितैव तां ॥ ३१ ॥
अनन्तरं तामवदन्नृपान्तरं
तदध्वदृक्तारतरङ्गरिङ्गणा।

एतस्य छुरिकारयेण ठणिति यथा तथा खण्डितमपसर्पदधः पतत् शिरो यस्य सः। ठणिति लोहकण्ठास्थिसङ्घट्टजशब्दानुकरणं। अतिशूरोऽयमिति भावः ॥ ३० ॥

तत इति। ततः सा भैमी तां वाणीं प्रतिवचनमन्तरेणैव इति जगाद। इति किं। आननमुद्रया मौनं विधीयतामिति। किम्भूता। तस्य उर्व्वीन्द्रस्य गुणाकर्णनसमुत्पन्नादद्भुतादाश्चर्य्यादिव स्ववक्त्रपद्मे अङ्गुलिरूपं नालं तस्य दायिनी अत एव वैदग्ध्यमयं एतच्चातुर्य्यबहुलं इङ्गितं चेष्टितं यस्याः सा। वचननिषेधार्थं आश्चर्य्याभिनयार्थञ्च मुखेऽङ्गुलिर्दीयते। वर्णननिषेधार्थं दत्ताङ्गुलिस्तद्गुणाद्भुतादिवेति लोकैरुत्प्रेक्षितमित्यर्थः। पद्मे च नालं भवति ॥ ३१ ॥

अनन्तरमिति। अनन्तरं तद्वर्णननिषेधानन्तरं सरस्वती नृपान्तरं तां भैमीं प्रत्यवदत्। किम्भूता तस्य वर्णनीयनृपान्तरस्याध्वनि तद्दिशि दृशस्ताराणामतिविशालानां तरङ्गाणां दृग्व्यापाराणां रिङ्गणं गतिर्यस्याः। दृग्व्यापारदर्शितवर्णनीय-

तृणीभवत्पुष्पशरं सरस्वती
स्वतीव्रतेजःपरिभूतभूतलं ॥ ३२ ॥
तदेव किन्नु क्रियते न का क्षति-
र्यदेष तद्दूतमुखेन काङ्क्षति ।
प्रसीद काञ्चीमयमाच्छिनत्तु ते
प्रसह्य काञ्चीपुरभूपुरन्दरः ॥ ३३ ॥
मयि स्थितिर्नम्रतयैव लभ्यते
दिगेव तु स्तब्धतया विलङ्घ्यते ।

नृपान्तरा । किम्भूतं नृपान्तरं । तृणीभवत् क्षीणीभवत्पुष्पशरः कामो यस्मात् तं । तथा स्वतीव्रतेजसा परिभूतं वशीकृतं भूतलं भूमण्डलं येन तं । तरङ्गितेत्यर्णेति च पाठः ॥ ३२ ॥

तदिति । नु भैमि एष काञ्चीपुरस्य सम्बन्धिन्या भुवः पुरन्दरः तस्य त्वां प्रति प्रहितस्य दूतस्य मुखेन सन्देशवचनेन कृत्वा यत्त्वदीयवरणादि काङ्क्षति तदेव किं न क्रियते अपि तु तदेव क्रियतां । एतदुक्तं कुर्व्वन्त्यास्तव का क्षतिः का हानिरपि तु न कापि । अस्मिन् प्रसीद । अयं नवरते लज्जया अमन्यमानाया अपि ते काञ्चीं मेखलाबन्धं प्रसह्य हठात् आच्छिनत्तु शिथिलयतु । अधीरतया ग्रन्थेरुन्मोचनमसहमानस्त्रोटयतु वा । एवं वृणीष्वेति भावः ॥ ३३ ॥

मयीति । चापं दधत् आशुगं वैरिषु क्षिपन्नयं राजा इति पूर्व्वोक्तं द्विषां नयं नीतिं सम्यग् उपादिशदिव । इति किं । हे

इतीव चापं दधदाशुगं क्षिप-
न्नयं नयं सम्यगुपादिशद् द्विषां ॥ ३४ ॥
अदःसमित्सम्मुखवीरयौवत-
त्रुटद्भुजाकम्बुमृणालहारिणी ।
द्विषद्गणस्त्रैणदृगम्बुनिर्झरे
यशोमरालावलिरस्य खेलति ॥ ३५ ॥

द्विषः । मयि मत्समीपे नम्रतयैव विनीततयैव स्थितिर्निवासोऽथ च स्वराज्ये स्थितिर्लभ्यते । स्तब्धतयाऽविनीततया तु पुनर्दिगेव विलङ्घ्यतेऽतिक्रम्यते । चेन्मयि नम्रा भविष्यथ तर्हि चापवत् स्थितिं प्राप्स्यथ । अन्यथा बाणवत् दिगन्तं यास्यथेति वचनं विनैवोक्तवानित्यर्थः । नम्रस्तब्धशब्दयोर्वक्रावक्रविनीतार्थपरतयोत्प्रेक्षा ॥ ३४ ॥

अद इति । अस्य राज्ञः यशोरूपा मरालावलिर्हंसपङ्क्तिर्द्विषतां भटानां गणाः सङ्घास्तेषां स्त्रैणं स्त्रीवृन्दं तस्य दृगम्बुनिर्झरे नेत्रवाष्पप्रवाहे खेलति । किम्भूता । अदःसमिति अमुष्य रणे सम्मुखागता ये वीरास्तेषां यौवतं स्त्रीसमूहः तस्य वैधव्यवशात् त्रुटन्तो ये भुजाकम्बवःशङ्खवलयानि त एव मृणालानि हरति अपनयति भक्षयति वेत्येवंशीला । हंसाली मृणालाहारान्निर्झरोदके क्रीडति । रणे सम्मुखागतानां शत्रूणां बधात् तत्स्त्रियः शङ्खवलयानि स्फोटयन्ति रुदन्ति च तेन चास्य कीर्त्तिर्भवति ॥ ३५ ॥

सिन्दूरद्युतिमुग्धमूर्द्धनि धृतस्कन्धावधिश्यामिके
व्योमान्तःस्पृशि सिन्धुरेऽस्य समरारम्भोद्धुरे धावति।
जानीमो नु यदि प्रदोषतिमिरव्यामिश्रसन्ध्याधिये-
वाऽस्तं यान्ति समस्तबाहुजभुजातेजःसहस्रांशवः ॥ ३६ ॥

सिन्दूरेति। नु भोमि समरस्यारम्भे उद्धुरे उद्युक्तेऽस्य सिन्धुरे गजे धावति सति समस्ता बाहुजाः क्षत्रियास्तेषां भुजातेजांस्येव सहस्रांशवः सूर्य्याः यदस्तं विनाशमस्ताचलञ्च यान्ति गच्छन्ति तत्प्रदोषतिमिरेण रजनीमुखसम्बन्धिना तमसा व्यामिश्रा मिलिता या सन्ध्या तस्या धिया बुद्ध्या भ्रान्त्येवेति वयं जानीमः। वाक्यार्थः कर्म्म। दिवारजन्योः सन्धौ भवः सान्ध्यो रागस्तद्भ्रान्त्येत्यर्थः। किम्भूते सिन्धुरे। सिन्दूरद्युत्या मुग्धो मनोज्ञः मूर्द्धा यस्य तस्मिन्। तथा धृता स्कन्धाववधीकृत्य श्यामिका स्वाभाविकी कज्जललेपमण्डनजा वा कालता येन तस्मिन्। तथा उच्चतया व्योमान्तःस्पृशि गगनमध्यस्पर्शिनि। तथा समरारम्भाद्रणतूर्य्यश्रवणात्कोपद्ःसहे वा। यदस्तं यान्ति तर्हि सायङ्कालतिमिरसंयुक्तसन्ध्याधियेवेति वा। सन्ध्यापि किञ्चित्कज्जलतुल्यतिमिरयुक्ता सिन्दूरवच्च स्वतो रक्ता वरुणदिगन्तस्पर्शिनी चेति पूर्व्वोक्तविशिष्टहस्तिदर्शने सति सायं सन्ध्येतिबुद्ध्येव तेजःसूर्य्याणामस्तगमनं युक्तं। एवंविधं गजं दृष्ट्वा सर्व्वेऽपि पलायन्त एवेत्यर्थः। जानीमोऽथ तदेपि पाठे अथशब्दो यदित्यर्थे तदा तदित्यर्थे ज्ञेयः। श्यामैव श्यामिकेति स्वार्थे कप्रत्यये। प्रत्ययस्थादितीत्वं (पा ७।३।४४) ॥ ३६ ॥

हित्वा दैत्यरिपोरुरः स्वभवनं शून्यत्वदोषस्फुटा-
सीदन्मर्कटकीटकृत्रिमसितच्छत्रीभवत्कौस्तुभं ।
उज्झित्वा निजसद्म पद्ममपि तल्लूतावनद्धीकृतं
लूतातन्तुभिरन्तरस्य भुजयोः श्रीरस्य विश्राम्यति ॥ ३७ ॥
सिन्धोर्जैत्रमयं पवित्रमसृजत्तत्कीर्त्तिपूर्त्ताद्भुतं
यत्र स्नान्ति जगन्ति सन्ति कवयः के वा न वाचंयमाः ।

हित्वेति । श्रीर्लक्ष्मीरस्य अस्य भुजयोरन्तर्मध्ये विश्राम्यति शोभा च । किं कृत्वा । दैत्यरिपोर्विष्णोः स्वभवनं स्वस्य गृहं उरः हित्वा । तथा तन्निजसद्म पद्ममपि उज्झित्वा । किम्भूतमुरः । लक्ष्म्या त्यक्तत्वात् शून्यत्वलक्षणेन दोषेण स्फुटं आसीदन्तः स्थिरीभवन्तः मर्कटकीटा ऊर्णनाभकीटास्तेषां करणेन निर्वृत्तं तैरचितं कृत्रिमं सितच्छत्र इव सितच्छत्रं मण्डलाकारं श्वेतं गर्भा-ण्डस्थापनस्थानं तद्भवन् तद्रूपीभवन् कौस्तुभाख्यो मणिर्यत्र । किम्भूतं पद्मं । तैर्लूतातन्तुभिः मर्कटीसूत्रैः मर्कटीसूत्रसदृशैः कमलसूत्रैरित्यर्थः । व्यक्तं प्रकटमवनद्धीकृतं बद्धं विसतन्तूनामेव लूतातन्तुत्वेनोक्तिः । परस्परमतिदूरे द्वेऽपि भवने प्रति गता-गताभ्यां श्रान्ता सती गृहद्वयं परित्यज्यातिसमीपवर्त्तिनोरस्य भुजयोरेव भवनयोः सुखेन निषीदत्यत्रैव स्थिरीभवतीत्यर्थः । कौस्तुभस्य धवलत्वाल्लूताछत्रत्वेन कमलसूत्राणाञ्च सादृश्यात् लूतातन्तुत्वेनोत्प्रेक्षा । लूता स्त्री तन्तुवाये स्यादित्यमरः ॥ ३७ ॥

सिन्धोरिति । अयं सिन्धोर्जैत्रं समुद्रस्य जेतृ पवित्रमुज्ज्वलं पावनञ्च तत्कीर्त्तिपूर्त्ताद्भुतं यशोरूपतडागाश्चर्य्यं असृजत् नि-

यद्बिन्दुश्रियमिन्दुरञ्चति जलञ्चाविश्य दृश्येतरो
यस्यासौ जलदेवतास्फटिकभूर्जागर्त्ति यागेश्वरः ॥ ३८ ॥

र्भमे। यत्र कीर्त्तितडागे जगन्ति स्नान्ति उज्ज्वलीभवन्ति स्नानं च कुर्व्वन्ति। यद्दर्शनविषये के वा कवयः स्फुरन्नूतनार्था अपि वाचंयमा मौनिनो न सन्ति अपि तु सर्व्वेऽपि मौनिन एव भवन्ति इत्यर्थः। अथ च के वयो जलपक्षिणः कवयः। यत्र के जलपक्षिणः के वा तापसा न सन्ति अपि तु महति तडागे बहवः पक्षिणस्तापसास्च विद्यन्ते। इन्दुर्यस्य कीर्त्तितडागस्य बिन्दुश्रियं अञ्चति प्राप्नोति यदपेक्षया चन्द्रोऽल्पीयानित्यर्थः। अथ च महतस्तडागस्य जलबिन्दुशोभामिन्दुरञ्चति यदीयो बिन्दुरिवेन्दुरित्यर्थः। यस्य च जलं आविश्य प्रविश्येव दृश्येतरो ऽस्मदादिनेत्रयोरविषयभूतोऽसौ जगति विद्यमानः स्फुटिका एव भूर्यस्य स कैलास एव यागेश्वरः स्फाटिकश्रीशिवलिङ्ग-रूपो जलदेवता जागर्त्ति स्फुरति। समच्छायत्वाज्जले क्षिप्तः स्फटिको न दृश्यते इयमेव स्फटिकपरीक्षा। उज्ज्वलतरैतत्-कीर्त्तिकल्लोलप्लावित इव कैलासो न दृश्यते। इन्दुर्जले चा-विश्य जले प्रतिबिम्बितः सन् यद्बिन्दुश्रियमञ्चतीति वा असा-विन्दुरेव यस्य जलमाविश्यादृश्यः स्फटिकनिर्मितो यागेश्वरः सन् जलदेवता जागर्त्ति। कीर्त्तिमध्यपाती चन्द्रोऽपि समच्छा-यत्वान्न दृश्यत इत्यर्थ इति वा। स्पृशेदिति वचनात्पर्व्वातिरिक्ते काले समुद्रस्यास्पृश्यत्वात् अस्य तु सर्व्वदा पवित्रत्वात्। समुद्रस्य च भूलोकस्थस्यैव कतिपयस्यैव जनस्य स्नानार्हत्वादस्य तु लोक-

अन्तःसन्तोषबाष्पैः स्थगयति न दृशस्ताभिराकर्णयिष्य-
न्नङ्गेनानस्तिलोमाऽऽरचयति पुलकश्रेणिमानन्दकन्दां।
न क्षोणीभङ्गभीरुः कलयति च शिरःकम्पनं तन्न विद्मः
शृण्वन्नेतस्य कीर्त्तीः कथमुरगपतिः प्रीतिमाविष्करोति॥३९॥

चयस्थानार्हत्वात्तस्य वर्णयितुं शक्यत्वादस्य चाशक्यत्वात्तस्य च चन्द्रैकसर्व्वस्वत्वादस्य च विन्दुरूपचन्द्रत्वात् समुद्रे च श्रीविष्णुरूपाया जलदेवतायाः सुप्तत्वादत्र च योगेश्वरस्य जाग्रत्त्वात्। एवंविधो यशस्वी कोऽपि नास्तीति भावः। योगेश्वर इति असौ जलदेवता जागर्त्ति। असौ का या स्फटिकभूः योगेश्वरः कैलासो जागर्त्तीति। वाचि यमो व्रत इति (पा° ३।२।४०) खचि वाचंयमपुरन्दरौ चेति (पा° ६।३।६९) साधुः॥ ३८॥

अन्तरिति। यस्मात् उरगपतिः शेषः अन्तःसन्तोषबाष्पैरानन्दाश्रुभिः कृत्वा दृशो नेत्राणि न स्थगयति नाच्छादयति। यतस्ताभिर्दृग्भिः एतद्गुणानाकर्णयिष्यन् सन् चक्षुःश्रवस्त्वादश्रुभिर्नेत्राच्छादने गुणानाकर्णनशङ्कया आनन्दाश्रुभिर्दृशौ नाच्छादयति। तथा आनन्द एव कन्दो मूलं यस्यास्तां पुलकश्रेणिं रोमाञ्चपङ्क्तिमपि आरचयति करोति। यतः अनस्तिरोमाऽविद्यमानरोमा। तथा सन्तोषात् शिरःकम्पनं न करोति। यतः क्षोणीभङ्गभीरुः। यद्यहं मूर्द्धानं कम्पयिष्यामि तर्हि भूमिः पतिष्यतीति भिया। तस्मात् कारणादेतस्य कीर्त्तीः शृण्वन् शेषोऽन्तःकरणे समुत्पन्नां प्रीतिं कथं केनान्येन प्रकारेणाविष्करोति प्रकटयति वयं तन्न विद्मः।

आचूडाग्रममज्जयज्जयपटुर्यच्चल्यदण्डानयं
संरम्भे रिपुराजकुञ्जरघटाकुम्भस्थलेषु स्थिरान् ।
सा सेवास्य पृथुः प्रसीदसि तया नास्मै कुतस्त्वत्कुच-
स्पर्द्धागर्द्धिषु तेषु तान् धृतवते दण्डान् प्रचण्डानपि ॥४०॥

आश्चर्य्यरूपकीर्त्तिरयमिति भावः । सहस्रमुखत्वाद्दृश इति बहुत्वं ॥ ३९ ॥

आचूडेति । संरम्भे युद्धसम्भ्रमे सति जये पटुरयं राजा रिपवश्च ते राजानश्च तेषां कुञ्जरघटाकुम्भस्थलेषु दूरनिखाततया स्थिरान् शल्याग्रलोहस्य सम्बन्धिनो दण्डान् शरान् प्रासान् वा आचूडाग्रं पुङ्खाग्रं मर्य्यादीकृत्य यदमज्जयन्निचखान । सा एतत्कर्तृका त्वदीया पृथुर्महती सेवा तया सेवया त्वं अस्मै कुतो न प्रसीदसि । किम्भूताय । तव कुचस्पर्द्धागर्द्धिषु कुचसाम्याभिलाषिषु तेषु कुम्भस्थलेषु तान् पूर्व्वोक्तान् प्रचण्डान्दण्डान् धृतवते कृतवतेऽपि । येन हि महती सेवा क्रियते तस्मै प्रसन्नीभूयते । अतिशूरोऽयं तस्माद् वृणीष्वेत्यर्थः ॥ ४० ॥

स्मितेति । सा भैमी स्मितश्रिया तं राजानं उपाहसत् हसितवती यतः कीर्त्त्यं वर्णयितुं शक्यं महत्त्वं यस्य एवम्भूतमेव । हि यस्मात् निषधेन्द्रवैभवं नलसामर्थ्यं गिरां पारे वागगोचरं वर्णयितुमपि न शक्यत इत्यर्थः । नलादेतस्य न्यूनत्वादुपहास इत्यर्थः । किम्भूतया स्मितश्रिया । तद्गुणश्रर्मणा तदीयगुणाकर्षणसमुत्पन्नेन सुखेन वितीर्णयेव दत्तयेव कृतयेव । तथा सुकाणि

स्मितश्रिया सृक्वणिलीयमानया
वितीर्णया तद्गुणशर्म्मणेव सा ।
उपाहसत् कीर्त्त्यमहत्त्वमेव तं
गिरां हि पारे निषधेन्द्रवैभवं ॥ ४१ ॥

निजाक्षिलक्ष्मीहसितैणशावका-
मसाऽवभाणीदपरं परन्तपं ।
पुरैव तद्दिग्वलनश्रियो भुवा
भ्रुवा विनिर्द्दिश्य सभासभाजितं ॥ ४२ ॥

कृपा नृपाणामुपरि क्वचिन्न ते
नतेन हाहा शिरसा रसादृशां ।

ओष्ठप्रान्ते लीयमानया संसर्गिण्या । कीर्त्त्यमिति असद्गुणारोपणार्थसूचकं पदं ॥ ४१ ॥

निजेति । असौ वाणी अपरमन्यं परन्तपं राजानं भ्रुवा पुरैव पूर्व्वमेव विनिर्द्दिश्य दर्शयित्वा तां भैमीं अभाणीत् उवाच । किंभूतां तां । निजाक्ष्णोर्लक्ष्म्या नेत्रकान्त्या हसित एणशावको मृगशिशुर्यया । किंभूतया भ्रुवा । तस्य वर्णनीयस्य राज्ञो दिशा तत्सम्मुखं चलनेन दृक्पातेन कृत्वा याः श्रियस्तासां भुवा स्थानभूतया । किंभूतमेनं । सभया सभास्थैर्मनोज्ञतया सभाजितं दृष्टं पूजितं वा । रिपुतापकारत्वादन्वर्थकनामानं वा ॥ ४२ ॥

कृपेति । हे भैमि ते तव नृपाणां मध्ये क्वचिदप्युपरि कस्याप्युपरि कृपा नास्ति हाहा कष्टं किमप्यवलोकस्यऽपि नेति न

भवन्तु तावत्तव लोचनाञ्चला
निपेयनेपालनृपालपालयः ॥ ४३ ॥
ऋजुत्वमौनश्रुतिपारगामिता
यदीयमेतत्परमेव हिंसितुं ।

युक्तेत्यर्थः । किंभूतानां । तत्कृतावज्ञावशाल्लज्जया नतेन शिरसा रसायां भूमौ दृग्येषां रसां पश्यन्तीति च । अन्यत्र कृपा मा भून्नाम तावत् किन्तु तव लोचनाञ्चलाः अपाङ्गदृगंशः निपेयः सादरावलोकनार्हः यो नेपालानां देशानां नृपालो राजा तं पिबन्ति सादरं पश्यन्ति एवंभूता अलयो भ्रमरभूता भवन्तु । एनं तावत् कटाक्षैर्विलोकयेत्यर्थः ॥ ४३ ॥

ऋजुत्वेति । ऋजुत्वमवक्रता नम्रत्वं प्रियवादित्वादिरूपा विनीतता च तथा मौनं निःशब्दत्वं वाक्संयमश्च श्रुतिपारगामिता आकर्णपूर्णता वेदपारगामिता च एवंरूपमतीवा-नितरां विश्रामविधायि विश्वासकारि विगतश्वासकारि मनसि स्थितप्रत्ययकारकञ्च अलीकपवनाभ्यासवशाद्वा श्वासाभावकारि यदीयमेतच्चेष्टितं परं शत्रुं स्वव्यतिरिक्तञ्च सर्व्वं जनं हिंसितु-मेव हन्तुमेव प्राणप्रियधनग्रहणार्थमेव च न तु तत्स्वव्यधनमात्र-प्रयोजनं न चार्जवादिगुणार्जनप्रयोजनं । सोऽस्य बकुरसङ्घः महान् अचयोऽतिदीर्घश्च शरः दाम्भिको दम्भेन चरति इति रूपकं । अतिक्रूरोऽयमिति भावः । दाम्भिके यावदुक्तं तत् सर्व्वं एतस्य शरे विद्यत इत्यर्थः । दाम्भिकेन यत्क्रियते तदेतच्छ-रेण क्रियत इत्यर्थ इति वा । दम्भो हिंसा माया च प्रयोजन-

अतीव विश्वासविधायि चेष्टितं
बहुर्मंदानस्य स दाम्भिकः शरः ॥ ४४ ॥
रिपूनवाप्यापि गतोऽवकीर्णितां-
मयं न यावज्जनरञ्जनव्रती ।
भृशं विरक्तानपि रक्तवत्तरान्
निकृत्य यत्नानसृजासृजद्युधि ॥ ४५ ॥
पतत्येतत्तेजोहुतभुजि कदाचिद्यदि तदा
पतङ्गः स्यादङ्गीकृततमपतङ्गापदुदयः ।

मस्य प्रयोजनमिति (पां ५ । १ । १०९) ठञ् । तेन चरति वा चरतीति (पां ४ । ४ । ८) ठक् ॥ ४४ ॥

रिपूनिति। यावन्तो जनास्तावतां रञ्जनं तदेव व्रतं तदस्यास्तीति एवंभूतोऽयं राजा रिपूनपि अवाप्य प्राप्यापि वा अवकीर्णितां चतव्रतत्वं न गतः प्राप्तः । यद्यस्मात् स्वशरीरादिविषये भृशं विरक्तानऽननुरागिणोऽपि अथ चैनं दृष्ट्वा विगतरुधिरानपि तान् रिपून् युधि निकृत्य बाणैश्छित्वाऽसृजा रुधिरेण कृत्वा रक्तवत्तरान् रक्तवन्तोऽनुरागिणोऽथच रक्तं विद्यते येषु ते रक्तवन्तः अतिशयेन रक्तवन्तो रक्तवत्तरा एवंभूतानसृजत् चकार। वैरिणामपि रञ्जनात् चतव्रतत्वं न जातमित्यर्थः। रक्तवत्तरान् क्तवतुर्मतुप् च ॥ ४५ ॥

पततीति। पतङ्गः सूर्य्यः एतस्य तेज एव हुतभुगग्निः तस्मिन् यदि कदाचित् कस्मिन्नपि समये पतति तदा तर्हि अङ्गी-

यशोऽमुष्येवोपार्ज्जयितुमसमर्थेन विधिना
कथञ्चित् क्षीराम्भोनिधिरपि कृतस्तत्प्रतिनिधिः ॥ ४६ ॥
यावत्पौलस्त्यवास्तूभवदुभयहरिल्लोमलेखोत्तरीये
सेतुप्रालेयशैलौ चरति नरपतेस्तावदेतस्य कीर्त्तिः।

कृततमः श्यामक्षीकृतः पतङ्गानां शलभानां द्वेहदाहलक्षणा या आपदस्तासां उदयो येनैवम्भूत एव स्यात् तत्तेजसाऽतितरां सन्तापवशात् पीड़ितः स्यात्। एतत्तेजोऽपेक्षया सूर्य्यो हीनो वह्न्यपेक्षया शलभतुल्य इत्यर्थः। तथाऽमुष्य यशः कथञ्चित् केनापि प्रकारेण उपार्जयितुमसमर्थेनेव विधिना ब्रह्मणाऽतिमहान् क्षीराम्भोनिधिरपि तस्यैतदीययशसः प्रतिनिधिरनुकल्पः कृतः कथञ्चित् कृत इति वा। यश इव यशःसदृशमिति वा। मुख्याभावे हि प्रतिनिधिरपि क्रियते। क्षीरादप्युज्ज्वलं अस्य यश इत्यर्थः। एवंविधः प्रतापवान् यशस्वी च कोऽपि नास्तीति भावः। मुख्यापेक्षया प्रतिनिधेर्न्यूनत्वादेकद्वीपव्यापिनः क्षीरोदादशेषद्वीपव्यापिन्याः कीर्त्तेराधिक्याच्च ॥ ४६ ॥

यावदिति। हे भैमि सेतुप्रालेयशैलौ श्रीरघुनाथकृतः सेतुः प्रालेयशैलस्य हिमाचलस्तौ यावत् यावन्तं देशमभिव्याप्य तिष्ठतः यावत्कालं तौ वर्त्तेते वा एतस्य नरपतेः कीर्त्तिस्तावत्पर्य्यन्तं चरति भ्रमति। किंभूतौ सेतुशैलौ। पुलस्त्यगोत्रापत्ययो रावणकुवेरयोरवास्तु अगृहभूमिभूते ऽपि वास्तुभवन्त्यौ गृहभूमित्वं प्राप्ते उभे द्वे ऽपि ये हरितौ दक्षिणोत्तरे दिशौ तयोः क्रमेण श्यामत्वाच्छुभ्रत्वाच्च रोमरेखा रोमाली उत्तरीयं

यावत्प्राक्प्रत्यगाशापरिवृढनगरारम्भणस्तम्भमुद्रा-
वद्री सन्ध्यापताकारुचिरचितशिखाशोणशोभावुभौ च ॥ ४७ ॥
युद्धा चाभिमुखं रणस्य चरणस्यैवादसीयस्य वा
बुद्धान्तः स्वपरान्तरं निपततामुन्मुच्य बाणावलीः ।

पूर्व्वकायावरणवस्त्रं तद्रूपौ । समुद्रबन्धनशिलापरम्परा दक्षिण-
दिशो रोमस्थानीया । हिमाचलस्य उत्तरदिग्वस्त्रस्थानीयः ।
तथा प्राक् च प्रत्यक् च आशे प्राचीप्रतिच्यौ दिशौ तयोः
परिवृढौ स्वामिनाविन्द्रवरुणौ तयोर्ये नगरे तयोर्यदारम्भणं
आरम्भः तस्मिन् स्तम्भयोरिव सुन्दरी मुद्रा आकारो ययो-
स्तावुभावद्री उदयास्ताचलौ च यावन्तं देशमभिव्याप्य तिष्ठतः
पूर्व्ववत् । किंभूतावद्री । प्रातःसायंसन्ध्ये एव रक्तत्वात्पताका-
रुची ताभ्यां रचिता निर्म्मिता शिखायां शिखरे शोणा रक्ता
शोभा ययोस्तौ । पौलस्त्येति । गोत्रापत्ये गर्गादित्वाद्यञ्
(पा० ४।१।१०५।) वाल्मभवदिति । चौ चेति (पा० ७।४।
२६।) दीर्घः । उभाववयवौ ययोस्ते उभय्यौ ते हरितौ चेति
समासे पुंवद्भावः इति वा ॥ ४७ ॥

युद्धेति । अनेन राज्ञा अरीणां शिरः भूमौ हठात् बला-
त्कारेण विलोठितं झटिति छेदात् लुरङ्गमणमभूत् । किम्भूता-
नामरीणां । आदसीयस्य अमुष्यायं आदसीयस्तस्य रणस्याभिमुखं
सम्मुखं प्रारम्भमभिलक्षीकृत्य वा बाणावलीः शरपङ्क्तीरुन्मुच्य
मुक्त्वा युद्धा वा निपततां बाणपङ्क्तिवर्षणेन युद्धं कृत्वा रणभूमौ
पतितानामिति यावत् । अथ च अन्तःकरणे स्वपरान्तरं स्वस्या-

छिन्नं वावनतीभवन्निजभियः खिन्नं भरेणाथवा
राम्नाऽनेन हठाद्विलोठितमभूद्भूमावरीणां शिरः ॥ ४८ ॥
न तूणादुद्धारे न गुणघटने नाश्रुतिशिखं
समाकृष्टौ दृष्टिर्न वियति न लक्ष्ये न च भुवि ।
नृणां पश्यत्यस्य क्व च न विशिखान् किन्तु पतित-
द्विषद्वक्षःश्वभ्रैरनुमितिरमून् गोचरयति ॥ ४९ ॥

त्मनः परस्य चान्तरं न्यूनाधिकत्वतारतम्यं बुद्ध्वा वा आदरीयस्य चरणस्यैव अभिमुखं बाणावलीरुन्मुच्य निरायुधीभूय निपततां एतच्चरणयोर्दण्डवन्नमस्कारं कुर्व्वतां । किम्भूतं शिरः। रणसम्मुख-पक्षे छिन्नं वा बाणैः खण्डितं सदाऽवनतीभवत् नतग्रीवं भूमौ पतितं सत् । तथा चरणपक्षे । अथवा निजभियो भरेण स्वीय-भयबाहुल्येन वा खिन्नं सत् अवनतीभवत् । द्वितीयपक्षे बलात् विलोठितं वामदक्षिणभागस्पर्शकारीकृतं । वैरिणो यदि युध्यन्ते तर्हि म्रियन्त एव । ये च विचारका भीरवश्च ते शस्त्राणि परि-त्यज्य राजानमेव शरणं गच्छन्ति जीवन्तीति । एवकारेणान्यः शरण्यो न विद्यत इति सूचितं । अन्यदपि भाराक्रान्तं नम्रम्भ-वति । वा शब्दः प्रत्येकविकल्पे ॥ ४८ ॥

नेति । युद्धकौतुकदर्शिनां नृणां दृष्टिः अस्य विशिखान् क्व च न कस्मिन्नपि तूणादुद्धारे निष्काशने उपादानकाले न पश्यतीति सर्व्वत्र सम्बन्धः । तथा कस्मिन्नपि गुणघटने मौर्व्याः सन्धानकाले न । आश्रुतिशिखं कर्णाग्रं मर्य्यादीकृत्य समाकृष्टौ

दमस्वसुश्चित्तमवेत्य हासिका
जगाद देवीं कियदस्य वक्ष्यसि ।
भण प्रभूते जगति स्थिते गुणै-
रिहाप्यते सङ्कटवासयातना ॥ ५० ॥

क्व न कस्मिन्नपि सम्यगाकर्षणकाले न । तथा मोचनानन्तरं वियति कस्मिन्नपि गगनदेशे न । तथा कस्मिन्नपि लक्ष्ये वेध्य-वेधे न । तथा शत्रून्निर्भिद्य ततो निर्गत्य भुवि कस्मिन्नपि भू-प्रदेशे पतितान्न पश्यन्ति । तर्हि किन्तु पतितानां बाणाघातक्ष-तमर्म्मवेधवशाद्गतप्राणानां भूमिष्ठानां द्विषतां वक्षःश्वभ्रैः दृढं प्रहृत्य वहिर्निर्गतशरक्षतच्छिद्रैः कृत्वा याऽनुमितिरनुमानज्ञानं अमून् बाणान् गोचरयति ज्ञापयति । चेदनेन बाणा न मुक्ता-स्तर्ह्येतेषां वक्षसि छिद्राणि कथं भवेयुरित्याद्यनुमितिः । चक्षुः-श्वभ्रैरिति पाठे चक्षुःष्वेव विध्यतीति भावः ॥ ४९ ॥

दमेति । हासयतीति हासिकाऽतिनीचा चेटी दमस्व-सुश्चित्तं तद्दर्शनबाहुल्यनिरपेक्षं तस्मिन्नरक्तं वाऽवेत्य ज्ञात्वा देवीं सरस्वतीं जगाद । हे देवि त्वं अस्य कियत् एतदीयं कि-यच्चरितं वक्ष्यसि वर्णयिष्यसि अपि तु बहुत्वात् प्रत्येकं वर्णयितुं न शक्यत इत्यर्थः । गुणैः सौन्दर्य्यादिभिः प्रभूते महति जगति स्थितेऽपि इह नृपे सङ्कटवासरूपा सम्मर्द्दवसतिरूपा यातना सङ्कटावासेन वा यातना तीव्रवेदना आप्यते प्राप्यते इति भण कथय । सर्व्वे गुणाः सर्व्वं जगत्परित्यज्यास्मिन्नेव सम्मर्द्देन निवसन्तीति एकैकैवकारेण वर्णय । पृथग्वर्णनाऽसामर्थ्यादि-

ब्रवीति दासीह किमप्यसङ्गतं
ततोऽपि नोच्चैयमतिप्रगल्भते ।
अहो सभा साधुरितीरिणः क्रुधा
न्यषेधदेतत्क्षितिपानुगान् जनः ॥ ५१ ॥

त्यर्थः । वाक्यार्थः कर्म्म । अथ च भूयसि । वर्त्तमाने जगति मध्ये गुणैरिहैव कष्टरूपवसतिपीडा प्राप्यते न त्वन्यत्र । एतस्मिन्निवासे गुणा उद्विजन्त एवानर्हत्वादेकोऽपि गुणोऽत्र नास्तीति भणेत्युपहासः । अस्य कियद्वक्ष्यसि कथय । अतःपरं मा स्म वादीः । तस्मान्निर्गुणमेनं गुणित्वेन कियन्तं कालं वर्णयिष्यसीति कथयेति वा । स्थितैरिति पाठे गुणविशेषणं । प्रभूतैरिति च ॥ ५० ॥

ब्रवीतीति । जनः प्रेक्षकः क्रुधा स्वस्वामिवर्णनविघातसमुत्पन्नेन क्रोधेन इतीरिणो भाषमाणानेतस्य क्षितिपस्यानुगाननुचरान्न्यषेधत् निवारयामास । इति किं । इह सभायां भैम्या दासी किमपि असङ्गतमयुक्तं ब्रवीति वदति का कस्येत्यादि भाषते । ततोऽपि दास्या अपि सकाशान्नीचा इयं चेटी अतिप्रगल्भते नितरां धृष्टतया भाषते । नियामकः कोऽपि नास्ति । अहो अयुक्तत्वादाश्चर्य्यं साधुः सभा । विरुद्धलक्षणया काक्का वा अकारप्रश्लेषेण वा असाधुरेतादृशी सभा न कुत्रापीति । ब्रवीति वर्त्तमानसामीप्ये भूते लट् (पां ३ । ३ । १३५ ।) ब्रवीषेति पाठः समीचीनः । गल्भङ् धृष्टत्वे ॥ ५१ ॥

अथान्यमुद्दिश्य नृपं कृपामयी
मुखेन तद्दिङ्मुखसम्मुखेन सा।
दमस्वसारं वदति स्म देवता
गिरामिलाभूवदतिस्मरश्रियं॥ ५२॥

विलोचनेन्दीवरवासवासितैः
सितैरपाङ्गाध्वगचन्द्रिकाञ्चलैः।

अथेति। अथ कृपामयी बहुलकृपा सा गिरां देवता मुखेन अन्यं नृपं उद्दिश्य दमस्वसारं वदति स्म। किम्भूतेन। तस्योद्दे-श्यस्य नृपस्य दिङ्मुखं दिग्विभागः तस्य सम्मुखेन। किम्भूतं नृपं। इलाभूवत्पुरूरवसमिव। किम्भूतां। अतिस्मरा अतिक्रान्तस्मरा श्रीर्यस्यास्तां॥ ५२॥

विलोचनेति। हे भैमि त्वं अपाङ्गाध्वगाया नेत्रप्रान्तरूप-भागगामिन्याश्चन्द्रिकायाः नेत्रमध्यगनीलगोलकस्याञ्चलैरिवा-ञ्चलैरतिदीर्घैर्व्विलोकनव्यापारैः कटाक्षैरिति यावत् तैः कृत्वा निभात् वस्त्वन्तरविलोकनव्याजात् त्रपामपाकृत्य मालयं मल-याद्रिस्वामिनं मायाः सम्पद्रूपाया लक्ष्म्या आलयं वा क्षितिक्षितं निभालय विलोकय। किंभूतं। रुचः कायकान्तेः आलयं आस्पदीभूतं। किंभूतैरञ्चलैः। विलोचने एव इन्दीवरे नीलो-त्पले नीलोत्पलतुल्ये नेत्रे तयोर्मध्ये वासः स्थितिस्तया वासि-तैर्भावितैः नयननीलिम्ना नीलीकृतैरित्यर्थः। तथा सितैः शुभ्रैः। नीलश्वेतकान्तिभिः कटाक्षैर्व्विलोकयेत्यर्थः। अथ च विलोचन-

क्षपामपाकृत्य निभान्निभालय
क्षितिक्षितं मालयमालयं रुचः ॥ ५३ ॥
इमं परित्यज्य परं रणादरिः
स्वमेव भग्नः शरणं मुधाविशत्।
न वेत्ति यत्त्रातुमितः कृतस्मयो
न दुर्गया शैलभुवाऽपि शक्यते ॥ ५४ ॥

तुल्यानां नीलोत्पलानां वासेन परिमलेन सुगन्धीकृतैः सितैः तिर्य्यगायतशीलत्वादपाङ्गतुल्यमार्गगामिन्या ज्योत्स्नाया अस्रुवैः करैरुपलक्षितं। तथा रुचः कान्तेः आलयं स्थानं। तथा मः शिवः आलयो यस्य शिवमौलिनिवासिनं चन्द्रमेवैनं राजानं क्षपामपाकृत्य पश्येत्यर्थः। मः शिवे मा च पद्मायामिति विश्वः। निभालय। चुरादावात्मनेपदिनः पाठात् परस्मैपदं चिन्त्यं। निभालनं निभालस्तद्वान्निभालवांस्तादृशं कुर्व्विति। तत् करोतीति णिचि (पा० ३।१।२६।सू० १वा०) मतुब्लोपे साधनीयं ॥५३॥

इममिति। हे भैमि रणाद्भग्नः पलायितः कृतस्मयः कृतगर्व्वः अरिः एतस्य शत्रुः परं शत्रुभूतमथवातिमहान्तं इमं परित्यज्य स्वमेव स्वीयमेव शरणं गृहं मुधा वृथाऽऽविशत्। त्वदीयोऽहं मां रक्षेत्युक्त्वा एनमेव शरणं रक्षितारं कृतगर्व्वत्वादप्राप्य स्वगृहं वृथैव गत इत्यर्थः। यद्यस्मात् दुर्गया विषमया शैलस्य भूः तया गिरिदुर्गेणेत्यर्थः। तथापि इतोऽस्मान्नृपात् त्रातुं न शक्यते इति न वेत्ति। गिरिदुर्गं प्रविष्टोऽपि बलात् ततोऽपाकृत्य

अनेन राज्ञाऽर्थिषु दुर्भगीकृतो
भवन् घनध्वानजरत्नमेदुरः ।
तथा विदूराद्रिरदूरतां गमी
यथा स गामी तव केलिशैलताम् ॥ ५५ ॥

हन्यते स्वगृहं प्रविष्टो हन्यत इति किं वाच्यं। अतः स्वगृहप्रवेशो व्यर्थ इत्यर्थः। अथ च पर्व्वतपुत्र्या दुर्गयापि त्रातुं न शक्यते। तद्रूपं हत्वैव शरणागतस्य रक्षत्येवायमिति भावः। शरणं गृह-रक्षित्रोरित्यमरः॥ ५४ ॥

अनेनेति। एतद्वरणे सोऽतिप्रसिद्धो विशेषेण दूरोऽद्रिरथ च रोहणाचलस्तथा तेन प्रकारेण अदूरतां सामीप्यं गमी गतो यथा येन प्रकारेण तव केलिशैलतां क्रीडापर्व्वतत्वं गामी गमिष्यति। किंभूतः। अतिवदान्येनानेन राज्ञाऽर्थिषु याचकेषु विषये दुर्भगीकृतः उपेक्षाविषयतां अयाचनीयतां प्रापितः। अत एव व्ययाभावात् नवा घना मेघास्तेषां ध्वानः शब्दस्तस्मा-ज्जातै रत्नैर्मेदुरः परिपुष्टो भवन्। विदूराद्रौ हि नवमेघशब्दा-द्रत्नशलाका उत्पद्यन्ते तास्च याचकैर्नीयन्ते। अस्मिंस्तु वक्तु-प्रदे सति तत्र कस्यापि याचकस्यागमनाद्यभावाद्रत्नैः कृत्वा लब्धपवनात्मं यावन्मेदुरो भवति स एव रत्नमयत्वात्तव क्रीडा-पर्व्वतस्थाने भविष्यति। अति वदान्योऽयमिति भावः। भवद्-घनध्वानेति पाठे भवद्भ्य उत्पन्नेभ्यो घनध्वानेभ्य इति व्याख्येयं। गमी गामीति पूर्व्ववत्॥ ५५ ॥

नम्रप्रत्यर्थिपृथ्वीपतिमुखकमलम्लानताम्भृङ्गजात-
च्छायान्तःपातचन्द्रायितचरणनखश्रेणिरैणेयनेत्रे ।
दृप्तारिप्राणवाताम्रुतरसलहरीभूरिपानेन पीनं
भूलोकस्यैष भर्त्ता भुजभुजगयुगं सांयुगीनं बिभर्त्ति ॥ ५६ ॥

नम्रेति। हे ऐणेयनेत्रे ऐणेयो हरिणपोतस्तन्नेत्रवन्नेत्रे यस्या-स्तत्संबुद्धिः। एण्यवयवभूते वा नेत्रे यस्याः। भूलोकस्य भर्त्ता एष राजा संयुगे साधु सांयुगीनं रणरसिकं भुजद्वयरूपं भुजगयुगं सर्पद्वयं बिभर्त्ति। किंभूतः। नम्राः प्रत्यर्थिपृथ्वीपतयः शत्रुनृपास्तेषां मुखान्येव कमलानि तेषां लज्जया म्लानता तद्रूपा भृङ्गेभ्यो जाता छाया भ्रमरसम्बन्धिनी या शोभा कृष्ण-ता तस्या अन्तःपातेन नखमध्ये प्रतिबिम्बितेन चन्द्रायिता चन्द्रवदाचरिता चरणनखश्रेणिर्यस्य। किंभूतं। दृप्तानां सद-र्पाणामरीणां प्राणाख्यवात एवातिप्रियत्वादमृतरसस्तस्य लह-रीणां तरङ्गाणां भूरि अतितरां पानेन पीनं पीवरं। सगर्व-नृपप्राणवियोगकरणेनोर्जस्वि। समानाकारत्वादतिक्रूरकर्म-त्वाच्च भुजयोः सर्पत्वं। सर्पाणाञ्च पवनाशनत्वात् प्राणाख्यैः पवनैः पीनत्वं युक्तं। दर्परहितांश्चरणपातिनो वैरिणो रक्षति सदर्पानसवान्मारयत्ययमिति भावः। ऐणेयं। एण्या अपत्यं स्त्रीभ्यो ढक् (पा० ४।१।१२०)। एण्या अवयवा इत्यर्थे एण्या ढञ् (पा० ४।३।१५८)। सांयुगीनं। साध्वर्थे प्रतिज-नादित्वात् खञ् (पा० ४।४।९९)॥ ५६॥

अध्याहारः स्मरहरशिरश्चन्द्रशेषस्य शेष-
स्याहेर्भूयः फणसमुचितः काययष्टीनिकायः।
दुग्धाम्भोधेर्मुनिचुलुकनत्रासनाशाभ्युपायः
कायव्यूहः क्व जगति न जागर्त्त्यदःकीर्त्तिपूरः॥५७॥

अध्याहार इति। अमुष्य कीर्त्तिपूरः क्व कस्मिन् जगति न जागर्त्ति न प्रकाशते अपि तु स्वर्गपातालमर्त्यलोकेषु स्फुरति। लोकत्रयव्यापित्वं क्रमेणाह। किम्भूतः। स्मरहरशिरसि यश्चन्द्रः तस्य यः शेष एकता तस्या अध्याहारो लक्षणया पञ्चदश-कलाभिः पूरकः। स्वर्गङ्गत्वा शिवशिरःस्थितश्चन्द्रो येन षोड-शकलः क्रियत इत्यर्थः। अन्यत्राप्यपूर्णवाक्ये किमपि योग्यं पदा-न्तरमध्याहृत्य वाक्यपूरणं क्रियते। तथा शेषस्याहेः सर्पराजस्य भूयांसः सहस्रसङ्ख्याकाः फणास्तेषां समुचितो योग्योऽतिदीर्घः काययष्टीनिकायः शरीरखण्डिकासमूहः। फणसहस्रस्य शरीरं सहस्रेण भवितव्यं। पातालं गत्वा तदीयशिष्टशरीरपूरणं क्रियत इत्यर्थः। तथा मुनेरगस्त्यस्य चुलुकनं सङ्कुचितहस्तपानं तस्माद्यस्त्रासो भयं तस्य नाशे निरासे अभि सामञ्जस्येनोपायः साधनं दुग्धाम्भोधेः। कायव्यूहः शरीरसङ्घः। पूर्व्वमेकाकित्वेन पानाद्भयमभूदिदानीमेतमेतद्यशोरूपानेकशरीरधारणात् एक-स्यानेकपाने सामर्थ्याभावाज्जलमात्रस्य च क्षीरतापादनाद्दुग्ध-यशसोस्तु स्वरूपत्वाद्दुग्धे यशोभ्रमो यशसि दुग्धभ्रम इति दुग्ध-यशसोर्निर्णेतुमशक्यत्वात् पानाभावात्। त्रयाभावसाधनभूतः क्षीरोदधेः कायव्यूहरूप इत्यर्थः॥५७॥

राज्ञामस्य शतेन किं कलयतो हेतिं शतघ्नीं कृतं
लक्षैर्लक्षभिदो दृशैव जयतः पद्मानि पद्मैरलं ।
कर्त्तुं सर्व्वपरच्छिदः किमपि नो शक्यं परार्द्धेन वा
तत्सङ्ख्यापगमं विनाऽस्ति न गतिः काचिद्गतैतद्द्विषां ॥ ५८ ॥

राज्ञामिति । नाम्ना शतघ्नीं चतुःशतीलोहकण्टकमञ्चितां हेतिं शस्त्रं कलयतो धारयतः अस्य राज्ञां शतेन किं कृतं । तेन शस्त्रेण मारणात् तैरनेकैरप्यस्य किमपि कर्त्तुं न शक्यत इत्यर्थः । अथ च यः शतमारणसमर्थः शस्त्रं गृह्णाति तस्य शत-सङ्ख्यामितैर्राजभिः किमपि कर्त्तुं न शक्यते । तथा राज्ञां लक्षैः किं । कृतं पूर्य्यतां । यतः लक्षं वेध्यं भिनत्तीति लक्षभि-त्तस्य लक्षभिदः । यो हि कुत्रचिदप्यप्रतिहतसायकस्तस्य लक्ष-सङ्ख्यैरपि किमपि कर्त्तुं न शक्यत इत्यर्थः । तथा राज्ञां पद्मैः पद्मसङ्ख्यैः राजभिरपि किं । तैरप्यस्य किमपि कर्त्तुं न शक्यते । यतो दृशैव पद्मानि कमलानि पद्मसङ्ख्यकान्वैरिणश्च जयतः । यो हि कमलतुल्यनेत्रस्तस्य शत्रुतः पराभवो न । अथ च यो भ्रूक्षेपमात्रेण पद्मसङ्ख्यापरिमितान् राज्ञो जयति तस्य पद्मसङ्ख्यैः राजभिः किञ्चित् कर्त्तुं न शक्यते । तथा वा समुच्चये राज्ञां परार्द्धेनापि परार्द्धसङ्ख्यैर्राजभिः अस्य किमपि कर्त्तुं नो शक्यं । यतः सर्व्वे च ते परे शत्रवश्च तांश्छिनत्ति तस्य । यो हि वैरिमात्र-हनने समर्थस्तस्य परार्द्धसङ्ख्याः शत्रवः किं कुर्व्वन्ति । तत्तस्मा-देतस्य द्विषां सङ्ख्याद्गणादपगमं पलायनं अथ च परार्द्धरूपायाः सङ्ख्याया अपगमं परित्यागमसङ्ख्यत्वं विना काचिद्गतिर्नास्ति

वयस्यया ऽऽकूतविदा दमस्वसुः
स्मितं वितत्याभिदधे ऽथ भारती।
इतः परेषामपि पश्य याचतां
भवन्मुखेन स्वनिवेदनत्वरां ॥ ५९ ॥

कृता ऽत्र देवी वचनाधिकारिणी
त्वमुत्तरं दासि ददासि का सती।
ईतीरिणस्तन्नृपपारिपार्श्विकान्
स्वभर्त्तुरेव भ्रूकुटिर्न्यवर्त्तयत् ॥ ६० ॥

वत खेदे असङ्ख्येयास्तेदभविष्यंस्तर्ह्यजीविष्यन् असङ्ख्येयत्वं नास्ति तस्मात्पलायनमेव जीवनोपायः। पलायितान्न हन्तीत्यर्थः। लक्षं शरव्ये सङ्ख्यायां। शतघ्नीं। अमनुष्यकर्तृके चेति ठक् (पां ३।२।५३) ॥ ५८ ॥

वयस्ययेति। अथ दमस्वसुराकूतविदा ऽभिप्रायज्ञया वयस्यया सख्या स्मितं वितत्य हसितं कृत्वा भारतीति अभिदधे उक्ता। इति किं। हे भारति त्वं भवन्मुखेन त्वन्मुखेन स्ववर्णनं याचतां प्रार्थयमानानामितो ऽस्मान्नृपात्परेषामन्येषां राज्ञां स्वनिवेदने स्ववर्णने एव त्वरां कालविलम्बासहनत्वं पश्य एतद्वर्णनाद्विरमेति भावः। अन्यानपि वर्णयेत्यर्थः ॥ ५९ ॥

कृतेति। स्वभर्त्तुः स्वस्वामिन एव भ्रुकुटिः कोपवशाद्भ्रूभङ्गः इति पूर्वोक्तं ईरिणो भाषमाणांस्तान्नृपपारिपार्श्विकान् राजसेवकान् न्यवर्त्तयत् न्यषेधत्। भ्रूक्षेपमात्रेण तेनैव ते निवारिता

धराधिराजं निजगाद भारती
तदुन्मुखेषद्वलिताङ्गसूचितं * ।
दमस्वसारं प्रति सारवत्तरं
कुलेन शीलेन च राजसूचितं ॥ ६१ ॥
कुतः कृतैवं वरलोकमागतं
प्रति प्रतिज्ञाऽनवलोकनाय वा ।

इत्यर्थः। इति किं। हे दासि अत्र राजवर्णने वर्णनाधिकारिणी भाषणाधिकारिणी देवीकृता त्वं का सती का भवन्ती केन प्रयुक्ता सती अथ वामती कुलटा का त्वमुत्तरं ददासि। अत्र त्वं वक्तुमयोग्येति। पारिपार्श्विकाम्। परिपार्श्वे वर्त्तन्ते परिमुखञ्चेति (पा० ४।१।२८) चकाराट्ठक्॥ ६०॥

धरेति। भारती दमस्वसारं प्रति धराधिराजं नृपं निजगाद कथयति स्मेत्यर्थः। किंभूतं। तस्य वर्णनीयस्य नृपस्य उन्मुखं सम्मुखं ईषद्वलितेन किञ्चित्परिवर्त्तितेनाङ्गेन करादिना सूचितं ज्ञापितं। तथा सारवत्तरमतिबलिष्ठं। तथा कुलेन शीलेन स्वभावेनाचरणेन वा राजसु मध्ये सूचितं योग्यं श्रेष्ठं। कुलशीलाभ्यां सारवत्तरं श्रेष्ठतरं वा॥ ६१॥

कुत इति। हे भैमि ते त्वया आगतं स्वयम्वरार्थं वरलोकं परिणेतृवृन्दं प्रति त्वचोकृत्य अनवलोकनाय अदर्शनार्थेवममुना दृश्यमानेन प्रकारेण प्रतिज्ञा कुतः कस्मात् कारणात् कृता

* वलितास्यसूचितमिति पाठान्तरं। सं० मू०।

अपीयमेनं मिथिलापुरन्दरं
निपीय दृष्टिः शिथिलास्तु ते वरं ॥ ६२ ॥
न पाहि पाहीति यदब्रवीरमुं
ममौष्ठ तेनैवमभूदिति क्रुधा।
रणच्छितावस्य विरोधिमूर्द्धभि-
र्विदश्य दन्तैर्निजमोष्ठमास्यते ॥ ६३ ॥

अपि त्वयुक्तमेतत्। वेति पाठे कुतो वेत्यन्वयः। अनवलोकनायैवेति अवधारणार्थो वा। न केवलं वरणायैव किन्तु अनवलोकनायापीति अप्यर्थो वा। किन्तर्हि कर्त्तव्यमित्यत आह। हे भैमि ते इयं दृष्टिः एनं मिथिलाया नगर्य्याः पुरन्दरं स्वामिनं निपीयैव शिथिलाऽस्तु एतद्वरं। सर्व्वथाऽनवलोकनाद्विलोकनं वरमिति राजान्तरवदनानुरागेणैनं विलोकयेत्यर्थः। अन्ये यद्यपि नावलोकितास्तथाप्येनं विलोकय। विलोकनेनापि एनं सभावयेत्यर्थः। पूर्व्वश्लोके सामान्यत उक्तत्वात्। अन्वादेशे (पा॰ २।४।३४) एनमिति समर्थनीयं॥ ६२ ॥

न पाहीति। अस्य विरोधिमूर्द्धभिर्व्वैरिशिरोभिः इति क्रुधा रणच्छितौ निजमोष्ठं दन्तैर्व्विदश्य विशेषेण दष्ट्वा आस्यते स्थीयते। इति किं। हे ओष्ठ त्वं अमुं नृपं प्रति पाहि पाहि इति यत्र अब्रवीः तेन कारणेन ममौष्ठविलुञ्चनपूर्व्वकं मरणमभूदिति। पाहि पाहीति यो वदति तमयं रक्षति। पाहीति पदोच्चारणे प्रथमं तवैव सामर्थ्यं पकारस्यौष्ठ्यत्वात् त्वया च

भुजेऽपसर्पत्यपि दक्षिणे गुणं
सहेषुणाऽऽदाय पुरः प्रसर्पिणे ।
धनुः परीरम्भमिवास्य सम्मदान्
महाहवे दित्सति वामबाहवे ॥ ६४ ॥
अस्योर्व्वीरमणस्य पार्व्वणविधुद्वैराज्यसज्जं यशः
सर्व्वाङ्गोज्ज्वलशर्व्वपर्व्वतसितश्रीगर्व्वनिर्व्वासि यत् ।

मदर्पत्वात्तदनुसारणान्मामयं मारितवानिति त्वमेवापराधी-त्यर्थः । शवमुष्टिन्यायेन दष्टैव न तु भुक्तेति आस्यत इत्यनेन सूचितं ॥ ६३ ॥

भुज इति । महाहवे महति रणसम्मर्द्दे दक्षिणेऽपसव्ये अथ च सरले अनुकम्पेऽपि भुजे इषुणा सह गुणं मौर्व्वीमपि आदाय गृहीत्वाऽपसर्पति कर्णपश्चाद्देशं गच्छति सति पुरः प्रसर्पिणे रिपु-सम्मुखयायिने दृढतरमुष्टयेऽस्य वामबाहवे सव्यभुजाय धनुः सम्म-दादिव दृढतरत्वजाताद्धर्षादिव परीरम्भमालिङ्गनं दित्सति दातुमिच्छति। दित्सतीनेति वा। अन्यस्मिन्नपि गुणिनि विश्वास-पात्रे सङ्ग्रामात् स्वजनमादाय पलायिते सति सङ्ग्रामं कर्त्तुं सम्मु-खाय वामाय दुष्टायापि अयमेव साधुरिति मत्वा सुवंशजेन केनचित्सम्भ्रमेणालिङ्गनं दीयते। दृढमुष्टिरतिशूरोऽयमिति । सङ्ग्रामे कर्णान्तपर्य्यन्तमाकर्षणाद्धनुस्सङ्कोचत्य शराम्मुञ्चन्नेवास्त इति भावः । वामबाहव इति । ददातियोगाच्चतुर्थी ॥ ६४ ॥

अस्येति । अस्योर्व्वीरमणस्य राज्ञः यद् यशः एतादृशं ।

तत्कम्बुप्रतिबिम्बितं किमु शरत्पर्जन्यराजिश्रियः
पर्य्यायः किमु दुग्धसिन्धुपयसां सर्व्वानुवादः किमु ॥ ६५ ॥
निस्त्रिंशत्रुटितारिवारणघटाकुम्भास्थिकूटाऽवट-
स्थानस्थायुकमौक्तिकोत्करकिरः कैरस्य नायङ्करः।

कीदृशं यशः। पर्व्वणि भवः पार्व्वणः पूर्णो विधुश्चन्द्रः तस्य द्वैराज्यं द्वयोराज्ञोः कर्म्म तत्र सज्जं तत्परं पार्व्वणचन्द्रसदृशमित्यर्थः। तथा सर्व्वेष्वङ्गेषु उज्ज्वलस्य धवलस्य शर्व्वपर्व्वतस्य हरनिवास-भूतकैलासस्य सितश्रीः श्वेतकान्तिस्तद्विषये यो गर्व्वस्तस्य नि-र्व्वासि निराकारकं। कैलासादपि धवलतरं एवम्भूतं यत् यशः तत्कम्बुप्रतिबिम्बितं सामुद्रशङ्खप्रतिबिम्बं किमु। तथा शरदि पर्जन्यराजिर्मेघपङ्क्तिस्तस्याः श्रीर्धवलिमशोभा तस्याः पर्य्यायः किमु। शब्दस्य शब्दान्तरेणोच्चारः पर्य्यायः। तथा दुग्धसिन्धोः क्षीरोदस्य पयसां दुग्धानां सर्व्वेण प्रकारेणानुवादः पुनरभि-धानं किमु। चन्द्रादितुल्यमेतद्यश इति भावः। अन्योऽपि अधिष्ठितद्वैराज्यः प्रतिपक्षं निरस्यति ॥ ६५ ॥

निस्त्रिंशेति। अस्य नृपस्यायं दृश्यमानः करः कैरेवम्भूत इव न उत्प्रेक्षितः तर्कितः अपि तु सर्व्वैरप्येवमेव तर्कितः। कीदृशः करः। निस्त्रिंशेन खड्गेन कृत्वा त्रुटितायाः खण्डनं प्राप्तायाः अरिवारणघटायाः वैरिगजपरम्परायाः कुम्भानां गण्डस्थलानां अस्थिकूटा अस्थिसमूहास्तेषामवटस्थाने गर्त्तलक्षणस्थाने स्थायुकः स्थितिशीलो मौक्तिकोत्करो मुक्तासङ्घस्तस्य किरः विक्षेपकः।

उन्नीतश्चतुरङ्गसैन्यसमरत्वङ्गत्तुरङ्गक्षुर-
क्षुण्णासु क्षितिषु क्षिपन्निव यशःक्षोणीजवीजव्रजं ॥ ६६ ॥
अर्थिभ्रंशवशप्रभवत्फलभरव्याजेन कुब्जायितः
सत्यस्मिन्नतिदानभाजि कथमप्यास्तां स कल्पद्रुमः।

तथा चत्वारि करिनररथतुरगलक्षणानि अङ्गानि येषामेवम्भू-
तानि सैन्यानि येषु ते समराः सङ्ग्रामास्तेषु त्वङ्गन्तश्चित्रं गच्छ-
न्तस्तुरङ्गास्तेषां क्षुरैश्चरणाग्रनखतीक्ष्णाघातैः क्षुण्णासु विदा-
रितासु कृष्टासु क्षितिषु रणक्षेत्रभूमिषु यशोलक्षणस्य क्षोणीजस्य
तदुत्पादकं वीजव्रजं वीजसङ्घं क्षिपन्निव वपन्निव। यशोवृक्षस्य
शुभ्रत्वात्तत्कारणेन वीजेन शुभ्रेणैव भवितव्यं। अरिकरिकुम्भ-
स्थमुक्ताफलानि वीजस्थाने जातानीत्यर्थः। अन्योऽपि पात्रस्थं
वीजसङ्घं स्वकरेणाकृष्य हलकृष्टासु भूमिषु वपति। वैरिकरिणां
हननादेतस्य वहु यशो जातमिति। तैक्ष्ण्यात्क्षुराः खुरा इति
तुल्यः शब्दः। निर्गतस्त्रिंशतोऽङ्गुलिभ्यो निस्त्रिंशः खड्ग इति।
डप्रकरणे सङ्ख्यायास्तत्पुरुषस्योपसङ्ख्यानं निस्त्रिंशाद्यर्थमिति डः।
स्थायुकं। लषपतपदस्थेत्युकञ् (पा० ३।२।१५४)। किरतीति
किरः। इगुपधेति कः (पा० ३। १। १३५)॥ ६६॥

अर्थीति। स कल्पद्रुमः प्रसिद्धः केवलं कल्पितप्रदः। अस्मिन्
राजनि अतिदानं अतिशयितं दानं भजति अकल्पितमपि
ददति सति अर्थिभ्रंशाद्याचकैर्वर्जनात् पूर्व्वमल्पान्यपि व्ययाभा-
वाद्वहूभवन्ति वहूनि जायमानानि फलानि तेषां भरव्याजेन

आस्ते निर्व्ययरत्नसम्पदुदयोदग्रः कथं याचक-
श्रेणीवर्जनदुर्य्यशोनिविडितव्रीडस्तु रत्नाचलः ॥ ६७ ॥
स्मजामि किं विघ्नमिदं नृपस्तुता-
वितीङ्गितैः पृच्छति तां सखीजने।

भारगौरवमिषेण कुब्जायितः खर्व्ववदाचरितोऽतिनम्रः सन् कथमप्यास्तां महता क्लेशेन। अथ च लज्जागोपनप्रकारेणापि तिष्ठतु कालं वातिवाहयतु। नम्रत्वेन लज्जागोपनं युक्तमिति भावः। तु पुनः रत्नाचलः याचकश्रेण्या वर्जनात् परित्यागात् जातेन दुर्य्यशसाऽपकीर्त्त्या निविडिता घनीकृता व्रीडा लज्जा यस्यैवम्भूतोऽपि याचकाभावान्निर्व्यययाऽव्ययया रत्नसम्पदा कृत्वा य उदयोऽनुस्यूता वृद्धिस्तेनोदग्रः उच्चशिखरोऽथ वा नम्र एव कथमास्तेऽपि तु लज्जितस्यानम्रत्वमयुक्तमेवेत्यर्थः। कल्पवृक्षस्य स्वर्गस्थितत्वाद्दुष्प्रापतया फलभरव्याजेन नम्रतया च लज्जा-परिहारः सम्भवः। रोहणाद्रेस्तु एकलोकनिवासाद्दुष्प्राप-त्वाभावेऽपि याचकैर्वर्जनाल्लज्जातिशयमतिनम्रत्वं युक्तं तत्तु तस्य नास्तीत्याश्चर्य्यं। कल्पवृक्षमेरुभ्यामप्ययमधिको दानशूर इति भावः। कुब्जायितः। लोहितादेराकृतिगणत्वादाचारे क्यष् (पा० ३। १। १३) ॥ ६७ ॥

स्मजामीति। वधूर्भैमी सखीजने इङ्गितैर्भ्रूभङ्गादिचेष्टितैः कृत्वा तां भैमीमिति पृच्छति सति स्वाभिप्रायज्ञापनार्थं स्मि-ताय वक्त्रं यत् अवक्रयत् वक्रं चक्रे तदद्दनवक्रणमेव तन्नृपे तस्मिन्

स्मिताय वक्त्रं यदवक्रयद्वधू
स्तदेव वैमुख्यमलक्षि तन्नृपे ॥ ६८ ॥
दृशाथ निर्दिश्य नरेश्वरान्तरं
मधुस्वरा वक्तुमधीश्वरा गिरां ।
अनूपयामास विदर्भजाश्रुती
निजास्यचन्द्रस्य सुधाभिरुक्तिभिः ॥ ६९ ॥

राज्ञि वैमुख्यं पराङ्मुखत्वं अलक्षि अलक्षितं । अन्यतो विलोकनादेवात्रानादरोऽस्या इतीति सखीभिर्लोकितेन राज्ञा वा तर्कितमित्यर्थः । इति किं । हे भैमि अहं अयश्चासौ नृपश्च इदं-नृपस्तस्य स्तुतौ विघ्नं सृजामि किं । वैलक्ष्यमिति पाठे असावधानतया यस्मान्मुखमवक्रयत् तस्मादेव भूपगतमेव वैलक्ष्यं मालिन्यं लोकैर्लक्षितमित्यर्थः । स्मिताय । स्मितं कर्त्तुं क्रियार्थोपपदेति चतुर्थी (पा० २ । ३ । १४) ॥ ६८ ॥

दृशेति । अथ मधुरस्वरा गिरामधीश्वरा वक्तुं वर्णयितुं दृशा नेत्रव्यापारेण नरेश्वरान्तरं नृपान्तरं निर्दिश्य दर्शयित्वा विदर्भजाश्रुती भैम्याः कर्णौ निजास्यं स्वीयवदनमेव चन्द्रस्य सुधाभिरमृतरूपाभिरुक्तिभिः कृत्वा अनूपयामास परिपूर्णे चकार उवाचेत्यर्थः । अनुगता आपो यत्रानूपो देशः । ऋगादिना समासान्ते ऊदनोर्देश इत्यूकारः (पा० ६ । ३ । ९८) । अनूपे जलप्लुते चकार । तत् करोतीति णिच् । लक्षणया मधुरस्वराकर्णनस्तिमिते चकारेत्यर्थः । अपूपुरन्नीमभुवः श्रुती पुनरिति पाठे णौ चङ्युपधाया इति किं वाच्यमित्युपधाह्रस्वः (पा० ७ । ४ । १) ॥ ६९ ॥

स कामरूपाधिप एष हा त्वया
न कामरूपाधिक ईक्ष्यतेऽपि यः।
त्वमस्य सा योग्यतमाऽसि वल्लभा
सुदुर्लभा यत्प्रतिमल्लभा परा ॥ ७० ॥
अकर्णधाराशुगसम्भृतां गतां
गतैररित्रेण विनास्य वैरिभिः।

स इति। एष कामरूपस्य देशविशेषस्याधिपः। अथ च मदनरूपस्यापि स्वामी तद्रूपधारणादित्यर्थः। स कः। यस्त्वया न ईक्ष्यतेऽपि न नाभिलष्यत इति तु किं वाच्यमित्यर्थः। हा कष्टमनुचितमेतत्। यतः कामाद्रूपेणाधिक अतिसुन्दरः। अथवा कामाद्रूपेणाधिको नेति काक्वा। यतोऽयं कामादधिकस्तस्मादस्य योग्यतमा सा त्वं वल्लभाऽसि नितरामुचिता प्रेयसी भवसि। सा का। परा उत्कृष्टा यस्यास्तव प्रतिमल्ला तुल्या भा कान्तिः सुतरां दुर्लभा यस्याः। सदृशी कान्तिः कस्याश्चिदपि न दृष्टचरी। अस्यापि सुन्दरत्वादित्यर्थः। अथ च पराऽन्या स्त्री यस्यास्तुल्यकान्तिर्दुर्लभा सातिसुन्दरी त्वमित्यर्थः। त्वमतिसुन्दरी अस्य सुतरामयोग्येत्यर्थ इति वा व्याख्यानान्तरं श्लिष्टत्वादुपेक्ष्यं। सुदुर्लभा। नसुदुर्भ्यां केवलाभ्यामिति नुम्निषेधः (पा० ७।१।६८) ॥ ७० ॥

अकर्णेति। अस्य वैरिभिः समरे निमज्य निपत्य यावान् सकलस्तरणिः सूर्यस्तन्मण्डलस्येत्यर्थः। भिदां भेदं विधाय कृत्वा-भवः संसार एव दुस्तरत्वादर्णवस्तीर्णः मोक्षप्राप्तेरपुनरावृत्ते-

विधाय यावत्तरणेर्भिदामहो
निमज्य तीर्णः समरे भवार्णवः ॥ ७१ ॥

रित्यर्थः। अहो आश्चर्य्यं शूरतरोऽयमित्यर्थः । किम्भूतः । अरिभ्यस्त्रायत इत्यरित्रं कवचं तेन विनाऽथवारेरस्मात् सकाशाद्रक्षकेणान्येन शूरतरेण विना न विद्यन्ते कर्णाः कर्णाकारा लोहकण्टका यासां एवंविधा धारा येषामेवंभूताः । कर्णान् घरन्ति कर्णधाराः न कर्णधारा अकर्णधारा एवम्भूता वा आशुगा बाणाः अदृष्टाः शरास्तैः संभृतानि प्रोतानि अङ्गानि अवयवा येषां तेषां भावस्तत्ता तां गतैः प्राप्तैः प्रत्यवयवविद्धैरित्यर्थः । यावत् साकल्ये। अथ च कर्णधारो नाविकः आशुगो वायुस्ताभ्यां कृत्वा संभृतानि परिपुष्टानि अङ्गानि रज्जुस्तम्भादीनि तरणोपायभूतानि च येषां कर्णधारानुकूलवायुना वा संभृतान्यङ्गानि येषां एवम्भूता ये न भवन्ति तद्भावं गतैः। अरित्रेण जलक्षेपणकाष्ठेन विना तस्याप्यभावे यावत्तरणे सकलाया नौकाया भेदं विधाय सकलां नौकां स्फोटयित्वा निमज्य बुडित्वा अर्णवस्तीर्णः। हे भव शिव अहो अत्याश्चर्य्यं कर्णधाराद्यभावे नौकायाश्च भेदे बुडित्वा तरणं तत्रापि समुद्रस्येति अत्याश्चर्य्यं अघटमानघटने च आश्चर्य्यसूचकं शिवनामोच्चारणं क्रियते । कर्णधारस्तु नाविकः। नौकादण्डः क्षेपणी स्यादरित्रं। स्त्रियां नौस्तरणिस्तरिः। द्युमणिस्तरणिर्मित्र इत्यमरः ॥ ७१ ॥

अमुष्य भूलोकभुजो भुजोष्मभि-
स्तपर्तुरेव क्रियतेऽरिवेश्मनि ।
प्रपां न तत्रारिवधूस्तपस्विनी
ददातु नेत्रोत्पलवासिभिर्जलैः ॥ ७२ ॥

एतद्दत्तासिघातस्रवदसृगसुहृद्दंशसार्द्रैन्धनैतद्-
दोरुद्दामप्रतापज्वलदनलमिलद्भूमधूमभ्रमाय ।

अमुष्येति । भूलोकभुजो भूपालस्यामुष्य भुजोष्मभिर्वाहुप्रतापैः अरिवेश्मनि अतिसन्तापकारित्वात्तपर्त्तुरेव ग्रीष्मर्त्तुरेव यद्यस्मात् क्रियते तस्मात् तत्र ग्रीष्मर्त्तौ तपस्विनी दीनारिवधूः नेत्राण्येवोत्पलानि तेषु वासिभिर्जलैः अश्रुभिः । अथ च नेत्रतुल्यकमलानां यो वासः परिमलः स विद्यते येषु तैर्जलैः कृत्वा प्रपां पानीयशालां न ददातु अपि तु ददात्वेव । तपस्विनी ग्रीष्मर्त्तौ सुगन्धिभिरुदकैः प्रपां करोति । अनेन पतिमारणात् शोकव्याप्ता सर्व्वाप्यरिनारी रुरोदैवेति भावः । प्रपा पानीयशालिकेत्यमरः ॥ ७२ ॥

एतदिति । आजिस्थलीषु सङ्ग्रामभूमिषु एतन्नासीरस्य एतत्सेनामुखस्य पुरो गच्छन्तो वाजिव्रजास्तेषां खुरेभ्यस्तुरणाग्रेभ्यो जातैरुद्धूलिता रजोराजिः रेणुपङ्क्तिः एतस्य दिग्जैत्रयात्रा दिग्जयकारिणो या यात्राः वैरिसम्मुखं गतास्तासु असममतुल्यं समरस्य भर सम्मर्द्दं पश्यतः कस्य जनस्य एतेन राज्ञा दत्तेभ्योऽसिघातेभ्यः स्रवदसृग्रक्तं येषां एतेन दत्तोऽसिघातो येभ्य

एतद्दिग्जैत्रयात्रासमसमरभरं पश्यतः कस्य नासीत्
एतन्नासीरवाजिव्रजखुररजरोराजिराजिस्थलीषु ॥ ७३ ॥
क्षीरोदन्वदपः प्रमथ्य मथितादेशेऽमरैर्निर्म्मिते
स्वाक्रम्यं सृजतस्तदस्य यशसः क्षीरोदसिंहासनं ।

अत एव सवदस्त्रजो वाऽसुहृद्दंशा अरिसङ्घा अथ च तद्रूपा वेणवस्त एव सार्द्राणीन्धनानि दाह्यकाष्ठानि यस्यैवंभूत एतस्य दोर्ष्णोर्बाहोरुद्दामप्रतापस्तीव्रप्रतापः स एव ज्वलन्दीप्यमानोऽनलः तस्य मिलन् सम्भवन् भूमा बाहुल्यं यस्यैवंभूतो बहुतरो धूमस्तस्य भ्रमाय सादृश्याद्धूमेऽपि रजसि धूम इति बुद्धये नासीदपि तु सर्व्वस्यापि। आर्द्रवेणुरूपेन्धनं दहतो वह्नेर्भूयान् धूमो भवति । सर्व्वेऽप्यरय एतत्प्रतापवह्निना दग्धाः । अस्यपतिरयमिति भावः । सार्द्रमित्यार्द्रपर्य्यायः । मिलद्भूमभूमेति पाठे मिलतो धूमस्य बाहुल्यं तद्भ्रान्तये ॥ ७३ ॥

क्षीरेति । केषां जगतां भुवनानां सम्बन्धिना जनेनास्य राज्ञो यशसोऽभिषेक एवात्मनो नाजनि नाकारि अपि तु स्वर्गादिस्थितेन सर्व्वेणापि लोकेनैतदीययशसोऽभिषेकः कृतः । विशेषेणाधिष्ठानमाह । किंभूतस्य यशसः । क्षीरोदन्वदपः क्षीरोदन्वान् क्षीरसमुद्रस्तस्यापो जलानि दुग्धरूपाणि प्रमथ्य मन्दराचलेन कृत्वा प्रकर्षेण विलोड्यामरैर्मथनक्रियायोगान्मथितमिति आदेशे सञ्ज्ञायां निर्म्मिते कृतायां अथ च निर्जलं मन्थमथितं दधि मथितमित्युच्यते। ततश्च क्षीरस्यापि मथनक्रिया-

केषां नाजनि वा जनेन जगतामेतत्कवित्वामृत-
स्रोतःप्रोतपिपासुकर्णकलशीभाजाभिषेकोत्सवः ॥ ७४॥

योगादृत्रोर्भूवन्मथितरूपे आदेशे निर्मिते सति जले स्थित्य-
सम्भवत्क्षीरोदन्वदुदके दुग्धरूपे अतिघने क्षते सतीत्यर्थः।
क्षीरोदरूपं सिंहासनं शुभ्रवस्तुमात्रापेक्षया तस्यातिशुभ्रत्वा-
द्भद्रं यद्भद्रपीठं तत्सुखेनात्मनाथ च सुखेन आयासरहितं यथा
तथा आक्रम्यमुपवेशनयोग्यं सृजतः कुर्वतः क्षीरोदपदमधि-
तिष्ठत इत्यर्थः। किंभूतेन जनेन। एतद्रचितं कवित्वं एतत्स-
म्बन्धिकविभिर्निर्मितं कीर्त्तिवर्णनरूपं कवित्वं तदेव स्वादुतर-
त्वादमृतं तस्य स्रोतसि प्रवाहे प्रोतौ स्यूतौ भृतौ सादरमा-
कर्णनेच्छू अथ च जलभरणेच्छू कर्णाविव कलशौ महान्तौ
कलशौ भाजा भजता। लोके हि कस्मिंश्चिद्राजनि केनचिन्म-
थिते तदीयं सिंहासनमधिष्ठितोऽन्यस्य केनचिद्वारिपूर्णेन कलशे-
नाभिषेकः क्रियते। घनीरूपतया उपवेशनयोग्यतां सूचयितुं
मथितादेशे क्षते सतीत्युक्तं। जलोपरि उपवेशनासम्भवात्। क्षी-
रोदादपि विमलतरं महीयस्यैतद्यशो वैदेशिकैर्लोकत्रयसञ्चारि
क्षतमिति भावः। तक्रं ह्युदश्विन्मथितं पादाद्यर्धाम्बु निर्जल-
मित्यमरः। क्षीरोदन्वदपः। उदन्वानुदधौ चेति (पा० ८। २।
१३) साधुः। ऋक्पूरब्धित्यप्रत्ययः (पा० ५। ४। ७४)।
आक्रम्यं। पोरदुपधादिति यत् (पा०। ३। १। ९८)।
अजनि। कर्मणि चिण् (पा० ३। १। ६६) ॥ ७४ ॥

समिति पतिनिपाताकर्णनद्रागदीर्ण-
प्रतिनृपतिमृगाक्षीलक्षवक्षःशिलासु।
लिखितलिपिरिवोरस्ताडनव्यस्तहस्त-
प्रखरनखरटङ्कैरस्य कीर्त्तिप्रशस्तिः॥ ७५॥
विधाय ताम्बूलपुटीं कराङ्गगां
बभाण ताम्बूलकरङ्कवाहिनी।

समितीति। अस्य राज्ञः कीर्त्तिप्रशस्तिर्वर्णनपङ्क्तिः समिति सङ्ग्रामे पतीनां निपातो मरणं तस्याकर्णनेन द्राक् शीघ्रं अदीर्णानि प्रतिनृपतिमृगाक्षीणां लक्षस्य वक्षांसि तान्येव तत्क्षणमेवाविदीर्णत्वाच्छिलास्तासु शोकवशादुरस्ताडने व्यस्तयो-र्दृढनिवेशितयोर्हस्तयोः प्रखरा अतितीक्ष्णा नखरा नखा एव टङ्काः पाषाणदारणलोहविकारास्तैर्रचितलिपिरिव रचित-लेखनेवास्तीति शेषः। अन्यस्यापि कीर्त्तिप्रशस्तिः शिलासु टङ्किकाभिरुत्कीर्य्य लिख्यते। सर्व्वेऽप्यरयोऽनेन हतास्तत्स्त्रियः शोकवशादुरस्ताडनं कुर्व्वन्ति अतिशूरत्वादस्य कीर्त्तिर्भवती-त्यर्थः। दृढशोकेऽप्यदीर्णत्वाच्छिलात्वं। शोकातुरस्योरस्ताडनं जातिः। टङ्कः पाषाणदारण इत्यमरः। समिदाजौसमित्सु चेति॥ ७५॥

विधायेति। ताम्बूलस्य करङ्कः सुवर्णादिरचितहंसाद्या-कारं ताम्बूलधारणपात्रं पटीति लोके तस्य वाहिनी धारिणी काचित् सखी दमस्वसुर्भावं तद्दर्शननिषेधरूपं अवेत्य ज्ञात्वा

दमस्वसुर्भावमवेत्य भारतीं
नयाऽनया वक्त्रपरिश्रमं शमं ॥ ७६ ॥
समुन्मुखीकृत्य बभार भारती
रतीशकल्पेऽन्यनृपे निजं भुजं ।
ततस्त्वसद्बालपृषद्विलोचनां
शशंस संसज्जनरञ्जनीं जनीं ॥ ७७ ॥

भारतीं इति बभाण । किं कृत्वा । ताम्बूलपुटीं पूगीफलचूर्णख-दिरपर्णानि यत्रैकत्र क्रियन्ते । यां मध्यदेशभाषया गुलविडेति व्यवहरन्ति । तां देव्यै दातुं कराङ्कगां स्वीयकरतलमध्यगतां वा कृत्वा करस्थां गृहीत्वेत्यर्थः । इति किं । हे देवि त्वं अनया वीटिकया एतदीयबहुवर्णनजनितं वक्त्रस्य सकलं परिश्रमं शमं नय बहुवर्णनजनितं शोषं शान्तिं प्रापयेति । एतत्स्तुते-र्विरमेत्यर्थः । अन्योऽपि शुष्कमुखो वीटिकया श्रमं शमं नयति ॥ ७६ ॥

समिति । भारती रतीशकल्पे कामतुल्येऽन्यनृपे निजं भुजं बाहुं सम्यग् उन्मुखीकृत्य बभार भैम्यै तं दर्शयितुं तदभिमुखं चकार । ततः अनन्तरं त्रसद्बालपृषद्विलोचनां भीतबालह-रिणनेत्रां संसज्जनानां सभ्यानां रञ्जनीं अनुरागजनिकां जनीं वरार्थिनीं तां भैमीं शशंस अभाणीत् । रतीशतुल्य इति च पाठः । रञ्जनीं । मृगरमणाभावान्नलोपाभावः (पा० ६ । ४ । २४ । स्० ३ वार्त्तिके ।) ॥ ७७ ॥

अयं गुणौघैरनुरज्यदुत्कलो
भवन्मुखालोकरसोत्कलोचनः।
स्पृशन्तु रूपामृतवापि नन्वमुं
तवापि दृक्तारतरङ्गभङ्गयः। ७८॥

अनेन सर्व्वार्थिकृतार्थताकृता
ऽऽहतार्थिनौ कामगवीसुरद्रुमौ।

अयमिति। हे भैमि गुणौघैः सौन्दर्य्यादिगुणसङ्घैः अनुरज्यन्तोऽनुरक्ता भवन्तः उत्कला लक्षणया तद्देशनिवासिनो लोका यत्र। अथ च गुणौघैरनुरज्यन्त उत्कृष्टाश्चतुःषष्टिःकला यत्र तैरुपलक्षितोऽयं नृपः। यस्मात् भवन्मुखालोके रसेनानुरागेणोत्कलोचन उत्कण्ठितनेत्रोऽस्तीति शेषः। तस्मान्ननु हे रूपामृतवापि सौन्दर्य्यामृतदीर्घिके सुन्दरि तवापि दृशोस्तारा उज्ज्वला विशाला वा चञ्चला वा तरङ्गाः पुनर्व्यापाररूपाः कल्लोलास्तेषां भङ्गयः प्रकारविशेषा अमुं स्पृशन्तु। अयं त्वां पश्यति त्वमप्येनं कटाक्षैः पश्य योग्यत्वादिति भावः। अनुरज्यदुत्कल इत्यनेन जनानुरञ्जनात् सम्पदाधिक्यं सूचितं। अन्यस्यामपि जलवाप्यां चञ्चलतरङ्गभङ्गयो भवन्ति। अनुरज्यदिति। श्यनो ङित्वान्नलोपः (पा॰ १।४।२४)॥ ७८॥

अनेनेति। कामगवीसुरद्रुमौ कामधेनुकल्पवृक्षौ मिथः अन्योन्यं क्रमेण पयःसेचनपल्लवाशने दुग्धसेचनपल्लवभाजने प्रदाय प्रकर्षेण दत्वा दानस्य व्यसनं अतिशये प्रत्यहमवश्यकरणीय-

मिथःपयःसेचनपल्लवाशने
प्रदाय दानव्यसनं समाप्नुतः ॥ ७९ ॥
नृपः कराभ्यामुदतोलयन्निजे
नृपानयं यान् पततः पदद्वये।
तदीयचूडाकुरुविन्दरश्मिभिः
स्फुटेयमेतत्करपादरञ्जना ॥ ८० ॥
यत् कस्यामपि भानुमान्न ककुभि स्थेमानमालम्बते
जातं यद्वनकाननैकशरणप्राप्तेन दावाग्निना।

तया प्राप्तस्याग्रहं समाप्नुतः समाप्तिं नयतः। कस्मादित्यत आह। किम्भूतौ। सर्व्वार्थिनां सर्व्वयाचकानां अभीष्टदानात् या कृतार्थता जन्मसाफल्यलक्षणं कृतार्थत्वं तां करोत्येवंभूतः कृत् तेनानेनातिदानात् सम्प्रत्याहृता आनीता अर्थिनो याचका ययोस्तौ। अर्थ्यन्तराभावात् कामगव्या कल्पवृक्षस्य दुग्धसेकः कृतस्तेन च पल्लवा भक्षयितुं तस्यै दत्ता इत्यर्थः। दानशूरोऽयमिति भावः ॥ ७९ ॥

नृपेति। अयं नृपः निजे पदद्वये प्रणामवशात् पततः नम्रान् यान् नृपान् कराभ्यां कृपया शिरसि धृत्वा उदतोलयत् उत्थापयामास। तदीया राजकीया याश्चूडामुकुटास्तासां कुरुविन्दरश्मिभिः माणिक्यशोणशोभाभिः कृतेयमेतस्य करपादयोः रञ्जना रक्तिमा स्फुटा दृश्यत इति शेषः ॥ ८० ॥

यदिति। भानुमान् सूर्य्यः कस्यामपि ककुभि दिशि स्थेमानं

एषैतद्भुजतेजसा विजितयोस्तावत्तयोरौचिती
धिक्तं वाडवमम्भसि द्विषि भिया येन प्रविष्टं पुनः ॥ ८१ ॥

स्थिरत्वं यत् नालम्बते अङ्गीकरोति किन्तु सर्व्वदा परिभ्रमत्येव। दावाग्निना वनवह्निना च घनं अतिगहनं काननं तल्लक्षणं एकं केवलं शरणं रक्षितारं प्राप्तेन तदेकाश्रयेण यज्जातं। एतस्य भुजतेजसा विशेषेण जितयोस्तयोः सूर्य्यदावानलयोस्तावन्निश्चितं एषा औचिती युक्तकारितरता। भीतस्य व्याकुलता वनाश्रयणञ्च युक्तं इत्यर्थः। मानी हि जितः सन् लज्जया मुखमदर्शयन् पुनर्दर्शनभयेनैकस्मिन्देशे वासं त्यक्त्वा सर्व्वत्र परिभ्रमति सर्व्वथाऽन्यस्य प्रवेष्टुमशक्यं घनं गहनं वाविशति। ताभ्यां युक्तमेव कृतमित्यर्थः। तं वाडवं वडवानलं पुनर्धिक् येनास्य भिया द्विषि सहजशत्रौ अम्भसि समुद्रजले प्रविष्टं निमग्नं। मानी हि पराजितोऽपि वैरिणः शरणं नैति अयन्तु गत इति अभिमानित्वाभावान्निन्द्य एवेत्यर्थः। अथ च वाडवो ब्राह्मणः। ततश्च ब्राह्मणत्वाच्छत्रावपि भयेन प्रवेशो युक्तः। शत्रुणा च तस्य रक्षणं युक्तं इति च सूचितं। सूर्य्यादेरप्येतदीयं तेजोऽधिकतरमिति भावः। खेमानमिति। स्थिरशब्दाद्भावे पृथ्व्यादित्वादिमनिचि (पा॰ ५।१।१२२) प्रियस्थिरेति। स्थादेशः (पा॰ ६।४।१५७)। शरणं प्राप्तेन। द्वितीयाश्रितेति समासः (पा॰ २।१।२४)॥ ८१ ॥

अमुष्योर्वीभर्त्तुः प्रसृमरचमूसिन्धुरभवै-
रवैमि प्रारब्धे वमथुभिरवश्यायसमये।
न कम्पन्तामन्तः प्रतिनृपभटा म्लायतु न तद्-
वधूवक्त्राम्भोजं भवतु न स तेषां कुदिवसः॥ ८२॥

अमुष्येति। अमुष्योर्व्वीभर्त्तुरणसंरम्भात् प्रसृमराः प्रसरणशीलाश्चमूसिन्धुराः सेनागजास्तेभ्यो भवैः समुत्पन्नैर्वमथुभिः करिकराग्रजातैर्मदजलविन्दुभिर्जलविन्दुभिर्वा अवश्यायसमये नीहारकाले हिमर्त्तौ प्रारब्धे निर्म्मिते सति प्रतिनृपभटा वीरा अपि रिपुनृपा अन्तस्तन्मध्ये स्वीयमनसि वा न कम्पन्तां अपि त्वस्माद्भयेन युक्त एव कम्पस्तेषां। तथा तेषां रिपूणां वध्वो रमण्यस्तासां वक्त्राम्भोजं न म्लायतु अपि तु भाविनः प्राणेशवधस्य निश्चितत्वात् तासां मुखस्य म्लानिरुचितैव। तथा स प्रसिद्धो रणवासरस्तेषां वैरिणां तत्स्त्रीणां च कुत्सितो दिवसोऽशुभरूपो वासरो न भवत्वपि तु भवत्वेव। वधनिश्चयाद्वैरिणां तत्स्त्रीणाञ्च शोकवशादित्यहमवैमि। हिमर्त्तौ शरीरकम्पः कमलम्लानिर्दुर्द्दिनश्च भवति। क्रूरतरोऽयं गजपतिरिति भावः। सिन्धुरभरैरिति पाठे जगसङ्घैः कर्तृभिः वमथुभिः कृत्वैति व्याख्येयं। वमथुः करिसीकरः। अवश्यायस्तु नीहार इत्यमरः। प्रसृमरेति। सृघस्यद इति क्मरच् (पा० ३।२।१६०।) अवश्यायेति। श्याद्व्यधेति णः (पा० ३।१।१४१)। तेषां। पुमान् स्त्रियेत्येकशेषः (पा० १।२।६७।)॥ ८२॥

आत्मन्यस्य समुच्चितीकृतगुणस्यादौतरामौचिती
यद्गात्रान्तरवर्जनाद्जनयद्भूजा निरेष द्विषां।
भूयोऽहंक्रियते स्म येन च हृदा स्कन्धो न यश्चानमत्
तन्मर्म्माणि दलं दलं समिदलंकर्म्मीणबाणव्रजः॥ ८३॥
दूरं गौरगुणैरहंकृतिमृता जैत्राङ्कारे चर-
त्येतद्दोर्यशसि प्रयाति कुमुदं बिभ्यन्न निद्रां निशि।

आत्मनीति। आत्मनि स्वीये स्वरूपे समुच्चितीकृतगुणस्य मेलितसौन्दर्य्यादिसर्व्वगुणस्यास्य राज्ञः अदौतरामतिशयेनौचितीयं। यत एष भूजानिर्भूपतिर्द्विषां गात्रान्तराणां हृत्स्कन्धेतराणां वर्जनात् अवयवान्तरं परित्यज्येत्यर्थः। येन च हृदा भूयः पुनः पुनरतितरां अहंक्रियते स्म अहङ्कारिणा जातमित्यर्थः। यश्च स्कन्धः नानमत् नम्रो न भूतः तस्यैव स्कन्धस्य मर्म्माणि अतिमृदूनि जीवस्थानानि दलं दलं खण्डं खण्डं अजनयत् चकार नान्येषां। किंभूतः। समिति सङ्ग्रामे अलङ्कर्म्मणे अलङ्कर्म्मीणोऽरिमारणसमर्थः बाणव्रजो यस्य। अपराधी हि राज्ञा दण्ड्यः। तत्स्कन्धस्यैवापराधो नान्येषां तस्यैव दण्डं कृतवानान्येषामित्यतितरामस्यौचितीत्यर्थः। अयञ्च सगुणः सदर्पान् नम्रांश्च मारयति शरणागतांस्तु रक्षतीति भावः। कर्म्मक्षमोऽलङ्कर्म्मीण इत्यमरः। अलङ्कर्म्मणे, पर्य्यादयो ग्लानाद्यर्थे चतुर्थ्येति समासे (पा॰ २।२।१८ सू॰ ७वा॰) अलङ्कर्म्मशब्दात्स्वार्थे, अपर्प्याप्ति(?)तंस्वलङ्कर्म्मेति खः (पा॰ ५।४।७।)॥ ८३॥

दूरमिति। गौरगुणैः धवलवर्णैः कृत्वा दूरं भृशं अहंकृति-

धम्मिल्ले तव मल्लिकासुमनसां माल्यं भिया लीयते
पीयूषस्रवकैतवाद्धृतदरः शीतद्युतिः स्विद्यति ॥ ८४ ॥
एतद्गन्धगजस्तृषाम्भसि भृशं कण्ठान्तमज्जत्तनुः
फेनैः पाण्डुरितः स्वदिक्करिजयक्रीडायशःस्पर्द्धिभिः।

सतां अहङ्कारवतां वस्तूनां जैत्रञ्च तदहङ्कारि च तस्मिन् जयाहङ्कारिणि एतद्वीर्यशसि एतस्य बाहुयशसि सकलेषु जगत्सु चरति प्रसरति सति अथ च स्वप्रतिमल्लगवेषणाय भुवनं परिभ्रमति सति बिभ्यत् भीतं कुमुदं निशि निद्रां स्वप्नमथ च सङ्कोचं न प्रयाति। तथा मल्लिकासुमनसां माल्यं माला अस्माद्भिया तव धम्मिल्ले केशपाशे ग्रन्थनविशेषे लीयते आत्मानं गोपायति। अथ वा अदृश्यं तिष्ठति। तथा शीतद्युतिश्चन्द्रो धृतदरः प्राप्तभयः सन् पीयूषस्रवकैतवादमृतस्रवणव्याजात् स्विद्यति स्वेदं मुञ्चति। अथ च हिमकणान् मुञ्चति। एकयोद्धा अहङ्कार इति वा। कुमुदादिभ्योऽप्यधिकं धवलमेतदीयं यश इति भावः। वह्निर्न धारयेन्माल्यमिति केशान्तर्गतमाल्यधारणाद्भैम्याः सदाचारत्वं सूचितं ॥ ८४ ॥

एतदिति। एतस्य गन्धगजः यः सप्तसु स्थानेषु स्रवति स गन्धगजः। स्वदानमलमूत्रादिगन्धेन जितान्यकरी। विरोधिकरिगन्धमसहमान इति वा गन्धगजः। कराम्भोवमिशाजात् शुण्डदण्डाग्रेण मुखधृतगण्डूषजलवमनमिषात् अम्बुधेः समुद्रस्याभ्रमुनाख्याः करिण्या वल्लभस्यैरावणस्य विरहं पुत्रवियोगजनितं

दन्तद्वन्द्वजलानुबिम्बनचतुर्दन्तः कराम्भोवमि-
व्याजादभ्रमुवल्लभेन विरहं निर्वापयत्यम्बुधेः ॥ ८५ ॥
अथैतदुर्व्वीपतिवर्णनाद्भुतं
न्यमीलदास्वादयितुं हृदीव सा।

शोकं निर्वापयति शमयति। किंभूतः। भृशं नितरां तृषा पिपासया सफेनत्वात्क्षीराब्धेः पुरः प्रसर्पणेन कण्ठान्तं ग्रीवां मर्य्यादीकृत्य मज्जन्तो जले क्रीडन्तो जलप्रवेशाददृश्यमाना तनुर्देहो यस्य एवम्भूतः। तथा स्वकीया दिक् प्राची तस्याः करी ऐरावणोऽन्ये वा तत्रत्याः करिणस्तेषां जयक्रीडा तयो-पार्जितैर्यशोभिः सह स्पर्द्धिभिस्तद्वदुज्ज्वलैः फेनैः जलावगाह-गाढैर्निर्मग्नदेहार्द्धदेशं पाण्डुरितः धवलीकृतः। तथा दन्त-द्वन्द्वस्य दन्तद्वयस्य जलेऽनुबिम्बनं प्रतिबिम्बस्तेन कृत्वा चत्वारो दन्ता यस्य सः। जलमध्ये विद्यमानत्वाद्धवलत्वाच्चतुर्दन्तत्वा-च्चैरावण एवायमिति भ्रान्त्या समुद्रः सुखी भवतीत्यर्थः। आ-समुद्रं दिग्विजयीत्यर्थः॥ ८५ ॥

अथेति। अथ सा भैमी न्यमीलत् अक्षिपक्ष्मसङ्कोचं चकार। किंभूता। अतिप्रीत्या मधुस्रजा वरणमधूकमालया नैषधस्य नाम जपति तच्छीलाऽत एव स्फुटीभवन् प्रत्यचायमाणः ध्या-नेन चिन्तनातिशयेन पुरः स्फुरन् अप्रस्तुततयाऽवभासमानो नलो यस्याः सा। तद्वोत्प्रेक्षते। एतस्योर्व्वीपतेर्वर्णनया समुत्पन्न-मद्भुतमाश्चर्य्यं हृदि विद्यमानं आस्वादयितुमिव। आश्चर्य्यस्य चेतसि वर्त्तमानत्वात्तदनुभवार्थं नेत्रे अन्तः प्रविष्टे इवेत्यर्थः।

मधुस्रजा नैषधनामजापिनी
स्फुटीभवद्ध्यानपुरःस्फुरन्नला ॥ ८६ ॥

प्रशंसितुं संसदुपान्तरञ्जिनं
श्रिया जयन्तं जगतीश्वरं जिनं।
गिरः प्रतस्तार पुरावदेव ता
दिनान्तसन्ध्यासमयस्य देवता ॥ ८७ ॥

तथाधिकुर्य्या रुचिरे चिरेप्सिता
यथोत्सुकः सम्प्रति सम्प्रतीच्छति।

नले एवानुरक्ता सती नेत्रनिमीलनेनैव तं नृपं निरीक्षाञ्च-कारेति भावः। अन्योऽपि जपमालयाभीष्टदेवतामन्त्रजपं कुर्व्वन् तां साक्षात्कर्त्तुं नेत्रे निमील्य ध्यानेन तां साक्षात्क-रोति ॥ ८६ ॥

प्रशंसितुमिति। दिनान्तसन्ध्यासमयस्य देवता सरस्वती पुरावदेव पूर्व्ववदेव ता अतिगम्भीरमधुरा गिरः प्रतस्तार उवाच। किं कर्त्तुं। संसदः सभाया उपान्तौ उभयपार्श्वौ रञ्ज-यत्येवं शीलं श्रिया शरीरशोभया कलाऽतिसुन्दरं जिनं बुद्धदेवं जयन्तं जगत्याः पृथिव्या ईश्वरं राजानं प्रशंसितुं वर्णयितुं। श्रिया संसदुपान्तरञ्जिनं जयन्तं जगति शौर्यादिना इन्द्रपुत्र-तुल्यं कीकटदेशप्रभुत्वाज्जिनं बौद्धं राजानमिति वा जयन्त-नामानं वा। जगदीश्वरमिति पाठे जिनविशेषणं ॥ ८७ ॥

तथेति। हे रुचिरे सुन्दरि त्वं तथा तेन प्रकारेणाधि-

अपाङ्गरङ्गस्थललास्यलम्पटाः
कटाक्षधारास्तव कीकटाधिपः ॥ ८८ ॥
इदं यशांसि द्विषतः सुधारुचः
किमङ्कमेतद्द्विषतः किमाननं ।

कुर्य्याः अधिकारं कुर्य्याः । तथा कथं । यथा येन प्रकारेण कीकटाधिपः मगधदेशस्वामी तत्कटाक्षेषु उत्सुकः सन् चिरेप्सिताः तव कटाक्षधारास्तिर्य्यगवलोकनपरम्पराः सम्प्रतीदानीं सम्प्रतीच्छति अङ्गीकरोति । किंभूता धाराः । अपाङ्गो नेत्रप्रान्तस्तल्लक्षणं रङ्गस्थलं नाट्यशाला तत्र लास्ये सविलासमन्दगतौ लम्पटाः । चिरेप्सिता त्वमिति वा । चिरेत्यकारान्तमव्ययं तेन समासः । एवमेवंजातीयेऽन्यत्रापि ज्ञातव्यं ॥ ८८ ॥

इदमिति । अखिलेषु लोकेषु धाविभिः प्रसरणशीलैः लोकत्रयमुज्ज्वलङ्कुर्व्वाणैरस्य यशोभिः विशेषेण शोषिता लोकत्रयान्निर्व्वासिता ताममी कृष्णपक्षरात्रिरेव मषी इदं यशांसि अस्य कीर्त्तीर्द्विषतः असहमानस्य सुधारुचश्चन्द्रस्याङ्कं कलङ्कमयत्र सन्निधिं धावति शीघ्रं गच्छति प्रविशति किं । किंवा एतद्विषत एतच्छत्रोराननं प्राप्नोतीति संशयः । एतद्यशोभिश्चन्द्राद्भुतमुखातिरिक्तस्य सकलस्यापि जगतः श्वेतीकरणात्तत्र निवस्तुमशक्ता सती मलिनं चन्द्रकलङ्कमेतच्छत्रुमुखञ्च प्रायेण गता । यो हि येन पराभूयते स तद्वैरिणमाश्रयतीत्यर्थः । अयमतितरां यशस्वीति भावः । अन्योऽपि शोषितः स्वगोत्रं याति ।

यशोभिरस्याखिललोकधाविभि-
र्विभीषिता धावति तामसी मषी॥ ८९ ॥
इदं नृपप्रार्थिभिरुज्झितोऽर्थिभि-
र्मणिप्ररोहेण विवृध्य रोहणः।
कियद्दिनैरम्बरमावरिष्यते
मुधा मुनिर्विन्ध्यमरुद्ध भूधरं॥ ९० ॥

श्यामस्य च श्यामं वस्तु सगोत्रमिति। तामसी तमःसम्बन्धिनी रात्रिः मषी श्यामवस्तुमात्रगता श्यामिका च यथाक्रमं चन्द्राङ्कं शत्रुमुखं धावति किमिति वा। निरन्तरोद्योतकरणादेतत्कीर्त्त्या निष्काशितेव तामसी स्त्रीभावभीरुर्भर्त्तुश्चन्द्रस्योत्सङ्गं गता। अत एव रात्रिकालिमा चन्द्राङ्के दृश्यते। सर्व्वस्यापि श्वेतीकरणात् श्यामिकापि निर्व्वासिताऽन्यत्र स्थातुमशक्ततयेव रिपुमुखं गता। अत एव विवर्णीभूतेषु वैरिमुखेषु कालिमा दृश्यते। एतद्द्विषतः। द्विषःशतुर्व्वेति (पा॰ २। ३। ६९ सू॰ ६ वा॰) षष्ठीसमासः॥ ८९ ॥

इदमिति। अतिवदान्यस्यास्य नृपस्य प्रार्थनशीलैरर्थिभिर्याचकैरनेनैव समस्तकामानां पूरितत्वादुज्झितः परित्यक्तः अत एव स्वव्यथाभावान्मणिप्ररोहेण विवृध्य अङ्कुरोत्पत्त्या विशेषेण वृद्धिं प्राप्य रोहणो मेरुः कियद्भिः कतिपयैरल्पैरेव दिनैः अम्बरमावरिष्यते आच्छादयिष्यति यतस्तस्मान्मुनिरगस्तिर्विन्ध्यनामानं भूधरं मुधैवारुद्ध मदागमनपर्य्यन्तं त्वया न वर्द्धितव्यमिति नियमेन वृथैव वाग्बद्धमकरोत्। तद्वृद्ध्यभावेऽपि

भूशक्रस्य यशांसि विक्रमभरेणोपार्जितानि क्रमा-
देतस्य स्तुमहे महेभदशनस्पर्द्धीनि कैरक्षरैः।
लिम्पद्भिः कृतकं कृतोऽपि रजतं राज्ञां यशःपारदै-
रस्य स्वर्णगिरिः प्रतापदहनैः स्वर्णं पुनर्निर्म्मितः॥ ९१॥

रोहणेनैव सूर्य्यगतेः प्रतिबन्धकस्य करिष्यमाणत्वादगस्त्यप्रयासस्य वैयर्थ्यमेव जातमित्यर्थः। अगस्त्येन विन्ध्यरोधस्तु पुराणप्रसिद्धः। अतिवदान्योऽयमिति भावः। आवरिष्यते। विकल्पत्वादिटो दीर्घतेति (पा० ७।२।३८)। अहङ्कृति। लङात्मनेपदं॥ ९०॥

भूशक्रस्येति। वयं विक्रमस्य भरेण बाहुल्येन क्रमात्पारिपाट्यात् उपार्जितानि एतस्य भूशक्रस्य पृथ्वीन्द्रस्य यशांसि कैरक्षरैर्वर्णैः स्तुमहे वर्णयामः। यशसां भूयस्त्वाद्वर्णानां परिच्छिन्नत्वात् स्तोतुं न शक्नुमः। सामान्याकारेण कथञ्चिद्वर्ण्यन्त इत्यर्थः। किम्भूतानि। महेभाः षष्टिहायना गजा ऐरावतो वा तेषां दशनैः सह स्पर्द्धन्त एवंशीलानि तद्वद्धवलानि। स्वर्णगिरिर्मेरुरन्येषां राज्ञां लिम्पद्भिर्यशोलक्षणैः पारदैः कृतकमसत्यं रजतं कृतोऽपि प्रलेपनिर्म्मितपाण्डुद्युतितां नीतोऽपि सन् अस्य प्रतापरूपैर्दहनैरग्निभिः पुनः स्वर्णं निर्म्मितः कृतः। प्रतापस्य पीतत्वात्सुवर्णरूपतां प्रापितः। पारदलेपनेन सुवर्णं श्वेतोभवति वह्नितापेन चोड्डीने पारदे पुनः काञ्चनमेव भवतीत्यर्थः। एतत्प्रतापाग्रे परेषां यशांसि न प्रसरन्ति। यशस्वी प्रतापवांश्चान्यः कोऽपि नास्तीत्यर्थः॥ ९१॥

यद्भर्त्तुः कुरुतेऽभिषेणनमयं शक्रो भुवः सा ध्रुवं
दिग्दाहैरिव भस्मभिर्म्मघवता सृष्टैः कृतोद्धूलना।
शम्भोर्म्मा वत सान्ध्यवेलनटनं भाजि व्रतं द्रागिति
क्षोणी नृत्यति मूर्त्तिरष्टवपुषोऽसृग्वृष्टिसन्ध्याधिया॥ ९२॥

यदिति। अयं भुवः शक्रो भूमीन्द्रः यस्या भूमेर्भर्त्तुः पत्युः अभिषेणनं सेनयाऽभिगमनं कुरुते सा क्षोणी भूमिः इति मनसि कृत्वा लोहितत्वेनौत्पातिकी असृग्वृष्टिः रुधिरवृष्टिस्तद्रूपा या सायंसन्ध्या तस्या धिया भ्रमबुद्ध्या द्राक् शीघ्रं नृत्यति गात्रविक्षेपं करोति कम्पत इत्यर्थः। वत खेदे। ध्रुवमुत्प्रेक्षे। किम्भूता सा। दाहादिन्धनज्वलनसम्भावात् दिग्दाहैरिव दिग्दाहाद्धिशामौत्पातिकनिर्हेतुकलोहितदीप्तेः प्रभवैरिव मघवतेन्द्रेण सृष्टैर्म्मोचितैः भस्मभिः कृत्वा कृतं धृतमुद्धूलनं अङ्गलेपो यया सा। इति किं। शम्भोः दिनरात्रिसन्धिरूपायां वेलायां काले भवं सान्ध्यवेलं सायंसन्ध्याकालसमुचितं नटनं नृत्यरूपं व्रतं नियमः माभाजि भग्नो माभूदिति स्वयं नृत्यतीत्यर्थः। यतः अष्टमूर्त्तेर्जलाद्यष्टमूर्त्तेः शम्भोरेका मूर्त्तिः पृथ्वी। शिवो हि सन्ध्यासमये नृत्यं करोति तन्मूर्त्तित्वात्तथापि नृत्यमारब्धमित्यर्थः। यमुद्दिश्य अयं प्रयाणं करोति तस्मिन्देशे दिग्दाहभस्मवृष्टिभूकम्परक्तवृष्टिलक्षणास्तत्पराजयसूचका उत्पाता भवन्ति। अयमेव विजयत इत्यर्थः। जलार्केन्द्वात्मखभ्वग्निवायवः शिवमूर्त्तयः। यत्सेनयाभिगमनं राज्ञस्तदभिषेणनमित्य-

प्रागेतद्वपुरामुखेन्दु सृजतः स्रष्टुः समग्रस्त्विषां
कोशः शोषमगादगाधजगतीशिल्पेऽप्यनल्पायितः ।
निःशेषद्युतिमण्डलव्ययवशादीषल्लभैरेष वा
शेषः केशमयः किमन्धतमसस्तोमैस्ततो निर्म्मितः ॥ ८३ ॥

मरः । यद्भर्त्तुः । भर्तृशब्दस्य पत्यर्थत्वाद्याजकादित्वात् समासः । (पा० २ । २ । ९) सेनयाऽभिगमनमभिषेणनं । सत्यापपाशेति (पा० ३ । १ । २५) णिचि लुट् । उपसर्गात् सुनोतीति (पा० ८ । ३ । ६५) षत्वं । दिग्दाहैरित्यत्र तस्येदमित्यण् (पा० ४ । ३ । १२०) । सन्धिवेलायां भवं सान्धिवेलं । सन्धिवेलेत्यण् (पा० ४ । ३ । १६) । इन्द्रः शिवस्य भस्माहरणेऽधिकारी अत एव दिशां दाहं कृत्वा भस्मार्पितवान् इति केचित् ॥ ८२ ॥

प्रागिति । प्राक् सर्गादौ अगाधजगतीशिल्पेऽपि असर्य्याद्त्रैलोक्यनिर्म्माणविषयेऽपि यस्त्विषां समस्तः सकलः कोशो भाण्डारागारसञ्चयः नाल्पायितः अल्पवन्नाचरितः किन्तु तावानेवाक्षयः स्थितः । आमुखेन्दु मुखचन्द्रमभिव्याप्य एतस्य वपुः सृजतः स्रष्टुः ब्रह्मणः सम्बन्धी स त्विषां समस्तः कोशः शोषं समाप्तिं अगात् प्राप क्षयितः । यतश्चरणप्रभृतिमुखपर्य्यन्तावयवनिर्म्माणार्थमेव पूर्णो न तु केशनिर्म्माणार्थं । ततस्तस्मात् कान्तिक्षयाद्धेतोः केशमयः केशप्रचुरः केशरूपोऽस्य एष शेषो भागः निःशेषं द्युतिमण्डलं समस्ततेजोराशिस्तस्य व्ययवशान्नाशवशात् भाभावस्तम इति न्यायात् ईषल्लभैः सुप्रापैः सुलभैरन्धतमस-

तत्तद्दिग्जैत्रयात्रोद्धुरतुरगखुराग्रोद्धतैरन्धकारं
निर्वाणारिप्रतापानलजमिव सृजत्येष राजा रजोभिः ।

स्तोमैर्गाढान्धकारसङ्घैः कृत्वा किंवा निर्म्मितः इत्युत्प्रेचा। सुन्द-रतरोऽयं केशास्यातिनीला घनास्येति भावः । ईषत्तमैः । अकृ-त्स्नार्थे खल्। उपसर्गादेव खल्घञोर्नान्यत्रेति नियमान्नुमभावः (पा० ७।१।६७)। अन्धतमसः । अवसमन्धेभ्यस्तमसः इत्यच् (पा० ५।४।७९) ॥ ८३ ॥

तदिति। एष राजा तासां प्राच्यादीनां सर्व्वासां दिशां जैत्रा जयकारिण्यो यात्रास्तासु उद्धुरा उत्साहवन्तोऽतिबलिन-स्तुरङ्गास्तेषां खुराग्रैरुद्धतैर्रजोभिः कृत्वा अन्धकारं सृजति।कथ-भूतमिव। निर्वाणः शान्तः अरिप्रतापानलस्तस्मादनन्तरजात-मिव अन्धकारं सूर्य्यप्रकाशस्याच्छादितत्वात् तमः सृजति। अनले शान्ते भाभावरूपोऽन्धकारो भवति। एतस्य दिग्जययात्रायां प्रारब्धायां सर्व्वेषामपि वैरिणां प्रतापः शान्तो भवतीति भावः । तुरङ्गबाहुल्यञ्च। तथा एतस्य कीर्त्तिप्रतानैर्यशोविस्तारैरेव च विधुभिर्बहुभिश्चन्द्रैः युधे युद्धार्थं आहूयमानः स्पर्द्धापूर्व्व-माकारित एव राहुः भियेव भयेनेव भूगोलस्य भूमण्डलस्य छायामयेन मायारूपेण व्याजेन गणितविद्भिः ज्यौतिषिकै-र्गणितशास्त्रप्रामाण्येन उन्नेयस्तर्क्यः कायः शरीरं यस्यैवंभूतो ऽभूत्। एतत्कीर्त्तिसमूहचन्द्रान् दृष्ट्वा एकस्य जेतुमशक्यत्वाद्रा-हुणा स्वङ्गोपायितुं भूगोलछायरूपं मायामयशरीरं धृतमि-

भूगोलच्छायमायामयगणितविदुन्नेयकायो भियाभू-
देतत्कीर्त्तिप्रतानैर्विधुभिरिव युधे राहुराह्वयमानः ॥९४॥
आस्ते दामोदरीयामियमुदरदरीं यावलम्ब्य त्रिलोकी
सम्मातुं शक्तिमन्ति प्रथिमभरवशादत्र नैतद्यशांसि।
तामेतां पूरयित्वा निरगुरिव मधुध्वंसिनः पाण्डुपद्म-
च्छद्मापन्नानि तानि द्विपदशनसनाभीनि नाभीपथेन॥९५॥

त्यर्थः। ज्योतिःशास्त्रे च भूगोलच्छायैव राहुत्वेनोक्ता। अन्योऽपि शत्रोर्भीतः स्वङ्गोपायितुं रूपान्तरं धारयति। एतादृशो यशस्वी कोऽपि नास्तीति भावः। निर्वाणेति। निर्वाणोऽवात इति तस्य णत्वं (पा॰ ८।२।५०)। च्छायमायेति। विभाषासेनेति षण्ढत्वं (पा॰ २।४।२५)॥९४॥

आस्त इति। या इयं त्रिलोकी लोकत्रयी दामोदरीयां उदरदरीं श्रीविष्णोर्जठरकन्दरामवलम्ब्याश्रित्यास्ते अत्रास्यां दामोदरोदरस्थितायां त्रिलोक्यां प्रथिमभरवशात् महत्त्वबाहुल्यादतिसम्मातुं सुखेन स्थातुं न शक्नुवन्ति असमर्थानि सन्ति तान्यतिप्रसिद्धानि द्विपदशनैः सनाभीनि सदृशानि अतिगौराणि एतस्य यशांसि तामेतां विष्णूदरदरीस्थितां तत्स्थितां त्रिलोकीं पूरयित्वावशिष्टानि तामुदरदरीं तत्स्थां त्रिलोकीं च परिपूर्णावशिष्टानि वा पाण्डुपद्मच्छद्मापन्नानि नाभीसमुत्पन्नधवलकमलव्याजमापन्नानि तदाकाराणि सन्ति मधुध्वंसिनो विष्णोर्नाभीरूपेण पथा मार्गेण निरगुरिव निर्जग्मुरिव सङ्कट-

अस्यासिर्भुजगः स्वकोशसुषिराकृष्टः स्फुरत्कृष्णिमा
कम्पोन्मीलदराललीलवलनस्तेषां भिये भूभुजां ।
सङ्ग्रामेषु निजाङ्गुलीमयमहासिद्धौषधीवीरुधः
पर्व्वास्ये विनिवेश्य जाङ्गुलिकता यैर्नाम नालम्बिता ॥ ९६ ॥

वासयातनाभिया वहिर्निर्गतानीव श्रीविष्णोर्नाभौ धवलं कमलं अन्यथोत्प्रेक्षितं पाण्डुपद्मं न किन्त्वेदृग्यशांसि । अथवा करिदन्तधवलतुल्यान्यतिभूयांसि चास्य यशांसीति भावः । दामोदरीयां । वृद्धाच्छः (पा० ४ । २ । ११४) । प्रथिमा । पृथ्वादिभ्य इमनिच् । (पा० ५ । १ । १२२) । नाभीपथेन । ऋगादिना समासान्तः (पा० ५ । ४ । ७४) ॥ ९५ ॥

अस्येति । अस्यासिरेव भुजगस्तेषां भूभुजां राज्ञां भिये भवतीति शेषः । किंभूतः । स्वकोश एव चर्म्ममयं पिधानं तदेव सुषिरं वल्मीकविवरं तस्मादाकृष्टः वहिष्कृतः सद्यो धृतस्य तथा स्फुरन् प्रकाशमानः उत्तमलोहजातिविशेषत्वात् कृष्णिमा श्यामत्वं यस्य । सर्पोऽपि सद्यो धृतत्वात् स्फुरत्कालिमा । तथा कम्पेन तत्र हस्तान्दोलनेन कृत्वा उन्मीलन्त्यः प्रकटीभूता अराला वक्रा लीला येषु तादृशानि वलनानि गतिविशेषा यस्य । सर्पोऽपि वक्रगतिर्भवति । तेषां केषां । यैः सङ्ग्रामेषु निजाङ्गुलीमय्याः स्वीयाङ्गुलीरूपाया महासिद्धौषध्या वीरुधः स्पर्शमात्रेण विषघ्न्याः वल्याः पर्व्व ग्रन्थिस्तदाङ्गुष्ठाग्रपर्व्वग्रन्थिद्वयञ्च आस्ये मुखे विनिवेश्य जाङ्गुलिकता विषवैद्यता गारुडिकता नालम्बिता

यः पृष्ठं युधि दर्शयत्यरिभटश्रेणीषु यो वक्रता-
मस्मिन्नेव बिभर्त्ति यस्य किरति क्रूरध्वनिं निष्ठुरः ।
दोषं तस्य तथाविधस्य भजतश्चापस्य गृह्णन् गुणं
विख्यातः स्फुटमेक एष नृपतिः सीमा गुणग्राहिणां ॥ ६७॥

नाम प्रसिद्धौ। सर्पोऽपि येन स्वमुखे सिद्धौषधोपर्व्वं न निक्षि-
प्यते तमेव यथा मारयति तथा एतदीयः खड्गोऽपि ये शस्त्राणि
न त्यजन्ति दैन्याच्च मुखे अङ्गुलीपर्व्वं न धारयन्ति तानेव
हन्ति मान्यान् विनीतांश्शरणागतांश्च । विषवैद्यो जाङ्गुलिक
इत्यमरः ॥ ६६ ॥

य इति । अरिभटश्रेणीषु शूरतरवैरिसङ्घेषु विषये युधि
यः पृष्ठं दर्शयति पराङ्मुखः पलायते अथ च यं प्रत्याक्रम्यते
तस्य स्वभावात् पृष्ठं दर्शयति। यः अस्मिन् स्वस्वामिन्येव नृपे
वक्रतामनृजुत्वं स्वाश्रय एव कृतघ्नत्वं बिभर्त्ति। अथ वान्यस्यैता-
दृग्बलाभावात् अस्मिन्नेव वक्रतां बिभर्त्ति सान्येन न स्वीकर्त्तुं
शक्यत इत्यर्थः। तथा यो निष्ठुरो निर्दयो दाक्षिण्यरहितः
सन् क्रूरध्वनिं अनेन सहाप्रियभाषणं किरति। अथ च परिण-
तादरेराजन्म क्रूरं वैरिणां भयावहं शब्दं किरति क्षिपति।
दोषं दूषणं अथ च बाहुं भजतः तथाविधस्य तस्य चापस्य
तथाविधस्यान्यस्य वा कस्यचिद्गुणं श्रुतशौर्य्यादिकं गृह्णन् वर्णयन्।
अथ च मौर्व्वीग्राहिणां धनुर्द्धराणां सीमा पर्य्यन्तावधिः स्फुटं
विख्यातः प्रसिद्ध एक एष राजा। एवंविधो धनुर्द्धरः सज्ज-

अस्यारिप्रकरः शरश्च नृपतेः सङ्ख्ये पतन्तावुभौ
सीत्कारञ्च न सम्मुखौ रचयतः कम्पञ्च न प्राप्नुतः।
तद्युक्तं न पुनर्निवृत्तिरुभयोर्जागर्त्ति यन्मुक्तयो-
रेकस्तत्र भिनत्ति मित्रमपरस्त्वामित्रमित्यद्भुतं॥ ९८॥

नश्च कोऽपि नास्तीत्यर्थः। धनुःपृष्ठदर्शनेनैतस्य पलायनाभावः सूचितः॥ ९७॥

अस्येति। अस्य नृपतेरुभौ सङ्ख्ये सङ्ग्रामे क्रमेण सम्मुखौ एतत्स-मुखं वैरिसम्मुखञ्च पतन्तौ सन्तौ सीत्कारं दुःखाभिव्यञ्जकं दन्त-मध्ये निर्गतं पक्षवातजनितञ्च ध्वनिविशेषं यत्न रचयतः कुरुतः यच्च मरणभीतिजनितं दुर्निर्गतत्वजनितञ्च कम्पं न प्राप्नुतः। उभौ कौ। अरिप्रकरः वैरिसङ्घः शरश्च एतौ द्वौ। तथा मुक्तयोः प्राप्तमोक्षधनुश्च्युतयोरुभयोर्यत्पुनर्निवृत्तिः जन्म प्रत्यागमनञ्च न जागर्त्ति भवति तत्सर्व्वं युक्तमुचितमेव। द्वयोरपि तुल्यधर्म्म-त्वात्। तर्हि विलक्षणं किमित्याशङ्कायामाह। तत्र तयो-र्द्वयोर्मध्ये एको वैरिसङ्घः मित्रं सुहृदमथ च सूर्य्यं भिनत्ति। अपरश्च शरः अमित्रं सूर्य्यव्यतिरिक्तमथ च वैरिणं भिनत्ति द्विधा करोतीत्यद्भुतं आश्चर्य्यं। तुल्यकर्म्मणोरतुल्यकर्म्मारम्भकत्वस्य विरुद्धत्वादित्यर्थः। चावन्योन्यसमुच्चये। दुःखभयराहित्येन रणे सम्मुखः पतति शत्रुसङ्घः। द्वाविमौ पुरुषौ लोके सूर्य्यमण्डल-भेदिनौ इति वचनात् सूर्य्यमण्डलं भित्त्वा मुक्तिं प्राप्नुतः। अदृ-ढमुष्टितया मुक्तवाणः कम्पसीत्कारौ रचयति। तदकरणाच्च दृढमुष्टितास्य सूचिता। दृढमुष्टित्वेन मुक्तो वैरिमध्ये न पुन-

धूलीभिर्दिवमन्धयन् बधिरयन्नाशाः खुराणां रवै-
र्वातं संयति खञ्जयन् जवजयैः स्तोतॄन् गुणैर्मूकयन्।
धर्म्माराधनसन्नियुक्तजगता राज्ञाऽमुनाधिष्ठितः
सान्द्रोत्फालमिषाद्विगायति यदा स्प्रष्टुं तुरङ्गोऽपि गां॥९९॥

रायाति वैरिणं हन्तीत्यर्थः। शूरतरोऽयं शत्रुमात्रं हतवानिति भावः। बाणपक्षे सम्यक् मुखं पुङ्खमग्रं वा यस्येति॥९८॥

धूलीभिरिति। धर्म्माराधने सम्यङ्नियुक्तं प्रेरितं जगद् येनै-वंभूतेनामुना राज्ञा अधिष्ठित आरूढस्तुरङ्गोऽपि धूलीभिः खुर-जरजोभिः दिवं स्वर्गलोकं अन्धयन् अन्धं कुर्व्वन् चक्षुः प्रविष्टा-द्रजस एव निमीलितनयनं कुर्व्वन्नित्यर्थः। तथा खुराणां रवैः समुच्छलनशब्दैः हत्वा आशा दिशः प्रान्तनिवासिनो जनान् बधि-रयन् बधिरतया शब्दान्तरग्रहणाशक्तान् कुर्व्वन्। तथा संयति सङ्ग्रामे जवस्य वातवेगस्य जयैः वायोःसकाशादतिवेगतया वातं खञ्जयन् पङ्गुं कुर्व्वन्। तथा गुणैर्हेतुभिः स्तोतॄन् अश्वजय-रूपलक्षणादिवर्णनकारिणो जनान् मूकयन् गुणाधिकत्वेन सामस्त्येन स्तोतुमसमर्थान्मूकानिव कुर्व्वन्। एवंभूतः सन्ननन्तरं सान्द्राणां निरन्तराणामुत्फालानां चतुर्भिस्चरणैरुत्पतनानां मिषात् पदैकेनापि चरणेन गां भुवमथच धेनुं स्प्रष्टुं तस्याः स्पर्शनं कर्त्तुं विगायति विशेषेण जुगुप्सते। धार्म्मिको राजा निषि-द्धमाचरतः स्वाधीनान् पापिनो दण्डयति। अहं तु त्वदधिष्ठितः पदा गोस्पर्शलक्षणं पापं कुर्व्वन् दण्ड्यः स्यामिति बुद्ध्या पदा

एतेनोत्क्रान्तकण्ठप्रतिसुभटनटारब्धनाट्याद्भुतानां
कष्टं द्रष्टैव नाभूद्भुवि समरसमालोकिलोकास्पदेऽपि।
अश्वैरश्वैरवेगैः कृतखुरखुरलीमंक्षुविक्षुद्यमान-
क्ष्मापृष्ठोत्तिष्ठदन्धङ्करणरणधुरारेणुधारान्धकारात्॥ १००॥

न स्पृशति चेत्यर्थः। धार्मिको जवनाश्वस्यायमेवेत्यर्थः। अन्ध-यन्नित्यादौ तत्करोतीति णिजन्ताच्छतृ॥ ९९॥

एतेनेति। समरसमालोकिनो ये लोकास्तेषामास्पदे स्थान-भूतायामपि भुवि। अथवा समरसमालोकिलोकानां देवाना-मास्पदे गगने वियति। एतेन राज्ञा उत्क्रान्तकण्ठाः छिन्नग्रीवाः कबन्धरूपाः प्रतिसुभटाः रिपुवीरास्त एव नटा नर्त्तकास्तैरार-ब्धानां नाट्याद्भुतानां नृत्ताश्चर्याणां द्रष्टा नाभूदेव कष्टमेतत् दुःखमेतत्। तत्र हेतुः। अश्वैरवेगैः शीघ्रजवैरश्वैः कृता खुरैः कृता खुरली अभ्यासभूमिः पुरः पुरः न्यासो वा तया मंक्षु मनोज्ञं शीघ्रं वा विशेषेण क्षुद्यमानं चूर्णीभवत् क्ष्मापृष्ठं भूतलं तस्मादुत्तिष्ठन् उत्पतन् अनन्धमन्धं करोति अन्धङ्करण एवंभूतः रणधुरारेणुः रणप्रारम्भ एव समुत्पन्नो रेणुस्तस्य धाराः प्रवा-हास्तज्जनितादन्धकारात्। रणविलोकनार्थमागतैरपि मानवै-र्देवैरपि अश्वखुरोत्थितरजःपूरितनेत्रैः कबन्धनृत्यं नालोकी-त्यर्थः। मन्दस्वच्छन्दयोः स्वैरं इति मेदिनी। एतत्क्रान्तोत्तमा-ङ्गेति पाठः साधीयान्। द्रष्टा। तृच्। रणधुरा। ऋगादिना ऽप्। (पा० ५।४।७४)॥ १००॥

उन्मीलल्लीलनीलोत्पलदलदलनामोदमेदस्विपूर-
क्रोडक्रीडद्‌द्विजालीगरुदुदितमरुत् स्फालवाचालवीचिः।
एतेनाखानि शाखानिवहनवहरित्पर्णपूर्णद्रुमाली-
व्यालीढोपान्तशान्तव्यथपथिकदृशां दत्तरागस्तडागः॥१०१॥
वृद्धो वार्द्धिरसौ तरङ्गवलिभं बिभ्रद्वपुः पाण्डुरं
हंसालीपलितेन यष्टिकलितस्तावद्वयोवंद्दिमा।

उन्मीलदिति। एतेन राज्ञा एतादृशस्तडागः अखानि। किंभूतः। उन्मीलन्ती विकसन्ती लीला विलासो येषां तानि नीलोत्पलानि तेषां दलानि पत्राणि तेषां दलनं विकासनं तदुद्भवेनामोदेन परिमलेन मेदस्वी पुष्टः बहुलपरिमलः पूरः प्रवाहस्तस्य क्रोडे उत्सङ्गे क्रीडन्ती द्विजाली हंसादिपङ्क्तिस्तस्या गरुद्भ्यः पत्रेभ्य उदित उत्पन्नो मरुद्वायुः तस्य स्फालः सवेग-गमनं सङ्घट्टो वा तेन वाचालाः शब्दायमानाः वीचयो यस्य। तथा शाखानिवहैः नवहरित्पर्णैर्नूतनश्यामपर्णैश्च पूर्णा द्रुमाल्यः वृक्षपङ्क्तयः ताभिर्व्यालीढः व्याप्तः उपान्तस्तीरप्रदेश-स्तेन शान्ता व्यथा ग्रीष्मातपपीडा यासां तासां पथिकदृशां ग्रीष्मातपपीडा येषां पथिकानां वा दृशः तासां दत्तः रागः सन्तोषो येन। अस्य तडागस्यातिरमणीयत्वं सुखजनकत्वं अस्य च धार्म्मिकत्वं सूचितं॥१०१॥

वृद्ध इति। असौ अनेन निर्मितस्तडागः वृद्धो महान् वार्द्धिः समुद्रः। समुद्रापेक्षयापि महानित्यर्थः। अथवा उसौ वारि

विभ्रच्चन्द्रिकया च कं विकचया योग्यस्फुरत्सङ्गतं
स्थाने स्नानविधायिधार्म्मिकशिरोनत्यापि नित्यादृतः ॥ १०२ ॥

धीयतेऽस्मिन् वार्द्धिर्वारिस्थानं तडाग एव वृद्धोऽतिप्रवयाः। कि-म्भूतः। तरङ्गैः कृत्वा वलिभं वलियुक्तं। तरङ्गा एव वार्द्धकसङ्कु-चितस्थूलशरीरावयवविशेषस्थाने जाता यस्येत्यर्थः। तादृशतरङ्ग-रूपाभिर्वलिभिर्भाति इति वा। हंसालीपलितेन हंसपङ्क्तिरू-पेण जराजनितश्वैत्येन पाण्डुरं धवलं प्रवाहरूपं वपुः बिभ्रत्। तथा यष्ट्या मध्यनिचिप्तकीर्त्तिस्तम्भरूपया कलितो ज्ञातपरि-माणोऽलङ्कृत इत्यर्थः। अथ च स्खलच्छरीरधारणार्थं दण्डेन युक्तो धृतशरीर इत्यर्थः। तथा तावतामतिबहूनां वयसां पक्षिणां बंहिमा बाहुल्यं यत्र। अथ च तावतः शतसमीपवर्त्तिनो वयसो वार्द्धकस्य बंहिमा यस्य। तथा विकचयाऽतिप्रकाशमा-नया चन्द्रिकया योग्यं समुचितं स्फुरत् प्रकाशमानं सङ्गतं मैत्रं यस्य। ज्योत्स्नावन्निर्म्मलं। अथ च समुद्रत्वादेतज्जलं ज्योत्स्नामै-त्रमुचितं कं जलं बिभ्रत्। अथ च विगतकेशया चन्द्रिकया खा-लित्येन चान्दीति कान्यकुब्जभाषायां तया उचितं स्फुरन्मैत्रं कं शिरो बिभ्रत्। यद्वा केशरहितेन खालित्येनोपलचितं। तथा योग्यं वार्द्धकाश्चितं स्फुरत् प्रकटं सङ्गतं सम्यग्गतं कम्पनं यस्य शिरसस्तत्। तथा स्नानविधायिभिर्धार्म्मिकैः शिरोनत्यापि यत् नित्यादृतः तत् स्थाने उचितं। धार्म्मिकैश्च स्नानादौ तीर्थं नम-स्क्रियते वार्द्धैरपि। समुद्रस्य पर्व्वण्येव स्पर्शयोग्यत्वादेतस्य सर्व्वदे-

तस्मिन्नेतेन यूना सह विहर पयःकेलिवेलासु बाले
नालेनास्तु त्वदक्षिप्रतिफलनभिदा तत्र नीलोत्पलानां ।
तत्पाथोदेवतानां विशतु तव तनुच्छायमेवाधिकारे
तत्फुल्लाम्भोजराज्ये भवतु च भवदीयाननस्याभिषेकः ॥१०३॥

त्याधिक्यं समुद्रात्। वलिभमिति मत्वर्थे तुन्दिवलीति भः। (पा॰ ५।२।१३८)। द्वितीयाव्याख्याने पचाद्यच् (पा॰ ३।१।१३४)। बंहिमेति। बहुलस्य भावः। पृथ्वादित्वादिमनिच् (पा॰ ५।१।१२२)। प्रियस्थिरेति बंहिरादेशः (पा॰ ६।४।१५७)। धार्म्मिकः। धर्म्मं चरतीति ठक् (पा॰ ४।४।४१)॥१०२॥

तस्मिन्निति। हे बाले तस्मिन् तडागे त्वं एतेन यूना सह विहर क्रीड। तथा तत्र तडागे पयःकेलिवेलासु जलक्रीडावसरेषु ग्रीष्मर्त्तौ वा तत्रैव नालस्य दृश्यत्वात्। प्रतियोग्यभिप्रायं बहुवचनं। नीलोत्पलानां तवाक्षिप्रतिफलनात् नेत्रप्रतिबिम्बात् सकाशाद्भिदा भेदः नालेन कमलदण्डेनास्तु। अतिसादृश्यादिदं वा नीलोत्पलमिदं वेति संदेहे सनालं यत् तन्नीलोत्पलमनालस्तु त्वन्नेत्रमिति नालमेव निर्णायकं भवत्वित्यर्थः। तथा तस्य पाथो जलं तस्य देवतानां अधिकारे आधिपत्ये वा तव तनुच्छायं त्वदीयशरीरप्रतिबिम्बमेव विशतु। तज्जलदेवतास्थाने त्वच्छरीरप्रतिबिम्बमेव भवत्वित्यर्थः। तथा तस्य फुल्लानां विकसितानां अम्भोजानां राज्ये खण्डे अथ चाधिपत्ये भवदीयाननस्य त्वदीयमुखकमलस्य च जलक्रीडावशात् अभि-

एतत्कीर्त्तिविवर्त्तधौतनिखिलत्रैलोक्यनिर्वासितै-
र्विश्रान्तिः कलिता कथासु जगतां श्यामैः समग्रैरपि ।
जज्ञे कीर्त्तिमयादहो भयभरैरस्मादकीर्त्तेः पुनः
सा यन्नास्य कथापथेऽपि मलिनच्छाया बबन्ध स्थितिं ॥१०४॥

षेकोऽथ च पट्टाभिषेकः भवतु । नीलोत्पलजलदेवताफुल्लकम-
लापेक्षया अमीनेत्रशरीराननमधिकमिति सूचितं । तनुच्छायं ।
विभाषासेनेति षण्ढत्वं (पा० २ । ४ । २५) ॥ १०३ ॥

एतदिति । जगतां स्थावरजङ्गमात्मकानां भुवनानां सम्ब-
न्धिभिः समग्रैरपि श्यामैः कृष्णैः कज्जलादिपदार्थैः गुणैर्वा
कथासु वार्त्तास्वेव विश्रान्तिः कलिता आश्रयोऽङ्गीकृतः । किम्भूतैः
श्यामैः । एतस्य कीर्त्तेर्यशसः विवर्त्तेन परिणामेन विशेषेण
वर्त्तनं स्थितिर्वा तेन धौताद्धवलीकृतान्निखिलात् सकलात्
कन्दरादिसहितात् त्रैलोक्यात् सकाशान्निर्वासितैर्निष्कासितैः ।
कीर्त्त्या लोकत्रयस्य श्वेतीकरणात् तत्र श्यामगुणानां साम्प्रतमदर्श-
नात् पूर्व्वं श्यामानि वस्तून्यभूवन्निति वार्त्तामात्रशेषाणि श्यामा-
नि जातानि सर्व्वथा न सन्तीत्यर्थः । तथा कीर्त्तिमयात् कीर्त्ति-
प्रचुरादस्माद्राज्ञः सकाशात् अकीर्त्तेः पुनर्भयभरैर्भीतिबाहुल्यै-
र्जज्ञे जातं अहो आश्चर्य्यं । कीर्त्तेरकीर्त्तेश्च विरोधात् कीर्त्ति-
रूपादस्मादकीर्त्तेः भयं युक्तं इत्यर्थः । एतत् कुतः । यद्यस्मान्मलिन-
च्छायाऽतिकृष्णा साऽपकीर्त्तिः अस्य कथापथेऽपि स्थितिमाश्रयं न
बबन्ध नाकरोत् । एतत्कथाप्रारम्भे अकीर्त्तिलेशस्याप्यभावात्

अथावदद्भीमसुतेङ्गितात् सखी
जनैरकीर्त्तिर्यदि वास्य नेष्यते ।
मयापि सा तत् खलु नेष्यते परं
सभाश्रवःपूरतमालवल्लितां ॥ १०५ ॥

कीर्त्तिरेव वर्ण्यत इत्यर्थः । यस्य यस्माद्बिभेति स तदीयकथा-प्रारम्भ एव मलिनो भूत्वाऽन्यत्रैव गच्छति । अविद्यमानमपि शशविषाणादि वचनगोचरो भवति अकीर्त्तिस्तु वचनगोचरोऽपि नाभूदित्याश्चर्य्यं । अविद्यमानाया अप्यकीर्त्तेर्भयोत्पादना-दतिचित्रं । जरतामिति पाठे वृद्धानां कथास्विति व्याख्येयं । जक्षे । भावे लकारः ॥ १०४ ॥

अथेति । अथ सखी भीमसुतायाः इङ्गितात् अननुराग-सूचकात् भ्रूवेल्लनादिचेष्टितात् सरस्वतीमवदत् । किं । हे वाणि जनैरस्य अकीर्त्तिर्यदि नेष्यते वा नाभिलष्यत एव तत् तर्हि मयापि साऽस्याकीर्त्तिः खलु निश्चितं नेष्यत इति यद्यपि तुल्यं तथापि परं कोऽपि परः कश्चिद्विशेषोऽस्ति । सभायाः सभालोकस्य श्रवःपूरतमालवल्लितां कर्णाभरणतमालवल्लित्वं नेष्यते प्रापयिष्यते । जनानामसम्मतां शशविषाणादिवदसती-मप्यस्याकीर्त्तिमेव सर्व्वां सभां श्रावयिष्यामि इत्यर्थः । वाण्या-स्तद्दर्शननिवारणं चकारेति भावः । अकीर्त्तेर्नीलत्वात्तमालव-ल्लित्वं । इष्यते । इषेः कर्म्मणि लट् । नेष्यते । णीञः प्रधानकर्म्मणि लट् ॥ १०५ ॥

अस्य चोणिपतेः परार्द्धपरया लचीकृताः सङ्ख्यया
प्रज्ञाचचुरवेच्यमाणतिमिरप्रख्याः किलाकीर्त्तयः ।
गीयन्ते स्वरमष्टमं कलयता जातेन बन्ध्योदरा-
न्मूकानां प्रकरेण कूर्म्मरमणीदुग्धोदधेरोधसि ॥ १०६ ॥

अकीर्त्तिमेव वर्णयति । अस्येति । हे वाणि मूकानां प्रकरेण समूहेन अस्य चोणिपतेरकीर्त्तयः किल प्रसिद्धं निश्चितं वा कूर्म्मरमणी कच्छपिका तस्या दुग्धादुत्पन्नस्योदधेः रोधसि तीरे गीयन्ते । किंभूताः । परार्द्धात् गणनावधेः सकाशात् परया ऽधिकया सङ्ख्यया लचीकृताः गणिताः परार्द्धादप्यधिकाः । तथा प्रज्ञाचचुर्भिर्जात्यन्धैः अवेच्यमाणं दृश्यमानं तिमिरं तत्-प्रख्यास्तत्तुल्या अतिश्यामाः । किंभूतेन प्रकरेण । अष्टमं स्वरं निषादादिसप्तस्वरातिरिक्तं कलयताऽङ्गीकुर्व्वता । तथा बन्ध्यो-दरात् जातेन । एवमस्याकीर्त्तयः स्थिताः सभायां श्राविताः । परार्द्धाधिका सङ्ख्याऽन्धस्य दर्शनशक्तिः तिमिरस्य च चाचुष-रूपत्वं स्वरस्याष्टमत्वं बन्ध्योदराज्जन्म कच्छपिकाया दुग्धं एतानि यथा सर्व्वथा न सन्ति तथैतद्विशेषणयुक्ता अस्याकीर्त्तयोऽपि न सन्तीति पर्य्यवसानवृत्त्या वर्णनैव कृता । उपहासार्थत्वसङ्गतोक्तिः । आ सामस्त्येन कीर्त्तयः पूर्व्वोक्तविशेषणविशिष्टा अस्य समस्ताः कीर्त्तयो गीयन्ते किल पर्य्यवसानवृत्त्याऽस्य कीर्त्तयो न सन्त्येवेति निन्दैवास्य कृतेति वा । कच्छपी च दर्शनेनैवापत्यानि पालयति न दुग्धेनेति प्रसिद्धिः । प्रज्ञाचचुषा योगिनो ज्योतिर्विलोकन-

तदक्षरैः सस्मितविस्मितानना
निपीय तामीक्षणभङ्गिभिः सभाम्।
इहास्य हास्यं किमभून्न वेति तं
विदर्भजा भूपमपि न्यभालयत्॥ १०७॥
नलान्यवीक्षां विदधे दमस्वसुः
कनीनिकागः खलु नीलिमालयः।

निष्ठास्तिमिरं न पश्यन्ति वा। तिमिरप्रख्याः तिमिरवत्प्रख्यायन्ते। मूलविभुजादित्वात् कः (पा० ३।२।५। वा० २१)॥ १०६॥

तदक्षरैरिति। विदर्भजा इहास्यां सभायां एतदीयवचनविषये वाऽस्य वर्णितस्य नृपस्य हास्यं किमभूत् किंवा नाभूत् इति कारणात् स्वभावात्तमपि भूपं न्यभालयत् औदासीन्येन सम्मुखदृष्ट्या ददर्श न त्वनुरागादित्यर्थः। किं कृत्वा। अनुरागाभावेऽपि हास्यरसकृताभिरीक्षणभङ्गिभिः अवलोकनप्रकारविशेषैः तां सभां निपीय सादरमवलोक्य। किम्भूतां सभाम्। तस्याः सख्याः विध्युपक्रमैर्निषेधे पर्य्यवसितैः पूर्व्वोक्तैरक्षरैः कृत्वा सस्मितानि सविस्मितानि साश्चर्य्याणि चाननानि यस्यास्ताम्। इह नृपेऽस्य हास्यं जातं न वेति वा। स्मितसहितां विगतस्मितत्वं विरुद्धं। विरोधाभासः॥ १०७॥

नलेति। पतिव्रताया भैम्या नलान्यावलोकनमनुचितमित्याशङ्कां परिहरन्नुत्तरसर्गे वर्णयिष्यमाणस्य नलस्य प्रस्तावनां करोति। दमस्वसुः कनीनिका नेत्रतारा नलादन्यस्य नृपस्य

चकार सेवां शुचिरक्ततोचितां
मिलन्नपाङ्गः सविधे तु नैषधे ॥ १०८ ॥
दृशा नलस्य श्रुतिचुम्बिनेषुणा
करेऽपि चक्रक्कलनम्रकार्मुकः ।

वीक्षामवलोकनरूपामागः अपराधं विदधे चक्रे । किम्भूता ।
खलु यस्मान्नीलिम्नः कालिम्नः आलयः स्थानं। मलिनो हि
निषिद्धमाचरति। अपाङ्गस्तु कटाक्षः पुनः सविधे द्वितीयपङ्क्तौ
चिचतुरेभ्योऽनन्तरमुपविष्टे नैषधे सत्यनले मिलन् सम्बद्धः सन्
शुचिरक्ततोचितां धवलरक्तलयोग्यां सेवां चकार । धवलरक्त-
लक्षणसामुद्रकलक्षणयुक्तोऽपाङ्गस्तु नल एव संलग्नोऽभूदि-
त्यर्थः ।अथ च शुचेः पापभीरोः अनुरक्तस्य च स्वभावेन उचितां
स्वामिभक्तोचितां इति वा। स्वामिभक्तो हि स्वामिनमेव सेवते
न त्वन्यमित्यर्थः। कटाक्षेणान्यावलोकने दोषः। ऋजुदृष्ट्या
त्वन्यविलोकने दोषो नेति न पातिव्रत्यक्षतिः कापि। नलमेव
कटाक्षैर्विलोकयति स्मेति भावः। इन्द्राग्निषु चतुर्षु अलीक-
नलेषु सत्स्वपि सत्यनललेऽजातेपि तत्रैव सत्यनले एवानुराग-
बाहुल्यादृष्टवशात् कटाक्षनिरीक्षणं युक्तं ॥ १०८ ॥

इदानीं श्लोकचतुष्टयेन परस्परानुरागं वर्णयति। दृशेति।
ततो भैमीकटाक्षविलोकनानन्तरं स्वयमनङ्गोऽङ्गरहितः परस्य
नलस्यैव दृगादिभिरङ्गैरवयवैर्धन्वितां धनुर्द्धरत्वं अनुकल्प्य
आकर्णगामिनाबाणकल्पेन चक्षुषा जनीं भैमीमार्दयदपीपिडत्।

स्मरः पराङ्गैरनुकल्प्य धन्विनां
जनीमनङ्गः स्वयमार्दयत्ततः॥ १०९॥
उत्कण्टका विलसदुज्ज्वलपत्त्रराजि-
रामोदभागनपरागतराऽतिगौरी।

किंभूतः स्मरः। करे नलस्यैव हस्ते रेखामयराज्यादिलक्षणरूप-चक्रछलेन नम्रं चक्राकारं कार्मुकं यस्य सः। भैम्या कटाक्षैर्नले वीक्षिते सति नलेन कटाक्षैर्वीक्षिता सा सती कामातुरा जातेति भावः। मुख्याङ्गाभावे चानुकल्पोऽप्यङ्गीक्रियते। आर्दयत्। अर्द हिंसायां ण्यन्ताल्लङ्। आर्दिददिति पाठे लुङ्॥ १०९॥

उत्कण्टकेति। सा भैमी रुद्रक्रुधः रुद्रकृतशापपरित्याग समुद्भवात्कोपाद्भेतोः तस्य रुद्रस्यारिः कामः तस्य बुद्ध्याऽयं काम एवेति बुद्ध्या नले विषये वासस्य स्वयम्बरेण स्थितेरर्थितां अभिलाषुकत्वं अधृत दधार। नले साभिलाषा जातेति भावः। स्वस्त्रुममाश्रयणस्य युक्तमेव। केव। काञ्चनकेतकीव। किंभूता सा केतकी च। उत्कण्टका उदितरोमाञ्चा उर्द्धीभूतसूचीतुल्य सूकाया च। तथा विलसन्ती शोभमाना नीलपीतादिभिर्वर्णैरुज्ज्वला प्रकाशमाना उज्ज्वलेन शृङ्गारेण वा प्रकाशमाना विलोकनादिशृङ्गारोपाया एवंभूता वा कस्तूर्यादिरचिता कपोलवक्षोजादौ पत्त्रराजिः पत्त्रवल्ली पत्त्रपङ्क्तिर्यस्याः। शोभमानोज्ज्वलवर्णपत्त्रपङ्क्तिश्च। तथा आमोदं विलेपजं सुरभिगन्धं हर्षं वा स्वाभाविकं परिमलञ्च भजतीति भाक्। तथा अपगतोऽनु-

रुद्रक्रुधस्तदरिकामधिया नले सा
वासार्थितामधृत काञ्चनकेतकीव ॥ ११० ॥
तन्नालीकनले चलेतरमनाः साम्यान्मनागप्यभू-
दप्यग्रे चतुरः स्थितान्न चतुरा पातुं दृशा नैषधान्।

रागो यस्या एवंभूता न भवति अतितरां अनपरागतरा। नले अतितरामनुरागिणी। न विद्यते परागः पुष्परजो यस्यामेवंविधा न भवति नितरां अनपरागा अनपरागतरा अतितरां पराग-सहिता। तथाऽतितरां गौरवर्णा उभय्यपि। गौरीं पार्व्वतीं अतिक्रान्ता वा भैमी। सुवर्णकेतकी यथा रुद्रकोपस्य वासः वसतिः तस्यार्थितां अभिलाषुकत्वं दधार तस्य स्थानं बभूवेत्यर्थः। तथा भैम्यपि नलविषये नलवैरिकामबुद्ध्या नलशत्रुः काम एवेति नलसम्बन्धित्वेन मां पीडयतीति धिया रुद्रकोपस्यात्मनि यो वासस्तदर्थितां दधार। रुद्रकोपस्य स्थानं जाता नितरां सकोपा जातेत्यर्थः। कामसाम्यं नलस्योक्तं। नलेन कटाक्षवीक्षणे कृते सातितरां कामपीडिता जातेति भाव इति वा। गौरीमतिक्रा-न्तेति तत्पुरुषे। गोस्त्रियोरुपसर्ज्जनस्येति (पा० १।२।४८)। ह्रस्वत्वप्राप्तेः अतिगौरिरिति स्यात्। तथापि कृदिकारादक्तिन इति (कौ० प० ३३। पं० ३। पा० ४।१।४५। वा०)। ह्रस्वान्तादपि पक्षे ङीषि अतिगौरीति सङ्गच्छते ॥ ११० ॥

तदिति। न अलीको नालीकः स चासौ नलश्च नालीक-नलः सत्यनलः। स चासौ नालीकनलश्च तन्नालीकनलस्तस्मि-

आनन्दाम्बुनिधौ निमज्य नितरां दूरङ्गता तत्तला-
लङ्कारीभवनाज्जनाय ददती पातालकन्याभ्रमं ॥ १११ ॥

अदृष्टवशघटितदुर्घटदर्शने सत्यनले चलेतरत् निश्चलं मनो यस्याः सा । तत्रैवानुरक्ता सती सा भैमी अग्रे स्थितानपि चतुरश्चतुःसङ्ख्यकानलीकान् साम्यान् सत्यनलसाम्येन नलान् दृशा नयनव्यापारेण पातुं कटाक्षैर्विलोकयितुं मनागत्यल्पमपि चतुरा कुशला नाभूत् । किंभूता । आनन्दाम्बुनिधौ आनन्दरूपे समुद्रे निमज्य क्रीडित्वा नलावलोकनान्निश्चला भूत्वेति यावत् । नितरां दूरङ्गता हर्षस्य परमकाष्ठां प्राप्ता तलङ्गता च । तथा तस्यानन्दसमुद्रस्य तलं तस्यालङ्कारीभवनाज्जनाय पातालकन्याभ्रमं अतिसौन्दर्य्यादानन्दवशाच्च निर्निमेषतया समुद्रे निमज्य तलगमनेन च किमियं नागकन्येति भ्रमबुद्धिं ददती जनयन्ती । अलङ्कारीभवते इति पाठे तस्य नलस्य भूतलस्य उपवेशनेनालङ्कारभूतायेन्द्रादिलोकाय नललक्षणाय जनाय वा पातालतलस्यालङ्कारीभवते वासुक्यादिनागलोकाय वा पुरःस्थितान्नलाकारानपीन्द्रादीनन्यराजवदतुच्छैव विलोकयति स्म । अदृष्टवशाच्च व्यवहितमपि सत्यनले कटाक्षैर्विलोकयति स्मेति भावः । तन्नलेतिपाठे तेषामलीकनलत्वात्तदानीं स्वीयेन रूपेणालङ्कारभूताय जनाय सत्यनलायेत्यर्थः ॥ १११ ॥

सर्व्वस्वं चेतसस्तां नृपतिरपि दृशे प्रीतिदायं प्रदाय
प्रापत्तद्दृष्टिमिष्टातिथिममरदुरापामपाङ्गोत्तरङ्गां ।
आनन्दान्ध्येन बन्ध्यानकृत तदपराकूतपातान् स रत्याः
पत्या पीयूषधारावलनविरचितेनाशुगेनाशु लीढः ॥ ११२ ॥

सर्व्वस्वमिति ॥ स नृपतिर्नलोऽपि चेतसः सर्व्वस्वं प्राणवत्प्रियां तां भैमीं दृशे स्वनेत्राय प्रीतिदायं सन्तोषजनितं दानं प्रदाय प्रकर्षेण दत्त्वा कटाक्षेण अतिसादरं दृष्ट्वा अमरदुरापां इन्द्रादिभिर्दुर्लभां लोकोत्तरस्वरूपां अथच तेषां कटाक्षेणानवलोकनात्तैर्दुरापां अपाङ्गे नेत्रप्रान्ते उत्तरङ्गां चलत्कल्लोलां अतिचञ्चलां कटाक्षरूपां तद्दृष्टिं भैमीदृष्टिमेव इष्टातिथिं प्रियमभ्यागतं प्रापत् लेभे। भैम्या पूर्व्वं कटाक्षैर्विलोकितोऽनन्तरं तेन सा विलोकिता अनन्तरं पुनरपि तया स विलोकित इत्यर्थः। अनन्तरं च रत्याः पत्या कामेन पीयूषधारारूपमतिनिर्वापकत्वादमृतरूपं यद्वलनं भैमीकृतं वलितग्रीवमवलोकनं तेन कृत्वा विरचितेनाशुगेन भैमीकटाक्षरूपेण बाणेनाशु शीघ्रं लीढो विद्धः सः नलः तदपराः तस्या भैमीदृष्टेरपरेऽन्ये तृतीयादयो ये आकूतपाताः अनेकभावाभिव्यञ्जका व्यापारविशेषास्तान् आनन्दान्ध्येन हर्षाश्रुपरिपूर्णनेत्रतया यदान्ध्यं अदर्शनत्वेन बन्ध्यान् निष्फलान् अकृत। भैमीद्वितीयकटाक्षवीक्षणेनैवातितृप्तो कामविवशः संस्तस्यास्तृतीयादिकटाक्षनिरीक्षणानि न ददर्शेति भावः। अन्योऽपि तुष्टः कस्मैचित् सर्व्वस्वं ददाति अतिप्रियस्यातिथिं प्राप्यानन्दबाष्पान्धो भवति ॥ ११२ ॥

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।
तस्य द्वादश एष मातृचरणाम्भोजालिमौलेर्महा-
काव्येऽयं व्यगलन्नलस्य चरिते सर्गो निसर्गोज्ज्वलः॥११३॥

श्रीहर्षमिति। पूर्व्वार्धार्थः पूर्व्ववत्। माता वागीश्वरी जननी च तस्याश्चरणाविवाम्भोजे तयोरलिरूपो भ्रमररूपः मौलिर्यस्य। यद्वा मातृचरणसम्बन्धिनी पूजार्थं चरणयोरुपढौकिता अम्भोजालिः कमलमाला तद्युक्तो मौलिर्यस्य। वागीश्वर्य्या जनन्या वा प्रसादरूपेण धृतनिर्माल्यकस्येत्यर्थः। द्वादशानां पूरणः सर्गः व्यगलत् समाप्तः। स्वभावत उज्ज्वल इत्यर्थः॥ ११३ ॥ इति श्रीबेदरकरोपनामक श्रीमन्नरसिंहपण्डितात्मजनारायणकृते नैषधीयप्रकाशे द्वादशः सर्गः॥ शुभमस्तु॥

त्रयोदशः सर्गः।

श्रीलक्ष्मीनृसिंहौ जयतः।

कल्पद्रुमान् परिमला इव भृङ्गमाला-
मात्माश्रयां निखिलनन्दनशाखिवृन्दात्।
तां राजकादपगमय्य विमानधुर्य्या
निन्युर्नलाकृतिधरानथ पञ्च वीरान्॥ १॥

इदानीं इन्द्रादिपञ्चनलीमञ्जं त्रयोदशं सर्गमारभते। कल्पद्रुमेति। अथ विमानधुर्य्याः शिविकावाहिनः तां भैमीं राजकाद्राजसमूहात् अपगमय्य निवर्त्त्य नलाकृतिधरान् नलवेषधारिणः पञ्च वीरान्नलसहितानिन्द्रादीन्निन्युः प्रापयामासुः। शिविकावाहिनां तेषु पञ्चसु नलोऽस्ति वा न वेति अपरिज्ञानात् नलस्यापि नलरूपधारकत्वं घटते। यस्य यद्रूपं तद्धारित्वं तस्यापि युक्तमेवेति काव्यापेक्षयापि युज्यते। वीरपदेन शौर्य्यं नायकगुणः। के। कस्मात्। कां। कानिव। परिमला मनोहराः गन्धाः समस्ताः नन्दनशाखिनो देवोद्यानतरवः तेषां वृन्दात् आत्माश्रयां परिमलाश्रितां भृङ्गमालां भ्रमरपङ्क्तिं परावर्त्त्य अतिशयान् कल्पद्रुमानिव। कल्पद्रुमा नन्दनस्थितवृक्षापेक्षया अधिकास्तथाऽन्यराजापेक्षया तेऽपीत्यर्थः। सर्व्वाभिलाषपूरकत्वसाम्यात्।

साक्षात्कृताखिलजगज्जनताचरित्रा
तत्राधिनाथमधिकृत्य दिवस्तथा सा
ऊचे यथा स च शचीपतिरभ्यधायि
प्राकाशि तस्य न च नैषधकायमाया ॥ २ ॥
ब्रूमः किमस्य वरवर्णिनि वीरसेनो-
द्भूतिं द्विषद्बलविजित्वरपौरुषस्य ।

मन्दारादिष्वपि चतुर्षु कल्पद्रुमशब्दप्रयोगः । भैम्या अप्यात्मा-श्रयविमाने स्थितत्वात् । नयतिर्द्विकर्मा ॥ १ ॥

साक्षादिति । सा देवी तत्र तेषु मध्ये प्राधान्यान्निवेश-नक्रमानुरोधाच्च दिवोऽधिनाथमिन्द्रमधिकृत्योद्दिश्य तथा तेन प्रकारेणोचे अकथयत् । यथा येन प्रकारेण स शचीपतिरिन्द्र-स्ताभ्यधायि उक्तो भवति । तस्येन्द्रस्य नैषधकायस्य माया छद्म न च प्राकाशि प्रकटितं भवति । किंभूता । साक्षात्कृतं अखिलजगतां जनताचरित्रं जनसमूहवृत्तान्तो यया सा । यथा इन्द्रादीनां प्राकट्यं न विष्णोराज्ञया वर्णनं च मौनित्वे प्रतिभाक्षयो न तथाऽवोचदिति भावः । साक्षादिति विशेषणे नलरूपं कृत्वा आगतानामिन्द्रादीनां ज्ञानौचित्यं सूच्यते ॥ २ ॥

ब्रूम इति । हे वरवर्णिनि उत्तमे भैमि वयं अस्येन्द्रस्य वीराणां वा सेनायाः सैन्यस्य उद्भूतिं उत्कृष्टैश्वर्यं सामर्थ्यं बाहुल्यं वा किं ब्रूमो वर्णयामः । वर्णनाशक्यत्वाद्वागगोचर इत्यर्थः । किम्भूतस्य । द्विषन्मित्रो यो बलनामा दैत्यस्तस्य विजित्वरं जय-

सेनाचरीभवदिभाननदानवारि-
वासेन यस्य जनिताऽसुरभी रणश्रीः ॥ ३ ॥

नशीलं पौरुषं पराक्रमो यस्य। यस्य रणश्रीः सेनाचरीभवन्तौ सैनिकौ भवन्तौ यौ इभाननदानवारी गणेशनारायणौ तयोर्वासेनाधिष्ठानेन कृत्वा जनिता कृता असुरभीर्दैत्यभयं यया सा। असुरेभ्यो देवानां या भीस्तस्या ईरणं क्षेपणं तेन या श्रीः सा यस्य जनितेति वा। वागगोचरोऽस्य चरितमित्यर्थः॥ नलपक्षे तु अस्य वीरसेनाख्यनृपादुत्पत्तिं किं कथयामः अपि तु न। अकथनेऽपि लोकत्रये प्रसिद्धत्वात्। स्वगुणैरेवास्य ख्यातत्वाद्वा। अन्यो हि स्वयं न प्रसिद्धस्तस्य पित्रादिप्रसिद्ध्या वर्णनं क्रियते। अयं तु न तथेति भावः। किंभूतस्य। द्विषतां बलस्य सैन्यस्याङ्गिकस्य सत्त्वस्य वा जित्वरं पौरुषं पराक्रमो यस्य। यस्य रणश्रीः सेनाचरीभवन्तः सैनिका इभास्तेषां आननदानवारि मुखदानोदकं तस्य वासेन गन्धेन सुरभिर्जनिता। रलयोः सावर्ण्यात्सेनायामचलीभवतां पर्व्वतायमानानां इभानामिति वा। मत्तगजबाहुल्यमनेन सूच्यते। एवमिन्द्रनलयोरभेदबुद्धिर्यथा तस्या भवति तथा देव्योक्तं। रणशब्दो लक्षणया रणभूमौ वर्त्तते। इतः श्लोकादारभ्यात्याजीति यावत् प्रथममिन्द्रादिवर्णनं पश्चान्नलवर्णनं। अत्याजीत्यादौ च नलवर्णनं प्राथम्येन दिक्पालवर्णनं पश्चादिति ज्ञेयम्। श्लोकादिष्ट प्रथमत इति श्लोकेन नलस्य प्राधान्यनिर्द्देशाद्धरिणेत्यादि तृतीयया दिक्पालानामप्राधान्यनिर्द्देशात्। उष्णस्पर्शवती

शुभ्रांशुहारगणहारिपयोधराङ्क-
चुम्बीन्द्रचापखचितद्युमणिप्रभाभिः।

शीते शीतस्पर्शा तपात्यये। भर्तृभक्ता च या नारी सोच्यते वरवर्णिनीति वृद्धाः। उत्तमा वरवर्णिनीत्यमरः। वरो वर्णो यस्या इति वा। अतिशायने धर्म्मशीलवर्णान्ताच्चेति इनिः (पा० ५। २।१३२)॥ ३॥

शुभ्रेति। एष इन्द्रः समिति च यात्रासु विलासगतिषु च दण्डयात्रासु वा। अमरवाहिनीभिः सुरसेनाभिः अन्वास्यते अनुगम्यते। किं विधाभिः। शुभ्रांशुश्चन्द्रः हरसम्बन्धिनो हाराः एकादशरुद्रास्तेषाङ्गणः समूहः हरसम्बन्धिनो वा ये गणाः नन्दिप्रभृतयस्तान् सर्व्वानपि हरन्ति आत्मना सह नयन्ति तत्सहिता इति यावत्। एवंविधाः पयोधरा मेघाः। हरस्यापत्यं हारः स्कन्दो गणपतिर्मेघाश्चेति वा। तेषामङ्कचुम्बी स्वामित्वा-न्मध्यवर्त्तीन्द्रः शुभ्रांशुहारगणान् हरत्यात्मना सह नयत्येवं शीलः पयोधराङ्कचुम्बी च एवंविधो वा य इन्द्रस्तस्य चापं तेन खचिता सम्बद्धा द्युमणिप्रभा सूर्य्यशोभा यासु ताभिः शुभ्रांश्वादिभिः शक्रधनुर्व्याप्तेन सूर्य्येण च प्रकर्षेण भान्ति ताभि-र्वा। तथा बहुः प्रचुरो लाभो धनादिप्राप्तिर्येषु रणेषु अर्चिता-भिः पूजिताभिः। दैत्यजयाद्बहुला आभा दीप्तिर्यासां तास्च ता रणार्चिताश्चेति वा। मेघानामपि कामरूपत्वात् सैनिकत्वं युज्यते। चन्द्रादिभिर्विशिष्टेन्द्रचापेन च खे आकाशे चिता वृद्धिं प्रापि-ता सूर्य्यशोभा यास्विति वा। तैः कृत्वा वृद्धिं प्राप्ता वा चन्द्राद-

अन्वास्यते समिति चामरवाहिनीभि-
र्यात्रासु चैष बहुलाभरणार्चिताभिः ॥ ४ ॥

यस्तेजस्विनस्तत्तेजःसम्बन्धेन सूर्य्यतेजः प्रचुरं यत्र जातमित्यर्थः ॥
नलपक्षे एष नलः सभायां दण्डयात्रासु च चामरधारिणीभिः
अन्वास्यते सेव्यते । किंभूताभिः । शुभ्राः सिताः अंशवो यस्य तेन
हारगणेन मुक्ताहारसमूहेन कृत्वा हारी सुन्दरः पयोधराङ्कः
स्तनमध्यस्तच्चुम्बिनी तत्सम्बद्धा इन्द्रचापसम्बद्धसूर्य्यप्रभेव प्रभा
यासां ताभिः । चोऽप्यर्थः । यात्रास्वपीति योजना । हारमध्य-
गमणीनामनेकवर्णत्वादिन्द्रचापसम्बद्धसूर्य्यप्रभासाम्यं । तथा त
एव बहुलानि प्रचुराणि आभरणानि तैरर्चिताभिरलङ्कृताभिः ।
प्राधान्याद्धाराणाङ्ग्रहणं । आभरणग्रहणं तद्व्यतिरिक्तालङ्का-
राणां अतो न पौनरुक्त्यम् । एतेन यथा सभायां निर्भय आस्ते
तथा सङ्ग्रामयात्रास्वपीति व्यज्यते । शुभ्र उद्दीप्तशुक्लयोः । द्युम-
णिस्तरणिर्मित्रः । समित्युद्धे सभयाञ्च इत्यमरः । हरशब्दात्तस्ये-
दमित्यण् (पा० ४ । ३ । १२०) । हारी । ताच्छील्ये णिनिः ।
अपत्ये वा अत इञ् (पा० ४ । १ । ९५) । यद्वा शुभ्रांशुहार-
गणेन हारिणः पयोधराः स्तनास्तेषामङ्कः पार्श्वप्रदेशः तच्चुम्बी
इन्द्रचापो नखपदविशेषस्तेन सम्बद्धा दिव्यरत्नप्रभा यासां
ताभिः । इन्द्रचापवदाकाशव्याप्ता दिव्यमणिप्रभा यासां ताभि-
रिति वा । चित्रमणिप्रभासम्वलिताः शक्रधनुःसदृशा भवन्तीति
बहुलैराभरणैर्भूषिताभिरित्यर्थः । खच दीप्तिसंवरणयोः ॥ ४ ॥

क्षोणीभृतामतुलकर्कशविग्रहाणा-
मुद्दामदर्पहरिकुञ्जरकोटिभाजां।
पक्षच्छिदामयमुदग्रबलो विधाय
मग्नं विपज्जलनिधौ जगदुज्जहार ॥ ५ ॥

क्षोणीति। इति पद्यं कुत्रचित्पुस्तके दृष्टं। तस्यायमर्थः। अयं क्षोणीभृतां पर्व्वतानां पक्षच्छिदां विधाय कृत्वा विपज्जलनिधौ आपत्समुद्रे मग्नं पक्षसहितैः पर्व्वतैः श्लक्ष्णीकरणाज्जगदुज्जहार उच्चकर्षेत्यर्थः। पर्व्वतपक्षच्छेदनाद्विपद्रहितं कृतवानिति भावः। किंभूतानां। अतुला अत्युच्चाः कर्कशाश्च विग्रहा देहा येषां। तथा उद्दामदर्पाणां अत्युद्भटानां हरिकुञ्जराणां सिंहहस्तिनां कोटिं भजतां। एकस्मिन् प्रदेशेऽनेकसिंहानामन्यस्मिन्नत्युद्भटानामनेककुञ्जराणामित्यर्थः। किंभूतोऽयं। बलाद्दैत्यादुदग्रः उदग्रबलः। यद्वा उदग्रं पौरुषं यस्य सः॥ नलपक्षे अतुलानत्युच्चान् सलक्षणांश्च कर्कान् श्वेताश्वान् घ्नन्ति मारयन्ति एवंविधा विग्रहाः शरीराणि वैरं वा येषां। तथा उद्दामदर्पा हरयोऽश्वा गजाश्च तेषां कोटिं भजतां। वैरिनृपाणां पक्षच्छिदां सहायच्छेदं कुक्षिच्छेदं वा कृत्वा उदग्रं बलं पौरुषं सैन्यं वा यस्य। अयं नलो वैरिकृतापत्समुद्रे मग्नं जगदुज्जहार। वैरिणो हत्वा आपद्रहितमकरोदित्यर्थः॥ ५ ॥

भूमीभृतः समिति जिष्णुमपव्यपायं
जानीहि न त्वमघवन्तममुं कथञ्चित्।

भूमीभृत इति। हे घटस्य प्रतिभटौ स्पर्द्धिनौ स्तनौ यस्या-स्तत्सम्बुद्धिः। हे भैमि त्वं समिति सङ्ग्रामे भूमीभृतः पर्व्वतान् जिष्णुं जेतारं। तथा न विद्यते पवेर्वज्रस्य अपायो नाशो यस्य। तममुं अमघवन्तमनिन्द्रं न तु नैव जानीहि अपि त्विन्द्र एवायं। इन्द्रस्य सहस्रनेत्रत्वान्नायं तथेत्यत आह। त्वं एतदीयं शयं पाणिम-तिक्रान्तं प्रसृतादपि दीर्घं अत एवाद्भुतमाश्चर्य्यकारि कथञ्चिद् गुप्तं नलरूपधारणाच्छादितं बहुनेत्रस्य भावो बाहुनेत्रं ना-लोकसे न पश्यसि गुप्तत्वान्न तु अविद्यमानत्वादित्यर्थः। शयावति-क्रान्तं हस्ततलयोर्नेत्राणि न सन्तीत्यर्थ इति वा। बहुनेत्र-समूहं बाहुनेत्रसम्बन्धिनमेतदीयमतिशयमुत्कर्षं वाश्चर्य्यमिति वा। नलपचे त्वममुं अघवन्तं सपापं न जानीहि पुण्यश्लोकत्वात्। रणे राज्ञो जेतारं। तथापगतो विशिष्टोऽपायो यस्मात्तं। रणे अपगतो व्यपायः पलायनं यस्मात् अपलायमानमित्यर्थः। एत-दीयं अतिशयमपरिमितहस्तपरिमाणमाश्चर्य्यरूपं प्रावरणवशा-द्वाहौ हस्ते स्थितं नेत्रं चीनांशुकं गुप्तं यथा तथा द्रव्यान्तरवि-लोकनव्याजेन नालोकसे अपि त्वालोकयेत्यर्थः। बाहू च नेत्रे च बाहुनेत्रं। शयमतिक्रान्तं बाहू हस्तपरिमाणाधिकपरिमाणौ नेत्रे च प्रसृतादप्यधिकेत्यर्थः। तद्गुप्तं यथा तथा नालोकसे अपि त्वालोकयेति वा। अतिशयं बाहुनेत्रं वाहू अतिशयितौ वदान्यौ शयौ ययोस्तावतिशयौ। नेत्रे च शयमतिक्रान्ते अतिशयौ च।

गुप्तं घटप्रतिभटस्तनि बाहुनेत्रं
नालोकसेऽतिशयमद्भुतमेतदीयम् ॥ ६ ॥
लेखा नितम्बिनि बलादिसमृद्धराज्य-
प्राज्योपभोगपिशुना दधते सरागं ।
एतस्य पाणिचरणं तदनेन पत्या
साढ्ढं शचीव हरिणा मुदमुद्वहस्व ॥ ७ ॥

अतिशये चेति नपुंसकैकशेषेण वा व्याख्येयं। एतदीयं गुप्तमनेन पालितं। बहवश्च ते नेतारश्च बहूनां वा नेतारस्तेषां समूहः अतिशयितो हस्तो यस्य। लक्षणया वदान्यं उत्कृष्टमालोकय। शूरा वदान्या अप्यनेन पोषिता इत्यस्योत्कृष्टत्वं व्यज्यते। कुलिश-भिदुरम्यविरित्यमरः। नेत्रं पथि गुणे च स्वे इति विश्वः। जिष्णुः। ग्लाजिस्थश्च ग्स्नुरिति ताच्छील्ये ग्स्नुः। (पा० ३।२।१३९)। तद्योगे भूमीभृत इति न लोकेति (पा० २।३।६९)। षष्ठीनिषेधात् द्वितीया। बहुनेत्रशब्दात् भावसमूहसम्बन्धे ष्यञ् (पा० ४।२।३७)। पक्षे प्राण्यङ्गत्वादेकवद्भावः (पा० २।३।२)॥ ६॥

लेखा इति। हे नितम्बिनि अतिपृथुनिबिडनितम्बे भैमि बलादीनां बलवृत्रनमुचिप्रभृतीनां समृद्धं सम्पूर्णं राज्यं राज-भावः तस्य प्राज्यो बहुः उपभोगस्तस्य पिशुनास्तदसहनाः लेखा देवाः एतस्येन्द्रस्य पाणी च चरणौ च पाणिचरणं सरागं सानु-रागं यथा तथा दधते धारयन्ति। हस्तनादात्पाणिं नमस्कारार्थं च चरणावित्यर्थः। तत्तस्मादनेन हरिणेन्द्रेण पत्या साढ्ढं शचीव

आकर्ण्य तुल्यमखिलां सुदती लगन्ती-
माखण्डलेऽपि च नलेऽपि च वाचमेताम्।
रूपं समानमुभयत्र विगाहमाना
श्रोत्रान्न निर्णयमवापदसौ न नेत्रात्॥ ८॥

मुदमुद्वहस्व धारस्व॥ नलपक्षे सरागमरुणं एतस्य पाणिचरणं कर्तृ सैन्यस्वाम्यमात्यादिभिः षड्विधेन वा बलेन समृद्धस्य राज्यस्य प्राज्य उपभोगस्तस्य सूचिका सामुद्रिकोक्तलक्षणभूताः ध्वजादिलेखाः कर्म्मभूताः दधते धारयति। दध धारणे एकवचनान्तमस्मिन् पक्षे रूपं। तस्मादनेन पत्या नलेन सह हर्षं धारयस्व। केन केव। हरिणेन्द्रेण शचीव। लेखा अदितिनन्दनाः। पिशुनौ खलसूचकावित्यमरः। नितम्बशब्दादतिशयार्थादिनिः (पा० ५।२।१३२)। पाणिचरणं। प्राण्यङ्गत्वादेकवद्भावे षण्ढत्वं (पा० २।४।१७)॥ ७॥

आकर्ण्येति। असौ सुदती भैमी एतां पूर्व्वोक्तां अखिलां वाचमाखण्डलेऽपि च नलेऽपि च तुल्यं लगन्तीं समानसम्बन्धामाकर्ण्य उभयत्र इन्द्रे नले च समानं रूपं ऐक्यरूपञ्च विगाहमाना जानती विशेषावलोकनादपि विशेषमनुपलभमाना यथाक्रमं श्रोत्राच्छ्रवणेन्द्रियात् नेत्राच्चक्षुरिन्द्रियाच्च निर्णयं नावापत् न प्राप। अनयेन्द्रः स्तुतः किंवा नलः। तयोः सरूपत्वादयमिन्द्रो नलो वेति नाज्ञासीदित्यर्थः। अपि चेति समुदायौ परस्परसमुच्चयवाचकौ। अवापत्। लृदित्वादङ्॥ ८॥

शक्रः किमेष निषधाधिपतिः स वेति
दोलायमानमनसं परिभाव्य भैमीम्।
निर्द्दिश्य तत्र पवनस्य सखायमस्यां
भूयोऽसृजद्भगवती वचसां स्रजं सा॥ ९॥

एष प्रतापनिधिरुद्गतिमान् सदायं
किं नाम नार्जितमनेन धनञ्जयेन।

शक्र इति। सा भगवती सरस्वती भूयः पुनरपि वचसः स्रजं वाङ्मालां असृजत्। किं कृत्वा। तत्र तेषु मध्ये अस्यां भैमीसमीपे पवनस्य सखायमग्निं निर्द्दिश्योद्दिश्य। पुनः किं कृत्वा भैमीं इति दोलायमानं दोलेव भवत् मनो यस्यास्तां परिभाव्य सञ्चिन्त्य। इति किं। एष किं शक्रः सत्यं दृष्टः निषधाधिपतिर्नलो वेति दोलेवाचरति। कर्त्तुः क्यङ् सलोपश्चेति (पा० ३। १।११)। क्यङि शानचि दोलायमानमिति। अस्यां सामीपिक आधारः॥ ९॥

एष इति। हे भैमि एष प्रतापस्य निधिः प्रकृष्टोष्मस्पर्शस्थानं। तथाऽयं सदा उद्गतिमानूर्द्ध्वगमनयुक्तः ऊर्द्ध्वज्वलनोऽयमित्यर्थः। धनञ्जयेन वह्निनाऽनेन किं नाम का सञ्ज्ञा नार्ज्जितं न प्राप्तं। अग्निर्वैश्वानरो वह्निरित्यादिकं नाम निर्वचनयोगात् प्राप्तमित्यर्थः। सर्व्वेषामपि नाम्नां निर्वचनमस्त्येव। नाम सम्भावनायां अग्निनाऽनेन किं नाम वस्तु न प्राप्तं। तैजसानां परमाणूनां सर्व्वत्राविरलत्वेन विद्यमानत्वादिति वा। अनेन धनञ्ज-

हेम प्रभूतमधिगच्छ शुचेरमुष्मान्
नास्यैव कस्य च न भास्वररूपसम्पत् ॥ १० ॥

यशब्देन कृत्वा सार्थकं नाम किं नार्ज्जितमिति वा। धनञ्जयत्वा-देतस्य त्वं शुचेरग्निरूपात्तादमुष्मादग्नेः प्रभूतं बहु हेम स्वर्णमधिगच्छ प्राप्नुहि। धनमिच्छेद्धुताशनादित्युक्तेः। अग्नेरपत्यं प्रथमं सुवर्ण-मिति श्रुतेः। अस्मात् सुवर्णं प्रथममुत्पन्नं। अस्येवाग्नेरिव कस्य च न कस्यापि भास्वरा देदीप्यमाना रूपसम्पन्नास्ति तेजोमात्र-विवक्षया। तेजोव्यतिरिक्तस्य कस्य च न शुक्लं भास्वरं रूपं दृष्ट-मित्यर्थः॥ नलपक्षे एष नलः क्षात्रतेजःस्थानं। तथा सदोदयवान्। तथाऽनेन जयेन कृत्वा किं नाम धनं नार्जितं वैरिणो विजित्य धनमर्जितं। दायो दानं तेन सहितमिति वा। एतेन धनार्जनस्य स्वोपभोगः फलं न किन्तु दानमेव मुख्यं फलं वदान्यत्वं च सूचितं। सदा अयः शुभावहो विधिर्यस्मादिति वा। शुचेः स्वधर्म्मोपार्जितद्रव्यादमुष्मात्प्रचुरं सुवर्णं प्राप्नुहि। शुचेः शृङ्गा-ररूपादिति वा। अस्य नलस्येव भास्वरा कायकान्तिसमृद्धिः कस्याप्यन्यस्य नास्ति। भा दीप्तिः स्वरः कण्ठशब्दः रूपं सौन्दर्य्यं तेषां सम्पदस्यैव कस्यापि नास्तीति वा। तेजस्वी मधुरस्वरः सुन्द-रश्चेत्युक्तं। वीतिहोत्रो धनञ्जयः। शुचिरप्पित्तमौर्वस्तु इत्यमरः। धनञ्जयः। सञ्ज्ञायां भृतृवृजीत्यादिना खच् (पा० ३।२।४६)। अरुर्द्विषदिति मुम् (पा० ६।३।६७)। भास्वरं। स्येश-भासेति वरच् (पा० ३।२।१७५)॥ १०॥

अत्यर्थहेतिपटुताकवलीभवत्तत्
तत्पार्थिवाधिकरणप्रभवस्य भूतिः।
अप्यङ्गरागजननाय महेश्वरस्य
सञ्जायते रुचिरकर्णि तपस्विनोऽपि ॥ ११ ॥

अत्यर्थेति। हे रुचिरकर्णि शोभनश्रवणेन्द्रिये भैमि अस्याग्नेरत्यर्थोऽतिशयितहेतिपटुता ज्वालापाटवं तस्य कवलीभवन्ति ग्रासीभवन्ति तानि तानि पार्थिवानि पृथिवीकार्य्याणि तृणकाष्ठकरीषादीनि तान्येवाधिकरणं भस्मन एवाधारः ततः प्रभव उत्पत्तिर्यस्या एवंविधा भूतिर्भस्म तपस्विनोऽपि पाशुपतादिव्रतनिष्ठस्य महेश्वरस्य शिवस्याङ्गरागजननाय उद्धूलनेनाङ्गानां विशिष्टवर्णोत्पत्तये सञ्जायते सम्पद्यते। एतत्सम्बन्धि भस्मापि ईश्वरस्य तपस्विनोऽपि उपकृत्यै प्रभवति अन्यस्य भवतीति किं वक्तव्यमिति स्तुतिः। रुचिरकर्णेति श्लेषोक्तिचातुरीविषये सावधाना भवेति व्यज्यते। एतद्वरणे भस्मैव केवलं नान्यत्किञ्चिदिति विचार्य्य वृणीष्वेति व्यज्यते॥ नलपक्षे अङ्ग रुचिरकर्णि अस्य नलस्य भूतिः सम्पत् महेश्वरस्य महाधनिकस्यापि त्यक्तसर्व्वसङ्गस्य मुनेरपि च अभिलाषसमुद्भूतये सम्पद्यते। ममेदृक्सम्पद्भूयादिति धनिको मुमुक्षुश्चापि अस्य भूतये स्पृहयतीत्यर्थः। धनिकस्य तपस्विनोऽपि ईर्ष्याजननाय सम्पद्यत इति वा। किम्भूता सम्पत्। अतिशयेनास्त्रपटुतया मोक्षोपसंहारादिमन्त्रप्रयोगसामर्थ्येन ग्रासीभवन्तस्ते च ते पृथ्वीश्वराश्च तेषामधिको

एतन्मुखा विबुधसंसदसावशेषा-
माध्यस्थ्यमस्य यमतोऽपि महेन्द्रतोऽपि।

रणस्तस्मादुत्पन्ना। स प्रभव उत्पादको यस्या इति वा। चात्र-तेजसोपार्जितेत्यर्थः। रागोऽनुरक्ते मात्सर्य्ये। हेतिर्ज्वालायुधेऽपि च। पार्थिवेति। तस्येश्वर इत्यधिकारे (पा० ५।१।४२)। सर्व्वभूमीत्यण् (पा० ५।१।४१)। रुचिरकर्णीति। नासिको-दरोष्ठेति (पा० ४।१।५५)। ङीष्॥ ११॥

एतदिति। हे पितृमुखि अशेषा सर्व्वाऽसौ विबुधसंसत् देवसभा एष एव मुखं यस्याः सा। अग्निमुखा वै देवा इति श्रुतेः। अस्याग्नेर्यमतोऽपि महेन्द्रतोऽपि माध्यस्थ्यं आसनापेक्षया दिगपे-क्षया च मध्ये विद्यमानत्वं अस्ति। त्वं महस्विनं तेजोयुक्तं महस्सु तेजस्सु विषये इनं स्वामिनं चैनं उपैहि प्राप्नुहि। येन सदारुणा काष्ठसहितेनामुना करश्रीः किरणशोभा उच्चैरूर्द्धा रक्ता वा-ध्रियते। पितृमुखीति सम्बुद्ध्या धन्यत्वं व्यज्यते। धन्या पितृमुखी कन्या धन्यो मातृमुखःसुत इति सामुद्रिकोक्तेः॥ नलपक्षे असौ जगति प्रसिद्धा पुरो दृश्यमाना च निखिला विद्वत्सभा एत-न्मुखा एतत्प्रधाना। यथा सर्व्वेष्वङ्गेषु मुखं प्रधानं तथा विद्व-त्सभायामसौ। के विबुधा इति पृष्टे प्रथममसौ गण्यत इत्यर्थः। पुण्यश्लोकत्वात्। एष मुखो यस्यास्तादृशीति वा। अस्य यमतः सम-वर्त्तिनोऽपि इन्द्रादप्यधिकं माध्यस्थ्यं व्यज्यते। पक्षपातरहितत्वं शत्रुमित्रयोस्तुल्यदण्ड इत्यर्थः। तसेः सार्व्वविभक्तिकत्वाल्लोकपा-लांशत्वादिन्द्रयमयोरेतन्मध्यवर्त्तित्वं इति केचित्। तेजस्विनमेनं

एनं महस्विनमुपैहि सदारुणोच्चै-
र्येनामुना पितृमुखि ध्रियते करश्रीः ॥ १२ ॥
नैवाल्पमेधसि पटोर्रुचिमत्त्वमस्य
मध्येसमिन्निवसतो रिपवस्तृणानि ।

प्राप्नुहि । येनामेन सदा सर्व्वदा हस्तशोभा अतिशयेनारुणा रक्ता धार्य्यते । स्विनं शोभनं पतिमेनं सह पूजय । तथा एनमुपैहि एतत्समीपं गच्छेति वा । महस्विनमुत्सववन्तं वा । विश्वप्रकाशे सकारान्तस्य महःशब्दस्य पाठात् । मुखं मुख्ये च वक्त्रे स्यादित्यजयपालः । पिता मुखं यस्या इति समासे मुखेनैव मुखस्य सादृश्यात् पितृमुखमिव मुखं यस्या इत्यत्र पर्य्यवस्यति ॥ १२ ॥

नैवेति । एधसि काष्ठे पटोर्ज्वाज्वल्यमानस्यास्याग्नेः रुचिमत्त्वं दीप्तियुक्तत्वं अल्पं नैव किन्तु बह्वित्यर्थः। जाज्वल्यमानस्यास्य इन्धने दीप्तिमत्त्वं अल्पं नैव तत्सम्बन्धादधिकं दीप्तिमानयं भवतीत्यर्थ इति वा। तथा मध्ये समित् समिधां काष्ठानां मध्ये निवसतो विद्यमानस्य तृणानि रिपवः शत्रवः । रिपुनाशो यथा वेगेन क्रियते तथा सन्दह्यमानेन तानि क्षणमात्रेण दह्यन्त इत्यर्थः। प्रादेशमात्राणां पलाशशम्यादिकाष्ठानां मध्य इति वा । इह लोके समिन्मध्ये वा उत्थानवान् ऊर्द्ध्वं ज्वलन् तरस्वी वेगवानयं विरोधिना केन उदकेन पराभवितुं पुनः शक्या भवति तेनैव शान्तिमेति नान्येनेत्यर्थः । अय्यो भवति अपि तु न । वेगेनोत्थितस्यास्य वा-

उत्थानवानिह पराभवितुं तरस्वी
शक्यः पुनर्भवति केन विरोधिनायं ॥ १३ ॥
साधारणीङ्गिरमुषर्बुधनैषधाभ्या-
मेतां निपीय न विशेषमवाप्तवत्याः ।

रिणापि शान्तिः कर्त्तुमशक्येत्यर्थ इति वा॥ नलपक्षे पटोर्ग्रहण-धारणादिसमर्थस्याल्पमेधसि मन्दप्रज्ञे रुचिमत्त्वं प्रीतियुक्तत्वं नैव अयोग्यत्वात्तस्येति भाव इत्यर्थः। तथा समिन्मध्ये सङ्ग्राममध्ये निवसतोऽस्य वैरिणस्तृणानि अकिञ्चित्करा इत्यर्थः। इह रणे भूलोके वा तरस्वी उत्थानवान् वेगवान् बलवान् वायं केन रिपुणा जेतुं शक्योऽपि तु न केनापि। कस्याप्यजय्योऽयमित्यर्थः। उत्थानमुदयः इदंसदृक्कोऽपि उदयी बलवांश्च नास्तीत्यर्थः। भवतीति सम्बोधनं वा। तरो बले च वेगे च। इध्ममेधः समिदित्य-मरः। अल्पमेधसि। नित्यमसिच्प्रजामेधयोरित्यत्र (पा॰ ५। ४। १२२)। नित्यग्रहणादन्यस्मादपि भवतीति वृत्तिकारोक्तेः प्रयोगानुसारेण असिच्। मध्ये समित्। पारे मध्ये षष्ठ्या वेति (पा॰ २। १। १८)। अव्ययीभावे निपातनादेत्वम्। झय इति (पा॰ ५। ४। १११)। वैकल्पिकत्वाट्टजभावः। परा भवितुं। शकधृषेति (पा॰ ५। ४। ६५)। अक्रियार्थत्वेऽपि शकि-योगात्तुमुन्॥ १३ ॥

साधारणीमिति। उषर्बुधनैषधाभ्यां अग्निनलाभ्यां साधा-रणीं समामेताङ्गिरं निपीयाकर्ण्य इदमीयमनयोः सम्बन्धिनं

ऊचे नलोऽयमिति तम्प्रति चित्तमेकं
ब्रूते स्म चान्यदनलोऽयमितीदमीयं ॥ १४ ॥

विशेषं तारतम्यं न अवाप्तवत्या प्राप्तवत्या भैम्याः पुरोवर्त्तिनं तं प्रति एकं चित्तं मनः अयं नल इत्यूचे अन्यदपरं चित्तं अयमनल इति ब्रूते स्म। नलव्यतिरिक्तोऽयं च वह्निरित्यकथयत्। युगपदालोचनस्मृतिप्रसङ्गात्मनसः प्रति शरीरमेकत्वस्य साधितत्वादेकस्मिन्नपि मनसि क्रियाभेदादवस्थान्तरप्राप्तेर्भेद इवोपपद्यते। एकमेव तं पुरोवर्त्तिनं अनल इति प्रत्यूचे। अकारप्रश्लेषेणानलोऽयमिति ब्रवीति स्म मनः। तथा अयमन्यान् वैरिणो द्यति चवखण्डयति अन्यात् न चासौ नलस्येति च ब्रूते स्म। अत्र व्याख्याने प्रथमसूचितक्रमभङ्गोऽपि न भवति। एकस्य दैरूप्यादिरोधाभासः। शोचिष्केश उषर्बुध इत्यमरः। उषसि बुध्यत इति उषर्बुधः। इगुपधेति कः (पा० ३।१।१३५) अहरादीनामिति रेफः (पा० ८। २। ७० वा० १)। तुल्यार्थैरिति तृतीया। (पा० २। ३। ७२)। अन्यदेति पचे कः। समानं साधारणमस्य साधारणं अमेकं प्रत्यविशिष्टं सम्बन्धं। पृषोदरादिः। ततस्त्रियां पादार्घाभ्यां चेत्यत्र (पा० ५। ४। २५)। आग्नीध्रसाधारणादञिति वार्त्तिकादञि ङीप् वा। प्रकरणाच्च साधारणभूमिरित्यादावदिव अत्रापि घटते। इदमीयं त्यदादित्वात् छश्चाहः (पा० ४।२।६) ॥ १४ ॥

एतादृशीमथ विलोक्य सरस्वती तां
सन्देहचित्रभयचित्रितचित्तवृत्तिम् ।
देवस्य सूनुमरविन्दविकासिरश्मे-
रुद्दिश्य दिक्पतिमुदीरयितुं प्रचक्रे ॥ १५ ॥
दण्डं बिभर्त्त्ययमहो जगतस्ततः स्यात्
कम्पाकुलस्य सकलस्य न पङ्कपातः ।

एतादृशीमिति । अथ सरस्वती अरविन्दविकासिनः कमलविकासकरा रश्मयः किरणा यस्य देवस्य रवेः दिक्पतिं दक्षिणदिशः पतिं सूनुं अन्येषां पुत्राणां दिक्पतित्वाभावाद्यमं उद्दिश्य उदीरयितुं वक्तुं प्रचक्रे आरेभे । किं कृत्वा । एतादृशीमुक्तसंशयास्पदीभूतां तथा नलनिश्चयाभावात् सन्देहः । तुल्यरूपदर्शनाद्देवयुक्तिचातुर्य्याद्वा चित्रं । नलनिश्चयाभावान्नलप्राप्तिविघ्नात्त्रासः तैः संशयाश्चर्य्यत्रासैः चित्रिता नानाविधाकृता चित्तवृत्तिर्यस्याः सा । एवंविधां तां भैमीं विलोक्य । चित्तभित्तिमिति पाठे चित्तमेव भित्तिर्यस्याः । भित्तौ हि चित्रं युक्तमित्यर्थः । एषैव दृश्यत इत्यर्थः । एतादृशीत्यदादिषु दृश इति कञि (पा० ३ । २ । ६०) । आसर्व्वनाम्न इत्यात्वे (पा० ६ । ३ । ९१) । टिड्ढेति ङीपि (पा० ४ । १ । १५) । एतादृशीति सिद्धं ॥ १५ ॥

दण्डमिति । अहो सम्बोधने अयं यमो दण्डं स्वायुधं बिभर्त्ति तत्तस्माद्धेतोः पुराणादिदर्शनेन कम्पाकुलस्य पाप-

स्वर्वैद्ययोरपि मदव्ययदायिनीभि-
रेतस्य रुग्भिरमरः खलु कश्चिदस्ति ॥ १६ ॥

भीरोः सकलस्य जगतो भुवनस्य पङ्कपातो वुडनं न स्यात् भवेत् । पङ्के महारौरवादौ नरके वा एतद्भयात् पापं कोऽपि न करोतीत्यर्थः । अहो आश्चर्य्यं । अन्यो यष्टिं धारयति अन्यस्य च कम्पमानस्य कर्दमपातो न भवतीत्यसङ्गतेः । तथा चिकित्सा-सामर्थ्ययोः स्वर्वैद्ययोर्दस्रयोरपि मदव्ययदायिनीभिः गर्व्वक्षयं कुर्व्वाणाभिरेतस्य रुग्भिः प्राणिकर्म्मविपाकदर्शनेनानेन प्रेरिताभिः पीडाभिः न म्रियत इत्यमरः कश्चित् किमस्ति अपि तु न कोऽप्यस्ति । कर्म्मजरोगाणां ताभ्यामप्यचिकित्स्यत्वादित्यर्थः । स्वर्वैद्ययोरपि नाम रुजापनयनसामर्थ्यासम्भवसूचनार्थं ॥ नलपक्षे अयं नलो दण्डं शासनं यतो बिभर्त्ति ततः शासनभयात्क-म्पाकुलस्य सकलस्यापि लोकस्य पङ्कपातो न भवेत् पूर्व्ववदे-तस्माद्भयात् अयं दण्डं चतुरङ्गसैन्यं बिभर्त्ति ततः शत्रुभयात् कम्पाकुलस्य लोकस्य पङ्कपातः दुःखपातो न भवेत् सैन्येनैव वैरिणां निहतत्वाल्लोकस्य दुःखनाश इति वा । सौन्दर्य्येण प्रसि-द्धयोर्नासत्ययोरपि गर्व्वक्षयकारिणीभिरस्य रुग्भिःकायकान्ति-भिरुपलक्षितोऽयं देवोऽपि कश्चिदस्ति किम् अपि तु नास्ति । देवेषु मध्ये दस्रावेव सुन्दरतमौ तावप्यनेन जितौ यतः । ये त्वेत-त्समीपस्थाः रमणीयास्त एतद्रूपधारणादेव न तु स्वभावेने-त्यर्थः । पङ्कोऽस्त्री शादकर्द्दमौ । अस्त्री पङ्कं पुमान् पाप्मा । रुजः

मित्रप्रियोपजननं प्रति हेतुरस्य
सञ्ज्ञा श्रुताऽसुहृदयं न जनस्य कस्य।
छायेदृगस्य च न कुत्रचिदध्यगामि
तप्तं यमेन नियमेन तपोऽमुनैव ॥ १७ ॥

प्रभारुग्रुचित्विड्भा इत्यमरः। स्त्रीरुग्रुजाद्युतिः शोभा इति मेदिनी। दायिनीभिरिति ताच्छील्ये णिनिः ॥ १६ ॥

मित्रेति। अस्य यमस्योपजननं उत्पत्तिम्प्रति सञ्ज्ञा नाम्नी मित्रप्रिया सूर्य्यपत्नी हेतुर्निमित्तं श्रुता आकर्णिता। छाया-नाम्नी तु कुत्रचित् कुत्रापि पुराणादौ ईदृगस्योत्पत्तिं प्रति हेतुर्नाध्यगामि नाश्रावि। किन्तु शनैश्चरस्यैवेत्यर्थः। यमो यमी श्राद्धदेवः सञ्ज्ञायास्तनयास्त्रय इति पुराणं। अयं यमः कस्य जनस्य असुहृत्प्राणहर्त्ता न अपि तु सर्व्वस्यापि प्राणहर्त्ता। अमुना यमेनैष नियमेन नक्तोपवासादिव्रतेन कृत्वा तपस्तप्तं धर्म्मः कृतः। अत एवास्य पुत्रत्वं धर्म्मराजत्वं चेत्यर्थः॥ नलपक्षे अस्य नलस्य सञ्ज्ञा नाम श्रुता सती मित्रप्रियस्य सुहृदिष्टस्योपजननं प्रति उत्पादनं प्रति हेतुः। अस्य सञ्ज्ञा सुहृदिष्टजननं प्रति हेतुः। श्रुता ख्यातेत्यर्थ इति वा पुण्यश्लोकत्वात्। अयं कस्य सुहृन्मित्रं न अपि तु सम्यक्परिपालनादुपकारित्वाद्वा सर्व्वस्यापि सुहृदेव। ईदृक् प्रत्यक्षे दृश्या अस्य छाया कायकान्तिः कुत्रापि नरसुरोरगेषु नाध्यगामि न दृष्टा। सुन्दरतरोऽयमित्यर्थः। छाया रीतिः लोकपालनमित्यर्थ इति वा। अस्येव जगत्पालनं कोऽपि

किञ्च प्रभावनमिताखिलराजतेजा
देवः पिता ऽम्बरमणी रमणीयमूर्त्तिः।

न करोतीत्यर्थः। अमुना मलेनैव यमेन ब्रह्मचर्य्यादिनियमेन नक्तादिव्रतेन च तपस्तप्तं त्वदर्थमिति शेषः। छाया स्यादातपाभावे प्रतिबिम्बार्कयोषितोः। तपश्चान्द्रायणादौ स्याद्धर्म्मे इत्यादि विश्वः। अध्यगामोति। इङो गाङादेशे कर्म्मणि चिण्। यमेनेति। पक्षे हेतौ तृतीया॥ १७॥

किञ्चेति। केवलं मञ्जास्य जननीत्येव न। किञ्चान्यच्च प्रभया दीप्त्याऽवनमितं तिरस्कृतं अखिलं राज्ञश्चन्द्रस्य तेजो येन सः। तथा रमणीयमूर्त्तिः अम्बरमणिः सूर्य्यः देवोऽस्य पिता। अस्य यमस्य उत्क्रान्तिदा नामिका अथ च मरणदा शक्तिरायुधविशेषः कमनु लक्षीकृत्य न प्रतिभाति समर्था न भवति अपि तु सर्व्वमनु समर्थैव। परेष्वन्येषु जनेषु गदान् रोगानियोक्तुः प्रेरयितुरस्य कृष्णत्वं श्यामत्वञ्च परपीडाजननेनापयश इत्यर्थः। अस्य कृष्णत्वं लौहत्वं लोहवत्कठिनान्तःकरणत्वमित्यर्थ इति वा॥ नलपक्षे प्रभावेन पराक्रमेण नमितसकलभूपप्रतापः। अम्बरमणिः सूर्य्यः इः कामस्तद्वद्रमणीयमूर्त्तिः देवो राजा वीरसेनोऽस्य पिता। देवो विजिगीषुरिति वा। महाकुलीनत्वमस्य सूचितं। राज्ञ इन्द्रस्य वा प्रभाया वनेन सञ्चणया समूहेन तेजःसहित कृत्वा मितमल्पीकृतमखिलभूपतेजो येनेति वा। अम्बरमणीभिर्वस्त्ररत्नैः कृत्वा रमणीयमूर्त्तिरिति वा। मणीशब्द ईबन्तोऽपि अम्बेति सम्बोधनं। रमणीनां स्त्रीणां रमणयोग्या मूर्त्तिर्यस्येति

उत्क्रान्तिदा न कमनु प्रतिभाति शक्तिः
कृष्णत्वमस्य च परेषु गदान् नियोक्तुः ॥ १८ ॥
एकः प्रभावमयमेति परेतराजौ
तज्जीवितेशधियमत्र निधेहि * मुग्धे ।

वा । अस्य शक्तिरायुधविशेषः कं वैरिणमनु उत्क्रान्तिदा मरणदा न भवति । अस्य शक्तिः सामर्थ्यं कं यममनु उत्क्रान्तिदा मरणप्रदा न प्रतिभाति अपि तु सम्भाव्यत एव । यमादन्येषां भयं तस्याप्यस्माद्भयं शूरत्वातिशयो द्योत्यते इति वा । तथा शत्रुषु गदां शस्त्रविशेषं प्रयोक्तुरस्य कृष्णत्वं देवकीपुत्रत्वं । गदायुद्धप्रावीण्यात्श्रीकृष्णसमानत्वमित्यर्थ इति वा । अस्य राज्ञः परा उत्कृष्टा इषुसम्बन्धिनो गदाः रोगाः दुःसहवाणजनिताः पीडा इति यावत् । तान् अर्थाद्वैरिषु प्रयोक्तुरस्य कृष्णत्वमर्ज्जुनत्वं च । वाणयुद्धप्रावीण्यादर्ज्जुनसमानोऽयमित्यर्थ इति वा । राजा प्रभौ नृपे चन्द्रे यक्षे क्षत्रियशक्रयोः । को ब्रह्मात्मनि लोकेषु शमने सर्व्वनाम्नि च । शक्तिर्बलप्रभावादौ शक्तिः प्रहरणान्तरे । इत्यादि विश्वः ॥ १८ ॥

एक इति । अयमेकः परेताः प्रेताः तेषां राजौ पङ्क्तौ विषये प्रभावं सामर्थ्यमेति । तत्तस्मादत्रास्मिन् जीवितेशधियं अन्तकबुद्धिं विधेहि कुरु हे मुग्धे उभयोर्भेदमजानाने सञ्ज्ञागर्भजातत्वात् इसमसहोदरस्याश्विभ्रातुर्यस्य यमस्य भूतेषु प्राणिषु

* निधत्स्वेति पाठान्तरं ।

भूतेषु यस्य खलु भूरि यमस्य वश्य-
भावं समाश्रयति दस्रसहोदरस्य ॥ १८ ॥
गुम्फो गिरां शमननैषधयोः समानः
शङ्कामनेकनलदर्शनजातशङ्के ।

भूरि प्रचुरं भूतं वश्यभावमधीनत्वं समाश्रयति प्राप्नोति । प्राणिषु मध्ये प्रचुरं भूतं यस्य यमस्य वशि वशवर्त्ति सत् प्रभावं विनाशमेवाश्रयतीति वा । मुमुक्षवः कतिपये तदर्पणया भूतानां प्राचुर्य्यं खलु निश्चये सर्व्वप्राणिनाश एतदधीन इति निश्चये-नायमन्तक इति किन्न जानासीत्यर्थः ॥ नलपक्षे परास्तु इतरे आत्मीयास्तु तेषामाजिः परान्कृष्टांस्तेजस्विनोऽपि इतरे यस्मि-क्षोदीयसः कुर्व्वन्ति ये तेषामाजिरिति वा । परात्कृष्टा या इतरेषां वैरिणामाजिरिति वा । तस्यां अयं नलः एक एव प्रभावमेति । तथा भूतेषु पृथिव्यप्तेजोवाय्वाकाशेषु मध्ये इयमि-त्यभिनयेन सकला भूः सौन्दर्य्येण दस्रसहोदरस्य अश्वितुल्यस्य यस्यास्य वश्यत्वमाश्रयति। तस्मान्मुग्ध सुन्दरि अस्मिन् प्राणेश-बुद्धिं निधेहि । तथा समा सश्रीका त्वं यस्य एतद्वरणे प्रयत्नं कुरु । एवंविधः शूरः प्रभुशक्तियुक्तः सुन्दरश्च कोऽपि नास्ती-त्येनमेव वृणीष्वेति भावः। इतरशब्दात् पञ्चं तत्करोतीति णिच् पचाद्यच् णिलोपः ॥ १८ ॥

गुम्फ इति । शमननैषधयोः यमनलयोर्विषये समानः तुल्यः पूर्व्वोक्तः गिरां गुम्फः देव्या वाणीसन्दर्भः विदर्भसु-

चित्ते विदर्भवसुधाधिपतेः सुतायाः
यन्निर्ममे खलु तदेष पिपेष पिष्टम्॥ २०॥
तत्रापि तत्रभवती भृशसंशयालो-
रालोक्य सा विधिनिषेधनिवृत्तिमस्याः।
पाथःपतिम्प्रति धृताभिमुखाङ्गुलीक-
पाणिः क्रमोचितमुपाक्रमताभिधातुं॥ २१॥

धाधिपतेः सुतायाः भैम्याश्चित्ते यच्छङ्कां संशयं निर्ममे तत् खलु निश्चितं एष पिष्टं पिपेष चूर्णमेव चूर्णितवान् इति दृष्टान्त इत्यर्थः। चूर्णचूर्णनं यथा वृथा तथेदमपीत्यर्थः। किम्भूते चित्ते। अनेकेषां नलानां दर्शनेन जातशङ्के उद्भूतसंशये। गुम्फः स्याद्गुम्फने गुच्छे इति विश्वः॥ २०॥

तत्रेति। तत्रभवती पूज्या सा सरस्वती क्रमोचितं क्रमप्राप्तं परिपाटीयोग्यं यथा तथा वाभिधातुं वक्तुमुपाक्रमत। किं कृत्वा। तत्र यमेऽपि भृशमत्यर्थं संशयालोः सन्दिहानाया अस्या भैम्या विधिनिषेधाभ्यां सकाशान्निवृत्तिं प्रवृत्तिनिवृत्त्योरभावं आलोक्य। किंभूता। पाथसां पयसां पतिं प्रभुं वरुणं प्रति धृतः अवस्थापितः अभिमुखाङ्गुलीकः सम्मुखकरशाखः पाणिर्यया। तत्रभवच्छब्दः पूज्यार्थः। अङ्गुलीकेति। नद्यृतश्चेति कप् (पा० ५। ४।१५३)। उपाक्रमत। प्रोपाभ्यामिति तङ् (पा० १। ३। ६४)। अभिधातुं। अभियोगे शकधृषेति तुमुन् (पा० ३। ४। ६५)॥ २१॥

या सर्व्वतोमुखतया व्यवतिष्ठमाना
यादोरणैर्ज्जयति नैकविदारका या।

येति। एतस्य भूरितरवारिनिधयः समुद्रा यस्यां सा चमू-र्ज्जयति सर्व्वोत्कर्षेण वर्त्तते। सा का। यस्याः परतो रोधः परं तीरं प्रतीतिविषयो दृग्गोचरो न। सेनायां समुद्राणामपि मि-लितत्वात् परं पारं न दृश्यत इत्यर्थः। सा का। या सर्व्वतोमुखस्य जलस्य भावेन व्यवतिष्ठमाना व्यवस्थिता जलमयीत्यर्थः। या यादोरणैर्जलजन्तुशब्दैस्तत्सङ्ग्रामैर्वा उपलक्षिता। तथा या नैकविदारका ऽनेककूपका। नैकान् विदारयति नैकविदारः कस्योदकस्याय आगमनं यस्यां सा। स्ववेगेन सर्व्वनाशकरमुदकं यस्यामस्तीत्यर्थ इति वा। या नैकविदारं कं यस्यामेवंभूता वा। यस्याः परतो वैरिणो यस्माद्वा रोधः आवरणं न ज्ञानगोचरं। निम्नाभिमुखस्य पयसः कस्यापि निवारयितुमशक्यत्वात् इति वा। यस्याः परप्रदेशात् प्रतिसम्मुखं इतिर्निर्गमनं तद्गोचरो नरो मनुष्यः अधोऽधस्तादेव प्रवाहवेगेनाध एव गच्छतीति भाव इति वा॥ नम्रपक्षे एतस्य भूरीणां तरवारीणां एकधारपतन-खड्गानां निधिः स्थानं सा चमूर्विजयते। या सर्व्वस्मादपि लोकात् सर्व्वसेनाभ्यो वा मुखतया श्रेष्ठतया व्यवतिष्ठते। मुख-शब्दो लक्षणया श्रेष्ठवाचकः। सर्व्वतः सर्व्वदिक्षु मुखं यस्यास्तद्भावेन व्यवतिष्ठत इति वा। अनेनानेकदिग्व्यापित्वात् सेनायाः प्राचुर्य्यं सूच्यते। या दोरणैर्बाहुयुद्धैर्भुजास्फालनशब्दैर्वोपलक्षिता।

एतस्य भूरितरवारिनिधिस्स्वभूः सा
यस्याः प्रतीतिविषयः परतो न रोधः॥ २२॥
नासीरसीमनि घनध्वनिरस्य भूयान्
कुम्भीरवान् समकरः सहदानवारिः।

दोरणैर्जयतीति वा। यादोरणैरमुष्य सङ्ग्रामैः सिंहनादैर्वा जयति सेनाजयेनास्य व्यपदेशो न किन्तु स्वयमेवासौ युद्धं कुरुते तेनोभयथा नलवर्णने तात्पर्य्यं। तथा नैके विदारका योद्धारो यस्यां सा। दोरणैः कृत्वा नैकविदारः कायो यस्याः सेति वा। यस्याः परस्माच्छत्रोः सकाशाद्रोधः आवरणं न ज्ञानगोचरः केनापि रोद्धुं न शक्यत इत्यर्थः। परस्मात् प्रतीतिविषयः सम्मुखमागच्छन्नरो मनुष्योऽधो हीन एवेति वा। पुष्करं सर्व्वतो मुखं। कूपकास्तु विदारकाः। कायो देहः। कूलं रोधश्चेत्यमरः। व्यवतिष्ठमानेति। समवप्रविभ्यस्थ इति तङ् (पा० १।३।२२)। अत्र ग्रन्थभूयस्त्वभयात् व्याकरणं न लिख्यते॥ २२॥

नासीरेति। नदीनामिनः स्वामी समुद्रः नासीरसीमनि जलमयसेनामुखविभागे स्थितः सन् करणभावं साधकतमत्वं इतैः गतैः रत्नैर्मुक्तादिभिरत्यमतिशयेनास्य वरुणस्य सुखमातनोति उत्पादयति। सुखजनने रत्नानि करणभूतानि। स्वामिनेऽस्मै रत्नानि दत्वा प्रीतिमुत्पादयतीत्यर्थः। करणे देहे भावं सत्त्वमितैः प्राप्तैः स्वदेहोत्पन्नैरित्यर्थ इति वा। अलङ्करणभूतत्वादरुणदेहस्थितैरिति वा। एवंविधैर्रत्नैरुपलक्षितो वा। अलङ्करणभावमलङ्करणत्वं गतैरत एव तैः सुखमातनोतीति वा।

उत्पद्मकाननसखः सुखमाननोति
रत्नैरलङ्करणभावमितैर्न दीनः ॥ २३ ॥
सस्यन्दनैः प्रवहणैः प्रतिकूलपातं
का वाहिनी न तनुते पुनरस्य नाम ।

किम्भूतो नदीनः । घनध्वनिः निविडशब्दः । तथा भूयान् प्रचुरतरः । दीर्घपरिमाणत्वात् सप्तसङ्ख्यत्वाद्वा । तथा कुम्भीरा नक्रास्तद्वान् । मकरा मत्स्यविशेषास्तद्युक्तः । तथा मद्दानवारिः पुण्डरीकाद्युक्तः । उच्छब्द उदयार्थः । उद्गतानि विकसितानि पद्मानि येषु तानि काननानि तेषां सखा तद्युक्त इत्यर्थः । उत्कृष्टा पद्मा लक्ष्मीर्येषामेवंविधैः काननैर्युक्त इति वा । उत्कृष्टा पद्मा लक्ष्मीः स्वकन्या यस्मिन् स चासौ वनमस्त्वस्येति वा । श्रीविष्णोस्तत्र विद्यमानत्वाल्लक्ष्मीयुक्तत्वं । नासीरसीमपदेन तीरं लक्ष्यते । तत्र नि- बिडध्वनिरिति वा । तरङ्गस्य तीरे प्रतिघातात् ॥ गजपक्षे भूयान् बह्वतरः । कुम्भी गजः नासीरमुखे सेनामुखविभागे सुखमनायासेन रवान् शब्दान् विस्तारयति । किम्भूतः कुम्भी । घनवन्मेघवत् ध्वनिर्यस्य । तथा समः आनुपूर्व्यवृत्तः सलक्ष्मीको वा करः शुण्डादण्डो यस्य । तथा दानवारिणा मदजलेन सहितः । तथा उद्गतानि पद्मकानि कुम्भस्थले पद्मविन्दुजालकानि यस्मिन्नेवंविधं यदाननं मुखं तद्युक्तः । तथा अलङ्कारत्वं प्राप्तै रत्नैर्दीनो न किन्तु सम्भृतः ॥ सेनामुखं तु नासीरं । नक्रस्तु कुम्भीरः । पद्मकं बिन्दुजालकमित्यमरः ॥ २३ ॥

सेति । हे विलासवति भैमि नाम शिरश्चालने । अस्य

तस्या विलासवति कर्कशताश्रिता या
ब्रूमः कथं बहुतया सिकता वयन्ताः ॥ २४ ॥

वरुणस्य का नाम वाहिनी नदी सस्यन्दनैः सवेगैः निर्झरोदक-सहितैर्वा प्रवहणैः प्रवाहैः कृत्वा कूलं तीरं प्रति अनु पातं गमनं न तनुते अपि तु सर्व्वापि करोति। वयं तस्यास्ताः सिकता वालुकाः बहुतया प्रचुरत्वेन कथं केन प्रकारेण ब्रूमः कथयामः। अतिबहुत्वेनेयत्तया वक्तुं न शक्यत इत्यर्थः। ताः काः। याः कर्कशतां काठिन्यं श्रिताः। कर्कैः जलजन्तुविशेषस्तच्छतैराश्रिता इति वा॥ नलपक्षे अस्य नलस्य का नाम वाहिनी सेना सस्यन्दनैः सरथैः प्रवहणैर्वाहनैरश्वादिभिः कृत्वा प्रतिकूला वैरिणस्तान् प्रति पातं गमनं न करोति अपि तु चतुर्विधापि सेना करोत्येव। प्रतिकूलानां वैरिणां पातं हननमिति वा। का सेनाऽस्य नाम ख्यातिं प्रतिकूलांश्छत्रून् पातयित्वा शत्रुमात्रं हत्वा न तनुते। नास्य ख्यातिं करोतीत्यर्थ इति वा। सवेगैः क्रीडारथैः कृत्वा वैरिणं प्रति गमनं करोतीति वा। अनेन सेनाया निर्भयत्वं। युद्धेऽपि क्रीडारथारोहणात्। कर्काः श्वेताश्वास्तेषां शतैराश्रिताया-स्तस्याः बहुतया बाहुल्येन ता भूयस्त्वेन प्रसिद्धाः वालुकाः वयं किं ब्रूमः। ताभ्योऽपि सेना प्रचुरतरेत्यर्थः। तस्याः सकाशात् ता वालुका बहुतया किं ब्रूमः। वालुकाः कथमपि संख्यातुं शक्यन्ते सा तु न कथञ्चिदित्यर्थ इति वा। असिः प्रहरणमेषां ते आ-सिकास्तेषां भावः आसिकता याः श्वेताश्वशताधिरूढाः ता आसिकता असिप्रहरणान् पुरुषान् इति यावत्। तान् बहुतया

शोणं पदप्रणयिनं गुणमस्य पश्य
किञ्चास्य सेवनपरैव सरस्वती सा।

किं वर्णयामः। अतिबहुत्वेन वक्तुं न शक्यन्त इत्यर्थः। बहून् तरन्ते गच्छन्ति वा रचन्ति वा ये ते बहुतरास्ते च ते आमिकाश्च तेषां भावान्मिति वा। बहवोऽवयवा येषां ते बहुतरा बहुसङ्घा एवंविधा आमिका यस्यां तस्या भावानिति वा। कर्कः शुक्रचयः। सांयात्रिकः पोतवणिक् इत्यमरः॥ पोतः प्रवहणं स्मृतमिति हलायुधः। प्रवहणं। कृत्यच इति णत्वं (पा० ८। ४। २८)। प्रतिकूलपातं॥ पर्वे द्रव्यवीप्सायां। विशि पतीत्यादिना णमुल् (पा० ३। ४। ५६)। तृतीयाप्रभृतीनीति पाक्षिकः समासः (पा० २। २। २१)। आमिकाः। असिः प्रहरणमेषां। प्रहरणमिति ठक् (पा० ४। ४। ५७)। असिभिर्जयन्तीत्यामिकाः। तेन दीव्यतीति ठक् (पा० ४। ४। २) ॥ २४॥

शोणमिति। हे सुभगे सौभाग्यवति भैमि त्वं एनं भुवनस्य जलस्याधिनाथं वरुणं भजस्व वृणीष्व। जलपतित्वमेवाह। त्वं गुणप्रधानमेवकं शोणं नाम नदमस्य पदप्रणयिनं चरणानुरागिणं पश्य। किञ्चेत्यधिकोक्तौ। शोणोऽस्य चरणप्रणयीति किं वक्तव्यं सा प्रसिद्धा सरस्वती नदी अस्य सेवनपरैव चरणसंवाहनादिपरैव। पूर्वोक्तापरितोषे वाशब्दः। के कमलस्य जलस्य आशयाः आधाराः समुद्रादिपल्वलान्ताः पद्माकरा वा तमिमं न भजन्ति सेवन्ते अपि तु लोकेदादयः सर्व्वेऽप्यस्यानुचरास्तस्य शोणाद्यनुचरत्वं

एनं भजस्व सुभग भुवनाधिनाथं
के वा भजन्ति तमिमं कमलाशया न ॥ २५ ॥
शङ्कालताततिमनेकनलावलम्बां
वाणी न वर्द्धयतु तावदभेदिकेयं।

का कथा। तस्मात् सलिलपतिरयमित्यर्थः। कमलाशया जलाभिलाषेण के वा लोका इमं न भजन्ति सेवन्ते स्तुवन्ति इत्यर्थ इति वा। शोणादीनां तत्तदभिमानिन्यो देवता लच्यन्ते। अतस्तेषां सेवकत्वं युज्यते॥ नलपक्षे त्वं जगत्पतिमेनं नलं पतित्वेन स्वीकुरु। स्वीकारयोग्यत्वमेव द्रढयति। त्वं शोणं रक्तं गुणमस्य पदप्रणयिनं पश्य तमिमं कमलायाः सम्पदः आशया अभिलाषेण वा के लोका न सेवन्ते अपि तु धनाभिलाषेण सर्व्वेऽपि सेवन्त इत्यर्थः। वाऽप्यर्थे। कमलाशया लक्ष्मीनिधयो धनिका अपि लोकास्तमिमं न भजन्त्यपि तु भजन्त्येवेति वा। अत्र प्रथमद्वितीयतृतीयविशेषणैः क्रमेण सौन्दर्य्यकलाकौशलौदार्य्याणि द्योत्यन्ते। शोणो हिरण्यवाहः स्यात्। शोणः कोकनदच्छविः। जीवनं भुवनं वनं। विष्टपं भुवनं जगत्। सलिलं कमलं जलं। कमला श्रीर्हरिप्रियारित्यमरः॥ आशया। अधिकरणे, शेतेरित्यच् (पा॰ ३।२।१५)॥२५॥

शङ्केति। इयं पूर्व्वोक्ता वाणी भीमोद्भवां प्रति लक्षीकृत्य भैम्या इति यावत्। अनेकनलावलम्बां नानानैषधविषयां शङ्कालताततिं संशयवल्लीपरम्परां न वर्द्धयतु तावत् न पूरयतु तावत् अपि तु पूरयत्येव। नवा च्छर्द्धिर्यस्याः सा नवर्द्धिः नवर्द्धिं

भीमोद्भवां प्रति नले च जलेश्वरे च
तुल्यं तथापि यदवर्द्धयदत्र चित्रं॥ २६॥

करोतु नवर्द्धयतु। भैमीं प्रति सन्देहपरम्परां न्यूनसमृद्धिं प्रति-
बद्धीकरोत्वित्यर्थ इति वा। तावच्छब्दोऽनुमताववधारणे वा।
यतो अभेदिका विशेषप्रतिपादनमकुर्व्वती। समानधर्म्मदर्शनाद्धि
संशय उपचीयते विशिष्टधर्म्मदर्शनाद् व्यावर्त्तत इत्यर्थः। यद्यप्यत्र
विषये चित्रं नास्ति तथापि नले जलेश्वरे च तुल्यमेककालं
यत्संशयपरम्परां अवर्द्धयत् पश्यति स्म अत्र विषये चित्र-
माश्चर्य्यं। न हि विषयस्यैव सन्दिहानत्वमुपपद्यते। यतो लोके दूर-
स्थिते पुरुषे पुरुषत्वं स्थाणुत्वं वाऽनुपलभ्योर्द्धत्वमात्रं स्थाणुसाध-
र्म्यमुपलभ्य तटस्थः स्थाणुर्वा पुरुषो वेति सन्दिग्धे न तु पुरुष एवा-
त्मानमूर्द्धमवलोक्याहं वा स्थाणुर्वेति। तस्मान्नलजलेश्वरविषयो
भैम्याः संशयो युक्तः। विषयभूतयोरेव तत्संशये महदाश्चर्य्यमिति
भावः। विरोधपरिहारस्तु तुल्यकालं यथाक्रमं नले शं सुखं
जलेश्वरे च कामतातति कालिमातिशयं पश्यति स्म। तथा हि
यदि दैव्येन नल एवायमित्यकथयिष्यत् तदा मय्यनुरक्ता भैमी
मामकभ्रमेणैनमेवावरिष्यत्। तच्च दैव्या न कृतं वरुणरूपेण वर्णि-
तत्वादिति। नले सुखं जनयितव्ये यदि वाणी मां नल एवायमि-
त्यकथयिष्यत्तदा नलबुद्ध्या भैमी मामेवावरिष्यत् तच्च तया न
कृतं मद्रूपेण वर्णितत्वादिति विषादाद्वरुणे कालिमाऽतिशयितो
जनितः। कामततातिरप्यनेकनलावलम्बिनी चतुर्णामप्यवरणात्

बालां विलोक्य विबुधैरपि मायिभिस्तै-
रुद्भ्रान्तामियमलीकनलीकृतस्वैः।

अथ च मत्सन्देहाद्वरुणं भजेन्नलसन्देहान्मां भजेदिति क्रमेण नलवरुणयोः संशयपरम्परां पूरयति स्म। अनेकनलावलम्बनां भैम्याः संशयवल्लीपरम्परां न वर्द्धयतु न छिनत्तु वर्द्धकपूर्त्तिछिदोर्यतो विशेषमप्रतिपादयन्ती। या हि छेदासमर्था क्षुरिका साऽनेकतृणविशेषनलालम्बनां लतातर्तिं न छिनत्तीति नाश्चर्य्यं। तथापि भैमीं प्रति नले च जलेश्वरे च संशयवल्लीपरम्परामेककालमेव यदच्छिनत्तच्चित्रम्। या हि न छिनत्तीति सा छिनत्तीति चित्रमिति भावः। मत्सन्देहादेनं भैमी भजेदिति नलभ्रान्तिः। नलसन्देहान्मां भजेदिति वरुणभ्रान्तिः। वरुणवाचिशब्दसद्भावात्। श्लेषवक्रोक्त्यादिज्ञानचतुरा भैमी वरुणं न वरिष्यतीति निश्चयेन नलभ्रमनाशः। नलेऽनुरक्ता भैमी मत्प्रतिपादकशब्दसद्भावान् मां न वरिष्यतीति निश्चयेन वरुणभ्रमनाश इति वा विशेषमप्रतिपादयन्ती वाणी सरस्वतीति। वा देव्या नामग्राहमहं वर्णितः। अतो मां वरिष्यति न वेति वरुणस्य सन्देहो गतः। इदानीमवशिष्टोऽहमेवमप्येतच्चेयमनुरक्तेति मां वरिष्यति न वेति नलसन्देहो गत इति भाव इति वा। इत्यादिव्याख्याविशेषो विचार्य्याङ्गीकरणीयः॥ २६॥

बालामिति। इयं भगवती सरस्वती निषधाधिराजमुद्दिश्य तां बालां भैमीमाह स्म उवाच। किं कृत्वा। तां भैमीं अलीकन-

आह स्म तां भगवती निषधाधिराजं
निर्दिश्य राजपरिषत्परिवेषभाजम् ॥ २७ ॥
अत्याजिलब्धविजयप्रसरस्त्वया
किं विज्ञायते रुचिपदं न महीमहेन्द्रः ।

नीलतस्वैरमत्यनैषधोक्ततात्मभिः मायिभिश्छलपरैरपि विबुधै-
र्दैवैरच्छद्मितामप्रतारितां विलोक्य। किम्भूतं नलं। राज्ञां परिष-
त्सभा तस्याः परि समीपे वेषं शृङ्गारं भजति। परिवेषमिति
पाठे परिवेष उपान्तः। बालामपि विबुधैरपि अपिरुभयत्र सम्ब-
ध्यते। बाला हि प्रतार्य्यते इयं बालापि न प्रतारिता तेष्वेकस्या-
प्यवरणात्। ये च विबुधाः ज्ञातारः ते मायिनः खलाः कथं
मायिभिरपि बाला न प्रतारितेत्याश्चर्य्यं। राजपरिषदः परि-
वेषरूपणात् नलस्य चन्द्रत्वं ध्वनितं। परिषत्। सदिरप्रतेरिति
षत्वम् (पा० ८।३।६६।) ॥२७॥

अत्याजीति। त्वया मह्या महेन्द्रो नलः किं न विज्ञायतेऽपि
तु विशेषेणेन्द्रादिभ्यो भेदेन मत्यत्वेन ज्ञायत इत्यर्थः। किम्भूतः।
अतिशयेनाजौ सङ्ग्रामे अतिशयिते वा आजौ लब्धः प्राप्ता
विजयस्यारिपराभवस्य प्रसरो बाहुल्यं येन। तथा रुचेरनुरा-
गस्य कान्तेर्वा पदं स्थानं। तथासौ अर्थिनमर्थिनं प्रतीति प्रत्यर्थि
या दानवशता दानपरता दाने अर्थिनं प्रत्येव वा वशतया
जितेन्द्रियतया वा माहिता हता या चेष्टा याचकानुकूलव्या-
पारस्तेन परदारदर्शनादिनिवृत्तिव्यापारेण च औरतवाहन-

प्रत्यर्थिदानवशताहितचेष्टयासौ
जीमूतवाहनधियं न करोति कस्य ॥ २८ ॥

स्वार्थिहेतोः प्राणानपि तृणवद्ददता राजविशेषस्य धियं बुद्धिं दानातिशयेनार्थिपरतन्त्रतया च जितेन्द्रियतया च किमयं जीमूतवाहनधियं कस्य न करोति दानशूरत्वादित्वयमस्य सूचितं। प्रत्यर्थिनो वैरिणो घ्नन्ति प्रत्यर्थिदा अनाः प्राणाः येषां ते अतिशूरास्ते वशा अधीना यस्य तस्य भावस्तत्ता तया कृत्वा कृता या चेष्टा तया शत्रुवशीकरणव्यापारेणेन्द्रबुद्धिं कस्य न करोति अपि तु सर्व्वस्यापि करोति। इन्द्रो यथा शत्रून् करोति तथायमपीति वा॥ इन्द्रपक्षे अयं महेन्द्रस्त्वया किन्न विज्ञायते अपि त्विन्द्रत्वेन निश्चयः। किम्भूतः। अतिशयितः आजिः सङ्ग्रामो यस्य। तथा लब्धो विजयेनार्ज्जुनेन कृत्वा प्रसरो वंशविस्तारो येन ततः कर्मधारयः। प्रसव इति पाठे नलपक्षे जयलाभः। इन्द्रपक्षे लब्धो विजयोऽर्ज्जुनः। विजयत इति विजयो जयो जयन्तो वा प्रसवः पुत्रो येन। रुचिपदं तेजःस्थानं। तथा मही उत्सववान्। तथायं प्रत्यर्थिदानवानां शतेषु अहिता प्रतिकूला चेष्टा ऽहितस्य शत्रोर्वा चेष्टा शत्रुत्वकृतस्तन्नाशकरो व्यापारस्तेनेन्द्रबुद्धिं कस्य न करोति। अथ चायं महेन्द्रस्त्वया किमित्यत्याजि केन हेतुना त्यक्तः। अयं न विज्ञायते विज्ञ इवाचरति विज्ञायते एवंभूतो न भवति अपि तु विद्वानेवेत्यर्थः। तथा रुचिपदं कान्तिस्थानं न। तथा मही नेति। नञावृत्त्या काका

येनामुना बहुविगाढसुरेश्वराध्व-
राज्याभिषेकविकसन्मदसा बभूवे।

व्याख्येयं। एवंगुणविशिष्टस्य परित्यागे किञ्चिदपि कारणं न पश्याम इति भावः। महेन्द्रस्त्वया विज्ञाय किमित्यत्याजि उचितमेव कृतमित्यर्थः। किम्प्रश्ने सम्भावनायां वा। त्यागे कारणमाह। लक्ष्मां विना पक्षिणा गरुडेनामृतहरणसमये जयस्य प्रसरो विस्तारो यस्य गरुडेन पराजित इत्यर्थः। तथा अरुचिपदं अननुरागस्थानं। तथा न सही उत्सवरहितः सदा दैत्यभयात्। अरुचिस्थानं महेन्द्रस्त्वया किन्न विज्ञायते अपि तु ज्ञात एव। यतोऽत्याजि त्यक्त इति वा। अस्मिन् पक्षे न महीत्यत्र नञः आवृत्तिः। अतिशयितरणं लक्ष्मां विना जयप्रसरो यस्येति वा। विजयस्तु जयं पार्थ इत्यमरः। विज्ञायते। उपमानादाचारे कर्त्तुः क्यङ् (पा० ३।१।१०।११)॥२८॥

येनेति। येनामुना नलेन बहुतिशयेन विगाढः सेवितो सुरेश्वरस्याध्वा मार्गः त्रिलोकीप्रतिपालनलक्षणः येन। तथा राज्ये योऽभिषेको मङ्गलस्नानं तेन कृत्वा विकसन्मदो यस्यैवंविधेन बभूवे जातं। पूर्व्वेण कर्म्मधारयः। बहुवारं सेवितो देवेन्द्रेण मार्गो लोकपालनप्रकारो यस्येति वा। पश्चात् कर्म्मधारयः। इन्द्रेण लोकपरिपालनमस्माच्छिक्षितमित्यर्थः। न भैमि अत्र पश्चसु मध्ये स्वयम्बरे नामग्राहं नाम गृहीत्वा एवममुना पूर्व्वोक्तेन प्रकारेण मया उदीरितमुक्तं तं नलमनु लक्षीकृत्य तेन चातुर्जनं

आवर्जनं तमनु तेन नु साधु नाम-
ग्राहं मया नलमुदीरितमेवमत्र ॥ २९ ॥
यच्चण्डिमा रणविधिव्यसनश्च तत्त्वं
बुध्वाशयाश्रितममुष्य च दक्षिणत्वं।

पतिलेनाङ्गीकरणं साधु शुभं। सत्यं नलमेनं सर्व्वथा वृणीष्वेति भावः। वह्निपक्षे येनानेन वह्निनाऽनेकवारं अनुभूतो यः सुरेश्व-राध्वरेषु देवेन्द्रयज्ञेषु आज्याभिषेको घृताप्लवस्तेन कृत्वा विक-स्वरतेजसा जातं। बहुवारं विगाढं आवर्त्तित इन्द्र आयाहीत्या-दिना आहूतः सुरेश्वरो यत्र तादृशेषु यागेषु आज्याभिषेकस्तेन कृत्वा विकस्वरतेजसा जातमिति वा। ननु भैम्यत्र पञ्चसु मध्ये नाम गृहीत्वा एवं पूर्व्वोक्तप्रकारेण मयोक्तं तमनलमग्निम्प्रति ते तव वर्जनं साधु अपि तु न साधु आ इति खेदे आवर्जनं पतित्वे-नाङ्गीकरणं साध्विति वा नु भैमि तमनु ते वर्जनं न साध्विति वा। पूर्व्वार्द्धेन सर्व्वदा परान्नभोजनेनैव परिपुष्टोऽयमिति त्यागः सूचितः। तथा ननु भैमी मया नाम गृहीत्वा कथितं नलान्यमथ च वह्निमनु ते वर्जनं साधु भद्रं। आ हर्षे नु भैमि तमनु ते आवर्जनं सामर्थ्येन वर्जनं न साधु अपि तु साध्वेवेति वा। आ आवर्जनं सामस्त्येनाङ्गीकरणं तव न साधु किन्तु वर्जनमेव सा-ध्विति वा। नामग्राहं। द्वितीयायामित्यनुवृत्तौ नाम्न्या दिशि-ग्रहोरिति णमुल् (पा० ३।४।५८) ॥ २९ ॥

यदिति। चोऽवधारणे यस्य चण्डिमा क्रूरत्वं रणविधौ

सैषा नले सहजरागभरादमुष्मिन्
नात्मानमर्पयितुमर्हसि धर्म्मराजे ॥ ३० ॥

सङ्ग्रामविधाने व्यसनमेव वैरिणां विगतासुकरणमेवेत्यर्थः सर्व्वा-
नपि वैरिणो मारयत्येवेति भावः। रणविधौ व्यसनमित्र व्यसनं
यस्य अपिड्मा कौर्य्यं यस्य रणकर्म्मणि व्यसनमिति वा। सैषा त्वं
अमुष्य आशयमभिप्रायमाश्रितं मनसि स्थितं दक्षिणत्वं सरलत्वञ्च
तत्सर्व्वं बुद्धा ज्ञात्वा पाणिमाश्रितं दानशूरत्वं वा ज्ञात्वा धर्म्म-
सहिते राजनि धर्म्मेण राजमाने वा अमुष्मिन्नले सहजरागभरात्
अकृत्रिमानुरागबाहुल्यादात्मानमर्पयितुं योजयितुं नार्हसि
अपि तु योग्या भवस्येवेति वा। सर्व्वथाऽयं वरणीय एव त्वयेति
भावः। एतेन शूरत्वदातृत्वधार्म्मिकत्वान्यस्योक्तानि। यमपक्षे
हे चण्डि कोपने यस्यामुष्य यमस्य मारणविधिर्व्यसनं प्राणि-
प्राणहरणशीलत्वं आशया दिशा च दक्षिणत्वमाश्रितं तत्त्वं
निरुपाधिरूपं ज्ञात्वा सैषा त्वं अनले नलान्यस्मिन् नलसदृशे
वास्मिन् धर्म्मराजे यमेऽकृत्रिमप्रेमरसबाहुल्यात् स्वं योजयितुं
अर्हसि। सर्व्वप्राणा एतदधीनाः दक्षिणदिक्पतिश्चायं तस्मा-
दादरणीय इति भावः। चण्डि नलान्यनामधेयश्रवणमात्रात्
कोपने सर्व्वदा सर्व्वप्राणिप्राणहरणमेव व्यसनं दोषं अमुष्य
दिशा दक्षिणत्वं छलेन सरलत्वमुदारत्वं चाश्रितं न त्वनेनेत्यर्थः।
तत्सर्व्वं तात्त्विकं बुद्धा सैषा त्वं नलादन्यस्मिन्नात्मानं योजयितुं
योग्या न भवसि अमुष्य मारणविधिर्व्यसनं तत्त्वत्वं सत्यं। दक्षिणत्वं

किन्ते तथा मतिरमुष्य यथाशयः स्यात्
त्वत्पाणिपीडनविनिर्म्मितयेऽनपाशः।

तु दिगाश्रितं दक्षिणदिक्पतित्वाद्दक्षिण इति देशनिमित् तास्य समाख्या। तदेतद्बुद्ध्वा सैषा त्वमात्मानमर्पयितुं नार्हसीति वा योजना। एवंविधो न वरणीय इति भावः। अन्यच्च कारणं। असहजरागभरात् सहजानुरागबाहुल्याभावाच्चेत्यर्थः। यत्रा-नुरागो नास्ति स न वरणीय एवेति भावः॥ ३०॥

किमिति। अमुष्य नलस्याशयो अभिप्रायस्तव पाणिपीडनस्य पाणिग्रहणस्य विनिर्म्मितये निष्पत्तये अनपाशः अपगता आशा यस्मादपाशः एवंविधो न भवतीत्यनपाशः तत्परो यथा स्यात् तथा किन्ते मतिः बुद्धिः। किंशब्दः सम्भावनायां। यथाऽयं त्वद्वरणाभिलाषसहितान्तःकरणो भवेत् तथा त्वं प्रायेण करिष्यसीति गम्यत इत्यर्थः। असौ नलो भुवनं जगत् चरिष्णून् चरणशीलान् कान् मानवान् मनुष्यान्नो अवति रक्षति अपि तु सर्व्वानप्ययमेव रक्षति। मानवान् अभिमानी नलः कान् न रक्षतीति वा। तस्मात् अमुत्र नले भवती रता नेति न युक्तं किन्त्वस्मिन् रता भवेत्यर्थः॥ असौ ना पुरुषश्रेष्ठः अतोऽमुत्र भवती रताऽनुरक्तेति किन्न युक्तं अपि तु युक्तमेवेति वा। भवतीति सम्बुद्धिर्वा॥ वरुणपक्षे अमुष्य वरुणस्य शयः पाणिर्येन प्रकारेण त्वत्पाणिग्रहणनिष्पत्तयेऽनपाशो न विद्यते पाशो यस्मिन्नेवंविधः पाशरहितो यथा भवेत् तथा ते बुद्धिः किं। किं प्रश्ने। पाशं त्यक्त्वा

कान्मानवानवति नो भुवने चरिष्णून्
नासावमुत्र न रता भवतीति युक्तम्॥ ३१॥
श्लोकादिह प्रथमतो हरिणा द्वितीया-
द्धूमध्वजेन शमनेन समं तृतीयात्।
तुर्यान्नलस्य वरुणेन समानभावं
सा जानती पुनरवादि तया विमुग्धा॥ ३२॥

त्वत्पाणिग्रहणं करिष्यतीत्यर्थः। त्वत्पाणिग्रहणनिष्पत्तये अस्य शयः करः स्यात् पाशो न। त्वत्पाणिग्रहणं शयेन करिष्यति पाशं त्यक्ष्यतीति भयं मायासीरित्यर्थ इति वा। असौ भुवनमुदकं तत्र-सञ्चरणशीलान् मनुष्यान् कान्नावति अपि तु जलप्रविष्टान् बुडनादिप्रमादाद्वरुण एव रक्षति उदकसञ्चरणशीलान्मनु-ष्यान्नोऽवति अपि तु रक्षतीति वा। नोऽस्माकं भुवनं पृथ्वीलोकः तत्र सञ्चरणशीलान् मनुष्यान् कादुदकाद्धेतुभूताद्रक्षति सर्व्वेषां ह्युदकं जीवनमिति वा। अमुत्र भवती न रता नानुरक्तेति न युक्तम्। अमुत्र नरता मनुष्यत्वं न भवतीति युक्तं देवोऽयमित्यर्थ इति वा। अमुत्र नरता नलत्वं न भवतीति युक्तमिति वा। असौ ना च पुरुषो न भवति अतोऽमुत्र भवती रतेति युक्तमपि तु नेति वा। अमुत्र भवती न रता नानुरक्तेति न युक्तं अपि तु युक्तमेवेति वा॥ ३१॥

श्लोकादिति। इह चतुर्षु अत्याजीत्यादिश्लोकेषु मध्ये अत्याजीति प्रथमतः श्लोकात् हरिणेन्द्रेण समं सह येनामुनेति

त्वं यार्थिनी किल नलेन शुभाय तस्याः
क्व स्यान्निजार्पणममुत्र चतुष्टये ते ।
इन्द्रानलार्यमतनूजपयःपतीनां
प्राप्यैकरूपमिह संसदि दीप्यमाने ॥ ३३ ॥

द्वितीयात् श्लोकात् धूमध्वजेनाग्निना सह यच्चण्डिमेति तृतीयात् श्लोकात् शमनेन यमेन सह किन्ते इति तुरीयात् श्लोकात् वरुणेन सह तस्य नलस्य समानभावं तुल्यरूपत्वं जानती अत एव विमुग्धा विशेषेण भ्रान्ता सा भैमी तया देव्या वक्ष्यमाणं पुनरवादि ॥ ३२ ॥

त्वमिति। या त्वं किल नले विषये अर्थिनी साभिलाषा तस्यास्ते तव अमुत्र नले निजार्पणं स्वसमर्पणं शुभाय कल्याणाय तुष्टये च सन्तोषाय च क्व न स्यात् कुतो न भवेदपि तु स्यादेव। किंविधे अमुत्र। इन्द्रस्य अनलस्य अर्यमतनूजो यमस्य पयःपतिर्वरुणस्य एतेषां ऐकरूप्यं दिक्पालांशत्वात् सरूपत्वं प्राप्य इहास्यां संसदि सभायां दीप्यमाने। न तस्मादयं वरणीय इत्यर्थः। या त्वं नलेन साभिलाषा तस्यास्तवामुत्र नले निजार्पणं शुभाय क्व कुतः स्यादपि तु न कुतोऽपि। किमित्यत आह। इन्द्राग्नियमवरुणानां चतुष्टये ऐकरूप्यं नलसारूप्यं प्राप्येह सभायां ज्वलति सति एतान् प्रसन्नानकृत्वा यन्नलवरणं तच्छुभाय न भवेदेव। शापं दास्यन्तीत्यर्थ इति वा। या त्वं नले विषये नार्थिनी एवं वक्ष्यमानमप्येनं नलं न वृणोषि यतस्तस्यास्ते नलसारूप्यं

देवः पतिर्विदुषि नैषधराजगत्या
निर्णीयते न किमु न व्रियते भवत्या ।

प्राश्विह सभायां प्रकाशमाने इन्द्रादीनां चतुष्टये मध्ये क
कस्मिन्निन्द्रेऽग्नौ यमे वरुणे वा निजार्पणं शुभाय स्यात् कथय ।
मया बहुशः प्रोच्यमानाऽपि यन्नलं न वृणुषे तद्यतेषु सुन्दर-
तमेषु चतुर्षु मध्ये कं वृणुषे इति कथय इत्यर्थ इति वा ।
अनेनाचेन्द्रादयो विद्यन्ते न वेति सन्देहो निरस्तः । परन्तु के
ते कश्च नल इति विशेषो नोक्तः। अत्रेन्द्रादीनां चतुर्णां त्यागो
ऽपि प्रतीयते। या त्वं नलेऽर्थिनी तस्यास्ते नलस्वरूपतां प्राप्येह
सभायां दीप्यमाने इन्द्रादिषु चतुष्टये निजार्पणं शुभाय क
स्यादपि तु न कुतोऽपि । या ह्यन्यत्रानरक्ता तस्या अन्यत्र
निजार्पणं शुभं कथं भवेत् । अन्यच्च नलरूपधारणादेते प्रका-
शन्ते न त्वेतेषां सहजसौन्दर्यमस्ति । अतोऽप्येते न वरणीया
इति भावः ॥ ३३ ॥

देव इति । हे विदुषि सर्वाक्षिचातुरीपरिज्ञानचतुरे भैमि
एष पुरोवर्त्ती देवः स्वर्गे क्रीडाकारी अमरश्च धराजगत्याः
भूलोकस्य पतिः पालयिता न किन्तु अर्थात् स्वर्गलोकस्य पति-
रिन्द्रः त्वया किमु किमिति न निर्णीयते इन्द्रत्वेन किमिति न
निश्चीयतेऽपि तु निश्चय इत्यर्थः। किमिति वा न व्रियतेऽपि तु
वरणीयस्तेत्यर्थः। मया न निश्चित इति कुतोऽवमितं भवत्येति
शङ्कायां सत्यां आह। यतो न व्रियत इति हेतूपन्यासः सरस्व-
त्या कृतः। अयमिन्द्र इति चेत् तत्र निश्चयः स्यात्तर्हि मनुष्यापे-

नायं नलः खलु तवातिमहा नलाभो
यद्येनमुज्झसि वरः कतरः परस्ते ॥ ३४ ॥

त्वयाऽधिकत्वादयं वृत एव स्यात् । तत्तु न कृतं अत इन्द्रत्वेन त्वया ऽयं न निश्चित इत्यर्थ इति वा । धराणां पर्व्वतानामजनमाजः क्षेपणं तत्र गतिरुपायभूता वज्रस्तेन कृत्वाऽयं ना पुरुषः सामर्थ्यवान् वज्रायुधो देव इन्द्रः पतिर्भर्त्ता भर्तृत्वेन किन्न निश्चीयते निश्चितस्त्वेन् किं वा न व्रियत इति वा । धराजगत्या वज्रस्य पतिरेष देवः त्वया न निश्चीयते इति न अपि तु निश्चित एव ज्ञात एव किमु न व्रियत इति वा । उशब्दः सम्बोधने । धरान् पर्व्वतान् अजति क्षिपतीति धराज इन्द्रः स एव गतिः शरणं यस्याः प्राच्याः दिशः पतिर्देव इन्द्रो न निर्णीयत इति न परं किं न व्रियते इति वा । इन्द्रस्चेन्नल इव कथं दृश्यत इत्यत आह । अयं खलु निश्चयेन नलो न भवति तव नलवदाभातीति नलाभः । अत्र हेतुमाह । यतोऽतिशयितं महस्तेजो यस्य मनुष्यापेक्षया बहुतेजा इत्यर्थः । अत एव वरणीयः । तथा चायं नलस्तृणविशेषस्तत्तुल्योऽसारभूतो न भवति किन्त्वतिबलोऽतो वरणीय इत्यर्थः । अस्य वरणे निश्चितं अतिशयिता ये महा नन्दनवनक्रीडादय उत्सवाः अननमानः प्राणनञ्च तेषां लाभः प्राप्तिस्तव भविष्यतीति शेषः । इन्द्रवरणे नन्दनवनक्रीडा सुधापानेनामरत्वञ्च त्वया प्राप्स्यत इत्यर्थः । अतिमहत-श्चिरकालप्राणनस्य लाभो भविष्यतीति वा । एवंगुणविशिष्टमेनं

अस्य विष्णोर्वा इमं ज्येष्ठं भ्रातृत्वेन स्वामिनमिन्द्रश्चेत् त्यजसि तर्हि परोऽन्यः को वरः अपि तु न कोऽपि । मद्वचनविश्वासादेनमेव वृणीष्वेति भावः । अथच यद्येनं त्यज्यसि तर्हि तत्र कतरो वरोऽभीष्टो भवेन्न कोऽपि किन्तु परः शत्रुरेव भवेदित्यर्थः । अथ च यद्येनं त्यजसि तर्हि परोऽन्यः एतदनन्तरः केन वायुना तरति प्लवते प्रसरति केन जलेन तीर्य्यते शान्तिं प्राप्यते वा यः स कतरोऽग्निर्वरो भवितेत्यर्थः । अत्रेन्द्रत्यागोऽपि सूचितः । तथाहि एष भूर्लोकस्य रक्षको देवो राजा नलो नेति निर्णीय निश्चित्य तेन नलत्वाभावलक्षणेनैव कारणेन न म्रियते । किमिति प्रश्नः । युक्तमेवैतत् कृतमिति शेषः । धराज इन्द्र एव गतिर्जीविनोपायो यस्याः प्राच्याः पतिर्देवो न निश्चीयत इति न अपि तु निश्चित एव । न म्रियते किमिति वा इति संशयलेशस्यापि निरासार्थं देवी पुनस्तत्समाह । अयं तत्सम्बन्धी त्वच्चित्तानुरञ्जकोऽतिमहान्नितरां तेजस्वी नलो न भवत्येव यस्त्वया निश्चितं तत्तथ्यमेवेत्यर्थः । किन्तु नलवदाभासत इत्येव नलाकारधारणादेवास्य भा न तु सहजेत्यर्थः । यद्वा यतोऽयं नलास्यलक्षणविशेषवन्निःसारो भाति तस्मान्नितरां तेजस्वी नलो न भवतीत्यर्थः । यदि चैनं त्यजसि तर्हि ते श्रेष्ठः कं सुखं तरतीति कतरः सुखसमुद्ररूपो नलो वरो भवितेत्यर्थः । यद्वा नैषधराजो नल एव गतिर्जीविनोपायो यस्या एवंविधया देव इन्द्रो न निश्चीयते किं अपि तु निश्चित एव । यतः पतिर्न म्रियते नलानुरागिणी त्वमिन्द्रोऽयमिति ज्ञात्वैव पतित्वेन नाङ्गीकरोषीत्यर्थः । यस्माद्दे-

त्यैरतिक्रान्तं महो यस्य तस्मादसारभूतः। यदि चैनं त्यजसि तर्हि तवालाभो नापि तु लाभ एवेति वा। वह्निपक्षे धरतीति धरो वाहनं स चासावजश्च मेषः धर इव पर्व्वततुल्यो वा यो मेषस्तेन कृत्वा या गतिस्तस्य वा या गतिः धरायां भूमावजेन कृत्वा या गतिस्तयोपलक्षितः पाकादिकरणद्वारा त्रैलोक्यरक्षणात् पतिः देवो द्युतिमानमरश्च वह्निर्निर्णीयत इति नापि तु निर्णीयत एव। परमेवंगुणविशिष्टो ज्ञात्वापि न व्रियतेऽपि त्वग्नित्वेन निश्चितो वरणीय एवेत्यर्थः। धरो वाहनमजो यस्य स धराजो वह्निः स एव गतिः शरणं यस्या आग्नेय्या दिशः पतिर्देवोऽग्निः किं न निर्णियते निर्णीतश्चेत् किमु न व्रियत इति वा। अग्निश्चेन्नलत्वेन किमिति भातीत्यचाह। अयं निश्चितं नलो न किन्तु ततोऽप्यतितेजस्वी तव नलवदाभातीति वा। अयं त्वत्सम्बन्धी नलो न भवति किन्त्वनल एवेत्यर्थ इति वा। एवंगुणविशिष्टमेनं यदि त्यजसि तर्ह्यग्नेः परोऽन्यः श्रेष्ठश्च ते को भर्त्ता भविताऽपि त्वेतत्सदृशोऽतितेजस्वी कोऽपि नास्तीत्यर्थः। अथ च तव कोऽभीष्टः अपि तु न कोऽपि किन्तु परः शत्रुरेवेत्यर्थः। अत्रापि त्यागः सूचितः। तथा हि एष ना मनुष्यो न किन्तु धराजगत्या आग्नेय्या दिशः पतिर्देवो वह्निरिति भवत्या निर्णीयते किं यतो न व्रियते त्वया सत्यमेव निश्चितमित्याह। अयं त्वच्चित्तानुरञ्जकोऽतितेजस्वी नलो न किन्तु तदाकारधारणान्नलाभः। सहजेयं कान्तिर्न भवतीत्यर्थः। नले रूपविषये आभा यस्य तेजस्विलं रूपं प्रत्येव न तु दैत्यान् प्रतीत्यर्थ इति

वा । नैषधराज्ञो गतिर्यस्यास्तया भवत्या एष दीप्यमानो देवो ऽग्निः किमु न निर्णीयते अपि तु निर्णीयत एव यतो न म्रियते । अयं तव पतिर्नलो न भवति किन्तु दैत्यैराक्रान्तेजास्तृणविशेषनलतुल्य इति वा । यमपक्षे एष धरान् पर्वतान् शृङ्गाभ्यां खुरैर्वाऽजति क्षिपति धराजो महिषः तस्य गत्या तेन वा या गतिस्तयोपलक्षितो धर्म्मरूपत्वात् पतिः पालयिता देवः क्रीडापरोऽमरस्य यमो न निर्णीयते इति अपि तु निश्चित एव । परं किमु न म्रियते यम एष देवः धराजेन महिषेण कृत्वाऽर्थाद्यमस्य गतिर्यस्यां एवभूता वा दक्षिणदिशः पतिर्न अपि तु भवत्यवेति किमु न निर्णीयते किं वा न म्रियते अपि तु यमत्वेन निर्णयो वरणीयस्येत्यर्थ इति वा । अतितेजस्व्ययं निश्चितनलो गहनो नापि तु धर्म्मरूपत्वाद्गहन एव । नलगहन इत्यस्य पचाद्यचि रूपं । यदि चैनमुज्झसि तर्हि तव लाभो न किन्तु हानिरेव । यतस्त्वेतदन्यः श्रेष्ठस्तु कतरो वरः अपि तु नास्त्येवेत्यर्थः । अयं नलो न किन्तु तवातिमहतां महानां प्राणानां लाभो यस्मात् सोऽतिमहानलाभः सर्व्वेषां प्राणा एतदधीना अतस्त्वया तस्मिन् वृते तव चिरकालं प्राणनं भविष्यतीत्यर्थः । यद्वा धर्म्मरूपत्वादतिशयितो महः पूजा यस्य स चासावनलाभस्तु तेजस्वित्वादग्नितुल्य इत्यर्थः । यदि चैवं त्यजसि तर्हि तव वरः श्रेष्ठः परः शत्रुः कतरोऽपि तु एतस्मिन् परित्यक्तेऽयमेव महांश्छत्रुरित्यर्थ इति वा । अथ च कं जले तरति कानि जलानि तरन्त्यस्मिन्निति वा कतरो वरुणो

वरो भविता। अत्रापि त्यागः सूचितः। तथा हि। एष धरा-जगत्या दक्षिणदिशः पतिर्देवो यमो न अपि तु यम एवेति निश्चित्य तेन कारणेन न ध्रियते किं धर्मराजबुद्ध्या देवो न निर्णीयत इति न किन्तु निर्णीयत एव। अतएव पतिर्न ध्रियते किमिति वा। अयं दैत्यैराक्रान्ततेजा नलः पितृदेवो यमो नापि तु यम एव परं तव नलवदाभाति नलाकारधारणादित्यर्थ इति वा। यदि चैनं त्यजसि तर्हि श्रेष्ठः सुखसमुद्रो नलो वरो भविता। वरुणपक्षे एष धराजगत्या भूलोकस्य पतिर्न किन्त्व-र्थात् पातालस्य। अत एव देवः कान्तिमान् अमरश्च वरुणः किं न निश्चीयते किं वा न ध्रियते। अयं नलो न किन्तु अतिमहती नलवत् कान्तिर्यस्य सोऽतिमहांस्तव नलाभो भातीति शेषः। यदि चैनमुज्झसि तर्ह्येतदन्यः श्रेष्ठस्तव को वरो भर्त्ता अपि त्वेतत्स-दृशोऽन्यो नास्तीत्यर्थः। धरायां जायन्ते धराजानि स्थावर-जङ्गमानि भूतानि तेषां गतिर्जीवनोपायो जलं तस्य पतिर्न अपि त्वपां पतिर्वरुणो देवः किं न निर्णीयते किंवा न ध्रियते अपि तु निर्णेयो वरणीयश्चेत्यर्थः। अतिमहस्यातिपूज्यस्यानलस्या-ग्नेरभावः कान्त्यभावो यस्माद्धेतोः। वरुणो हि जलरूपत्वादग्नि-विरोधीत्यर्थ इति वा। यदि चैनं त्यजसि तदा तव वरः श्रेष्ठः कः परः शत्रुरपि त्वयमेव शत्रुरित्यर्थ इति। धरतीति धरो धर्त्ता जगतः पोषकः स चासावजश्च तस्य धराजस्य श्रीविष्णोः गतिः प्रथममयनमाधारो जलं तस्य पतिर्नापि तु तत्पतिर्वरुणः किं न निर्णीयते। उदकं आपो नारा इत्यादिना

श्रीविष्णोराश्रयः। अथ च यदि त्वं एनं श्रः श्रीविष्णुः इनः स्वामी यस्य तं श्रीविष्णुभक्तं वरुणं त्यजसि तर्हि तव लाभो न किन्तु हानिरेव। तस्मात्तव कतरो वरुण एव परः श्रेष्ठो वर इति वा। अत्रापि त्यागः सूचितः। तथा हि। एष धराजगत्याः पूर्व्वोक्तप्रकारेण उदकस्य प्रतीच्या दिशो वा पतिर्वरुणो देवो नापि तु स एवेति निर्णीयते किमु अपि तु निश्चित एव। यतो न म्रियते नायं नल इत्यादि तुल्यं। यद्येनं त्यजसि तर्हि तवापि महतामनानां प्राणानां लाभो जीवितामीत्यर्थः। यस्मात् ते सुखसमुद्ररूपः श्रेष्ठो नलो वरो भविता। नलप्राप्तावेव तव प्राणा नान्यथेति भावः। इत्यादिव्याख्या सुधिया योजनीयाः। ग्रन्थविस्तरभयान्न लिखिताः। नलपक्षे अयं नैषधराजस्य निषधदेशसम्भिनो राज्ञः निषधदेशोद्भवानां लोकानां यो राजा तस्य वा गत्या ज्ञानेन कृत्वा पतिः स्वामी देवः क्रीडादियुक्तो राजा वा ना मनुष्यो नलः किं न निश्चीयते किं वा न म्रियतेऽपि तु निषधाधिपो मर्त्य एवायं पञ्चमो नल एवायं इति निश्चेतव्यो वरणीयश्चेत्यर्थः। खलु यस्मात्तवातिमहान् अलाभः विष्णुलाभः। नाविष्णुः पृथिवीपतिरिति नलस्य विष्णुत्वादित्यर्थः। यदि चोत्कृष्टवराकाङ्क्षया एनं त्यजसि तर्हि कोवरोऽस्मात्परोऽधिकोऽपि तु नास्तीति नलमेव वृणीष्वेति भावः। नलस्याप्यवरणेऽभर्त्तृकैव स्थास्यसीत्यर्थः। एष धराजगत्या भूलोकस्य पतिः स्वामी ना मनुष्यो नलो देवो राजा नापि तु नल एवेति किं न निश्चीयते किंवा न म्रियते अपि तु निश्चेयो वरणीयश्च। यस्मा-

नलवरणे तवातिमहतो जीवनस्य लाभो नलप्राप्तावेव तव जीवनं भविष्यतीत्यर्थः। यदि चायं शुभावहं दैवरूपमेनं त्यजसि तर्हि तव कः श्रेष्ठो वरोऽपि लब्धो नास्तीत्यर्थ इति वा। नैषधराज एव गतिर्यस्यास्तया भवत्या मनुष्योऽयं नलो राजा पतिः किं न निश्चीयते किंवा न व्रियते अपि तु उभयमपि कर्त्तव्यं। यद्येनमुज्झसि तर्हि तव निश्चितमतिमहान् अलाभो महदभाग्यं। यस्मादेतादृशोऽन्यः कतरो वरो ऽपि तु नास्त्येवेत्यर्थ इति वा। एष देवो न इन्द्रादिरमरो न किन्तु भूलोकस्य पतिः मनुष्योऽतितेजस्वी नल इति किं न निश्चीयते किंवा न व्रियते। यदि च देवरूपमेनं त्यजसि तर्हि तव लाभो न किन्तु हानिरेव। धरायां जायन्ते धराजाः मनुष्यास्तेषां गत्या प्रकारेण सनिमेषनेत्रत्वादिलिङ्गेनैष देवो नेति किमु न निर्णीयते तथा पतिरिति किमिति न व्रियते निश्चितं ना मनुष्यो नलोऽयं। यदि चैनं त्यजसि तर्हि तव परोऽन्यो वरः श्रेष्ठः कतरो लाभः अपि त्वेतद्वरणात् परः कोऽपि श्रेष्ठः लाभो नास्तीत्यर्थः। एष धरायां भूलोके अतिसौन्दर्य्यादजः काम इति बुद्ध्या प्राणेशो मनुष्यो नलो न तु देवः कश्चिदिति किं न निर्णीयते किं वा न व्रियते निकटस्थानामेषां चतुर्णामेतदाकारधारणात् कृत्रिमं सौन्दर्य्यं तेषामस्य तु सहजमिति दर्शनमात्रेण तारतम्यं ज्ञात्वा एष नलो निश्चेयः वरणीयश्चेत्यर्थः। इत्यादिव्याख्या यथाबुद्धिर्ज्ञातव्या। नलः स्फोटगले राज्ञि पितृदेवे कपीश्वरे इत्यादि विश्वः॥ ३४॥

इन्द्राग्निदक्षिणदिगीश्वरपाशिभिस्तां
वाचं नले तरलिताऽथ समां प्रमाय।
सा सिन्धुवेणिरिव वाडववीतिहोत्रं
लावण्यभूः कमपि भीमसुताऽऽप तापं॥ ३५॥
प्राप्तुं प्रयच्छति न पक्षचतुष्टये तां
तल्लाभशंसिनि न पञ्चमकोटिमात्रे।

इन्द्रेति। अथ लावण्यभूः परमसौन्दर्य्योत्पत्तिस्थानं सा भीमसुता नले विषये तां पूर्व्वोक्तां देवः पतिरित्यादिवाचं चेन्द्राग्निदक्षिणदिगीश्वरपाशिभिः समां सह तुल्यां श्लेषेण तेषामपि वर्णयित्रीं प्रमाय निश्चित्य तरलिता सन्देहवशात् नलनिश्चयाभावाद् दोलायमानमनाः सती कमपि अनिर्वाच्यमतिदुःसहं तापं आप। का कमिव सिन्धुवेणिर्गङ्गा सागरसङ्गमा वाडववीतिहोत्रमिव। वडवानलमिव यथा प्राप्नोति सत्यनिश्चयाभावाद्वाडवानलमिव दुःसहं सन्तापं प्रापेति भावः। नले तरलिता सोत्कण्ठेति वा॥ ३५॥

प्राप्तुमिति। सा भैमी निषधराजो नलस्य सम्बन्धिन्यां विविधायां सतो बुद्धौ सत्यां नलविषये सन्देहे सतीति यावत्। पञ्चमी चासौ कोटिश्च पञ्चमकोटावेव पञ्चमकोटिमात्रे पञ्चमभागरूपे पञ्चमस्थानमय्यमिति यावत्। एवम्भूते पक्षाणां मध्ये सत्यतरेऽतितरां सत्येऽपि नले विषये श्रद्धामास्तिक्यं न दधे सत्यमलेऽपि नलोऽयमेवेति तस्या बुद्धिर्नोदभूदित्यर्थः। क सति तल्ला-

श्रद्धां दधे निषधराड्विमतौ मताना-
मद्वैततत्त्व इव सत्यतरेऽपि लोकः ॥ ३६ ॥

भर्त्सिनि भैमीप्राप्त्यभिलाषिणि पञ्चचतुष्टये पक्षाणां समीप-वर्त्तिनां सहायानां सदृशानामिन्द्रादीनां चतुष्टये तां श्रद्धां सत्यनलविषयं निश्चयं प्राप्तुं न प्रयच्छति सति भैमीप्राप्त्यभि-लाषेणातिसुन्दररूपधारणात् कृत्रिमरत्नादिष्विव मायानलेषु बहुरूपातिशयदर्शनान्नलनिश्चयं प्रतिषेधति सति कः कस्मिन्निव मतानां साङ्ख्यादिषड्दर्शनानां मध्ये एकमेवाद्वितीयं ब्रह्म नेह नानास्ति किञ्चनेत्यादिश्रुतिभिः सत्यतरे परमार्थतो वर्त्तमाने ऽपि अद्वैतरूपे तत्त्वे स्वरूपे ब्रह्मैक्यबोधे वा विषये लोकोऽवि-द्यावान् युक्तायुक्तविचारशून्यो जनो यथा श्रद्धां न धत्ते। क्व सति पञ्चचतुष्टये अनेकात्मवादिसाङ्ख्यादिदर्शनचतुष्के ताम-द्वैतश्रद्धां प्राप्तुं न ददति सति नानात्मत्वसाधकयुक्तिसहस्रैरे-कात्मनिषेधके सतीति यावत्। तस्य तत्पदवाच्यस्य लाभस्त-च्छंसिनीत्यद्वैततत्त्वस्य विशेषणं। साङ्ख्या हि प्रतिशरीरं पुरुष-बहुत्वमङ्गीकुर्व्वन्ति। नैयायिकाश्च नानात्मानो व्यवस्थात इति वचनात् आत्मनो नानात्वमङ्गीकुर्व्वन्ति। आर्हताश्च देहप्रमाणा-त्मस्वाकारमङ्गीकुर्व्वन्ति। बौद्धाश्च स्वसिद्धान्तसिद्धानेकयुक्ति-भिरनेकात्मनामेव चित्तततिबाहुल्यमङ्गीकुर्व्वन्ति। सत् असत्। सदसत्तल्लक्षणमिति पञ्चचतुष्टयं। सदादिनः साङ्ख्याः। असदा-दिनो बौद्धाः। सदसद्वादिनो नैयायिकाः। प्रपञ्चानिर्व्वचनी-

सत्त्ववादिनो वेदान्तिनः । न सत् बाधानुपपत्तेः । न हि सद्ब्रह्म गगनादिकं वा बाध्यते । न चासत् प्रतिभासानुपपत्तेः । न हि अत्यन्तासत् शशशृङ्गं कदाचिदप्यवभासते । न च सदसदात्मकं उभयरूपं परस्परविरोधात् । न ह्यसत्सद्वा अवस्थातुमर्हति । उभयरूपमपि न भवतीत्यपि वक्तुमयुक्तं इत्यादि ज्ञातव्यं । साङ्ख्या हि प्रतिशरीरं भिन्नान् शुद्धस्वभावान् सर्व्वव्यापकान् बहूनात्मन इच्छन्ति । नैयायिका अपि प्रतिशरीरं भिन्नान् सर्व्वव्यापकान् ज्ञानादिनवविशेषगुणवत आत्मन इच्छन्ति । आर्हतास्तु प्रति शरीरं भिन्नान् देहपरिमाणान् सङ्कोचविकाशशीलान् बहूनात्मनोऽङ्गीकुर्व्वन्ति । बौद्धा हि प्रति देहं भिन्नान् क्षणिकज्ञानसन्ततिरूपान् बहूनेवात्मन इच्छन्ति । भैमीप्राप्त्यभिलाषिणि सत्यतरे नले नलसम्बन्धिन्यां विमतौ सत्यामपि सा श्रद्धा न दधे अपि तु दधावेव । अनेकनलदर्शने सत्ये पञ्चमकोटिस्थे सत्ये नले अविज्ञातेऽपि बन्धौ बलात्प्रह्लादते मन इति न्यायेन अयमेव प्रायेण सत्यनलो भविष्यतीति तस्या मनसि बुद्धिरुदभूदित्यर्थः । मतानां विमतावपि सत्यतरे अद्वैततत्त्वे लोकत इति लोकः परीक्षका जना यथा श्रद्धां धत्ते तथेति सम्बन्धः । प्राप्तुमिति पाठे निषधराट् नलः इन्द्रादिचतुष्टये भैमीप्रतारणार्थं स्वीयस्वरूपधारणात्मां स्वस्मै प्राप्तुं न यच्छति सति तत्राभ्यर्थसिनि भैमीप्राप्त्यभिलाषिणि पञ्चमकोटिस्थे अर्थादात्मनि श्रद्धां निश्चयं न दधे भैमीं प्राप्तुं । एतस्मिंश्चतुष्टये प्रतिबन्धके सतीयं मया कथंकारं प्राप्यते ऽपि तु नेति तस्य

कारिष्यते परिभवः कलिना नलस्य
तां द्वापरस्तु सुतनूमदुनोत् पुरस्तात्।
भैमी नलोपयमनं पिशुनौ सहेते
न द्वापरः किल कलिश्च युगे जगत्यां॥ ३७॥

बुद्धिरुदभूदित्यर्थः। मतानां विमतौ सत्यां सदसदादिपञ्चचतुष्टये तां सम्यक् प्रतीतिं निषेधति सति अभेदसिद्धिसंसिनि पञ्चमकोटिमात्रे चतुष्कोटिविनिर्मुक्ते सत्यतरेऽप्यद्वैततत्त्वे यथा लोकः श्रद्धां न धत्त इति व्याख्येयं। लोकः कौतुकदर्शी सभास्थो जन इयमेनं वरिष्यतीति निश्चयं अयं पञ्चमः सत्यनल इति वा निश्चयं न दधे। पञ्चमकोटिमात्रे पुंवत्कर्मधारयेत्यादिना (पा० ६।३।४२) पुंवद्भावः॥ ३६॥

कारिष्यत इति। उक्तिविशेषेण पुनरपि सन्देहजनितं सन्तापं वर्णयति। कलिना चतुर्थयुगेन नलस्य परिभवः पराभवः कारिष्यते करिष्यते। द्वापरस्तु अयं वा नलोऽयं वाऽनल इति सदेहः। पुनरथ चशब्दबलेन तृतीयं युगं पुनस्तां सुतनुं सुन्दरीं पुरस्तात् कलेः पूर्व्वमेवादुनोत् अपिपीडत्। कलिर्वरणानन्तरं नलपराभवं करिष्यति। द्वापरस्तु भैम्यै एनं नलं वरीतुमेव नाददित्यर्थः। तयोर्विरोधित्वे कारणमाह। किल यस्मात् कारणात् द्वापरः कलिश्च द्वावपि युगे जगत्यां भूलोके भैमीनलयोरुपयमनं विवाहं न सेहाते। जातं तयोर्विवाहं कलिर्यथा न सोढा तथा भाविनं द्वापरोऽपि न सेहे। यतः पिशुनौ खलौ। निश्चिते

उत्कण्ठयन् पृथगिमां युगपन्नलेषु
प्रत्येकमेषु परिमोहयमाणबाणः।

नले विवाहो भवत्येव। सन्देहस्तु प्रतिबन्धकः। तस्मात्कलिवत् द्वापरस्यापि विरोधित्वात्तेन सा पीडितेति युक्तमेवेत्यर्थः। द्वापरे कलौ च भैमीनलयोरभावात् तयोर्विवाहं न सहेते तौ इत्यर्थः। नलनिश्चयाभावात् सा ऽतितमं सन्तापमापेति भावः। शब्दश्लेषबलेनेयमुक्तिः। द्वापरः संशये युगमिति विश्वः। कारि-ष्यते। स्यसिच् सीयुट् तासिष्वित्यादिना (पा० ६।४।६२) इट्। चिण्वद्भावादचो ञ्णितीति (पा० ७।२।११५) वृद्धिः। परिभवः। परौ भुवोऽवज्ञान इति (पा० ३।३।५५) घञो विकल्पितत्वात् ऋदोरप् (पा० ३।३।५७)॥ ३१॥

उत्कण्ठयन्निति। परिमोहयमाणा मोहजनका बाणा यस्यैवंभूतोऽत एव इमां भैमीं प्रत्येकमेषु इन्द्रादिनलपदेषु युगपदेकस्मिन्नेव काले पृथक् पार्थक्येनोत्कण्ठयन् सोत्कण्ठां कुर्वन् अयं वा नलोऽयं वा नल इति बुद्ध्यैकैकस्मिन् विषये तुल्यकालं पृथक्प्रकारेणोत्कण्ठयन् पृथक्प्रयत्नसाध्यामन्यादृशीमन्यादृशीमुत्कण्ठां अस्या जनयन् इति यावत्। एवंभूतः स पञ्चबाणः निजाः स्वीयाः शिलीमुखाः बाणास्तान् शीलयत्यभ्य-स्यति। स्वीयबाणाश्रितेति यावत्। एवंभूता पञ्चसङ्ख्या तस्याः साफल्यं सप्रयोजनत्वं यद्यपि तर्हि तदा तस्मिन्नेवावसरे न त्वन्य-देति वयं जानीमहे उत्प्रेक्षामहे। एकस्मिन्नले अनुरागस्य पर्य्या-

जानीमहे निजशिलीमुखशीलिसञ्ज्ञा
साफल्यमाप स तदा यदि पञ्चबाणः ॥ ३८ ॥

येनैकेनैव बाणेन जनने शेषाणां चतुर्णां वैयर्थ्यमेव स्यात् किमयं नल इति नलत्वेनोपलक्षितेषु पञ्चस्वपि प्रत्येकं पञ्चभिरेव बाणैः पृथक्प्रयत्नेन युगपदनुरागजनने पञ्चानामपि बाणानां साफल्यं तदैव जातमित्यर्थः । पृथगित्यस्योत्कण्ठाविशेषणत्वात् प्रत्येक-मित्यस्येन्द्रादिविशेषणत्वात् सम्बन्धभेदान्नार्थपौनरुक्त्यं । नलेषु युगपदिमां पृथगुत्कण्ठयन् तथा प्रत्येकमेषु नलेष्वेव युगपत्प-रिमोह्यमाणा अर्थाद्भैम्यां विषयेऽनुरागजनका बाणा यस्य स मदनः यदि निजबाणसञ्ज्ञासाफल्यमाप तर्हि तदैव नान्यदा। पञ्चस्वपि तस्या युगपत् पृथगनुरागजननात्। तस्यामपि पञ्चाना-मपि तेषां प्रत्येकं युगपदनुरागजननाच्च। स्वीयबाणसञ्ज्ञायाः साफल्यमापेत्यर्थ इति वा। नलेषु तां पृथक् सोत्कण्ठां कुर्वंस्तथा एषु नलेष्विव प्रत्येकमुत्कण्ठां जनयन्नर्थाद्भैमीं प्रति। यतः परि-मोह्यमाणबाण इत्युभयत्रापि उत्कण्ठाजनने हेतुगर्भविशेषणं। सा भैमी पञ्चस्वपि नलबुद्ध्यैव सानुरागाऽभूदिति भावः । तेऽपि तस्यामित्यपि च भावः। पञ्चस्वनुरागात् पातिव्रत्यभङ्गप्रसङ्ग इति न। पञ्चस्वपि परपुरुषतापरिहारेण नलबुद्ध्यैवानुरागात् परिहारः। उत्कण्ठयन्। इयमुत्कण्ठते काममस्येनामुत्कण्ठयति। हेतुमण्णिचि शता । पक्षान्तरे तूत्कण्ठां कुर्वन्निति तत्करोतीति णिच् ॥ ३८ ॥

देवानियं निषधराजरुचस्त्यजन्ती
रूपादरज्यत नले न विदर्भसुभ्रूः ।
जन्मान्तराधिगतकर्म्मविपाकजन्मै-
वोन्मीलति क्व च न कस्य च नानुरागः ॥ ३९ ॥

देवानिति । इयं विदर्भसुभ्रूर्भैमी नले रूपात् सौन्दर्यान्ना-नरज्यत नानुरक्ता नलेऽनुरक्ता परं रूपाद्धेतोरिति नेत्यर्थः । यतो निषधराजरुचो नलतुल्यकान्तीन् देवानिन्द्रादीन् त्यजन्ती। यदि नले रूपाद्धेतोररज्यत् तर्हि नलतुल्यरूपानिन्द्रादीन् नात्यक्ष्यत् । ते तावत् त्यक्ताः । तस्मान्नलानुरागे रूपं हेतुर्न भवतीत्यर्थः । तर्हि कथमनुरक्तेत्याशङ्क्याह । जन्मान्तरे अधि-गतं पूर्व्वकृतं कर्म्म तस्य यो विपाकः फलजननोन्मुखता तज्जन्मा तदुत्पन्न एव कस्य च न कस्यापि प्राणिनोऽनुरागः क्व च न कस्मिंश्चित् प्राणिनि उन्मीलति उत्पद्यते पूर्व्वकृतकर्म्मवशादेव कोऽपि कस्मिंश्चित् प्रीतिं बिभर्त्ति । तथा च पूर्व्वजन्मकृतसुकृत-विशेषादेवानपेक्षितान्यकारणविशेषो नलेऽनुरागस्तस्याः सम-भूदित्यर्थः । नलनिश्चयाभावेऽपि रूपसाम्ये सत्यपि च नल एवानुरक्ततया नलादिन्द्रादिरूपोऽप्यन्यस्तदीयानुरागविषयो मा-भूत् किन्तु नल एवेत्यर्थान्तरन्यासमतात् पर्य्यं । अनुरागजननं उभयोरपि पूर्व्वकर्म्मविपाको हेतुर्ज्ञेयः । अरज्यत । ग्यन्विकर-णाद्रज्यतेर्ञ्जित्वात् कर्त्रभिप्रायक्रियाफलविवक्षया तङ् ॥ ३९ ॥

क्व प्राप्यते स पतगः परिपृच्छ्यते यः
प्रत्येमि तस्य हि पुरेव नलं गिरेति।
सस्मार सस्मरमतिः प्रति नैषधीयं
नव्यामरालयमरालमरालकेशी ॥ ४० ॥

क्वेति। सस्मरा कामतरला धीर्मतिर्यस्याः सा अरालकेशी कुटिलकेशी भैमी तत्र सभायां सन्देहावसरे वा इति मनसि विचार्य्य नैषधीयं नलसम्बन्धिनं नलदूत्यकारिणं अमरालयं मरालं स्वर्गनिवासिनं देवाश्रयं वा हंसं प्रति उद्दिश्य सस्मार। इति किं। स पतगः हंसः क्व कस्मिन् स्थाने प्राप्यते। स कः। यो हंसो मया परितः सामस्त्येन एषु मध्ये सत्यं नलं मह्यं कथयेति विश्वास्यतया पृच्छ्यते। स एव किमिति प्रष्टव्य इति चेत् आह। हि यस्मात्तस्य हंसस्य गिरा पुरेव सङ्घटनाकाल इव नलं प्रत्येमि निश्चिनोमि। अदृष्टमज्ञातमपि च नलं दूत्यावसरे यथा हंसवचनेनाहं ज्ञातवती तथाधुनापि नलनिश्चयाभावे परमाप्तस्य तस्य वचनान्नलं निश्चिनोमीति मदनपरवशत्वेनाऽधीरत्वान्नलनिश्चयार्थमाप्ततमं तं हंसं सस्मारेत्यर्थः। प्राप्यत इत्यादि। वर्त्तमानसामीप्ये वर्त्तमानवद्वा (पा० ३।३।१३१) इति लट्। निषधसम्बन्धि नैषधीयं नलवरणलक्षणं कार्य्यमुद्दिश्य हंसं सस्मारेति वा योजना। किल नैषधीयमिति पाठे नलं किल निश्चितं प्रत्येमीति योजना। प्रियदूतभूतमिति पाठो वा ॥ ४० ॥

एकैकमैक्षत मुहुर्महतादरेण
भेदं विवेद न च पञ्चसु कञ्चिदेषा ।
शङ्काशतं वितरता हरता पुनस्त-
दुन्मादिनेव मनसेयमिदं तदाह ॥ ४१ ॥
अस्ति द्विचन्द्रमतिरस्ति जनस्य तत्र
भ्रान्तौ दृगन्तचिपिटीकरणादिरादिः ।

एकैकमिति । एषा भैमी महता आदरेण प्रयत्नेन मुहुः एकैकं इन्द्रादीनैक्षत आलोकत । विशेषजिज्ञासया पुनः साभिप्रायं ददर्शेत्यर्थः । अथ च महता दरेण भयेन, पतिव्रतेयं पञ्चापि सादरं कथं पश्यतीति अविदितसादरावलोकनकारणेभ्यो जनेभ्यो ऽपवादभयेनेत्यर्थः । परं पञ्चसु मध्ये कञ्चिदल्पीयांसमपि भेदं विशेषं न च नैव विवेद । अनन्तरञ्च वक्ष्यमाणप्रकारेण शङ्काशतं सन्देहपरम्परां वितरता तन्वता वितीर्य्य च पुनस्तच्छङ्काशतं हरता वक्ष्यमाणप्रकारानेकयुक्तिभिर्नाशयता मनसा इयं भैमी इदं वक्ष्यमाणं बभाषे । चेतस्येवाविचारयदित्यर्थः । उत्प्रेक्ष्यते । उन्मादिनेव उन्मादवतामपि भूयसा आदरेण भयेन वा प्रत्येकमीक्षते तारतम्यञ्च न जानातीति । शङ्काशतञ्च करोति पुनरपसारयति ददाति च पुनरादत्ते चेत्येवमव्यवस्थितचित्तो भवति । तथेयमप्यव्यवस्थितचित्ताभूदिति भावः । वेद स्मेति पाठे भूतेऽर्थे । लट् स्मेति (पा० ३।२।११८) लट् ॥ ४१ ॥

तमेव विचारमाह । अस्तीति ॥ जनस्य द्विचन्द्रमतिः द्वौ

स्वच्छोपसर्पणमपि प्रतिमाभिमाने
भेदभ्रमे पुनरमीषु न मे निमित्तम्॥ ४२॥
किं वा तनोति मयि नैषध एव काय-
व्यूहं विधाय परिहासमसौ विलासी।

चन्द्राविति बुद्धिः प्रसिद्धाऽस्ति। परं तत्र भ्रान्तौ प्रमाणप्रमित्यै-कत्वे एकस्मिन्नेव चन्द्रे विषये यो अनेकत्वप्रत्ययस्तस्मिन्विषये दृगन्तयोर्नेत्रप्रान्तयोर्यच्चिपिटीकरणं अचिपिटयोश्चिपिटयोः करणं अङ्गुल्यग्रेण निपीडनं तदादिर्यस्य काचकामलादिदोषस्य स दृगन्तचिपिटीकरणादिदोष आदिः प्रथमो हेतुरस्ति। चन्द्र-द्वयभ्रान्तौ चिपिटादिः हेतुर्युक्तः। तथा प्रतिमाया आदर्शादौ दृश्यमानस्य मुखादिप्रतिबिम्बस्याभिमानेऽपि प्रतिबिम्बस्फुरण-रूपे भ्रान्तिज्ञानेऽपि स्वच्छस्यादर्शादेरुप समीपे यत् समर्पणं प्रापणं दर्पणसन्निधानं तन्निमित्तं अस्तीति शेषः। दर्पणादिस्व-च्छवस्तुसन्निधानादलीकमपि प्रतिबिम्बं भासत इत्यर्थः। मे मम पुनरमीषु दृश्यमानेषु भेदभ्रमे एकस्मिन्नले विषये यः पञ्चत्व-सङ्ख्यादिविशिष्टो बोधस्तस्मिन् विषये निमित्तं कारणं नास्ति। द्विचन्द्रभ्रान्तौ कारणमस्तीति भ्रान्तिर्युक्ता। एकोऽपि नलः पञ्चधा भासत इति तु मदीया भ्रान्तिः कारणाभावान्न युक्ता। तस्मादन्य एवैते के च न भविष्यन्तीति स्वयमेव संशयश्चकार परिजहार चेति भावः। अभिमानोऽर्थादिदर्पे ज्ञाने प्रणय-हिंसयोरिति निघण्टुः॥ ४२॥

पक्षान्तरमाह। किं वेति॥ वा पक्षान्तरे। असौ प्रत्यक्षदृश्यः

विज्ञानवैभवभृतः किमु तस्य विद्या
सा विद्यते न तुरगाशयवेदितेव ॥ ४३ ॥
एको नलः किमयमन्यतमः किमैलः
कामोऽपरः किमु किमु द्वयमाश्विनेयौ ।
किं रूपधेयभरसीमतया समेषु
तेष्वेव नेह नलमोहमहं वहे वा ॥ ४४ ॥

नैषध एव कायव्यूहं शरीरसमूहं विधाय निर्धार्य्यायमपि परिहासं प्रतारणाक्रीडां तनोति किं । यतो विलासी एकोऽप्यसौ नलः एवमपि क्रीडावशात् कायव्यूहं तनोति न त्वन्ये के च न सन्तीत्यर्थः । किन्ना तनोतीति पाठे काकुः । कायव्यूहरचनेऽस्य शक्तिः कथमित्यत आह । विशिष्टस्य ज्ञानस्य विशिष्टं ज्ञानं यैरेवंविधा ये कला ग्रन्थाः तेषां वा वैभवं बाहुल्यं तद्भृतस्तस्य नलस्य तुरगाशयवेदितेव अश्वहृदयज्ञातृतेव सा कायव्यूहविधानरूपा विद्यापि किमुत विद्यते अपि तु सापि विद्यत एवेति सम्भावना । विज्ञानवैभवभुव इति पाठे । भुवः स्थानभूतस्येत्यर्थः । परिहासः । उपसर्गस्य घञ्यमनुष्ये (पा० ६।३।१२२) सूत्रे बहुलग्रहणाद् दीर्घः ॥ ४३ ॥

एक इति । वा पक्षान्तरे । इह एषु पञ्चसु मध्ये अयमेको नलः किं । अन्यतमः द्वितीय ऐलः पुरूरवाः किं । अपरस्तृतीयः कामः किमु । शिष्टद्वयं आश्विनेयौ अश्विनीकुमारौ किमु । एवमुक्तेषु तेषु पञ्चसु एव अहं नलमोहं किं न वहे । अपि तु तेष्वेव

पूर्व्वं मया विरहनिःसहयापि दृष्टः
सोऽयं प्रियस्तत इतो निषधाधिराजः।
भूयः किमागतवती मम सा दशेयं
पश्यामि यद्विलसितेन नलानलीकान्॥ ४५॥
मुग्धा दधामि कथमित्थमथापशङ्कां
सङ्क्रन्दनादिकपटः स्फुटमीदृशोऽयं।

नलबुद्धिं धारयामि। न तु कायव्यूहरचनादेक एव नलः पञ्चधा जात इत्यर्थः। यतो रूपधेयभरस्य सौन्दर्य्यबाहुल्यस्य सीमतया पराकाष्ठात्वेन समेषु सदृशेषु साचाद्विमोहो युक्तः। अन्यतमः। स्वार्थे तमप्। सीमशब्दो नान्तः स्त्रीलिङ्गः॥ ४४॥

पूर्व्वमिति। विरहनिःसहया वियोगविह्वलया मया सोऽयं निषधाधिराजः प्रियः प्राणेश इतस्ततः सर्व्वासु दिक्षु पूर्व्वमपि स्वयंवरसमयात् प्रागपि दृष्टः। य इदानीं दृश्यते स मोहवशात् सर्व्वत्र पूर्व्वमपि दृष्ट इत्यर्थः। प्रकृते किमित्यत आह। ममेयं भूयः पुनरपि सैव विरहोद्भूतोद्भ्रान्ततारूपा दशा आगतवती किं। यद्विलसितेन यस्याः सामर्थ्येनालीकानसत्यान्नलान् पश्यामि। अपि पूर्व्वं इत्यनेन भूय इत्यनेन वा योजनीयः॥४५॥

मुग्धेति। अथ पचान्तरे। अथवा मुग्धा मोहवशा सती अहं इत्थं अस्ति द्विचन्द्रेत्याद्यनेकरूपां अपशङ्कां दुःशङ्कां कथं दधामि अपि त्वेतदयुक्तमित्यर्थः। यतः स्फुटं निश्चितं अयमीदृशः नलबाहुल्यज्ञानरूपः सङ्क्रन्दनादीनामिन्द्रादीनां चतुर्णां कप-

देव्याऽनयैव रचिता हि तथा तथैषां
गाथा यथा दिगधिपानपि ताः स्पृशन्ति ॥ ४६ ॥
एतन्मदीयमतिवञ्चकपञ्चकस्थे
नाथे कथं नु मनुजस्य चकास्तु चिह्नं।

टस्तेषां मायैवैषेत्यर्थः। हि यस्मादनया देव्यैव सरस्वत्यैवैषां पुरोवस्थितानां सम्बन्धिन्यो गाथाः त्रूम इत्यादिवर्णनश्लोकास्तथा तथा तेन तेन प्रकारेण रचिताः यथा येन प्रकारेण ता गाथा दिगधिपानिन्द्रादीनपि स्पृशन्ति श्लिष्टशब्दशक्त्याऽभिधावृत्त्या वदन्ति न केवलमित्यपेरर्थः। तस्मादिन्द्रादिभिरेव मत्प्रतारणार्थं मायया नलरूपं धृतमित्येव बुद्धिर्युक्ता न तु संशयरूपेत्यर्थः। तथाशब्दस्य द्विरुपादानाद् यथाशब्दो ऽपि द्विर्ज्ञातव्यः। कपटोऽस्त्री व्याजदम्भोपधय इत्यमरः॥ ४६ ॥

एतदिति। एतस्मिन्मदीयाया मतेर्बुद्धेर्वञ्चके भ्रामके पञ्चके इन्द्रादिसमूहे तन्मध्यस्थिते नाथे मम प्राणेशे मनुजस्य मनुष्यस्य चिह्नं स्वेदनिमेषरजःस्पर्शम्लानकुसुमत्वादिलिङ्गं कथं नु कथमिव चकास्तु प्रकाशतां। अपि त्विन्द्रादिमायया नलस्यस्यापि चिह्नस्य छादितत्वात्तन्न प्रकाशत इति युक्तमित्यर्थः। नलस्य स्वयमवञ्चकत्वेऽपि छत्रिणो गच्छन्तीति न्यायात् चतुर्णामेव वञ्चकत्वेऽपि तत्सिद्धिः। परिहासवशाद्वा नलस्यास्यापि वञ्चकत्वं युक्तम्। एतद्राजसु दृश्यमानं स्वेदादिचिह्नमिति भिन्नं पदं वा। हतस्वेदं अमी बर्हिर्मुखा देवाः। धुतं त्यक्तं रजो रेणुःस्पर्शो

लक्ष्माणि तानि किममी न वहन्ति हन्त
बर्हिर्मुखा धुतरजस्तनुतामुखानि ॥ ४७ ॥
याचे नलं किममरानथवा तदर्थं
नित्यार्च्चनादपि ममाफलिनैरलन्तैः ।
कन्दर्पशोषणशिलीमुखपातपीत-
कारुण्यनीरनिधिगह्वरघोरचित्तैः ॥ ४८ ॥

यया एवम्भूता तनुर्येषां तेषां भावो धुतरजस्तनुता रेणुसंस्पर्शर-हिततनुता मुखे मालिन्यादि येषां तानि स्वेदराहित्याम्लानपु-ष्पत्वनिर्निमेषत्वादीनि देवत्वव्यञ्जकानि तानि प्रसिद्धानि चि-ह्नानि किमिति न वहन्ति धारयन्ति । मयि कृपया तावद्धाङ्कु-युक्तानि परन्तु नोह्यन्ते कष्टमित्यर्थः । बर्हिर्मुखपदं कृपाराहि-त्यसूचकं । नलचिह्नानामस्फुटत्वेऽपि यदि देवचिह्नानि स्फुटा-न्यभविष्यंस्तर्हि पारिशेष्यान्नलनिश्चयोऽप्यभविष्यत्तान्यपि त्वस्फु-टानीत्युभयथापि मया नलो निश्चेतुं न शक्यत इति भावः ॥ ४७ ॥

याच इति । अहं, मह्यं यूयं नलं प्रयच्छतेति, अमरान् नलं याचे किं । अथवा पूर्व्वापरितोषे । तदर्थं नलप्राप्त्यर्थं तेषां नित्यार्चनादपि ममाऽफलिनैः प्रार्थितमददद्भिस्तैर्देवैरलं पूर्य्यतां एतावन्ति दिनानि।नित्यपूजनादपि ये नलं न प्रायच्छंस्तेऽधुना प्रार्थनमात्रेण कथं दास्यन्तीति वृथैव तत्प्रार्थनमित्यर्थः । किंवि-धैस्तैः । कन्दर्पस्य शोषणाख्यशिलीमुखो बाणस्तेन पातात् पतनात् पीतः शोषितः कारुण्यनीरनिधिः कृपासमुद्रो येषां तानि अत

ईशा दिशां नलभुवं प्रतिपद्य लेखा
वर्णश्रियं गुणवतामपि वः कथं वा।
मूर्खान्धकूपपतनादिव पुस्तकाना-
मस्तं गतं वत परोपकृतिव्रतित्वं ॥ ४९ ॥

एव गह्वराणि गभीरबिलरूपाणि घोराणि कठिनानि चित्तानि येषामेवम्भूतः। यस्मात् कृतेऽपि नित्यपूजने कामायत्ततया निष्फलत्वादफलितैरित्यर्थः। यावदिर्दिकर्म्मा। न दत्तफलैरिति वा पाठः। फलशब्दादस्त्यर्थे फलबर्हाभ्यामिनच् (पा० ५।२।१२२। वा० ५।) ततो नञ्समासः॥ ४८॥

देवानुपालभते। ईशा इति। हे दिशामीशा दिक्पाला लेखा देवा, नलो भूः स्थानं यस्यास्तां नलभुवं नलप्रभवां वा वर्णश्रियं रूपशोभां प्रतिपद्य प्राप्य गुणवतां सौन्दर्य्यादिगुणयुक्तानामपि वो युष्माकं परेषामुपकृतिरुपकार एव व्रतं तदिद्यते येषां ते व्रतिनस्तेषां भावस्तत्त्वं कथं वा कुतो वा हेतोरस्तं गतं नष्टं स्वयमुपकारकत्वाभावेऽपि स्वाभिलषितायामपि मयि भवदर्थदूत्यकारिणो नलस्याप्याकारे धृते सौन्दर्य्यादिगुणागमनात् परोपकारित्वमप्यागतं तन्मद्विषये कथं विनष्टमित्यर्थः। नलाकारधारणादेतावतो मत्प्रतारणा किमिति क्रियत इति भावः। केषामिव। मूर्खाः अश्रुतशास्त्राः पुरुषा एवाज्ञानवशादन्धास्त एव कूपा अतिगभीरा मूर्खरूपाः कूपास्तेषु पतनात् तदधीनत्वात्तृणविशेषलेखनीभूतनलप्रभवां रेखां वर्णश्रियं लिप्यक्षरशोभां प्राप्य

यस्येश्वरेण यदलेखि ललाटपट्टे
तत् स्यादयोग्यमपि योग्यमपास्य तस्य।
का वासनाऽस्तु बिभृयामिह यां हृदाऽहं
नार्कातपैर्जलजमेति हिमैस्तु दाहम् ॥ ५० ॥

शृङ्खलादिगुणयुक्तानां दोरकयुक्तानां वा पुस्तकानां यथा वाचकपाठकाद्युपकारकारित्वरूपमस्तङ्गच्छति मूर्खस्य मूर्खत्वादेवोपकाराभावादन्येषां चासमर्पणादित्यर्थः। कूपपतितानामपि पुस्तकानामनुपकारकत्वमेव प्रतिपद्य स्थितानामिति समानकर्त्तृकत्वं ॥ ४९ ॥

यस्येति। ईश्वरेण यस्य प्राणिनः ललाटपट्टे यदयोग्यमनुचितमपि अलेखि लिखितं तदयोग्यमपि तस्य योग्यं समुचितमर्थं अपास्य प्रतिक्षिप्य स्याद्भवेत्। योग्यमर्थं परित्यज्य तत्परिहारेण स्वयमेव भवेदिति यावत्। अतो योग्यतया कार्य्यकरणाभावे सति इह नलानेकत्वसन्देहेन निश्चयार्थं यां वासनां युक्तिमहं हृदा बिभृयां धारयेयं सा का वासना युक्तिरस्तु भवतु अपि त्वेवंविधा युक्तिर्नास्ति। चित्तेनान्यथाकर्त्तुं विचारितेऽपि ललाटपट्टलिखितादन्यथा न भवतीत्यर्थः। योग्यमपास्यायोग्यमेव भवतीत्यत्र दृष्टान्तमाह। यतो जलजमम्भोजं अर्कातपैरुष्णैरपि सूर्य्यकिरणैर्दाहं नैति हिमैस्तु पुनर्दाहं गच्छति। उष्णस्पर्शो दाहकः शीतस्पर्शस्तु दाहशमक इति लोके दृष्टं। तदिदं विपरीतं जातमिति विरुद्धकार्य्योत्पत्तेर्विषमं नलस्य मम वा ललाटे यदी-

इत्थं यथेह मदभाग्यमनेन मन्ये
कल्पद्रुमोऽपि स मया खलु याच्यमानः ।
सङ्कोचसंज्वरदलाङ्गुलिपल्लवाग्र-
पाणिर्भवन् भवति मां प्रति बद्धमुष्टिः ॥ ५१ ॥
देव्याः करे वरणमाल्यमथार्पये वा
यो वीरसेनिरिह तत्र निवेशयेति ।

रेणायोग्यमेव लिखितं तर्हि परस्परयोग्यं परस्परं विहाय तस्य मम चायोग्यमेव भविष्यतीति कं प्रकारं चित्ते धारयिष्यास्यपि तु न कमपीति देवानां न कोऽप्यपराध इति भावः ॥५०॥

तर्हि कल्पद्रुमो याच्यतामित्यत आह । इत्थमिति । इह नलैकत्वेऽपि समये वा इत्थमनेन नलानेकत्वभवनप्रकारेण यथा यादृक् ममाभाग्यं नलानिश्चयात् यथा दैवाभावो दृश्यते अनेन हेतुना प्रकारेण वा मोऽतिवदान्यः कल्पद्रुमोऽपि खलु निश्चितं मया नलं याच्यमानः सन् मां प्रति बद्धमुष्टिरतिकार्पण्यसङ्कुचत्करो भवतीत्यहं मन्ये । किम्भूतः । सङ्कोच एव संज्वरः सन्तापो येषां एवंविधानि दलानि किसलयान्येव अङ्गुलयो येषामेवभूताः पल्लवा एवाग्रपाणयः हस्ताग्राणि यस्यैवम्भूतः । अनेन एवम्भूतो भवन् । अन्यस्यापि बद्धमुष्टेरङ्गुलयः सङ्कुचिता भवन्ति । कल्पितदानशीलोऽपि मदभाग्यवशान्मां प्रत्यदातैव भवेदिति भावः । अदातृत्वनिश्चयात् भवतीति वर्त्तमानप्रत्ययः ॥ ५१ ॥

देव्या इति । अथवा इह स्वयम्बरे एतेषु पञ्चसु मध्ये वा यो

सैषा मया मखभुजां द्विषती कृता स्यात्
स्वस्मै तृणाय तु विहन्मि न बन्धुरत्नम् ॥ ५२ ॥

यः स्यादमीषु परमार्थनलः स माला-
मङ्गीकरोतु वरणाय ममेति चैतां।
तं प्रापयामि यदि तत्र विसृज्य लज्जां
कुर्व्वे कथं जगति भूटणवति चो विडम्बः ॥ ५३ ॥

वैरिमेनिः सत्यनलः तत्त्वं तावज्जानासि अतस्त्वत्रैतां मालां निवेश्य निक्षिपेत्युक्ता देव्याः सरस्वत्याः करे वरणमाल्यं वरणमधूकमालां अर्पये ददामीति सम्भावना। स्वयमेवैतद्दूषयति। एवं क्रियमाणे सैषा देवी या मखभुजां देवानामिन्द्रादीनां द्विषती वैरिणी कृता स्यात्। तन्मायाप्रकटनादित्यर्थः। भवतु नाम सा तद्वैरिणी स्वकार्य्यसिद्धिस्तु साध्येत्यत आह। तु पुनः तृणाय तृणतुल्यायातिनिःसाराय स्वस्मै स्वरूपाय अकिञ्चित्करात्मकार्य्यसिद्धये बन्धुरत्नं सुहृन्मध्येऽतिश्रेष्ठां देवीं न विहन्मि। मम यत् किंवा भवतु परंतु देवद्वेषरूपं मित्रविघातं न करोमीत्यर्थः। अन्योऽपि तृणार्थं सुज्ञः रत्नं न विनाशयति। द्विषती। द्विषोऽमित्रे (पा० ३।२।१३१) इति शतरि, उगित्वान्ङीप् (पा० ४।१।६)। मखभुजां। द्विषःशतु र्वेति (पा० २।३।६९) षष्ठी॥५२॥

य इति। अमीषु पञ्चसु भवत्सु मध्ये यः परमार्थनलः सत्यनलः स्यात् स मम वरणाय मालामङ्गीकरोतु इत्येवंप्रकारेण इत्युक्ता चेति वा मालां तत्र तेषु मध्ये सत्यनलं प्रापयामि तत्पु-

इतरनलतुलाभागेषु शेषः सुधाभिः
स्नपयति मम चेतो नैषधः कस्य हेतोः।

निर्लज्जां विसृज्य कथं कुर्वे अपि त्वेवं कर्त्तुमयुक्तं। यतः जगति सर्व्वस्मिन् सभाजने शृण्वति सति हा कष्टं विडम्बः। लज्जात्यागादतिपरिहासो भविष्यतीति शेषः। सर्व्वेषां समक्षमेवंवचने लज्जात्यागात् सर्व्वेऽप्युपहसिष्यन्तीत्यर्थः। हीति खेदे। हि यस्मादर्थे इ खेदे इति वा। इति चेति समुदायप्रकारे। यदि चेति वा ॥ ५३ ॥

इतरेति। इतरैश्चतुर्भिर्नलैस्तुलां साम्यं भजत इति भाग एषु शेषः पञ्चसु मध्ये अन्त्यः पञ्चमो नैषधः मम चेतः कस्य हेतोः केन कारणेन सुधाभिरमृतैः स्नपयति आप्लुतमिव करोति। रूपसाम्ये सत्यप्येष एव मम मनसे यतो रोचते तस्मादयमेव सत्यनलो भविष्यतीत्याशयः। सत्यनलत्वज्ञापकं निरुपाधिकपरमप्रेमसम्वाद्दृष्टान्तेनान्यथा कथयति। प्रथमेति। वाऽथवा युक्तमेतत् प्रथमचरमयोरादिमान्त्ययोः शब्दयोर्वर्णैरक्षरैः सख्ये मैत्र्यां सत्यामपि चरमे यास्त्वान्त्ये शब्दे अनुप्रासभासांच्छेकानुप्रासवृत्त्यनुप्रासलाटानुप्रासाख्यशब्दालङ्कारकान्तीनां विलास उल्लासश्चमत्कारो विशेषेण शोभते। वर्णसाम्ये सत्यपि प्रथमस्यानायासगतत्वाद् द्वितीयस्य तु सदृशस्य पश्चाद्भूरिप्रयत्नसाध्यत्वाच्चरमे यद्यप्यनुप्रासत्वं स्फुरति तथापि द्वितीयसाहित्ये प्रथमेऽपि यथानुप्रासत्वमस्ति तथा सुन्दरान्तरविच्छेदेन पश्चा-

प्रथमचरमयोर्वा शब्दयोर्वर्णसख्ये
विलसति चरमेऽनुप्रासभासां विलासः ॥ ५४ ॥
इति मनसि विकल्पानुद्यतः सन्त्यजन्ती
क्वचिदपि दमयन्ती निर्णयं नाससाद ।
मुखमथ परितापास्कन्दितानन्दमस्या-
मिह रविरचितावस्कन्दमिन्दुं निनिन्द ॥ ५५ ॥

दवलोक्यमानतयैव पञ्चमस्तेतस्मै रोचते तेन त्वत्र सत्यत्वं प्रयोजकं अतः सर्व्वेऽपि तुल्या एवेति भावः। अत्रायमेव श्लोको दृष्टान्तः। अत्र तयोरेव प्रथमचरमशब्दयोर्वर्णसाम्ये सत्यपि चरमे चरम-शब्द एवानुप्रासातिशयो न प्रथमशब्दे । प्रथम इत्युक्ते नानु-प्रासः। प्रथमचरमयोरित्युक्ते तु चरम एवानुप्रासातिशयो दृश्यते । न तथा प्रथम इत्यर्थ इति वा । यद्वा आद्यपादचतु-र्थपादयोर्वर्णसाम्ये सत्यपि चरमे चतुर्थपादेऽनुप्रासभासां विला-सो विलसति। उभयोरनुप्रासत्वे सत्यपि चतुर्थेऽनुप्रासभासां विलास इत्युक्तेस्तत्रैवानुप्रासत्वं न तु प्रथमे। स्नपयतीति। मित्त्व-पक्षे ह्रस्वः। कस्य हेतोः। षष्ठी हेतुप्रयोगे इति (पा० २।३।२६) षष्ठी ॥ ५४ ॥

इतीति। इति उक्तप्रकारेण मनसि उद्यतः उत्पद्यमानान् विकल्पान् अनेकशङ्कावलंबनबोधान् दोषोद्भावनेन संत्यजन्ती क्वचिदपि पक्षे निर्णयं निश्चयं नाससाद । पञ्चसु मध्ये कस्मिन्नपि पुंसि नलनिश्चयं न प्रापेति वा। अथ पश्चान्नलनिश्चयाभावात्

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं।
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यं॥
स्वादूत्पादभृति त्रयोदशतयाऽऽदेश्यस्तदीये महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः॥५६॥

परितापेनास्कन्दितो ऽभिभूत आनन्दो यस्य। परितापेन कृत्वा ऽस्कन्दितोऽप्राप्त आनन्दो येनैवम्भूतं वाऽस्या मुखं कर्तृ मिहिरेण सूर्य्येण रचितः अवस्कन्दः पराभवो यस्यैवंविधं इन्दुं निनिन्द निष्प्रभदिनचन्द्रसदृशमभूदित्यर्थः। आस्कन्दनमास्कन्दः पराभवः परितापेन य आस्कन्दः स सञ्जातो यस्यैवंविधो आनन्दो यस्येति। तदस्येति (पा० ५।२।३६) तारकादित्वादितचा सिद्धिः॥५५॥

श्रीहर्षमिति। अर्द्धं पूर्व्ववत्॥ स्वादूत्पादभृति सहृदयहृदयाह्लाददायित्वात् स्वादरसोत्पत्तिधारके ऽत्यन्तमधुरनवार्थसहिते त्रयोदशतया आदेश्योऽभिधेयः सर्गो स्वभावेनोज्ज्वलः व्यरमत् समाप्त इत्यर्थः। व्यरमत्। व्याङ्परिभ्यो रमः (पा० १। ३।८३) इति परस्मैपदम्॥५६॥ इति श्रीवेदरकरोपनामकश्रीमन्नरसिंहपण्डितात्मजनारायणकृते नैषधीयप्रकाशे त्रयोदशः सर्गः॥१३॥

चतुर्दशः सर्गः।

ॐ गणेशाय नमः।

अथाधिगन्तुं निषधेश्वरं सा
प्रसादनामाद्रियतामराणाम्।
यतः सुराणां सुरभिर्नृणान्तु
सा वेधसाऽसृज्यत कामधेनुः॥ १॥

अथाधिगन्तुं निषधेशमेषा
प्रसादनं दानवशात्रवाणाम्।
अचेष्टतासौ महतीष्टसिद्धि-
राराधनादेव हि देवतानाम्॥ २॥

अथेति। अथ विकल्पदूषणानन्तरं सा भैमी निषधेश्वरं नलमधिगन्तुं निश्चेतुं प्राप्तुञ्च षोडशोपचारैरमराणां प्रसादनां परितोषणमाद्रियतादरेण चकार। यतः वेधसा सुराणां कामधेनुरभिलाषप्रसूः सुरभिर्गौरसृज्यत सृष्टा। नृणां तु पुनः कामप्रसूः सा देवप्रसादना सृष्टा। तस्मान्नलनिश्चयार्थं प्राप्त्यर्थञ्च देवपरितोषणं चकारेति युक्तमित्यर्थः॥ १॥

अथेति क्षेपकः। अचेष्टत अकुरुत। शत्रव एव शात्रवाः प्रज्ञादित्वात् स्वार्थेऽण्॥ २॥

प्रदक्षिणप्रक्रमणालवाल-
विलेपधूपाचरणाम्बुसेकैः।
इष्टञ्च मिष्टञ्च फलं सुवाना
देवा हि कल्पद्रुमकाननं नः॥ ३॥
श्रद्धामयीभूय सुपर्वणस्तान्
ननाम नामग्रहणाग्रकं सा।

पूर्व्वोक्तार्थसमर्थनार्थमर्थान्तरन्यासमाह। प्रदक्षिणेति। हि यस्माद् देवाः नोऽस्माकं मनुष्याणां कल्पद्रुमकाननं बहवः कल्पवृक्षा एवेति कवेरुक्तिः। किंभूता देवाः। प्रदक्षिणरूपं प्रक्रमणञ्च वलयाकारं परिभ्रमणं तदेवालवालं वृक्षमूले जल-धारणार्थं वलयाकारः सेतुः स च विलेपश्चन्दनादिलेपश्च धूपो दशाङ्गादिः तेषामाचरणानि करणानि तान्येवाम्बुसेकाः प्रद-क्षिणाद्याचरणञ्च उदकस्नपनानि च तैर्वा कृत्वा इष्टमभिलषि-तञ्च मिष्टञ्च स्वभावसुन्दरं सुस्वादु च फलं मनोरथरूपकामना-दिकञ्च सुवाना उत्पादयन्तः। वृक्षा अपि आलवालवृक्षा-यूर्वेदोक्तनरुदोषनाशकनिविडिङ्गादिलेपदोहदधूपाम्बुसेकैरिष्टं मिष्टञ्च फलं सुवते। आवरणमिति पाठे अङ्गप्रत्यङ्गदेवतापूजा कण्टकादिवृतिश्चेति व्याख्येयं॥ ३॥

पूजाप्रारम्भार्थं प्रथमं नमस्कारमाह। श्रद्धेति॥ सा श्रद्धा-मयीभूय आस्तिक्यप्रचुरा भूत्वा तान्स्ववेशधारिणः सुपर्वणो देवान् नामग्रहणाग्रकं इन्द्राय नम इत्यादिनामग्रहणपूर्व्वकं

सुरेषु हि श्रद्दधतां नमस्या
सर्व्वार्थसिद्ध्यङ्गमिथःसमस्या ॥ ४ ॥
यत्तान् निजे सा हृदि भावनाया
बलेन साक्षादकृताखिलस्थान्।
अभूदभीष्टप्रतिभूस्तदस्या
वरं हि दृष्टा ददते परन्ते ॥ ५ ॥

ननाम ववन्दे। हि यस्मात् सुरेषु श्रद्धावतां नमस्या नमस्कार एव सर्व्वार्थसिद्धेर्यान्यङ्गानि तेषां मिथःसमस्या परस्परपूरण-हेतुः। श्रद्धापूर्व्वं देवनमस्कार एव कारणसामग्रीसम्पादकः। तस्माद्देवं नमस्कृतवतीत्यर्थः। समस्या यथा पदानां परिपूरणं करोति तथा नमस्या वाञ्छापूरणं करोतीति भावः। श्रद्धा-मयी। प्रकृतवचने मयट्। अग्रकं। शेषाद्विभाषेति कः (पा० ५।४।१५४।) नमस्करणं नमस्या। नमो वरिव इति क्यच् (पा० ३।१।१९।) ॥ ४ ॥

देवपूजाङ्गं ध्यानं प्रथममाह। यदिति ॥ साऽखिलस्थान् सर्व्वगतांस्तानिन्द्रादीन् भावनया ध्यानस्य बलेन सामर्थ्येन निजे हृदि यत्साक्षादकृत प्रत्यक्षीचकार। सर्व्वगतानपि ध्यानबलेनै-कत्रानीय ददर्शेत्यर्थः। स साक्षात्कार एव तस्या भैम्या अभी-ष्टस्य नलप्राप्तिलक्षणस्य प्रतिभूः दाननिश्चयकर्त्ताऽभूत्। हि यस्माद्दृष्टास्ते देवाः परं श्रेष्ठं वरमभीष्टं परिणेतारञ्च ददते प्रयच्छन्ति। न हि देवदर्शनं निष्फलं भवतीत्यर्थः ॥ ५ ॥

हृत्पद्मसद्मन्यधिवास्य बुद्ध्या
दध्यावथैतान्नियमैकताना ।
सुपर्वणां हि स्फुटभावना या
सा पूर्व्वरूपं फलभावनायाः ॥ ६ ॥
सभाजनं तत्र ससर्ज तेषां
सभाजने पश्यति विस्मिते सा ।

पूजानन्तरं पुनरपि ध्यानमाह । हृदिति । अथ पूजानन्तरं नियमैकतानाऽनन्यवृत्तिस्तत्परा सती हृदेव पद्मं तद्रूपे सद्मनि गृहे एतानिन्द्रादीन् बुद्ध्याऽधिवास्याधिष्ठाप्य दध्यौ सर्व्वगतानामपि देवानां हृदये बुद्ध्या समारोपितं रूपं ध्यानेन साक्षादकृतेति यावत् । हि यस्मात् सुपर्वणां देवानां या स्फुटा भावना ध्यानबलेन प्रत्यक्षता सा फलभावनायाः कार्य्यसिद्धेः पूर्व्वरूपं प्रथमं स्वरूपं । कारणस्य कार्य्यापेक्षया नियतप्राग्भावित्वाद्देवानां प्रत्यक्षतायाः कार्य्यमात्रं प्रति कारणत्वात् कारणसामग्रीरूपां देवप्रत्यक्षतां ध्यानेनाकृतेत्यर्थः । पूजायाः पूर्व्वमनन्तरञ्च ध्यानस्य दृष्टत्वात् अत्रानित्यस्यास्य च श्लोकस्य न पौनरुक्त्यं । उपान्वध्याङ्वसः इत्यत्र (पा० १।४।४८) अण्यन्तस्य वसेर्ग्रहणात् स्वहस्तदत्ते मुनिमासने इति च ण्यन्तस्य वसेः प्रकृत्यन्तरत्वात् हृत्पद्मनीत्याधारस्य न कर्म्मत्वं ॥ ६ ॥

इदानीं देवपूजामाह । सभाजनमिति । सा तत्र स्वयम्बरस्थाने अकस्मादेव देवपूजारम्भाद् अत्यादरेण च पूजनाद्विस्मिते

आमुद्यते यत्सुमनोभिरेवं
फलस्य सिद्धौ सुमनोभिरेव ॥ ७ ॥
वैशद्यहृद्यैर्म्रदिमाभिरामै-
रामोदिभिस्तानथ जातिजातैः।

साश्चर्य्ये सभाजने सभालोके पश्यति सति तमनादृत्य वा तेषां देवानां सभाजनं प्रीत्याऽऽराधनं ससर्ज चक्रे। यद्यस्मात् फलस्याभीष्टस्य सिद्धौ दाने सुमनोभिः शोभनचित्तैरेवम्भूतैरेव सद्भिः सुमनोभिर्देवैः एवमत्यादरपूजनेन कृत्वा आमुद्यते हृष्टैर्भूयते तस्मादेवमपूजयदित्यर्थः। एवमेवैवंमत्येवेत्येवकारयोजना वा। पुष्पैरपि फलसिद्ध्यर्थमामुद्यते विकस्वरीभूयते। सभाजने। यस्य च भावेनेति (पा० २।३।३७।) षष्ठी चानादर इति (पा० २।३।३८) वा सप्तमी ॥ ७ ॥

वैशद्येति। अथ सा नवीनैर्नवैः स्तवैः स्तुतिश्लोकरूपैः प्रसूनस्तवकैः पुष्पगुच्छैः स्तुतिश्लोकैः पुष्पगुच्छैश्च वा तानिन्द्रादीन् आनर्च। किं विधैः। वैशद्येन स्पष्टतया प्रसादगुणेन हृद्यैः सहृदयहृदयप्रियैः। अथ च शुभ्रत्वेन मनोज्ञैः। तथा म्रदिम्ना निष्ठुरटवर्गादिवर्णरहितश्रुतिमधुरवर्णरचनाजनितेन माधुर्य्येण। अथ च सौकुमार्य्येणाभिरामैरत एवामोदिभिर्हर्षजनकैः। अथ च सौगन्ध्यसहितैः। तथा जातैः षड्विंशत्यक्षरजनितचरणाद्यनुष्टुबादिजातैर्निष्पन्नैः। अथ च मालतीसम्भवैः। तथा आर्य्याविशेषरूपया गीत्या अन्विता युक्ताः षट् पदाः षट्चरणाः श्लोका

आनर्च गीत्यन्वितषट्पदैः सा
स्तवप्रसूनस्तवकैर्नवीनैः ॥ ८ ॥
भक्त्या तयैव प्रससाद तस्या-
स्तुष्टं स्वयं देवचतुष्टयं तत्।
स्वेनानलस्य स्फुटतां यियासोः
फूत्कृत्यपेक्षा कियती खलु स्यात् ॥ ९ ॥

यच। अथ च गुञ्जन्मधुकरैः। वैशद्यं शब्दार्थालङ्कारापशब्दभावदोषराहित्यं तेन मनोज्ञैर्वा। जातिः छन्दसि सामान्ये मातृत्याङ्गोत्रजन्मनोः। गीतिश्छन्दसि गाने चेति विश्वः। हृद्येति। हृदयस्य प्रिय (पा० ४।४।९५।) इति यत् हृदयस्य हृल्लेखेति (पा० ६।३।५०।) हृदादेशः अभिरम्यते यैस्तैरभिरामैः। अकर्त्तरि च कारक (पा० ३।३।१९।) इति चकारादसञ्ज्ञायामपि करणे घञ्। ज्यात्यादिलक्षणं छन्दोग्रन्थे ज्ञातव्यं। न वा कैरिति पाठे कैर्वा स्तवप्रसूनस्तवकैर्नानर्च अपि तु नानाप्रकारैः स्तवप्रसूनस्तवकैस्तानपूपुजदित्यर्थः ॥ ८ ॥

भक्त्येति। तस्याः पातिव्रत्यादिगुणैरादावेव भक्तिनिरपेक्षं स्वयमात्मनैव तुष्टं तदिन्द्रादिदेवचतुष्टयं तस्यास्तयैवाल्पोचस्यापि भक्त्या पुनः प्रससाद प्रसन्नमभूत्। अल्पीयस्यापि भक्त्या प्रसन्नतायां दृष्टान्तमाह। खलु यस्मात् स्वेनात्मनैव स्फुटतां प्राकट्यं यियासोर्यातुमिच्छतः लब्धबहुसन्धुक्षणतया आसन्नप्रज्वलनस्यानलस्य वह्नेः कियती सन्धुक्षणार्थं फूत्कृतेर्मुखपवनस्या-

प्रसादमासाद्य सुरैः कृतं सा
सस्मार सारस्वतसूक्तिसृष्टेः।
देवा हि नान्यद्वितरन्ति किन्तु
प्रसद्य ते साधुधियं ददन्ते॥ १०॥

पेचा स्यात् भवेत् अपि त्वल्येव। तादृशोऽग्निर्द्वित्रैरेव फूत्कारैः सन्धुचितो दीप्यतेतरामित्यर्थः। तस्मात् स्वतः प्रसन्नस्याल्पयापि भक्त्या पुनः प्रसन्नत्वं युक्तमित्यर्थः। तस्याश्चरित्रादय ते पवित्रात् प्रागेव हृष्टा झटिति प्रसेदुरित्यपि पाठः स्पष्टार्थः॥ ९॥

प्रसादफलमाह। प्रसादमिति। सा भैमी सुरैः कृतं प्रसादमासाद्य सरस्वत्या इमाः सारस्वत्यस्तास्च ताः सूक्तयश्च शोभनोक्तयः श्लेषवाक्यानि तासां सृष्टेर्निर्म्माणस्य रचनां इत्यर्थः सस्मार। श्लेषार्थे सन्देहं परित्यज्य गाथाक्रमेणेन्द्रादींश्चतुरोऽपि ज्ञात्वा पञ्चमो नल इत्यजानादित्यर्थः। देवीवचनस्मरणरूपः को नाम प्रसाद इत्यत आह॥ हि यस्मात् देवा अन्यत्किञ्चिन्न वितरन्ति ददति किन्तु ते देवाः प्रसन्ना भूत्वा साध्वीं कार्य्यसाधिकां धियं बुद्धिमेव ददन्ते। तदुक्तं महाभारते॥

"न देवा दण्डमादाय रचन्ति पशुपालवत्।
यन्तु रचितुमिच्छन्ति सुबुद्ध्या योजयन्ति तमिति।"

तस्मादयमेव प्रसादो युक्त इत्यर्थः। सृष्टेः। अधीगर्थेति (पा० २।३।५२।)कर्म्मणि षष्ठी। ददन्ते। दद दाने इत्यस्य रूपं॥ १०॥

शेषं नलं प्रत्यमरेण गाथा
या या समार्था खलु येन येन।

स्मरणमेव विशदयति। शेषमिति॥ शेषं पञ्चमं सत्यनलं प्रति लचीकृत्य ब्रूमः। किमित्यादिराकर्ण्येति यावत्। एष इत्यादिः साधारणीमिति यावत्। दण्डमित्यादिर्गुम्फमिति यावत्। या सर्व्वत इत्यादिः शङ्केति यावत्। या या गाथा प्रमादात् पूर्व्वं येन येनेन्द्रादिदेवेन सह समार्था तुल्यार्था सरस्वत्योक्तेति शेषः। सा भैमी तां तां ब्रूम इत्यादिगाथां ततः प्रमादानन्तरं तदन्येन तस्मात्तस्मादिन्द्रादिरूपान्मुख्यादर्थादन्येन शेषशब्दा प्रतिभासमानेन नलरूपेणार्थेन सह खलु निश्चितमलगन्तीमसम्बद्धार्थां विशेषं प्रति स्वस्वाकारधारणात् भिन्नमिन्द्रादिदेवं प्रतिसन्दधे योजयामास। इयमेतस्य गाथेयमेतस्य गाथेति सम्बन्धं चकारेत्यर्थः। ब्रूम इत्यादौ बालां विलोक्येति यावत्। नलस्य सर्व्वत्रानुस्यूतत्वादिन्द्रादीनान्तु चतसृषु चतसृष्वेव स्वस्वगाथासु अनुस्यूतत्वात्तां तामिन्द्रादिगाथां तदन्येन वज्रादिना सहालगन्तीं विशेषमजानात्। येन्द्रेण नलेन चासमानार्था तामिन्द्रविषयामेव सस्मार॥ एवमितरदेवचितयेऽपि प्रत्येकगाथामेकविषयामेव सस्मार। एवं चतसृष्वपि गाथासु नलस्यानुवृत्तेरिन्द्रादीनाञ्च व्यावृत्तेरावापोद्वापाभ्यामेते देवा अयमेव नल इत्यज्ञासीदित्याशय इति वा। प्रतिश्लोकं गाथात्वेऽपि चतुर्भिश्चतुर्भिःश्लोकैरेकैकस्य प्रतिपादनादेक-

तां तां तदन्येन सहालगन्तीं
ततो विशेषं प्रतिसन्दधे सा ॥ ११ ॥
एकैकवृत्तेः प्रतिलोकपालं
पतिव्रतात्वं जगृहुर्दिशो याः ।

गाथात्वसमारोपात्प्रत्येकपर्य्यवसानादेकवचनं । यद्वा पञ्चमं नलं प्रति या या, अत्याजि, येनामुना, यच्चण्डिमा, किन्ते तथेत्यादिका, गाथा येन येनेन्द्रादिना सह सम्बद्धार्था तदन्येन वज्र्यादिना सहालगन्ती तां तां गाथामेव विशेषं भेदं जानाति स्म । एकैकस्या गाथाया एकैकदेवपर्य्यवसानाच्चतसृणामपि गाथानां नले पर्य्यवसानात्परिशेषप्रमाणादयं पञ्चम एव नल इति विशेषमज्ञासीदित्यर्थः । अस्मिन् पक्षेऽमुमेवार्थमुक्तिविशेषेण प्रकटयितुमाह । एकैकेति । उत्तरश्लोकस्यावतारिका कर्त्तव्या ॥११॥

एकैकेति । या गाथा एकैकवृत्तेः एकस्मिन्नेकस्मिन्निन्द्रेऽग्नौ यमे वरुणे च वर्त्तमानत्वात् प्रतिलोकपालमेकैकमिन्द्रादिदिक्पालं प्रति दिशामैन्द्यादीनां पतिव्रतात्वं जगृहुरङ्गीचक्रुः । प्राच्यादीनामिन्द्रादिप्रतिनियतदेववृत्तितया यत् पातिव्रत्यं तत्पातिव्रत्यं तेनैवाकारेण या अत्याजीत्यादि गाथा अङ्गीचक्रुरित्यर्थः । ता गाथा मिलितास्ततस्तोऽपि तदा प्रमादादनन्तरं अमावेकस्य केवलस्य नलस्य वश्या नलैकप्रवणा नलैकाभिधायिनीरेव वेद स्माऽज्ञासीत् । का इव आशा इव । मिलिता दिशो यथा नलस्य वश्याः ऐन्द्र्यादीनां दिशामिन्द्राद्येकैकप्रवण-

वेद स्म गाथा मिलितास्तदासा-
वाशा इवैकस्य नलस्य वश्याः॥ १२॥
या पाशिनैवाशनिपाणिनैव
गाथा यमेनैव सहाग्निनैव।

त्वऽपि सर्व्वासां दिशां चक्रवर्त्तिनलैकवश्यत्वं यथा तथा गाथानामपीत्यर्थः। आशा अर्थिनां मनोरथाः वदान्यतया नलस्य यथा वश्या इति वा। दासा इति वा पाठः। भ्रान्तिदशायामुभयार्थत्वं प्रसादानन्तरं तु नलैकार्थत्वं वेद स्मेति भावः। दिशां पातिव्रत्यं गाथाभिर्गृहीतमित्यर्थः॥ १२॥

येति। किं न इत्यादिर्या गाथा पाशिनैव वरुणेनैव समा तुल्यार्था न त्वन्येनेन्द्रादिना। या चाऽत्याजीत्यादिरशनिपाणिनेन्द्रेणैव समा न त्वन्येन देवेन। या च यच्चण्डिमेत्यादिर्यमेनैव समा न त्वन्येन। या च येनामुनेत्यादिरग्निनैव तुल्या न त्वन्येन। नलस्य सम्बन्धिनीं मिलितां समुदितां चतुष्टयरूपां तां गाथामेव तदा देवप्रसादादनन्तरं सैषा भैमी नलस्य विशेषाय इन्द्रादिभ्यो भेदज्ञानाय मेने। इन्द्रादीनामेकैकस्यामेव गाथायां वर्त्तमानत्वात्। नलस्य तु सर्व्वत्रानुगतत्वादत्याजीत्यादिगाथाचतुष्टयप्रतिपाद्यो यः स एव नल इति तामेव गाथां मिलितां नलस्य भेदज्ञापिकामज्ञासीदिति भावः। या नलस्य गाथेति वा सम्बन्धः। या पाशिनेवन्द्रेणैव यमेनैवाग्निनैव समा गाथा नलस्य सम्बन्धिनीं मिलितां तामेव अनलस्य नलव्यतिरिक्तस्ये-

तामेव मेने मिलितां नलस्य
सैषा विशेषाय तदाऽनलस्य ॥ १३ ॥
निश्चित्य शेषं तमसौ नरेशं
प्रमोदमेदस्वितरान्तराऽभूत्।

न्द्रादेर्भेदाय मेने। मिलितया तया कृत्वा नले निश्चिते सति नान्तरीयकत्वात्तदितरे देवा अपि तयैव निश्चिता इति भाव इति वा। मिलितां तामेव गाथां नलस्य विशेषाय तथा नलेतरस्येन्द्रादेर्भेदाय मेने इति वा व्याख्येयं। या पाशिनैवेत्यादेरेवकारात् परस्परसमुच्चयार्थानप्यर्थानङ्गीकृत्य या नलसम्बन्धिनी गाथा पाशिनापीन्द्रेणापि यमेनाप्यग्निनापि तुल्यार्थाऽभूत्तां देवः पतिरित्यादिमिलितां पञ्चार्थां गाथां देवप्रसादादनन्तरं नलस्यैव विशेषाय मेने। प्रसन्नैर्देवैः स्वीयस्वीयाकारेषु हृतेषु पूर्वं पञ्चार्थत्वेन प्रतिभातामपीदानीमेकस्य नलस्यैव प्रतिपादिकामज्ञासीदिति भावः। देवः पतिरितीयमेव गाथा विषय इति ज्ञेयं। अवधारणार्थेष्वप्येवकारेषु इयमेव गाथा विषय इति व्याख्येयं। अयं श्लोकः निश्चित्य शेषं, एकैकवृत्तेरिति द्वाभ्यां श्लोकाभ्यां समानार्थः। अनलस्येति। प्रत्येकपर्य्यवसायित्वादेकवचनं ॥ १३ ॥

निश्चित्येति। असौ भैमी शेषमवशिष्टं तं पञ्चमं पूर्वोक्तप्रकारेण नरेशं नलं निश्चित्य प्रमोदेन प्रकृष्टहर्षेण मेदस्वितरं अत्यन्तपरिपुष्टं सोल्लासमन्तरं मानसं यस्याः एवंविधाऽभूत्।

देव्या गिरां भावितभङ्गिराख्य-
च्चित्तेन चिन्तार्णवयादसेदम् ॥ १४ ॥

सा भङ्गिरस्याः खलु वाचि काऽपि
यद्भारती मूर्त्तिमतीयमेव ।
श्लिष्टं निगद्यादृतवासवादीन्
विशिष्य मे नैषधमप्यवादीत् ॥ १५ ॥

नले निश्चिते सति नितरां हृष्टाऽभूदित्यर्थः। रलयोः सावर्ण्यात् नरस्यासावीशस्य तं इति वा। अनन्तरञ्च देव्याः सरस्वत्या गिरां वचनानां भाविता पर्य्यालोचिता भङ्गिः प्रकारो यया विज्ञानाशया गिरां देव्याः सरस्वत्या वा विज्ञातवचोरचना-विशेषा सती नलनिश्चयात् पूर्व्वं चिन्तार्णवयादसा चिन्तासमुद्र-जलजन्तुरूपेण, नलनिश्चये सत्यपि तत्प्राप्त्युपायचिन्तासमुद्र-जलचरेण वा चित्तेन मनसा इदं वक्ष्यमाणप्रकारं आख्यत् ऊचे। मनस्येवैवमचिन्तयदिति भावः। चित्रार्णवेति पाठे वि-चित्रदेवीवचनानुस्मरणजनिताश्चर्य्यसमुद्रजलचरेणेति साश्चर्य्ये-णेत्यर्थः ॥ १४ ॥

किमाख्यदित्याह। सेति। खलु निश्चितं सा प्रसिद्धा मूर्त्ति-मती भारती सरस्वती देवी, इयमेवेयं मूर्त्तिमती सा भारत्ये-वेति भारतीत्वं विधेयं। यद्यस्मादस्या वाचि काऽपि लोकोत्तरा भङ्गिः रचनाऽस्ति तस्मादित्यर्थः। यस्मादियमेव मूर्त्तिमती भारती तस्मादस्या वचने निश्चितं सा कापि भङ्गिरस्तीति वा।

जग्रन्थ सेयं मदनुग्रहेण
वचःस्रजः स्पष्टयितुं चतस्रः ।

तामेव भङ्गीमाह। यत् श्लिष्टमुभयसम्बद्धं वचो निगद्य स्पष्टमुक्त्वा वासवादीनादृतगौरवेणावर्णयत्। विशिष्य विशेषं कृत्वा तेभ्यो विशिष्य वा यदत्याजीत्यादिश्लोकचतुष्टयेन मे मम मह्यं वा नैषधमप्यवादीत्। सर्व्वलोकपालांशस्य नलस्यैव वर्णनं कृतमिति युक्तमिति भावः ॥ १५ ॥

जग्रन्थेति। सेयं वाणी मयि मम वाऽनुग्रहेण कृपया स्पष्टयितुं नलं स्पष्टं ज्ञापयितुं यास्ततस्तोऽत्याजीत्यादीर्वचःस्रजो वचनमाला जग्रन्थ ससर्ज। तासु मध्ये द्वे ते वचःस्रजौ नामग्राहं मया नलमुदीरितं क्षमुश्मिन्नले सहजरागभरादित्येवंरूपे महीमहेन्द्रे नलमुदीरितमित्येवंरूपे वा नलं लक्षयितुं ज्ञापयितुं क्षमेते समर्थे भवतः। अहो आश्चर्य्यं। ममैवायमेतावन्तं कालं महीयान्मोहः अबोधः। नले स्पष्टं कथितेऽपि एतावन्तं कालं मम निश्चयो नाभूदित्याश्चर्य्यमित्यर्थः। पूर्व्वोक्ता एव चतस्रो वचःस्रजः स्पष्टयितुं तदर्थं स्पष्टीकर्त्तुं ये द्वे ते वचःस्रजौ, त्वं यार्थिनी, देवः पतिरित्येवंरूपे सेयं देवी जग्रन्थ, ते द्वे वचःस्रजौ नलं लक्षयितुं क्षमे समर्थे। त्वं यार्थिनीत्यनेन प्रथमव्याख्याने स्फुटं नलस्यैव प्रतिपादनात् व्याख्यानान्तरेऽपि च देवान् परितोष्य सम्यज्य वा नल एव स्वीकरणीय इति यावदर्थं नलस्यैव प्रतिपादनाद्देवः पतिरित्यनेनापि लोकपालांशत्वादे-

द्वे ते नलं लक्षयितुं क्षमेते
ममैव मोहोऽयमहो महीयान् ॥ १६ ॥
श्लिष्यन्ति वाचो यदमूरमुष्याः
कवित्वशक्तेः खलु ते विलासाः ।

कस्यापि नलस्यैव पञ्चरूपत्वसम्भवादिन्द्रादेश्चासम्भवान्नलादन्यस्तव कतरो वरोऽपि त्वन्यो नास्तीत्यपि नलस्यैव प्रतिपादनादित्यर्थ इति वा । अत्र पूर्व्वस्तच्छब्दो विशेष्य वचःस्रक्परामर्शार्थः । उत्तरस्तु तत्परामर्शकोऽपि विधेयसंस्पर्शी । यत्तदोश्च नित्यसम्बन्धात् यच्छब्दः सम्बध्यते । श्रन्थि ग्रन्थि दम्भि स्वञ्जीनामिति वक्तव्यमिति (पा० १।२।६। वा० १) नित्यमपितो लिटः कित्त्वविधानाञ्जग्रन्थेति रूपं । संयोगात्परस्य लिटो वा कित्त्वमिति केचिदिति अपितो लिटः कित्त्वविधानाद्वा नलोपाभावः समर्थनीयः । युक्त्यन्तरेण वा समाधातव्यं ॥ १६ ॥

श्लिष्यन्तीति । अमुष्या देव्या अमूः पूर्व्वोक्ता वाचः यदनेकार्थतया श्लिष्यन्ति श्लेषं भजन्ते खलु निश्चितं कवित्वशक्तेः काव्यनिर्म्माणसहजप्रतिभाया विलासाः विजृम्भणानि । कवित्वशक्तिं विना श्लेषवचोरचना निर्म्मातुमशक्येत्यर्थः । किल यस्माद् व्यतिभेदिनोऽपि परस्परापेक्षया नलापेक्षया वा विशेषेण सहस्रनेत्रत्वादिना अतितरां भिन्ना अप्यमी लोकपालाः भूपालस्य नलस्य लीला विलासान्समाविशन्ति अनुभवन्ति नलाकारं बिभ्रति । अथ च नलवर्णकेषु श्लोकेषु मूर्त्तीभूय प्रविष्टा इव

भूपालनीलाः किल लोकपालाः
समाविशन्ति व्यतिभेदिनोऽपि ॥ १७ ॥
त्यागं महेन्द्रादिचतुष्टयस्य
किमभ्यनन्दत् क्रमसूचितस्य।
किं प्रेरयामास नले च तन्मां
का सूक्तिरस्या मम कः प्रमोहः ॥ १८ ॥

दृश्यन्त इत्यर्थः। अतः श्लेषवशान्मम भ्रमोऽभूदिति भावः। श्लेषवशान्नललीलाः सन्तो लोकपाला गाथाः समाविशन्तीति वा। अन्योन्यं भिन्ना अपि लोकपाला नललीलाः सन्तोऽंशेन नृपत्वं प्राप्ताः सन्तः किलैकीभवन्ति। अतो नलस्यैव लोकपालांशतया तत्र युक्तानि देवीवचांसि श्लेषं वदन्तीति कवित्वशक्तिविलासा एव ॥ १७ ॥

त्यागमिति। इयं देवी अत्याजि येनेत्यादिश्लोकचतुष्टयेन त्वं यार्थिनी, देवः पतिरित्यादिना गाथाद्वयेनापि क्रमेण सूचितस्य प्रत्यायितस्येन्द्रादिनलचतुष्टयस्य पूर्व्वव्याख्यानप्रकारेण परित्यागं किं कथमभ्यनन्दत् युक्तमेतदिति स्तौति स्मेत्यर्थः। नले मां पूर्व्वव्याख्यानप्रकारेण प्रेरयामास च। किं कथं प्रेरयामास एकेनैव वाक्येन द्वयमिति कथंचकाराश्चर्य्यमेतदित्यर्थः। किं शब्दावत्राश्चर्य्ये। नले च नल एवेति। चकारोऽवधारणार्थो वा। तत्तस्मात्कारणादस्या देव्याः का सूक्तिः शोभनवचननिर्म्माणचातुरी अपि तु लोकोत्तरा। मम प्रकृष्टो मोहश्च कः

परस्य दारान् खलु मन्यमानै-
रस्पृश्यमानाममरैर्धरित्रीम्।
भक्त्येव भर्त्तुश्चरणौ दधानां
नलस्य तत्कालमपश्यदेषा ॥ १९ ॥

अपि तु सोऽपि लोकोत्तरः। अस्या इयमुक्तिः क मम मोहस्य केत्यर्थः। एवं देव्या इन्द्रादिचतुष्टयस्य स्पष्टं परित्यागेऽभ्यनुज्ञाते नलस्य च वरणेऽभ्यनुज्ञाते ममैवं मोहो न युक्त इत्यर्थः। पूर्वं मोहोऽभूदिदानीं तु निवृत्त इत्याशयः। इन्द्रादित्यागं किमर्थमभ्यनन्दत् नले च मां किमर्थं प्रेरयामास उभयमपि तात्पर्यं चकार। तदेतन्मदनुग्रहार्थमेवेति भाव इति वा। त्यागं। त्यजेः कुषिपणतोः ७। ३। ५२। इति कुत्वं ॥ १८ ॥

एवं विचारानन्तरं किमभूत्तत्राह। परस्येति॥ एषा भैमी तत्कालं देवप्रसादसमये एवम्भूतां धरित्रीं पृथ्वीं अपश्यत्। किम्भूतां। परस्य नलस्य दारान् मन्यमानैरिव परनारीबुद्ध्येवामरैरिन्द्रादिभिरस्पृश्यमानां। खलु इवार्थे। तथा भूपतित्वाद्भर्त्तुर्नलस्य भक्त्येव सेवाबुद्ध्येव चरणौ दधानां धारयन्तीं। अन्यापि भक्त्या भर्त्तुश्चरणौ धारयति। देवत्वात् सहजो भूम्यस्पर्शो मनुष्यत्वात् सहजो भूमिस्पर्शोऽन्यथोत्प्रेक्षितः। देवमनुष्यचिह्ने दर्शिते। दारानिवेति वा पाठः ॥ १९ ॥

सुरेषु नापश्यदवैक्षताक्ष्णो-
र्निमेषमुर्वीभृति सम्मुखी सा।
इह त्वमागत्य नले मिलेति
सञ्ज्ञानदानादिव भाषमाणम्॥ २०॥

नाबुद्ध बाला विबुधेषु तेषु
चोदं क्षितेरैक्षत नैषधे तु।
पत्ये सृजन्त्याः परिरम्भमुर्व्याः
सम्भूतसम्भेदमसंशयं सा॥ २१॥

सुरेष्विति। सा भैमी सम्मुखी सती बुद्धिपूर्वं विलोकयन्ती सुरेषु अक्ष्णोर्निमेषं नेत्रपक्ष्मसङ्कोचं नापश्यत् नावैक्षत। उर्वीभृति नले तु अवैक्षत। देवानामनिमेषत्वान्मनुष्याणाञ्च सनिमेषत्वादित्यर्थः। तत्रोत्प्रेक्षते। किम्भूतं निमेषं। सञ्ज्ञानदानात् अकारणसूचकाक्षिपक्ष्मचेष्टाकरणात् इति भाषमाणमिव। इति किं। हे भैमि त्वमागत्य इह मया चिह्निते नले मिल संयुक्ता भवेति॥ २०॥

नेति। सा तेषु विबुधेषु देवेषु क्षितेः चोदं भूरेणुं लग्नं नाबुद्ध न ददर्श। नैषधे तु ऐक्षत ददर्श। देवानां रजःसम्बन्धाभावात्। नराणां तत्सम्बन्धादित्यर्थः। तत्र असंशयमुत्प्रेक्षते। पत्ये नलाय परिरम्भमालिङ्गनं सृजन्त्या ददत्या उर्व्याः सकाशात्सम्भूतसम्भेदमिव सञ्जातसम्बन्धमिव आलिङ्गनवशाद्भूरेणुर्लग्न इवेत्यर्थः। पत्ये। क्रियया यमभिप्रैति स सम्प्रदा-

स्वेदः स्वदेहस्य वियोगतापं
निर्व्वापयिष्यन्निव संसिसृक्षोः ।
हीराङ्कुरश्चारुणि हेमनीव
नले तयालोकि न दैवतेषु ॥ २२ ॥
सुरेषु मालाममलामपश्यन्-
नले तु बाला मलिनीभवन्तीम् ।

नमिति (पा० १ । ४ । ३२ । वा० १) सम्प्रदानत्वं ॥ २१ ॥

स्वेद इति । तया नले स्वेद आलोकि न दैवतेषु देवेषु । किं करिष्यन्निव । संसिसृक्षोर्भैम्यालिङ्गनं कर्त्तुमिच्छोः स्वदेहस्य नलशरीरस्य वियोगतापं भैमीवियोगजनितं ज्वरं निर्व्वापयिष्यन्निव शमयिष्यन्निव। देवेषु स्वेदस्याभावान्नरेषु च तत्सद्भावादित्यर्थः । उदकं हि तापं शमयति । नलाखिङ्गनोत्सुकस्य भैमीदेहस्य वा सात्विकस्वेदयुक्तो नलो मया प्राप्त एवेति भैम्या विरहज्वरशान्तिः । उत्प्रेक्ष्यते। चारुणि अत्युत्तमे हेमनि सुवर्णे खचितो हीराङ्कुर इव। अतिगौरदेहरोमकूपस्थस्वेदजलकणझलत्कारो हेमस्थवज्राङ्कुरत्वेनोत्प्रेक्षितः। देवता एव दैवतानि। प्रज्ञादित्वात्स्वार्थे (पा०५।४।३८) अण्। क्वचित् स्वार्थिकाः प्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्त इति (पा०५।३।६८) परिभाषया षण्ढत्वं ॥ २२ ॥

सुरेष्विति। बाला भैमी सुरेषु मालां अमलां निर्म्मलामम्लानां चापश्यत् नले तु मलिनीभवन्तीं पूर्व्वमम्लानां काल-

इमां किमासाद्य नलोऽद्य मद्दों
श्रद्धास्यते मामिति चिन्तयेव ॥ २३ ॥
श्रियं भजन्तां कियदस्य देवा-
श्छाया नलस्यास्ति तथापि नैषाम् ।

क्षेपणोष्मणा च म्लानां मलिनाञ्च जायमानां अपश्यत् । सुराणाममम्लानकुसुमत्वादित्यर्थः । उत्प्रेक्षते । इति चिन्तयेव मलिनीभवन्तीं । इति किं । नलोऽद्य स्वयम्वरदिने मद्दों मत्सकाशाद्यतिमद्दङ्गीं इमां भैमीं आसाद्य प्राप्य मां मालां श्रद्धास्यते किं आदरेणाङ्गीकरिष्यति किं अपि तु नेति ॥ २३ ॥

श्रियमिति । देवा अस्य नलस्य श्रियं शोभां कियद्भजन्तां आश्रयन्तु अपि तु न किञ्चिदपि यस्मात् एषां देवानां नलस्य सम्बन्धिनी तथा तादृशी अतिप्रसिद्धा छायापि कान्तिलेशोऽपि नास्ति । येषां यदीयकान्तिलेशोऽपि नास्ति ते तदीयां शोभां कथमाश्रयन्तामपि तु न कथञ्चिदित्यर्थः ॥ अथ च एषां नलसम्बन्धिनी आदर्शादिस्थिता छाया प्रतिबिम्बमपि नास्ति । प्रतिबिम्बतुल्यास्ते न भवन्तीति यावत् । येषां यदीयप्रतिबिम्बेनापि न साम्यं ते तदीयबिम्बश्रियं कथं भजन्तामित्यर्थः ॥ अथ चास्य श्रियं किञ्चिद्भजन्तां नटवन्नलरूपधारणात् किञ्चिच्छ्रीमन्तां । तथापि स्वाभाविकी नलस्य कान्तिरेषां नास्ति ॥ अथ चास्य सम्पदं बहु भजन्तां तथापि नलस्य कान्तिरेषां नास्ति । सम्पदा तुल्यत्वेऽपि कान्त्या तुल्यत्वं नास्तीत्यर्थः ॥

इतीरयन्तीव तया निरैक्षि
सा नैषधे न त्रिदशेषु तेषु ॥ २४ ॥
चिह्नैरमीभिर्नलसंविदस्याः
संवादमाप प्रथमोपजाता।
सा लक्षणव्यक्तिभिरेव देव-
प्रसादमासादितमप्यबोधि ॥ २५ ॥

अथ चास्य श्रियं कियदङ्ग भजन्तां तथापि भूमौ तमःप्रकृतिः छाया देहव्यवहितरविप्रभोपलक्षितः श्यामाकारो नलस्यास्ति एषां तेजोरूपत्वेन नास्ति। तेजोराहित्येन च नराणां विद्यत इत्यर्थः। तया भैम्या इति पूर्व्वोक्तप्रकारेणेरयन्तीव कथयन्तीव यत्राहं वर्त्ते स एव नल इति प्रकाशयन्तीव सा छाया नैषधे निरैक्षि दृष्टा तेषु त्रिदशेषु न। छायापि स्वाभावभावाभ्यां देवत्वनरत्वव्यञ्जिका जातेत्यर्थः। कियदिति क्रियाविशेषणं ॥ २४ ॥

चिह्नैरिति। अस्या भैम्याः प्रथमोपजाता दूत्यकालोत्पन्ना इतरनलतुलाभागिति पूर्व्वसर्गोक्ततर्कोत्पन्ना वा देवीश्लोकानुसन्धानोत्पन्ना वा अयमन्य एव नल इति संवित् बुद्धिरमीभिः पूर्व्वोक्तैर्भूस्पर्शादिभिश्चिह्नैः संवादं स एवायं नल इति अनुव्यवसायरूपं आप। पूर्व्वं मम नलोऽयमिति प्रत्ययो युक्त एव जात इति। एतैश्चिह्नैर्निश्चितवतीत्यर्थः। अनन्तरञ्च सा भैमी देवत्वनरत्वज्ञापकानां लक्षणानां निमेषत्वभूस्पर्शादिचिह्नानां व्यक्तिभिः प्रकटनैरेवासादितं प्राप्तं देवप्रसादमप्यबोधि। एता-

नले निधातुं वरणस्रजन्तां
स्मरः स्म रामां त्वरयत्यथैनाम् ।
अपत्रपा तां निषिषेध तेन
द्वयानुरोधं तुलितं दधौ सा ॥ २६ ॥
स्रजा समालिङ्गयितुं प्रियं सा
रसादधत्तैव बहुप्रयत्नम् ।

यत्पर्य्यन्तं भूस्पर्शादिचिह्नानि न दृष्टानि इदानीन्तु दृश्यन्ते तस्मान्मम पूजया देवाः प्रसन्ना इत्यप्यजानादित्यर्थः ॥ २५ ॥

नले इति । अथ स्मरः तां वरणस्रजं वरणमधूकमालां नल निधातुं निक्षेप्तुं एनां रामां भैमीं त्वरयति स्म शीघ्रं प्रेरयामास । अपत्रपा अन्यतो लज्जा च तां भैमीं निषिषेध निवारयामास । सर्व्वस्मिन् जने पश्यति सति कथमहमेनं वृणे इति लज्जावशात्तस्या बुद्धिरुदभूदित्यर्थः । तेन कारणेन सा भैमी द्वयानुरोधं स्मरलज्जयोराज्ञा प्रवृत्तिनिवृत्तिसन्देहं तुलितं समानमेव दधौ । भावसन्धिवशादुत्कण्ठापत्रपाभ्यां मालानिक्षेपानिक्षेपदोलायिताभूदित्यर्थः । अन्योऽपि तुल्याभ्यां द्वाभ्यां विरुद्धकार्य्यद्वयार्थं प्रेषितो द्वयोरनुरोधादौदासीन्यमेवावलम्बते । तामिति पुनरुपादानं वाक्यान्तरत्वात् समर्थनीयं । निषिषेध । स्थादिष्वभ्यासेनेति (पा० ८ । ३ । ६) षत्वं ॥ २६ ॥

स्रजेति । सा भैमी रसात् प्रीत्या स्रजा मधूकमालया प्रियं नलं समालिङ्गयितुं बहुप्रयत्नं भूयांसमुद्योगं अधत्तैव चका-

स्तम्भत्रपाभ्याममभवत्तदीये
स्यन्दस्तु मन्दोऽपि न पाणिपद्मे ॥ २७ ॥
तस्या हृदि व्रीडमनोभवाभ्यां
दोलाविलासं समवाप्यमाने ।
स्थितं धृतैणाङ्ककुलातपत्रे
शृङ्गारमालिङ्गदधीश्वरश्रीः ॥ २८ ॥

रैव । तु पुनस्तदीये पाणिपद्मे स्तम्भत्रपाभ्यां हेतुभ्यां मन्दोऽप्यन्योऽपि स्यन्दस्खलनं नाभवत् ॥ २७ ॥

तस्या इति । अधीश्वरी समर्था भूयसी अधीश्वरस्य कस्यचिद्राज्ञो वा श्रीर्लक्ष्मीस्तस्या भैम्या हृदि स्थितं वर्त्तमानं शृङ्गारं शृङ्गाररसं आलिङ्गत् । किम्भूते हृदि । व्रीडमनोभवाभ्यां दोलाविलासं आन्दोलजनितां क्रीडां समवाप्यमाने प्राप्यमाणे । कोटिद्वयसम्बन्धात् प्रवृत्तिनिवृत्तिसन्देहं प्राप्ते इत्यर्थः । तथा एणाङ्कश्चन्द्रस्तस्य कुलं कुलोत्पन्नो नल इत्यर्थः । स एवातपत्रं धृतं एणांककुलातपत्रं येन तस्मिन् । शृङ्गाररस एव सम्राट् भैमीहृदयमेव सिंहासनं नल एव छत्रं लज्जाकामौ दोलाया उभयपार्श्वत आन्दोलनार्थं स्थितौ चामरधारिणौ वा । तस्या भावसन्धिसम्बलितः शृङ्गारो राजवदुज्जृम्भत इति भावः । दोला दोलनेव भोगस्तयः प्रियमालिङ्गन्ति ॥ अधीश्वरस्य नलस्य श्रीरिति वा । अत्र पद्ये ह्रीकामाभ्यां दोलायमानां भैमीं दृष्ट्वा म्लानो नलः पूर्वं विप्रलम्भशृङ्गारं प्राप्तः ततः सापि

कर: स्रजा सज्जतरस्तदीयः
प्रियोन्मुखः सन् विरराम भूयः।
प्रियाननस्यार्द्धपथं ययौ च
प्रत्याययौ चातिचलः कटाक्षः॥ २९॥

तस्याः प्रियं चित्तमुपेतुमेव
प्रभूबभूवाक्षि न तु प्रयातुम्।
सत्यः कृतः स्पष्टमभूत्तदानीं
तयाक्षिलज्जेति जनप्रवादः॥ ३०॥

तं तादृशं दृष्ट्वा तदीयशोभाङ्गीकारात् स्वयमपि तादृशी बभूवेति भावः। आन्दोलिकाछत्रचामरैरयं प्रभुरिति ज्ञायत इत्यर्थः। श्रितमिति पाठे त्वदीति विषयसप्तमी॥ २८॥

कर इति। स्रजा सज्जतरो नितरां सज्जः कण्ठे निक्षेप्तुं उद्यैः कृतमालस्तदीयः करः प्रियोन्मुखः नलसम्मुखं गन्तुं सो ऽधोगः सन् भूयः पुनर्लज्जावशाद् विरराम निवृत्तः। तदीयोऽतिचलः कटाक्षश्च प्रियाननस्यार्द्धपथं ययौ च प्रत्याययौ च। दिदृक्षारसादर्द्धमार्गं गतोऽपि लज्जावशान्मध्ये मार्गं नलकटाक्षसम्बन्धाच्च पुनः प्रत्यावृत्त इति भावः। अन्योऽप्यतिबलो गतागते करोति॥ २९॥

तस्या इति। तस्याश्चित्तं प्रियं उपेतुमेव प्राप्तुमेव अक्षि तु पुनः नलं प्रयातुं प्राप्तुं न प्रभूबभूव समर्थं नाभूत्। स्पष्टमुत्प्रेक्षे। अक्ष्णि नेत्रे लज्जेति जनप्रवादो लोकाभाणकः तया तदानीं

कथं कथञ्चिन्निषधेश्वरस्य
कृत्वास्यपद्मं दरवीक्षितश्रि ।
वाग्देवताया वदनेन्दुबिम्बं
त्रपावती साऽकृत सामिदृष्टं ॥ ३१ ॥
न जानतीवेदमवोचदेनाम्
आकूतमस्यास्तदवेत्य देवी ।

नलवरणसमये सत्यः कृतोऽभूत् । अन्यथा लज्जायाश्चित्तधर्मत्वे चित्तस्य नलप्राप्तिरयुक्ता नेत्रस्य च नलप्राप्तिर्युक्तेत्यर्थः । प्रीत्या चित्तं नल एव वर्त्तते परं लज्जावशात् कटाक्षेण विलोकयितुं नाशकदिति भावः । प्रभूबभूव । च्वौ चेति (पा० ७ । ४ । २६ ।) दीर्घः ॥ ३० ॥

कथमिति । सा भैमी त्रपावती निषधेश्वरस्यास्यपद्मं मुखकमलं कथं कथञ्चिन्महता कष्टेन लज्जाविगमसाहसेन दरवीक्षितश्रि ईषद्विलोकितशोभं कृत्वा वाग्देवताया वदनेन्दुबिम्बं लज्जया सामिदृष्टमर्द्धदृष्टमकृत । किञ्चिद्दृष्ट्वा पुनर्व्यावृत्तत्वाददृष्टसकलशोभं चकारेत्यर्थः । त्रपावतीत्युभयत्र हेतुः । एतां मालां नलकण्ठे स्थापयेत्याशयेन देवीमुखमर्द्धवीक्षितं चकारेति भावः ॥ ३१ ॥

न जानतीति । देवी अस्या भैम्यास्तत्पूर्व्वश्लोकसूचितं आकूतमाशयं अवेत्य ज्ञात्वापि न जानतीव एनां भैमीं प्रतीदमवोचत् । इदं किं । हे भैमि त्रपोर्मिप्रतिसीरया लज्जाकल्लोलरूपजवनि-

भावस्त्वपोर्मिप्रतिसीरया ते
वितीर्यते लक्षयितुं न मेऽपि ॥ ३२ ॥
देव्याः श्रुतौ नेति नलार्द्धनाम्नि
गृहीत एव त्रपया निपीता ।
अथाङ्गुलीरङ्गुलिभिः स्पृशन्ती
दूरं शिरः सा नमयाञ्चकार ॥ ३३ ॥

कया ते तव भाव आशयः मेऽपि ममापि लक्षयितुं सरस्वत्या अथ च विश्वास्य सखीभूताया अपि ज्ञातुं न वितीर्य्यते । त्वं लज्जावशादतिगूढं यत् सूचयसि तन्मयापि न ज्ञायते । ततः किञ्चिल्लज्जां त्यक्त्वा स्पष्टं कथयेति परिहासबुद्ध्या तामेव स्वाशयं बोधयितुमवोचदित्यर्थः । अन्यदपि जवनिकाच्छादितं न ज्ञायते । प्रदीयते लक्षयितुं न मेऽपीति पाठे मे मह्यं । प्रतिसीरा जवनिकेत्यमरः ॥ ३२ ॥

देव्या इति । देव्याः श्रुतौ कर्णे नेति नलस्यार्द्धे नाम्नि गृहीत एव भैम्या उच्चारित एव त्रपया निपीता व्याप्ता सा भैमी लेति द्वितीयमक्षरं उच्चारयितुमशक्ता सती अथानन्तरं स्वस्या अङ्गुलीः, देव्या वा अङ्गुलीः, स्वीयाङ्गुलीभिरेव स्पृशन्ती मृजन्ती निविडं पीडयन्ती शिरो दूरमत्यर्थं नमयाञ्चकार । अभिलाषप्रतिबन्धे दुःखितस्याङ्गुलिमेलनं स्वभावोक्तिः ॥ ३३ ॥

करे विधृत्येश्वरया गिरां सा
पान्था पथीन्द्रस्य कृता विहस्य ।
वामेति नामैव बभाज सार्थं
पुरन्ध्रिसाधारणसंविभागम् ॥ ३४ ॥

विहस्य हस्तेन विकृष्य देवी
नेतुं प्रयाताऽभि महेन्द्रमेताम् ।
भ्रमादियं दत्तमिवाच्छिदेहे
ततश्चमत्कृत्य करं चकर्ष ॥ ३५ ॥

कर इति । गिरामीश्वरया वाग्देव्या विहस्य अज्ञानमाट्-नाट्यहास्यं कृत्वा सा करे विधृत्य इन्द्रस्य पथि पान्था पथिका कृता । इन्द्रं प्रति वरणार्थं नीता सा भैमी पुरन्ध्रीणामन्यस्त्रीणां साधारणः समानः संविभागः अंशो यस्य पुरन्ध्रिषु वा एवम्भूतं सर्व्वस्त्रीवाचकं वामेति नाम वक्रार्थत्वात् सार्थं नामैव बभाज भेजे । इन्द्रं प्रति देव्या नीयमाना सा वक्राभूदिति भावः । सार्थमेव नाम इति वा । पान्थेति पूर्ववत् । पाथेति पाठे, पथं गताविति धातोर्ज्वलादित्वाण्णे, पथि गन्त्री कृतेत्यर्थः । पुरन्ध्रीति पूर्ववत् ॥ ३४ ॥

तमेवार्थमुक्तिविशेषेण पुनराह । विहस्येति । वाग्यानन्तरं देवी विहस्य किञ्चिद्धसित्वा एतां भैमीं स्वहस्तेन विकृष्य महेन्द्रमभिलक्षीकृत्य नेतुं प्रयाता प्रस्थिता इन्द्रं प्रापयितुं निर्गता । तत इन्द्रादिगमनाद्यागानन्तरं इयं भैमी चमत्कृत्य किमियमिन्द्रवरणे मां प्रवर्त्तयतीति बुद्ध्या भीत्वा करं स्वहस्तं चकर्ष ।

भैमीं निरीक्ष्याभिमुखीं मघोनः
स्वाराज्यलक्ष्मीरधृताभ्यसूयाम्।
दृष्ट्वा ततस्तत्परिहारिणीं तां
व्रीडा बिडौजःप्रवणाभ्यपादि ॥ ३६ ॥
त्वत्तः श्रुतं नेति नले मयातः
परं वदस्वेत्युदिताथ देव्या।

आचकर्ष किंभूतमिव करं। भ्रमाद्रज्जुभ्रान्तेः अहिदेहे सर्पशरीरे दत्तमिव स्थापितमिवेत्युत्प्रेक्षा। सर्पदेहे भ्रमाद्दत्तं हस्तं यथा कश्चित् कर्षति तथेत्युपमा वा। ततो देवीकरादिति वा ॥ ३५ ॥

भैमीमिति। स्वाराज्यलक्ष्मीः बिडौजःप्रवणा इन्द्रेऽत्यन्तमनुरक्ता स्वर्गाधिपत्यश्रीः भैमीं मघोन इन्द्रस्याभिमुखीं निरीक्ष्य सपत्नीबुद्ध्या भैम्यामभ्यसूयामसहनत्वं अधृत दधार। ततः अनन्तरं तां भैमीं तत्परिहारिणीं इन्द्रत्यागिनीं दृष्ट्वा इन्द्रेऽनुरक्ता सती व्रीडां लज्जामभ्यपादि प्राप। इयमिन्द्रं नाभिलषति वृथैव मयेर्ष्या कृतेति ललज्जेत्यर्थः। इयं भैमी स्त्रीरत्नभूता सती निर्गुणतयैनं परिहरति तस्याहं प्रिया जातेति लज्जितेत्यर्थः। अभ्यपादि। कर्त्तरि चिण् ॥ ३६ ॥

त्वत्त इति। अथ देव्या इति उदिता परिहासवशादुक्ता भैमी इत्था इत्थैव भाषितनैषधाऽभूत्। इति किं। हे भैमि मया त्वत्तः नलविषये नेति श्रुतं निषेधार्थो नकारः श्रुतः। अतः कारणात्परं नलादन्यमभीष्टं वदस्व कथय। अथ च नलविषये

ह्रीमन्मथद्वैरथरङ्गभूमि-
र्भैमी द्विधा भाषितनैषधाऽभूत् ॥ ३७ ॥

हसत्सु भैमीं दिविषत्सु पाणौ
पाणिं प्रणीयाप्सरसां रसात् सा ।
आलिङ्ग्य नीत्वाऽक्षत पान्थदुर्गां
भूपालदिकपालकुलाध्वमध्यम् ॥ ३८ ॥

नल इति पदे नेति नलनाम्नोऽर्द्धे श्रुते सति नकारात् परमल-कारमक्षरं कथयति । किम्भूता । ह्रीमन्मथयोर्लज्जाकामयोर्द्वैरथस्य द्वाभ्यां प्रवृत्तस्य युद्धस्य रङ्गभूमिर्नृत्यस्थानं समबलह्री-कामवशीकृता । अस्मिन्नलं मालां मया संपर्यति कृत्येव नलं निर्दिष्टवती न त्वन्यं । न च मात्राऽकारमुच्चारयति सत्यर्थः । उदिताऽथ पश्चादिति वा । वदस्व । भाषणेऽतिभाषणे सान्त्वन उत्साहे वा तङ् । द्वैरथं । द्विरथसम्बन्धि इति सम्बन्धेऽण् ॥ ३७॥

हसत्स्विति । सा देवी भैमी आलिङ्ग्यांकपालिकया धृत्वा भूपालस्य नलस्य दिक्पालकुलस्य च इन्द्रादिचतुष्टयस्य पुरः-सरोऽध्वा मार्गस्तन्मध्यं नीत्वा प्रापय्य पान्थदुर्गां पथिकैरिन्द्रा-दिपूजितशिलामयकल्पितमार्गदेवतां अक्षत चकार इन्द्रादिप-ञ्चकमार्गमध्ये नीत्वा सुमार्चेत्यर्थः । लज्जाभरनिश्चलत्वादति-सौन्दर्याच्च देवतात्वं । केषु सत्सु । रसादुभयाशयपरिज्ञानाद्भै-म्याश्च देव्याशयापरिज्ञानात् प्रीतेर्वा अप्सरसां उर्वशीप्रभृतीनां पाणौ पाणिं प्रणीय निक्षिप्य तालिकादानपूर्व्वं दिविषत्सु इन्द्रा-

आदेशितामप्यवलोक्य मन्दं
मन्दं नलस्यैव दिशां चलन्तीम्।
भूयः सुरानर्द्धपथादथासौ
तानेव तां नेतुमना नुनोद ॥ ३९ ॥

मुखाब्जमावर्त्तितलोलनाल
कृत्वालिङ्कंङ्करवलद्मलच्म्यम्।

दिषु इसत्सु सत्सु। उत्सवादौ मञ्चके दुर्गामारोप्य राजवीथिषु भ्राम्यते तथैनामपि चलदुर्गां चकारेत्यर्थ इति वा। दिविषत्सु। सत्सूद्विषद्रुहेत्यादिना (पा० ३।२।६१) क्विप्। हृद्युभ्यां चेति (पा० ६।३।९। वा० १) सप्तम्या अलुक्। हलदन्तादिति (पा० ६।३।९।) सुषामादित्वात् (पा० ८।३।९८) इति वा षत्वं। पान्थानां दुर्गा। पान्था चासौ दुर्गा चेति वा ॥ ३८ ॥

आदेशितामिति। अथ असौ देवी भूयः पुनरपि अर्द्धपथात् सकाशान्नलं विहाय तानेव सुरानिन्द्रादीन्नेतुमनाः प्रापयितुकामा सती तां भैमीं नुनोद इतस्त्वलेति प्रेरयति स्मेत्यर्थः। किं कृत्वा। इन्द्रादिसम्मुखमागच्छेत्यादेशितामादिष्टामपि तथा मन्दं मन्दं नलस्यैव दिशां नलसम्मुखमेव चलन्तीं गच्छन्तीं विलोक्य। आदेशः सञ्जातोऽस्याः। अदेशितामिति पाठे नलं प्रति गच्छेत्यप्रेरितामपीत्यर्थः ॥ ३९ ॥

मुखेति। भीमोद्भवा देव्यास्तामङ्कपालीं मुमोदामुचत्। केव। विवोढुः परिणेतुः दृढां प्रथमसुरतारम्भनिर्भरां अङ्क-

भैमीङ्गवा तां नुनुदेऽङ्कपालीं
देव्या नवोढेव दृढां विवोढुः ॥ ४० ॥
देवी कथञ्चित् खलु नामदेव-
द्रीचीभवन्तीं स्मितसिक्तसृक्का ।

पालीं नवोढा नववधूरिव । अङ्कपालीमोचनमात्रेण सास्यं वि
वर्त्तितं न तु लिङ्गं । किं कृत्वा । परिहासवशान्नलसम्मुखगमन
निषेधिकानां आलीनां सखीनां निवारणव्यञ्जकं हुंहु इति
रवः शब्दस्तद्रूपैर्लक्ष्यैश्चिह्नैर्लक्ष्यं ज्ञेयं । तेषां वा लक्ष्यं विषयभूतं,
यद्वार्थान्नलवरणनिषेधिकास्वालिषु कोपवशाद्धुंकारा एव हुंहु
ङ्कारास्तद्रूपैश्चिह्नैर्लक्ष्यं, अथवाऽलीनां भ्रमराणामिव ये हुंहुं
रवचिह्नैर्लक्ष्यं निपतद्भ्रमभ्रमरं आवर्त्तनं परावर्त्तनं लोल
चञ्चलं कण्ठदण्ड एव नालं यस्य एवं मुखाब्जं कृत्वा । नवो-
ढापि आलिङ्गनादि कुर्व्वित्युपदिशन्तीनां सखीनां तासु वा
हुंहुंरवचिह्नलक्ष्यं मुखाब्जमावर्त्तयति । अब्जमपि लोलनाल
भ्रमरहुंहुंरवलक्ष्यञ्च भवति । रवलक्ष्मेति पाठे लक्ष्मसञ्ज्ञा
इत्यर्थः ॥ ४० ॥

देवीति । देवी तां भैमीमित्याह स्म । किम्भूतां । कथञ्चिन्म-
हताङ्कपालीमोचनादिप्रकारेण कष्टेन खलु निश्चितं यद्देवद्री-
चीभवन्तीं न देवानञ्चति देवान् प्रत्यगच्छन्त्येवंविधा भवन्ती तां ।
किम्भूता । स्मितेन ईषद्धासेन सिक्तसृक्का सिक्तौष्ठप्रान्ता स्वा-
भिप्रायापरिज्ञानात् किञ्चित्कृतहासा । इति किं । हे सखा-

आह स्म मां प्रत्यपि ते स्पृशं का
शङ्का शशाङ्कादधिकास्यबिम्बे ॥ ४१ ॥
एषामकृत्वा चरणप्रणाम-
मेषामनुज्ञामनवाप्य सम्यक् ।

ङ्कात् अधिकं सुन्दरमाह्लादकं आस्यबिम्बं यस्या एवम्भूते, भैमी-सखीप्रायां मामपि प्रति, इयं प्रतार्य्य इन्द्रादिवरणार्थं मां नयतीति। तेन च का पुनः शङ्का अपि त्वेवं शङ्का न कार्य्या मा भैषीरिति। देवानञ्चति देवद्रीची। विष्वग्देवयोरिति (पा० ६।३।९३।) टेरद्र्यादेशे, उगित्वात् (पा० ४।१।६।) ङीपि, अच (पा० ६।४।१३८।) इत्यकारलोपे, चाविति (पा० ६।३।१३८।) पूर्व्वस्याणो दीर्घः। पश्चान्नञ्समासः। अदेवद्रीचीभवन्तीमिति पाठः सभ्यः। अदेवद्रीचीं देवद्रीचीं भवन्तीं ततो नञ्समासः, च्विप्रत्ययः। शशाङ्कात्। यस्मादधिकमिति (पा० २।३।९।) ज्ञापकत्वात् पञ्चमी ॥ ४१ ॥

चेन्न प्रतारयसि तर्हि पुनः इन्द्रादिसम्मुखं मां किमिति नयसीत्याशङ्कायामाह ॥ एषामिति ॥ एषामिन्द्रादीनां चरणयोः प्रणाममकृत्वा तथा एषां सम्यग्यथा भवति तथाऽनुज्ञां नलवरणानुमतिं अप्राप्य निजचिह्नप्रकटनमात्रानुमितप्रसादेन लब्धप्रायामपि साक्षाच्छिरःकम्पादिसूचितामनुज्ञामलब्ध्वा सुपर्व्ववैरे स्वावज्ञानादिन्द्रादिभिः सह विरोधे सति येऽयं तव वैरसेनिं नलं वरीतुं इच्छा चेष्टाऽभिलाषो वा सा कथमिवौचिती

सुपर्ववैरे नव वैरसेनिं
वरीतुमीष्टा कथमौचितीयम् ॥ ४२ ॥

इतीरिते विश्वसितां पुनस्ता-
मादाय पाणौ द्विविधत्सु देवी ।
कृत्वा प्रणम्रां वदति स्म सा तान् *
भक्तेयमर्हत्यधुनानुकम्पाम् ॥ ४३ ॥

युष्मान् वृणीते न बहून् सतीयं
शापावमानाच्च भवत्सु नैकम् ।

अपि तु न कथञ्चित् । स्वावज्ञानादिरुष्टाः सन्तः शापन्दास्यन्तीति तान् प्रति सोयम न तु वरणार्थमिति भावः । इयमौचितीति वा । कतमौचितीत्यपि पाठः ॥ ४२ ॥

इतीति । सा देवी इति पूर्व्वोक्तमीरिते सति विश्वसितां तां भैमीं पाणौ पुनरादाय धृत्वा द्विविधत्सु देवेषु विषये नमस्कारवशात्प्रकर्षेण नम्रां कृत्वा तान् देवानिति वदति स्म । इति किं । भवद्भक्ता इयं भैमी अधुना तत्स्ववरणानुमतिरूपामनुकम्पामर्हति इति ॥ ४३ ॥

एतद्वरणार्थमागतानामस्माकं तत्स्ववरणानुमतिर्दीयतामिति कथमुच्यत इत्याशङ्कां परिहरति ॥ युष्मानिति ॥ हे लोकपालाः इयं भैमी यस्मात्सती पतिव्रता एकभर्तृकैव तस्मा-

* आह स्म नम्रां प्रविधाय सा तान् इति स० पुस्तके पाठः ।

तद्वः समेतं नृपमंशमेतं
वरीतुमन्विष्यति लोकपालाः ॥ ४४ ॥
भैम्याः स्रजः सञ्जनया पथि प्राक्
स्वयम्वरं सञ्जनयांबभूव ।

इद्धन् युष्मान् न वृणीते पतित्वेन नाङ्गीकरोति। भवतु मध्ये शेषावमानाच्च एकं न वृणीते। तत्तस्मात् सर्व्वैकवरणपक्षयो-र्दोषदर्शनाद्धेतोरेकत्र नलस्वरूपे समेतान् मिलितानंशानंश-भूतान्वो युष्मानेवैनं नृपं, अष्टानां लोकपालानां वपुर्धारयते नृप इति वचनात् युष्मद्रूपमेवैनं नलं नृपं वरीतुं अन्विष्यति विचारयति। नले वृते पूर्व्वोक्तोभयदोषाभावात् नलमेव वरीतुं वाञ्छतीत्यर्थः। वो युष्माकं समेतानंशानेनं नृपमिति वा ॥ ४४ ॥

परदारत्वादपीयं भवद्भिर्नाभिलषणीयेत्याह॥ भैम्या इति। हे लोकपालाः, वेधाः मातृसेवनानन्तरं स्वमन्दिरागमनवे-लायां पथि स्रजो मालायाः सञ्जनया सङ्गेन षष्ठे सर्गे प्रसू-प्रसादाधिगतेत्यादिकथितप्रकारेण भ्रान्तिदृष्टनलेषु मध्येऽस्य दूत्यगतस्य सत्यनलस्य कण्ठे निक्षेपणया कृत्वा भैम्याः स्वयम्वरं प्राक् पूर्व्वमेव सञ्जनयाम्बभूवाकृत। तथा तत्रैव सर्गे तथ्यं मि-थस्तावित्याद्युक्तप्रकारेणास्य नलस्यालिङ्गनयालिङ्गनेन भैम्याः सम्भोगं वाह्यरतमपि व्यधत्त। अस्य सम्भोगमिति वा। अस्य स्वयम्वरस्य सम्भोगं फलं आलिङ्गनेन चकारेति वा। तस्मात् कं

सम्भोगमालिङ्गनयास्य वेधाः
शेषन्तु कं हन्तुमियद्यतध्वम् ॥ ४५ ॥
वर्णाश्रमाचारपथात् प्रजाभिः
स्वाभिः सहैवास्खलते नताय ।
प्रमेदुषो वेदृशवृत्तभङ्ग्या
दिष्ट्यैव कीर्त्तिर्भुवमानयद्वः ॥ ४६ ॥

पुनः शेषं अवशिष्टमंशं हन्तुं विनाशयितुं इयत् सन्नाहकारधा-
रणादिप्रकारेण यतध्वं प्रयत्नं कुरुत, अपि तु न कोऽप्यवशि-
ष्टोऽशः। तस्माद्वृथा प्रयासो न कार्यः किन्त्वाश्वेव दातव्येत्यर्थः।
वाह्यरतस्यैवाभ्यर्हितत्वात् तत्राप्यालिङ्गनस्याभ्यर्हिततरत्वात्तस्य
च संवृत्तत्वात् कं पुनः शेषं सम्भोगं हन्तुं इयद्यतध्वं इति वा।
किमिति पाठे शेषा तु लोकस्थितिरिति कामशास्त्रोक्तन्यायेन
शेषं लोकस्थितिरूपं सम्भोगं पुनर्हन्तुं इयत् किं यतध्वं इति
व्याख्येयं। सज्जनालिङ्गनेत्यत्राप्युक्तत्वाच्च ॥ ४५ ॥

इदानीं युक्त्यन्तरेण देवान् सान्त्वयति ॥ वर्णेति ॥ वा पूर्वा-
परितोषे। पूर्वमसम्भावितमेवाऽत्र मया। किन्तु नताय कीर्त्तिर्दि-
ष्ट्यैव वो युष्मान् भुवमानयत् भैमीस्वयम्वरदर्शनव्याजेन नताय
कीर्त्तिं दातुमेवात्रागमनं युष्माकं न तु भैमीवरणार्थमित्यर्थः।
किंभूताय। यतः स्वाभिः प्रजाभिः सह वर्णानां ब्राह्मणादीनां
आश्रमाणां ब्रह्मचर्य्यादीनां सत्पुरुषाचारपथात् सकाशाद-
स्खलते अच्युताय। किम्भूतान् वः। ईदृग्वृत्तभङ्ग्या प्रमेदुषः

इति श्रुते ऽस्या वचसैव हास्यात्
कृत्वा सलास्याधरमास्यबिम्बम् ।
भ्रूविभ्रमाकूतकृताभ्यनुज्ञे-
ष्वेतेषु तां साथ नलाय निन्ये ॥ ४७ ॥

मन्दाक्षनिस्पन्दतनोर्मनोभू-
दुःप्रेरमप्यानयति स्म तस्याः ।
मधूकमालामधुरं करं सा
कण्ठोपकण्ठं वसुधासुधांशोः ॥ ४८ ॥

स्वाचाराचरणादेव निष्कपटदूत्यकरणाद्वा प्रसन्नान् । भैम्या इन्द्रादीन् विहाय सौन्दर्य्यादिना गुणेन नल एव वृत इति कीर्त्तिः ॥ ४६ ॥

इतीति । इति पूर्व्वोक्ते देवीवचने श्रुते सति अस्या देव्या वचसैव जाताद्धास्यात् स्मिताद्धेतो आस्यबिम्बं मुखचन्द्रं सलास्याधरं चञ्चलोष्ठं कृत्वा एतेषु देवेषु भ्रूविभ्रमरूपेणाकूतेनाशयज्ञापकेनेङ्गितेन कृता कृताभ्यनुज्ञा नलवरणानुमतिर्यैस्तेषु सत्सु । अथानन्तरं सा देवी तां नलाय नलं प्रापयितुं नलार्थं वा निन्ये पुनर्नलसम्मुखीचकारेत्यर्थः ॥ ४७ ॥

मन्दाक्षेति । सा देवी मधूकमालया मधुरं सुन्दरं तस्याः करं वसुधासुधांशोर्भूचन्द्रस्य नलस्य कण्ठोपकण्ठं कण्ठसमीपं आनयति स्म प्रापयति स्म । किम्भूतायाः । मन्दाक्षेण लज्जया निस्पन्दा निश्चला तनुर्यस्याः सस्तम्भाया इत्यर्थः । किम्भूतं करं ।

अथाभिलिख्येव समर्प्यमाणां
राजिं निजस्वीकरणाक्षराणाम्।
दूर्वाङ्कुराढ्यां नलकण्ठनाले
वधूर्मधूकस्रजमुत्ससर्ज॥ ४९॥

तां दूर्वया श्यामलयातिवेलं
शृङ्गारभासन्निभया सशोभाम्।

मनोभुवा नलविषयकामेन दुःप्रेरमपि कामेनापि प्रेरयितुमशक्यं। निष्पन्देति पाठे पूर्ववत्पत्वं। दुःप्रेरमपि प्रेरयति स्मेति विरोधाभासः॥ ४८॥

अथेति। अथ करस्य नलकण्ठसमीपनयनानन्तरं वधूर्भैमी दूर्वाङ्कुराढ्यां मधूकस्रजं नलकण्ठनाले उत्ससर्ज निचिक्षेप वती। उत्प्रेक्षते। अभिलिख्य समर्प्यमाणां दीयमानां निजेनात्मना नलस्य स्वीकरणं तत्सम्बन्धिनामक्षराणां मया त्वं निश्चित वृतोऽसीति एवंरूपाणां वर्णानां राजिमिव। निश्चयज्ञापनार्थं हि पत्रं दीयते तदिवेत्यर्थः। मालासञ्जनानन्तरं वाङ्गीकरणं निश्चयो जातः। दूर्वाङ्कुराणां श्यामलादक्षरसाम्यं मधूकानि लिखिताक्षरसन्धिस्थानीयानि। कण्ठस्य नालत्वामुखस्य कमलत्वं॥ ४९॥

तामिति। भूभृन्नलः तां मालां कण्ठेन बिभरांबभूव। किम्भूतां। श्यामलया अत एव शृङ्गाररसस्य भया कान्त्या सन्निभया तुल्यया दूर्वयाऽतिवेलमतितरां सशोभनदीप्तिं। तथा

मालां प्रसूनायुधपाशभासं
कण्ठेन भूमृद्दिभरांबभूव ॥ ५० ॥
दूर्वाग्रजाग्रत्पुलकावलिं तां
नलाङ्गसङ्गाङ्कुशमुल्लसन्तीम् ।
मानेन मन्ये नमितानना सा
सासूयमालोकत पुष्पमालाम् ॥ ५१ ॥

प्रसूनायुधस्य कामस्य पाशभासं पाशसदृशीं । मालानिक्षेपानन्तरमेव कामपरवशत्वान्मालायाः कामपाशत्वं । श्यामो भवति शृङ्गार इति भरतवचनाच्छृङ्गारस्य श्यामत्वं । भूभृत्पर्व्वतोऽपि । विरांबभूव । भीह्रीति (पा० ३।१।३९) आमि, कृञ्चेति (पा० ३।१।४०) भुवोऽनुप्रयोगः ॥ ५० ॥

दूर्वेति ॥ मानेनेर्ष्याजनितकोपेन नमितानना सा भैमी सासूयं गुणवत्यामपि तस्यां दोषारोपसहितं यथा तथा सेर्ष्यमिति यावत् पुष्पमालामालोकत इत्यहं मन्ये शङ्के। किम्भूतां । दूर्वाग्राण्येव दूर्वाङ्कुरा इव च जाग्रती स्फुरन्ती पुलकावलिर्यस्याः तां । तथा नलाङ्गसङ्गाङ्कुशमुल्लसन्तीं शोभमानां सहर्षाञ्च । लज्जानम्रमुखी सत्येव मालासहितं नलवक्षः कटाक्षैर्विलोकितवती । अन्यापि नायिका एवंविधां सपत्नीं मानेन नम्रमुखी सती सेर्ष्यमालोकते । स्त्रीणामीर्ष्याकृतः कोपो मानोऽन्यासङ्गिनि प्रिये इत्यमरः ॥ ५१ ॥

कापि प्रमोदास्फुटनिर्जिहान-
वर्णैव या मङ्गलगीतिरासाम्।
सैवाननेभ्यः पुरसुन्दरीणा-
मुच्चैरुलूलुध्वनिरुच्चचार ॥ ५२ ॥

सा निर्मले तस्य मधूकमाला
हृदि स्थिता च प्रतिबिम्बिता च।
कियत्यमग्ना कियती च मग्ना
पुष्पेषुबाणालिरिव व्यलोकि ॥ ५३ ॥

कापीति। प्रमोदाद्धर्षवशात्कण्ठस्य सगद्गदत्वादस्फुटा अप्रकटा निर्जिहाना निर्गच्छन्तो वर्णा अक्षराणि यस्या एवंविधैव या पुरसुन्दरीणां विलोकयितुमागतानां आननेभ्यः कापि लोकोत्तरा मङ्गलरूपा धवलादिगीतिरासीत् सैवोच्चैरुलूलुध्वनिरुच्चचार उदलसत्। विवाहाद्युत्सवे स्त्रीणां धवलादिमङ्गलगीतिविशेषा गौडदेशे उलूलुरित्युच्यन्ते। सोऽप्यव्यक्तव्यक्तवर्ण उच्चार्यते। स्वदेशरीतिः कविनोक्ता ॥ ५२ ॥

सेति। तस्य नलस्य निर्मले हृदि स्थिता चान्तःप्रतिबिम्बिता च सा मधूकमाला कियती किञ्चिदमग्ना अब्रुडिता कियती च मग्ना ब्रुडिता, पुष्पेषुः कामस्तस्य बाणालिः शरपङ्क्तिरिव व्यलोकि वीक्षिता लोकैरिति शेषः। मधूकप्रतिबिम्बानां किञ्चिदन्तःप्रविष्टरूपबाणांशसाम्यमुपरिस्थितानां चामग्नबाणांशसाम्यं। मालास्पर्शान्नलोऽपि कामपरवशो जात इत्यर्थः ॥ ५३ ॥

रोमाणि सर्व्वाण्यपि बालभावाद्
वरश्रियं वीक्षितुमुत्सुकानि।
तस्यास्तदा कण्टकिताङ्गयष्टे-
रुद्ग्रीविकादानमिवान्वभूवन्॥ ५४॥
रोमाङ्कुरैर्दन्तुरिताखिलाङ्गी-
रम्याधरा सा सुतरां विरेजे।
शरव्यदण्डैः श्रितमण्डनश्रीः
स्मारी शरोपासनवेदिकेव॥ ५५॥

रोमाणीति। तदा तस्मिन् समये कण्टकिता सञ्जातरोमाञ्चाऽङ्गयष्टिः शरीरं यस्यास्तस्या भैम्या वबयोरभेदात् बालभावात् केशत्वादथ च शिशुत्वाद्वरस्य नलस्य श्रियं शोभां वीक्षितुं उत्सुकानीव सर्व्वाण्यपि रोमाणि उदुच्चैर्ग्रीवा यस्यां क्रियायां सा उद्ग्रीविका क्रिया तस्या आदानमङ्गीकरणं अन्वभूवन्निव। सात्विको रोमाञ्चस्तम्भस्च तस्या जात इत्यर्थः। बालास्च वरश्रियं वीक्षितुं उत्कण्ठिताः खर्व्वत्वादुद्ग्रीवा भवन्ति। कण्टकस्तारकादिः उद्ग्रीविका बहुव्रीहौ कप्॥ ५४॥

रोमेति। रोमाङ्कुरैर्दन्तुरित उन्नतः नतीकृतोऽखिलाङ्गं यस्याः सा रोमाञ्चयुक्ता, तथा रम्याधरा बिम्बोष्ठी सा भैमी स्मारी कामसम्बन्धिनी शरोपासनवेदिकेव बाणाभ्यासशालेव सुतरां विरेजे। किम्भूता वेदिका। शरव्यदण्डैः वेध्यभूतैर्दण्डैः श्रिता मण्डनश्रीः अलङ्कारशोभा यया सा। रोमाङ्कुरा शर-

चेष्टा व्यनेशन्निखिलास्तदास्याः
स्मरेषुवातैरिव ता विधूताः ।
अभ्यर्थ्य नीताः कलिना मुहूर्त्तं
लाभाय तस्या बहु चेष्टितुं वा ॥ ५६ ॥

व्यदण्डस्थानीयाः । भैम्यपि श्रितमण्डनश्रीः । रोमाञ्चितां तां दृष्ट्वा सर्व्वेऽपि कामशरवशा जाता इति भावः । शराभ्यास उपासनमित्यमरः । दन्तुरङ्कृतं दन्तुरितं ॥ ५५ ॥

चेष्टा इति । तदा तस्मिन् कालेऽस्या निखिलास्ताश्चेष्टा व्यनेशन् विनष्टाः । उत्प्रेक्षते । स्मरेषुवातैः कामबाणपुङ्खवायुभिः विधूता इव भ्रमणवशात् भीता इव । वाशब्द उत्प्रेक्षान्तरसमुच्चये, इवार्थे वा । तस्या लाभाय भैम्याः प्राप्तये बहुभिः प्रकारैश्चेष्टितुं अभ्यर्थ्य भैमीमेव याचित्वा मुहूर्त्तं घटिकाद्वयं क्षणमात्रं वा कलिना युगेन नीता इव । भैम्याः कामुकेन कलिना स्वस्याल्पविलासितया भैमीमलभमानेन बहुविलाससम्पत्तये भैमीविलासा एव याचितकमण्डनार्थं नीता इवेति भावः । याचितमपि क्षणमात्रमेव नीयते । सात्त्विकस्तम्भेन कटाक्षादिव्यापाररहिता सा जातेति भावः । व्यनेशन्नित्यत्र पुषादित्वात् च्लेरङि (पा० ३ । १ । ५५ ।) नशिमन्योरलिट्येत्वं वक्तव्यं (पा० ६ । ४ । १२० । वा० २) इत्येत्वं । भाष्यकारस्य कैयटस्य पदमञ्जरीकारस्यापि मते छन्दस्येवैत्वं नशिमन्योर्न भाषायां । अनेशन्नस्येषव आभुरस्येति श्रुत्युदाहरणान्नशेरप्येत्वं

तन्न्यस्तमाल्यस्पृशि यन्नलस्य
स्वेदं करे पञ्चशरश्चकार ।
भविष्यदुद्वाहमहोत्सवस्य
हस्तोदकं तज्जनयाम्बभूव ॥ ५७ ॥
तूलेन तस्यास्तुलना मृदोस्तत्
कम्प्रास्तु सा मन्मथबाणवातैः ।

छन्दस्येवेत्यवसीयते। वृत्तिकृता तु नशिमन्योर्भाषाविषयत्वम-ङ्गीकृत्य अमिपचोः छन्दोविषयत्वमङ्गीकृत्यैवं समर्थितं। नशि-मन्योरलिट्येत्वं छन्दस्यमिपचोरपीत्यादि (पा० ६।४।१२०) (१) कारिका च ॥ ५६ ॥

इदानीं नलस्य सात्त्विकत्वं वर्णयति ॥ तदिति ॥ पञ्चशरः कामः तया भैम्या निक्षिप्तं माल्यं मालां अनुरागवशात् पुनः पुनः स्पृशतीति स्पृक् तस्मिन्नलस्य करे सात्त्विकं स्वेदं घर्म्मजलं चकार। तद्भविष्यतः उद्वाहरूपस्य महोत्सवस्य सम्बन्धि नियतपरस्व-त्वोत्पादने हेतुभूतं हस्तोदकं कन्यादानजलमेव जनयाम्बभूव। नलस्यापि सात्त्विकस्वेदः प्रवृत्त इति भावः। स्वेदजलं न भवति किन्तु हस्तोदकमिति ॥ ५७ ॥

तूलेनेति। मृदोरतिसुकुमार्य्यास्तस्या भैम्यास्तूलेन कार्पा-सेन मृदुतया यस्मात्तुलना साम्यमस्तीति शेषः। तत्तस्मात्सा मन्मथबाणवातैः कामशरपुङ्खवायुभिः कम्प्रा सकम्पा अस्तु भवतु। कार्पासो हि लघुत्वाद्वातेन सकम्पो भवति। सा च

चित्रीयितं तत्तु नलो यदुच्चै-
रभूत् स भूभृत्पृथुवेपथुस्तैः॥ ५८॥
दृशोरपि न्यस्तमिवास्त राज्ञा
रागाद्दृगम्बुप्रतिबिम्बि माल्यम्।

तत्तुल्या। अतस्तस्याः कामबाणवातैः सकम्पत्वं युक्तमेवेत्यर्थः। तत्तु पुनश्चित्रीयितं आश्चर्यं कृतं यदुच्चैर्भूभृन्महाराजो धीरोऽपि स नलस्तैः कामबाणवातैः कृत्वा पृथुर्भूयान् वेपथुः कम्पो यस्यैवंविधोऽभूत्, तत्तैः कामबाणैश्चित्रं कृतमाश्चर्यं कृतमित्यर्थः। तृणस्य तृणतुल्यस्य वा वातैः कम्पो युक्तः। अत्युच्चस्य पर्व्वतस्य तु वातैः कम्पोऽतितरामाश्चर्यकारीत्यर्थः। उभावपि तुल्यानुरागौ सात्विककम्पयुक्तौ जाताविति भावः। चित्रीयितं। नमोवरिवश्चित्रङः क्यजिति (पा० ३।१।१९) क्यजन्तात् क्तः। क्यचि चेति (पा० ७।४।३३) इत्वमकारस्य॥ ५८॥

दृशोरिति॥ दृशोरपि अम्बुनि क्रोधजनितेऽश्रुणि प्रतिबिम्बोऽस्यास्तीति एवंशीलं माल्यं सा मधूकमाला रागान्नलविषयात् क्रोधात् अथच तज्जनितान्नेत्रलौहित्याद्धेतोः सभामध्ये राज्ञां दृशोरपि न्यस्तमिव, येन केनचिद्दत्ताश्चिक्षिप्तमिवास्त अतिष्ठत। नेत्रलौहित्यदर्शनादेवं ज्ञातमभूदिति यावत्। तथा कश्चित् क्रुद्धः सन् कस्यचिन्नेत्रे बलादङ्गुल्यादिशल्यं निक्षिपति तदीयनेत्रस्य च लौहित्यं भवति अश्रु च निर्गच्छति। तथा क्रोधाद्दर्शनमात्रेण तन्माल्यमेव तेषां द्वयोरपि नेत्रयोर्निक्षिप्तं शल्यमिवा-

नृपस्य तत्पीतवतोरिवाक्ष्णोः
प्रालम्ब्यमालम्बत युक्तमन्तः ॥ ५९ ॥

भवत्। अत एव तयोर्लौहित्यमश्रु च जातमित्यर्थः। अर्थादयुक्तमेतत्। न केवलमन्तःकरणे शल्यं निक्षिप्तं किन्तु दृशोरपीत्यपिशब्दार्थः। अथ च रागात् नलप्रीत्या भैम्या माल्यं यथा नलकण्ठे न्यस्तं तथा रागात् क्रोधात् नलस्पर्द्धिनां सम्मुखं पश्यतां राज्ञां नेत्रयोरपि शल्यमिव क्षिप्तमभूत्। यतो दृगम्बुप्रतिबिम्बि। नलमसहमानाः सर्व्वेऽपि राजानो मालादर्शनमात्रेण क्रोधेर्ष्यावशाः सङ्कुचितनेत्राः पराङ्मुखाः सन्तस्तां न पश्यन्ति स्मेति भावः। नृपस्य नलस्य अक्ष्णोरन्तः मध्यः कर्त्तृभूतः प्रालम्ब्यं प्रालम्बं लम्बत्वं हर्षविस्फारितत्वं आलम्बत अङ्गीचकार एतद्युक्तं। हर्षवशाद्धि नेत्रयोर्विस्फारत्वं भवति। प्रालम्बमिति पाठे प्रालम्बनं प्रालम्बः स एवार्थः। उत्प्रेक्षते। किम्भूतयोरक्ष्णोः तत्पीतवतोरिव माल्यं सादरं विलोकमानयोरिव। हर्षजनितं विस्फारत्वं विलोकनजन्यत्वेन उत्प्रेक्षितं। यद्वा नलनेत्रमध्यस्तन्माल्यमेव प्रालम्बमृजुलम्बिनं हारविशेषं अङ्गीचकार। सादरविलोकनान्नेत्रयोरन्तः प्रतिलम्बितायां मालाया ऋजुलम्बित्वं नेत्रयोर्विस्फारत्वमन्तरेण न घटत इति तदेवाक्षिपति। नलस्तु तां मालां विलोकयन् हर्षवशाद्विस्फारितनेत्रो जात इति भावः। तन्माल्यं रागाद्दृशोर्न्यस्तमिवास्त। नेत्रमध्ये निक्षिप्तं यच्छल्यादि तद्दिवाभूत्। युक्तमेतत्। क्रोधाद्धि दृष्टमात्रं वस्तु

स्तम्भस्तथालम्भितमां नलेन
भैमीकरस्पर्शमुदः प्रसादः।
कन्दर्पलक्षीकरणार्पितस्य
स्तम्भस्य दम्भं स चिरं यथाऽऽयत्॥ ६० ॥

शल्यमिव भवति नेत्रयोश्च लौहित्यमस्रु च भवतीति युक्तमित्यर्थः। तन्माल्यं पीतवतोऽपि नलनेत्रं वस्तु शल्यमिव भवति। नलनेत्रयोरन्तः रागात् प्रीतेर्दृष्टत्वं प्राप एतदपि युक्तं। प्रीतेर्हि दर्शो भवति इत्यपि युक्तमेवेत्यर्थ इति वा। प्रालम्ब्यं गुणवचनादित्वात् (पा० ५।१।१२४) ष्यञ्। प्रालम्बमिति पाठे प्रालम्बो हारभेदे स्यादिति विश्वः। राज्ञेति पाठे, आनन्दाश्रुणि प्रतिबिम्बितं माल्यं राज्ञा नलेनानुरागाद्दृशोरपि न्यस्तमिवास्त। न केवलं हृदि किन्तु नेत्रयोरपि धृतमित्यर्थः। अत एव तन्माल्यं पिवतोर्नलनेत्रयोर्मध्यः प्रलम्बत्वमालम्बतेति युक्तं। दीर्घाया मालाया अन्तर्द्धारणार्थं नेत्रमध्येऽपि दीर्घो जात इवेति भावः॥ ५९ ॥

स्तम्भ इति॥ मालानिक्षेपसमयजातभैमीकरस्पर्शस्तेन जाता मुत् हर्षस्तस्य प्रसादरूपः स्तम्भः सात्विकभावः नलेन तथाऽलम्भितमां अतितरां प्राप्तः। यथा स नलः कन्दर्पस्य लक्षीकरणाय लक्ष्यार्थं अर्पितस्यारोपितस्य स्तम्भस्य दम्भं व्याजं कामवेध्यस्तम्भसादृश्यं चिरमायत्। कामवेध्यस्तम्भवद्भैम्याः करस्पर्शजातसात्विकस्तम्भवशान्नितरां निर्व्यापारो जात इति भावः। नितरां कामपीडा सूचिता॥ ६० ॥

उत्सृज्य साम्राज्यमिवाथ भिक्षां
तारुण्यमुल्लङ्घ्य जरामिवारात्।
तं चारुमाकारमुपेक्ष्य यान्तं
निजां तनूमाददिरे दिगिन्द्राः॥ ६१॥
मायानलत्वं त्यजतो निलीनैः
पूर्वैरहंपूर्विकया मघोनः।

इदानीमिन्द्रादिभिः स्वं रूपं धृतमित्याह। उत्सृज्येति॥ अथ नलवरणानन्तरं ते इन्द्रादयो दिगिन्द्रा दिक्पाला यान्तं गच्छन्तं चारुं सुन्दरं तं अलीकनलाकारं उपेक्ष्योन्मुच्य निजां सहस्रनेत्रत्वादिलक्षणां स्वीयां तनूं आरान्नलसमीप एवाददिरेऽङ्गीचक्रुः। कः कामिव। कश्चिद्राजा साम्राज्यमुत्सृज्य क्षीणपुण्यतया चक्रवर्त्तिपदं त्यक्त्वा भिक्षामिव। तथा कालवशाद्गच्छत्तारुण्यमुल्लङ्घ्यातिक्रम्य कश्चिज्जरामिव। उपमाद्वयेनेन्द्राद्याकाराणां नलाकारादतिहीनत्वं सूचितं। साम्राज्यादिपरित्यागेन भिक्षाद्यङ्गीकारे यावद्दुःखं भवति तावन्नलाकारपरित्यागेन स्वाकाराङ्गीकारे तेषां जातमिति भावः। तत्र निजत्वमेव हेतुः। अन्योऽपि विद्वानसमीचीनमपि निजमङ्गीकरोति न तु समीचीनं परकीयं। यातुमिति पाठे स्वर्गमिति शेषः। आददिरे। आङो दोनास्येति (पा० १।३।२०) तङ्॥ ६१॥

यथाक्रमं तेषामाकारस्वीकारमाह। मायेति। मायानलत्वं अलीकनलत्वं त्यजतो मघोनः निलीनैः पूर्वनिजस्वत्वा गोपि-

भीमोद्भवासात्विकभावशोभा-
दिदृक्षयेवाविरभावि नेत्रैः ॥ ६२ ॥
गोत्रानुकूलत्वभवे विवाहे
तत्प्रातिकूल्यादिव गोत्रशत्रुः।

तैः पूर्व्वैर्नेत्रैः नलाङ्गसङ्गजनिता भीमोद्भवायाः सात्विकभाव-शोभा रोमाञ्चादिलक्ष्मीस्तस्या दिदृक्षयेव दर्शनेच्छयेवाहं पूर्व्व-महं पूर्व्वमिति यथा भवति तथा. यद्वाहं पूर्व्वमहं पूर्व्वमिति यस्यां क्रियायां सर्व्वे भ्रुवते साहंपूर्व्विका स्पर्द्धौत्सुक्याभ्यां आ-विरभावि वेगेन प्रकटीभूतं। इन्द्रेण स्वनेत्रसहस्रं प्रकटितमिति भावः। अन्योऽपि दर्शनोत्सुकोऽहंपूर्व्विकया प्रकटो भवति। अहं पूर्व्वमहं पूर्व्वमित्यहंपूर्व्विका स्वतंत्यमरः। अहं पूर्व्विकया। स्वार्थिकः मत्वर्थीयष्ठक् च ॥ ६२ ॥

गोत्रेति॥ तया स इन्द्रसखः प्रवरः ददृशे दृष्टः। स कः। गोत्रशत्रुरिन्द्रः यं वरं श्रेष्ठं प्रवरमेतन्नामानं सखायं पुरस्कारं पूजितवान् अथ चाग्रेसरमकरोत्। किं कुर्वन्। गोत्रयो-र्वसिष्ठकश्यपाद्योर्वंशादिपुरुषयोरनुकूलत्वेनासमानत्वेन विवाहत्वेन वा भवे जायमाने अथच गोत्रयोर्जन्मकालीननाक्षत्रानुकूल्येन तृतीयैकादशचतुर्थदशमादिज्योतिःशास्त्रोक्तसद्राशिकूट-सम्भवेन जायमाने विवाहे विषये विवाहार्थमिति यावत्। आयन् स्वर्गात् स्वयम्बरार्थं आयन् भुवमागच्छन्। एतावन्तं कालमदृष्टोऽभूत् इदानीन्तु प्रकटो जात इत्यर्थः। सखायमिन्द्र-

पुरश्चकार प्रवरं वरं य-
मायन् सखायं ददृशे तया सः ॥ ६३ ॥
स्वकामसम्मोहमहान्धकार-
निर्वापमिच्छन्निव दीपिकाभिः।

मायन् प्राप्नुवन् स प्रवरस्तया दृष्ट इति वा। प्रवरशब्दच्छलेन प्रवरपुरस्कार उत्प्रेचते। तस्य गोत्रानुकूलविशिष्टस्य विवाहस्य प्रतिकूल्यादिरुद्धत्वादिव। यतोऽयं गोत्रशत्रुरिति च्छलं। नल-भैमीगोत्रयोरनुकूलत्वेन जायमाने विवाहे स्वयमिन्द्रस्तत्प्राति-कूल्यं कृतवान्। ततश्च विशिष्टस्यापि प्रातिकूल्ये गोत्रयोरपि प्रातिकूल्यं जातं देवत्वाद्गोत्ररहित्याच्च स्वगोत्रभैमीगोत्रयोर-प्यनुकूलत्वाभावात् प्रातिकूल्यं। ततश्च गोत्रयोः प्रातिकूल्येऽपि श्रेष्ठप्रवराङ्गीकरणेनापि यथा कथञ्चिद्विवाहो घटिष्यत इति बुद्ध्या प्रवरमार्षेयं पुरश्चकारेत्यर्थः। यदा गोत्रानुकूलत्वाभावे विवाहे तस्य प्रातिकूल्याद्धेतोः प्रवरं पुरश्चकार समानप्रवर-त्वेनापि विवाहनिषेधादित्यर्थः। नाम्नो राशिचरयोर्राशिकूट-सूचकयोर्गणनायां षडष्टकाद्यसद्राशिकूटादिव गोत्रशत्रुरि-त्यादिज्योतिःशास्त्रादूह्यं। प्रवरं इन्द्रमित्रं ॥ ६३ ॥

स्वकामेति॥ वायुसखोऽग्निः निजं वपुः उद्गत्वरीभिरुद्-त्वरीभिः शिखाभिर्ज्वालाभिः छुरितं व्याप्तं वितेने चकार। भैम्यभिलाषं परित्यज्य पुनरपि ज्वालाव्याप्तं शरीरमङ्गीचका-रेत्यर्थः। किं कुर्वन्निव। दीपिकाभिर्वस्त्राग्निज्वलितशिखाभिः

उद्गत्वरीभिश्छुरितं वितेने
निजं वपुर्वायुसखः शिखाभिः ॥ ६४ ॥

पत्यौ वृते भीमजया न वक्रा-
वक्रा स्वमङ्काय निजुह्नुवे यः ।
जनादपत्रप्य स हा सहाय-
स्तस्य प्रकाशोऽभवदप्रकाशः ॥ ६५ ॥

सदण्डमालक्तकनेत्रचण्डं
नमःकिरं कायमधत्त कालः ।

स्वस्य कामेन सम्बन्धोऽविवेकरूपस्तमसा महान्धकारस्तस्य नि-र्वापं शान्तिमिच्छन्निव । उत्पूर्व्वकगमेः, गत्वरश्चेति (पा० ३।२।२६४) करबन्तात् । टिड्ढाणञिति (पा० ४।१।१५) ङीप् ॥ ६४ ॥

पत्याविति ॥ यः प्रकाशः पूर्व्वं वक्रेरलोकनलत्वाङ्गीकारस-मये स्वमात्मानं अङ्काय शीघ्रं निजुह्नुवे गोपितवान् स तस्य वक्रेः सहायः सखा प्रकाशो दीप्तिः सहोऽङ्का दिवसेन हेतुनाऽप्र-काशः अप्रकटोऽभवत् । प्रकटीभूतोऽपि सूर्य्यप्रभाच्छादितया ऽप्रकटो जात इत्यर्थः । हा कष्टं । पत्यौ स्वस्वामिनि वक्रौ भीम-जया न वृते सति जनालोकादपत्रप्य लज्जित्वेव प्रकटो नाभूत् इति लुप्तोत्प्रेक्षा । अन्योऽपि स्वस्वामिनोऽपकर्षे लज्जया नि-लीयते । ज्वालास्वङ्गीकृतास्वपि रात्रिवत् प्रकाशाभावाद्वक्रि-र्निष्प्रभ एवाभूदिति भावः ॥ ६५ ॥

सदण्डमिति ॥ कालो यमः सदण्डं लोहयष्ट्या सह वर्त्तमानं

तत्कालमन्तःकरणं नृपाणा-
मध्यासितुं कोप इवोपसन्नः ॥ ६६ ॥
दृग्गोचरोऽभूदथ चित्रगुप्तः
कायस्थ उच्चैर्गुण एतदीयः ।

अलक्तकेनारक्तं वस्त्रमालक्तकं तद्वदारक्ते नेत्रे ताभ्यां चण्डम-
तिभयङ्करं, तथा तमःकिरं अन्धकारमुद्गिरन्तं कालत्वात् ।
यद्वा स्वीयश्यामत्वातिशयेन तमसो विक्षेपकं एवंविधं कायं देह-
मधत्त प्रकटितवानित्यर्थः । उत्प्रेक्षते । तत्कालं तस्मिन्नलवर-
णानन्तरसमये नृपाणामन्तःकरणमध्यासितुमधिष्ठातुं उपसन्न
आसन्नीभूतः कालः श्यामः कोप इव मूर्त्तः । कोप एव राज्ञां
प्रकटो जात इति भावः । कुपितोऽप्येवंविधो भवति । आलक्तके ।
तेन रक्तं रागादित्यण् (पा० ४ । २ । १) तमः किरं । इगुप-
धेति (पा० ३ । १ । १३५) कः । अन्तःकरणं । अधिशीङिति
(पा० १ । ४ । ४६) कर्मत्वं ॥ ६६ ॥

दृगिति ॥ अथ एतदीयो यमसम्बन्धी उच्चैर्नितरामुन्नतो
वा गुणः सेवकः । उच्चैर्गुणा यस्यैवंविधो वा । कायस्थो राजसेवकः ।
गणकजातिविशेषश्चित्रगुप्तनामा लेखको दृग्गोचरः प्रकटोऽभूत् ॥
अथ च काये देहे तिष्ठति कायस्थः एतदीयो नितरां प्रसि-
द्धश्चित्रेणाश्चर्यभूतेन नखाकारेण गुप्तश्छादित एवंभूतो गुणः
श्यामवर्णः प्रकटोऽभूत् । एवं शब्दश्लेषसामान्येन सूचितयोर्द्वयो-
र्विशेषमाह । तत्रैको गणकः तालादिपत्रस्योर्द्ध्वस्योपरि मसीं

ऊर्द्धं तु पत्रस्य मषोद एको
मषेर्दद्ध्योपरि पत्रमन्यः॥ ६७॥
तस्यां मनोबन्धविमोचनस्य
कृतस्य तत्कालमिव प्रचेताः।
पाशं दधानः करबद्धवासं
विभुर्बभावाप्यमवाप्य देहम्॥ ६८॥

द्रव्यान्तरेण द्रवीभूतं कज्जलं ददात्येवंभूतः, प्राणिनां शुभा-शुभकर्म्मगणनार्थं मषा विलिखन्नित्यर्थः। अन्यः कृपागुणस्तु मषेरुपरि पत्रं जयपत्रं ददन्मषेः सकाशादहं काल इति पत्रा-लम्बनं कुर्व्वन् प्रकटोऽभूदित्यन्वयः अतिश्याम इत्यर्थः। चा ऽपरस्य समुच्चये लर्थे वा॥ ६७॥

तस्यामिति॥ तस्मिन् काले तन्नवरणानन्तरं विभुः स्वामी प्रचेता वरुणः आप्यं पार्थिवतैजसाद्यवयवोऽवष्टभ्य प्रचुरतरजला-वयवनिर्म्मितमुपभोगयोग्यमसाधं देहमवाप्य बभौ। किंभूतः। तस्यां भैमीविषये कृतस्य मनोबन्धविमोचनस्य अन्तःकरणबन्धो-न्मोचनस्य पूर्व्वं भैमीविषये पाशेन बध्वा निश्चलीकृत्य यत्स्थितं मनस्तत्तया नले वृते सति प्रकृष्टचेतस्त्वात् पुनस्तन्नलभैमेवो-न्मोचितं तत् तदीयमोचनस्यैव तत्सम्बन्धिनमिव करे बद्धवासं कृतवसतिं पाशं स्वायुधं दधानः। अन्यस्यापि तत्कालमेव कृत-वस्त्रादिबन्धनविमोचनस्य हस्ते पाशो बन्धनरज्जुर्भवति। आप्यं पूर्व्ववत्॥ ६८॥

सहद्वितीयः स्त्रियमभ्युपेया-
देवं स दुर्बुध्य नयोपदेशम् ।
अन्यां सभार्य्यः कथमृच्छतीति
जलाधिपोऽभूदसहाय एव ॥ ६९ ॥

सहेति ॥ स जलाधिपो वरुणोऽथ च जडस्वामी मूर्खतम इति विचार्य्य असहाय एवाभूत् । इति किं । सहद्वितीयः ससहायः स्त्रियमभ्युपेयात् किं पुनरन्यां । एवं रूपं नयोपदेशं नीतिमार्गं दुर्बुध्य दुष्टमिदमिति विचार्य्य,

मात्रा स्वस्रा दुहित्रा वा न विविक्तासनो भवेत् ।
बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति ॥

तथा ।

कामिनी कामयेदेव निर्जने पितरं सुतं ।
सद्वितीयोऽभ्युपेयात्तां मनःपरिणतामपि ॥

इत्यादिवाक्यरूपं स्त्रीपुरुषयोरेकान्ते मदनविकारसम्भवादेकेन स्त्रियं प्रति न गन्तव्यं किन्तु ससहायेनैवेति प्रतिपादनपरं नीत्युपदेशं द्वितीयया सहधर्म्मिण्या सह वर्त्तमानः स्त्रियमुपेयादित्युपदेशपरं बुद्ध्वा सभार्य्योऽन्यां कथं ऋच्छति प्राप्नोति अपि तु न कथञ्चित् । न ह्यन्यस्यामनुरक्तमन्यानुसरति न चान्यया तु हृतमन्या वृणोतीति नयस्य पूर्व्वमर्थं त्यक्त्वा द्वितीयमङ्गीकृत्यासहाय एवागत इत्यर्थः । अन्योऽपि जडो नयोपदेशं विपरीतमेव बुध्यते । द्वितीया सहधर्म्मिणीत्यमरः । सहद्वितीयः । विकल्पत्वात् सत्वाभावः ॥ ६९ ॥

देव्यापि दिव्याऽनु तनुः प्रकाशी-
कृता मुदश्चक्रभृतः सृजन्ती ।
अनिङ्गितैस्तामवधार्य चिह्नै-
स्तद्वाचि बाला शिथिलाकृताऽभूत् ॥ ७० ॥
विलोकके नायकमेलकेऽस्मिन्
रूपान्यता कौतुकदर्शिभिस्तैः ।

इदानीं देव्यापि स्वाकारो धृत इत्याह ॥ देव्येति ॥ इन्द्रादीनां स्वाकारधारणानन्तरं देव्यापि सरस्वत्यापि चक्रधृतः श्रीविष्णोर्मुदो हर्षान् सृजन्ती प्रेयसितरा दिव्या तनुरतिसुन्दरी मूर्त्तिः प्रकाशीकृता । देव्यापि स्वाकारो धृत इत्यर्थः । अनन्तरञ्च बाला भैमी अनिङ्गितैः प्रकटितैर्वीणाहंसादिभिश्चिह्नैस्तां सरस्वतीं अवधार्य्य ज्ञात्वा तद्वाचि श्लेषवक्रोक्त्यादिरूपायां तस्यां वाण्यां विषये शिथिलाकृता परित्यक्ताश्चर्य्याऽभूत् । पूर्व्वं तु मानुषीयमीदृशं कथं वदतीति साश्चर्याभूत् सम्प्रति सरस्वतीं दृष्ट्वाऽस्या एवं उक्तौ किमाश्चर्यं अपि तु न किञ्चिदिति त्यक्ताश्चर्या जातेत्यर्थः ॥ ७० ॥

विलोकक इति ॥ अस्मिन्नानादेशेभ्यः समागते नायकमेलके राजसङ्घे विलोकके विलोकयति सति रूपान्यतया स्वस्वाकारं परित्यज्य सहसनेकाद्याकारधारणेन कौतुकं दर्शयितुं शीलमेषामेवंभूतैस्तैर्देवीसहितैरिन्द्रादिभिः निर्जले जलदर्शनादिरूपामिन्द्रजालविद्यां विदन्ति जानन्ति तेषां वृत्तिवधात् जीव-

बाधा व्यधायीन्द्रादिभिरिन्द्रजाल-
विद्याविदां वृत्तिवधाद्व्यधायि ॥ ७१ ॥
विलोक्य तावाप्तदुरापकामौ
परस्परप्रेमरसाभिरामौ ।
अथ प्रभुः प्रीतमना बभाषे
जाम्बूनदोर्वीधरसार्वभौमः ॥ ७२ ॥

नोपायस्य स्वयमङ्गीकरणेन नाशात् बाधा व्यधायि पीडा विहिता, वताश्चर्यं कष्टं वा । स्वयम्बरमध्ये इन्द्रजालं प्रकटयतामैन्द्रजालिकानां विलोकके ऽस्मिन् राजसङ्घे तैर्वृत्तिवधात्तेषां बाधा व्यधायि पीडाविहिता । ऐन्द्रजालिकान् परित्यज्येन्द्रादीनामेव विलोकनादित्यर्थ इति तत्त्वार्थो वा । रूपान्तरं धारयमाणानिन्द्रादीन् दृष्ट्वा सर्व्वेऽपि साश्चर्या जाता इति भावः । तैः । सा च ते च । पुमान् स्त्रिया (पा० १।२।६७) इत्येकशेषः ॥ ७१ ॥

विलोक्येति ॥ अथ जाम्बूनदस्य सुवर्णस्योर्वीधरो मेरुस्तस्य सार्वभौमश्चक्रवर्त्ती अत एव प्रभुः समर्थ इन्द्रः प्रीतमनाः संस्तौ भैमीनलौ एतादृशौ विलोक्य बभाषे । किम्भूतौ । आप्तः अन्योन्यप्राप्तिरूपः दुरापः अन्योन्येन प्राप्तुमशक्यः कामोऽभिलाषो याभ्यां अत एव परस्परप्रेमरसेनाभिरामौ स्तम्भस्वेदसात्त्विकभावयुक्तौ । प्रभुर्जाम्बूनदेत्यादिना वरदानसामर्थ्यं सूचितं । प्रीतमना इत्यनेन च स्वेच्छयैव वरं दातुमारब्धवान्न तु याचितः सन्निति प्रतारणाभावं सूचयति । सार्वभौमः । तस्येश्वरः

वैदर्भि दत्तस्तव तावदेष
वरो दुरापः पृथिवीश एव।
दृत्यन्तु यत्त्वं कृतवानमायं
नल प्रसादस्त्वयि तन्ममायम्॥ ७३॥
प्रत्यक्षलक्ष्यामवलम्ब्य मूर्त्तिं
हुतानि यज्ञेषु तवोपभोक्ष्ये।

(पा० ५।१।४२) इत्यण्। अनुशतिकादीनाञ्च (पा० ७।३।२०) इत्युभयपदवृद्धिः॥ ७२॥

किमाह सोऽत्यत आह॥ वैदर्भीति॥ हे वैदर्भि मया तावत् प्रथमं एष पृथिवीश एव नल एव तव लत्सम्बन्धी वरः, अथ च देवप्रसादः अर्थात् तुभ्यं दत्तः। किम्भूतः। भूयोभिरपि तपोभिर्दुरापः। दत्तस्तावद्दत्त एवेति वा। इति भैमीमुक्का नलमाह। हे नल त्वं तु भैमीविषयेऽस्मत्सम्बन्धि दूत्यं यद्यस्मादमायं व्याजरहितं मनःशुद्ध्या कृतवान् तत्तस्मात् त्वयि विषये ममापि वक्ष्यमाणः प्रसादो वरदानमित्यर्थः॥ ७३॥

प्रत्यक्षेति॥ हे नल अहं प्रत्यक्षेण लक्ष्यां मेचदृश्यां मूर्त्तिं तनुमवलम्ब्य धृत्वा यज्ञेषु तव हुतानि हवींषि पुरोडाशादीनि उपभोक्ष्ये। ईदृशेन वरेण मम को लाभ इत्यत आह। हि यस्मात् तद्विदांसो यजमानादयश्च मखं यज्ञमस्माभिस्साक्षाद्भुक्तमवेक्ष्य मन्त्रादधिकोऽतिरिक्तो यो देवस्तस्य सद्भावे विषये श्रद्दधते। मिमांसका मन्त्रातिरिक्ता कर्मसमवायिनो देवता

संशेरतेऽस्माभिरवेच्य भुक्तं
मखं हि मन्त्राधिकदेवभावे ॥ ७४ ॥
भवानपि त्वद्दयितापि शेषे
सायुज्यमासादयतं शिवाभ्याम्।

नास्त्येवेति वेदान्तिभिः सह विप्रतिपद्यन्ते। तस्मात् तद्विप्रतिपत्तिनिरासद्वारा तुभ्यं कीर्त्तिं दातुं त्वदीययज्ञेषु कृतं प्रत्यक्षेणैव शरीरेण भोच्य इति भावः। अग्नौ प्रक्षिप्तस्य हविषो भस्मसाद्भावमात्रदर्शनान्मन्त्रप्रकाश्येन्द्रादीनां वाऽदर्शनात् किमयं यज्ञः सत्योऽसत्यो वेति सन्देहे प्रत्यक्षशरीरेण मखभोजने त्वयं सन्देहो गमिष्यति। कस्मिन् सति। मन्त्रादधिके देवेषु भावे विश्वासे सति। मन्त्रमयी देवतेत्येतत्पक्षया प्रत्यक्षायां देवतायामधिकस्य मनोविश्वासस्य युक्तत्वादित्यर्थः। संशयनिवृत्तिरेव महांस्तव लाभो भविष्यतीति भावः। उपभोच्ये। भुजोनवने (पा० १।३।६६) इति तङ्। अस्माभिरिति बहुवचनं देवतान्तराभिप्रायं ॥ ७४ ॥

भवानिति॥ हे नल भवानपि त्वद्दयिता भैम्यपि युवां शेषे भूलोकभोगनिमित्तस्य कर्म्मणः शेषे अस्तमये सति शिवाभ्यां ईश्वरपार्वतीभ्यां सायुज्यं सहैक्यं आसादयतं प्राप्नुतं। भवान् शिवेन भैमी च पार्वत्या संहैक्यं गच्छतमित्यर्थः। स्वकर्म्म प्राप्तमिदं स्वयमेव भविष्यति किं वरदानेनेत्यत आह। हि यस्मात् प्रेत्य मरणं प्राप्य अहं कीदृक् प्रेतो देवो मनुष्यो वा स्वर्गस्थो

प्रेत्यास्मि कीदृक् भवितेति चिन्ता
सन्तापमन्तस्तनुते हि जन्तोः ॥ ७५ ॥
तवोपवाराणसि नाम चिह्नं
वासाय पारेसि पुरं पुरास्ते ।
निर्वातुमिच्छोरपि तन्न भैमी
सम्भोगसङ्कोचभियाधिकाशि ॥ ७६ ॥

नारकी वा भविष्यामीत्यादिचिन्ता जन्तोः प्राणिनः अन्तःकरणं सन्तापं महान्तमाधिं जनयति । वरदानेन चिन्तानिवृत्तौ मनस्तापनाशः फलमित्यर्थः । शिवाभ्यां । पुमान् स्त्रिया (पा० १।२।६७) इत्येकशेषः । अस्मीत्यहमर्थेऽव्ययं वा ॥ ७५ ॥

तवेति ॥ हे नल निर्वातुमिच्छोरपि मुमुक्षोरपि तव वासाय त्वमत्यर्थं उपवाराणसि काशीसमीपे पारेसि असिनद्याः परतीरे नामचिह्नं त्वन्नामाङ्कितं तत्प्रसिद्धं पुरं नलपुरमिति यावत् पुरास्ति भविष्यति । इदानीमन्यत्र निवासेऽपि अतःपरं तत्पुरं राजधानी भविष्यति । मुमुक्षोरपि ते पुरं काशीमधिकृत्य न कृतमित्यर्थः । किमिति । न कृतमित्यत आह । भैम्या सह सम्भोगः सुरतादिसुखं तस्य सङ्कोचोऽल्पत्वं तस्माद्भिया भयेनाधिकाशि पञ्चक्रोशपरिमितायां काश्यां मुक्तिपुर्यां ब्रह्मचर्यादिनियमे भोगसङ्कोचभिया तत्पुरं न कृतं किन्तु तत्समीप इति भावः ॥ ७६ ॥

धूमावलिश्मश्रु ततः सुपर्वा
मुखं मखास्वादविदां नमूचे।
कामं मदीक्षामयकामधेनोः
पयायतामभ्युदयस्त्वदीयः॥ ७७॥

या दाहपाकौपयिकी तनुर्मे
भूयात् त्वदिच्छावशवर्त्तिनी सा।
तया पराभूततनोरनङ्गात्
तस्याः प्रभुः सन्नधिकस्त्वमेधि॥ ७८॥

धूमेति॥ ततः धूमावलिरेव श्मश्रु यस्यैवंविधं मखास्वाद-विदां यज्ञरसाभिज्ञानां देवानां मुखं सुपर्वा देवोऽग्निः इति तं नलमूचे। इति किं। हे नल त्वदीयोऽभ्युदयस्त्वत्समृद्धिः कामं नितरां मदीक्षामयी विलोकनरूपा कामधेनुस्तस्याः पयायतां दुग्धमिवाचरतु तद्वदपरिमितो भवत्विति। मद्विलोकनमात्रेण तव समृद्धिरनन्तास्त्विति तस्मै वरं दत्तवानित्यर्थः। अन्यत्रापि मुखस्य भूषणं श्मश्रु च युक्तं। कामधेनोः पयो युक्तं। धूमाव-लिरूपेण श्मश्रुणा ततो व्याप्त इति वा। पयायतां। आचारे कर्त्तुः क्यङ् सलोपश्चेति (पा० ३।१।११) क्यङ्सलोपौ॥७७॥

वरान्तरमाह॥ येति॥ हे नल स्फोटादिजनको दाहः, तण्डुलादेः पाकः तयोरौपयिकी कारणभूता मे या तनुर्मूर्त्तिः सा तवेच्छाया वशे वर्त्तत इति वशवर्त्तिनी इत्येवं शीला भूयात् निरग्निकेऽपि देशे यत्र त्वमभिलषसि तत्र दाहपाकयोग्या मम

अस्तु त्वया साधितमन्नमीन-
रसादि पीयूषरसातिशायि ।
यद्भूय विद्मस्तव सूपकार-
क्रियासु कौतूहलशालि शीलम् ॥ ७९ ॥

मूर्त्तिः प्रकटा भवत्वित्यर्थः । अत एव वशवर्त्तित्वात्तस्या मदीय-
मूर्त्तेः प्रभुः स्वामी सन् त्वं शिवनेत्रज्वालारूपया तया मदी-
यमूर्त्या पराभूततनोर्दग्धशरीरादनङ्गादधिक एधि भव ।
पूर्व्वमेव सुन्दरत्वेन कामादधिकः, इदानीन्तु मत्तन्वास्त्वद्वश-
वर्त्तित्वात्त्वद्वशीभूतया तया कामे पराभूते प्रकारान्तरेणाप्य-
धिकतरो भवेति भावः ॥ ७८ ॥

वरान्तरमाह । अस्त्विति । हे नल त्वया साधितं राद्धमन्नं
तण्डुलादि मीना मत्स्या रसाः प्रपानकादयः दुग्धादयो वा ते
आदयो मुख्या यस्य एवम्भूतमन्यदपि पाकयोग्यं भक्ष्यं पीयूष-
रसातिशायि पीयूषरसममृतास्वादमप्यतिशेते एवं शीलं तस्मा-
दपि नितरां स्वादु अस्तु भवतु । हे भूप राजन् यद्यस्मात् वयं
तव शीलं सूपकाराणां क्रियासु कर्म्मसु विषये कौतूहलशालि
तूहलेन शालते शोभते एवं शीलं विद्मः जानीमः तस्मात्
तुभ्यमीदृशो वरो दत्त इत्यर्थः । शीलमित्यत्र चित्तमित्यपि
पाठः । विद्मः । अस्मदो द्वयोश्चेति (पा० १।२।५९) बहुत्वं

॥ ७९ ॥

वैवस्वतोऽपि स्वत एव देव-
स्तुष्टस्तमाचष्ट नराधिराजम्।
वरप्रदानाय तवावदानै-
श्चिरं मदीया रसनोद्धुरेयम्॥ ८०॥
सर्व्वाणि शस्त्राणि सहाङ्गचक्रै-
राविर्भवन्तु त्वयि शत्रुजैत्रे।
अवाप्यमस्मादधिकं न किञ्चि-
ज्जागर्त्ति वीरव्रतदीक्षितानाम्॥ ८१॥

वैवस्वतोऽपीति। वैवस्वतः सूर्य्यपुत्रो यमोऽपि देवः स्वत एव स्वयमेव तुष्टः सन् तं धराधिराजं नलं इत्याचष्ट अवोचत्। इति किं। हे नल तवावदानैर्दूत्यादिकर्म्मभिर्या गीयशोरङ्ग-भावैर्वा निमित्तैरियं मदीया रसना जिह्वा वरप्रदानाय तुभ्यं वरं दातुं चिरमुद्धुरा उत्सुका, वरं दास्यामीति सोत्कण्ठा क्रियत इत्यहमपि वरं दास्यामीत्यर्थः॥ ८०॥

सर्व्वाणीति। हे नल सर्व्वाणि मन्त्रप्रयोज्यब्रह्मास्त्रादिसहितान्यभ्याससाध्यानि कुन्तखड्गादीनि शस्त्राणि अङ्गानां मोक्षोपसंहारादीनां मन्त्रा देवतादीनां वा चक्रैः समूहैः सह त्वयि आविर्भवन्तु प्रकटीभवन्तु। मन्त्रशस्त्रादीनि त्वमेव जानीहीति भावः। यतः सर्व्वजैत्रे शत्रूणां जेतरि। किमित्येवं वरदानमित्याशङ्क्याह। सङ्ग्रामादपलायनलक्षणे वीराणां व्रते दीक्षितानां गृहीतनियमानां शूराणामस्मात् शस्त्रज्ञानादधिकमुत्कृष्टं कि-

कृच्छ्रङ्गतस्यापि दशाविपाकं
धर्म्मान्न चेतः स्खलतु त्वदीयं ।
अमुष्यतः पुण्यमनन्यभक्तेः
स्वहस्तवास्तव्य इव त्रिवर्गः ॥ ८२ ॥

च्छिदपि अवाप्यं न जागर्त्ति स्फुरति तस्मिन् किन्त्वेतदेव तेषां परमं प्राप्यं तस्मादयं वरो युक्त एवेत्यर्थः । दीक्षितानां, कृत्यानां कर्त्तरि वेति (पा० २ । ३ । ७१) षष्ठी ॥ ८१ ॥

कृच्छ्रमिति । हे नल कृच्छ्रमतिकष्टदशाविपाकमवस्थापरिवर्त्तं गतस्यापि प्राप्तस्य आपदि पतितस्यापि तव चेतः धर्म्मान्न स्खलतु न चलतु । किम्भूतं चेतः । त्वदीयं त्वदायत्तं । आपदि सर्व्वैरप्यधर्म्म एव क्रियते तव तु चित्तमापद्यपि धर्म्मपरमेव भूयादिति वरो मया दीयत इत्यर्थः । एतस्य वरस्य दाने हेतुमाह । यस्मात् पुण्यममुष्यतोऽनन्यभक्तेः पापानासक्तस्य केवलधर्म्मैकसेविनः पुरुषस्य धर्म्मार्थकामलक्षणस्त्रिवर्गः स्वहस्तवास्तव्य इव स्वहस्ते वसति एवम्भूत इव भवति । अनन्यभक्ते धर्म्मे तदायत्तावर्थकामावपि प्राप्येते । कृच्छ्रमित्यादिना भविष्यत्कलिप्रभावः सूचितः । स्खलतात्त्वदेदमित्यपि पाठः । अन्यस्य भक्तिर्भजनं तदभावोऽनन्यभक्तिर्धर्म्मातिरिक्तभजनाभावाद्धेतोरिति वा । वसतीति वास्तव्यः, वसेस्तव्यत्कर्त्तरि णिच्चेति (पा० ३ । १ । ९६ । वा० २) तव्यत् । वर्गः सङ्घः ॥ ८२ ॥

स्मिताञ्चितां वाचमवोचदेनं
प्रसन्नचेता नृपतिं प्रचेताः ।
प्रदाय भैमीमधुना वरौ ते
ददामि तद्यौतककौतुकेन ॥ ८३ ॥
यत्राभिलाषस्तव तत्र देशे
नन्वस्तु धन्वन्यपि तूर्णमम्भः ।
अपो वहन्तीह हि लोकयात्रां
यथा न भूतानि तथा पराणि ॥ ८४ ॥

स्मितेति। प्रसन्नचेताः सन्तुष्टः प्रचेता वरुणः एनं नृपतिं प्रति स्मिताञ्चितां हासविशदां वाचमवोचत्। हे नल अहं तु भैमीं प्रदायाधुना तस्या भैम्या यौतकं युतकयोर्वधूवरयोः सम्बन्धि पारिवर्हं वस्त्राभरणादि तस्य कौतुकेन ते तव द्वौ वरौ ददामि।

कन्यां प्रदाय यत्किञ्चिद्वरायात्र प्रदीयते ।
वेदिकायां स्थितायैव तद्यौतकमिति स्मृतमिति ।

युतं युग्मं युतमेव युतकं युतकसम्बन्धि देयं यौतकं । दयिजेति कान्यकुब्जभाषायां ॥ ८३ ॥

यत्रेति। ननु हे नल यत्र धन्वनि निर्जले मरावपि देशे तव जलाभिलाषः तत्र देशे त्वदिच्छामात्रेण तूर्णं शीघ्रं अम्भः जलमस्तु भवतु। जलस्यैव वरदाने हेतुमाह। हि यस्मात् इह लोके पञ्चसु भूतेषु वा मध्ये आपो जलानि भूतानि यथा लोकयात्रां लोकजीवनहेतुत्वं वहन्ति प्राप्नुवन्ति तथा पराणि

प्रसारितापः शुचिभानुनास्तु
मरुः समुद्रत्वमपि प्रपद्य।
भवन्मनस्कारलवोद्गमेन
क्रमेलकानां निलयः पुरेव ॥ ८५ ॥

भूतजातान्याकाशलक्षणानि भूतानि लोकजीवनहेतवो न भवन्ति। पानीयं प्राणिनां प्राणा विश्वमेतच्च तन्मयमिति। उदकस्यैवानुसारित्वं परमः पुरुषार्थ इत्यर्थः। अम्भस्तु जीवनोपाय इति विश्वः ॥ ८४ ॥

प्रसारीति। हे मम मरुर्निर्जलो देशो भवतो मनस्कारोऽभिलाषस्तस्य लवो लेशस्तस्योद्गमेनोदयेन बहूदकत्वात् समुद्रत्वं प्रपद्य प्राप्यापि पुरेव निर्जलत्वदशायां यथासीत् तथैवास्तु भवतु। किंविधः। पूर्वं शुचिभानुना ग्रीष्मसम्बन्धिना सूर्य्येण प्रसारी विस्तृतस्तापः सन्तापो यस्य। इदानीमपि समुद्रत्वात् शुभ्रकिरणेन चन्द्रेण विस्तारिता आपो यस्य शुचेर्वाडवाग्नेः करणेन ज्वालया विस्तारितः सन्तापो यस्येति वा। चन्द्रोदये समुद्रवृद्धिः समुद्रे वाडवाग्निर्युक्तः। तथा पूर्वं क्रमेलकानामुष्ट्राणां निलयः स्थानभूतः। बाहुल्येन तेषां तदुद्भवत्वात्। इदानीं भवन्मनस्कारलवोद्गमे सति नक्राणां यादोविशेषाणां ये सन्तास्तेषां निलयः क्रमेलयो मरुद्भवन्मनस्कारलवोद्गमे सति समुद्रत्वं प्रपद्यापि पुरेव शुचिभानुना प्रसारितापो नास्त्वपि तु भवत्वेवेति वा। प्रसारिता आपो यस्येति। स्वकुप्रपधः पद्यमानश्च इति

अम्लानिरामोदभरश्च दिव्यः
पुष्पेषु भूयाद्भवदङ्गसङ्गात्।
दृष्टं प्रसूनोपमया मयान्यन्-
न धर्म्मशर्म्मोभयकर्म्मठं यत्॥ ८६॥
वाग्देवतापि स्मितपूर्व्वमुर्व्वी
सुपर्वराजं रभसाद्बभाषे।

(पा० ५।४।७४) अप्रत्ययः। मनस ऐकाग्र्यकरणं मनस्कारः. चित्तस्यैकाग्र्येण चिन्तनमिच्छाविशेषः। चित्ताभोगो मनस्कार इत्यमरः। अतः कृकमीत्यादिना (पा ८।३।४६) सत्वं॥ ८५॥

वरान्तरमाह। अम्लानिरिति। हे नल भवदङ्गसङ्गाद्धेतोः पुष्पेषु अम्लानिरसङ्कुचद्दलावयवत्वं आमोदभरश्च दिव्यः स्वर्गीयः परिमलातिशयश्च भूयात्। यद्यस्मात् प्रसूनोपमया पुष्पसादृश्येन पुष्पसदृशमित्यर्थः। धर्म्मस्य पुण्यस्य शर्म्मणः सुखस्य चोभयस्य पुण्यसुखलक्षणस्य द्वयस्य कर्म्मठं करणे समर्थं अन्यत् पुत्रादिकं वस्तु मया न दृष्टं किन्तु पुष्पमेव देवादिपूजनेन धर्म्मं शिरसि धारणेन परिमलेन वा सुखञ्च करोति। कर्म्मठं। कर्म्मणि घटते कर्म्मणि घटो ठच् (पा० ५।२।३५)॥ ८६॥

वागिति। वाग्देवता सरस्वत्यपि स्मितपूर्व्वं प्रसन्नत्वात् किञ्चित् स्मितं कृत्वेत्यर्थः। उर्व्वीसुपर्वराजं भूमीन्द्रं रभसाद्धर्षात् इति बभाषे। हे नल तव प्रेयसी भैमी। तस्यास्त्वत्प्राप्तिजनितं सम्मद हर्षं आचरन्त्याः मत् मत्तः सकाशात्किञ्चित्ते

त्वत्प्रेयसीसम्मदमाचरन्त्या
मत्तो न किञ्चिद् ग्रहणोचितं ते ॥ ८७ ॥
अर्थी विनैवार्थनयोपसीदन्-
नाल्पोऽपि धीरैरवधीरणीयः ।
मान्येन मन्ये विधिना वितीर्णः
स प्रीतिदायो बहु मन्तुमर्हः ॥ ८८ ॥

तव ग्रहणोचितं ग्रहीतुं योग्यं किं नापि तु मत्सकाशादपि किञ्चिद्ग्रहीतुमुचितमेव त्वत्प्रियामित्रभूतया मया यद्दीयते तदप्यङ्गीकुर्व्विति । रभसो हर्षवेगयोरिति विश्वः । सम्मदं । प्रमोदामोदसम्मदा इत्यमरः ॥ ८७ ॥

गर्वपरिहारपूर्व्वं स्ववरस्य ग्रहणयोग्यत्वमेव समर्थयते । अर्थ इति । त्वया मत्समीपमागन्तव्यं इति या अर्थना तया विनैव उपसीदत्समीपमागच्छन् स्वयमेव चाभवन् अल्पोऽप्यर्थः अर्थ्यते अर्थः फलं स धीरैर्मनीषिभिर्नावधीरणीयः नावज्ञेयः किन्त्वङ्गीकरणीय एव । यस्मात् मान्येन मानमर्हता पूज्येन विधिना ब्रह्मणा दैवेन चावितीर्णो दत्तः । यान्त्रामन्तरेण लब्धत्वात्स प्रीतिदायः । प्रीत्या दानं प्रीतिदायः अल्पोऽपि बहु मन्तुं गौरवेणाङ्गीकर्त्तुं अर्ह उचित इत्यहं मन्ये । तस्मात्त्वयापि मया योऽल्पोऽप्यर्थो दीयते स ग्रहीतव्य एवेति भावः । धीरैरल्पोऽप्यर्थो नावज्ञायते किन्तु पुनर्महानित्यपेरर्थः । महतोऽपि वरस्याल्पत्वोक्तेर्गर्वपरिहारः । प्रीत्या दायः प्रीतिदायः । कर्तृकरणे कृतेति (पा० २।१।३२) समासः । दीयते दायः, कर्म्मणि घञ् ॥ ८८ ॥

अवामा वामार्द्धे सकलमुभयाकारघटनाद्-
द्विधा भूतं रूपं भगवदभिधेयं भवति यत्।

तमेव वरमाह। अवामेति। शश्वज्जपो यस्य तत्सम्बोधनं तादृशं, भो नरपते नल मे मन्त्रं गोप्यं मदीयरहस्यभूतं सेन्दुमं इन्दोर्मा चन्द्रकान्तिस्तया सहितं ईशभागे चन्द्रकान्त्या युतं चन्द्रकलोपेतं पार्व्वतीभागे च भूषणीभूतार्द्धचन्द्रयुतं उक्तरीत्या निश्चित आकारः स्वरूपं यस्य। यद्वा ईहामात्रेण साकारं, विचारे क्रियमाणे अविद्यमानाकारं, तथा स्मरहरमयं कामतत्त्वरूपं क्रमेण भुक्तिमुक्तिदायि एवम्भूतं तद्रूपं अन्तःकरणे सते साधवेऽर्थात् तुभ्यं। यद्वा हे नरपते सते साधवे ते तुभ्यं अलमत्यर्थं सिध्यतु समाधिदशायां साक्षाद्भवत्वित्यर्थः। मे तद्रूपमिति वा। मे मम प्रसादादिति शेष इति वा। स्त्रीणां कामप्रधानत्वात् स्मरपदेन स्त्रीभागो लक्ष्यते। तथा च पूर्व्वोक्तगुणविशिष्टं स्मरहरमयं शक्तिशिवरूपं तन्मे रूपं तवान्तः सिद्धत्विति वा। पूर्व्वोक्तं हरमयं मे रूपममलं अन्तः स्मर चिन्तय। तद्रूपं सते ते तुभ्यं सिध्यत्विति वा। तद्रूपमलमन्तः स्मर, तथा शश्वज्जप स्तुहि, तच्च ते सिद्धत्विति वा। शश्वज्जपनं जपो यस्य तादृश हे नल सेन्दुं अमलं कर्पूरगौरं हरं अयं शुभावहविधिभूतं तन्मते विशिष्टं रूपं स्मर। रपते भाषमाणाय स्तुवते सते साधवे तुभ्यं सिद्धतु वा। रपते ते स हरः सिद्धतु साक्षात्कार्य्यसाधको भवत्विति वा। स्तुवते ते तद्रूपं हरो वा स ते शोभनायाभीष्टाय सिद्धतु। यद्वा स्मरहरं शिवं शिवभूतं शश्वज्जप सदा स्तुहि

तदन्तर्मन्त्रं मे स्मरहरमयं सेन्दुममलं
निराकारं शश्वज्जप नरपते सिध्यतु सते ॥ ८९ ॥

सोऽयं स्मरहरस्ते सिद्ध्यतु साक्षाद्भवत्विति वा। अन्तर्मध्ये मन्त्राः शैवाः शाक्ताश्च यस्य तादृशमिति वा। तत्किं। यद्रूपं शब्दरूपत्वाद् भगवती भगवांश्च भगवन्तौ पार्व्वतीपरमेश्वरौ अभिधेयं वाच्यं यस्य। यद्वा भगवच्छब्दवाच्यं अर्द्धनारीश्वरं भवति। कथं। यतः द्विधा स्त्रीपुंसरूपौ द्वौ भागौ रूपं भूतं प्राप्तं इति वा। एतत् कुत इत्यत आह। यतोऽर्द्धं दक्षिणभागे अवामा न स्त्री किन्तु पुरुष इत्यर्थः। अर्द्धं वामभागे वामा स्त्री चेति सामर्थ्यादर्द्धशब्दावृत्त्या योज्यं। एवं द्विधाभूतमित्यर्थः। अवामं दक्षिणञ्च आ सामस्त्येन वाममावाममदक्षिणञ्च अवामा वामे च ते अर्द्धे च समौ भागौ भूतं प्राप्तं सत् यद्द्विधा भवतीति वा। परस्परमुभयोराकारयोर्घटनात् सकलं सम्पूर्णैकरूपमित्यर्थः। यद्रूपमर्द्धं वामभागे अवामा अप्रतिकूला प्रसादावदातकान्तमुखी वामा स्त्री भवति पार्व्वतीरूपं भवतीत्यर्थः। तद्धरमयं रूपमित्युक्तेःसामर्थ्याद्दक्षिणार्द्धं महेशः पुरुषरूपं भवति इत्युक्तं भवति। एतेन शक्त्युद्रेकः सूच्यते। कीदृशं हरं स्मरहरं वा सेन्दु तथा अमलं सेन्दुत्वेऽपि कलङ्करहितं। यतः सकलकलामात्रचन्द्रयुतं। कलामात्रं हि निष्कलङ्कं भवतीत्यर्थ इति वा। कलाभिरणिमाद्यैश्वर्य्यचतुःषष्टिकलाभिः सहितमिति वा। यद्रूपमर्द्धं अवामा वामा च सा शक्त्यात्मिका विष्णुः अर्द्धं सा वा लक्ष्मीश्च वा चार्थे यद्वाऽवतीति वा रक्षिका सा लक्ष्मीनारायणात्मकं

भवति। तद्वामनेत्रस्सेन्दुरूपतया सेन्दुम ध्याने चन्द्रकलोपेतत्वात् सेन्दुर्मा लक्ष्मीभागे च भूषणीभूतार्द्धचन्द्रयोगात् सेन्दुमं शिवाद-भिन्नत्वाद्धरमयं सामर्थ्याद्दक्षिणभागे शिवरूपं एवम्भूतं हरिहरात्मकं मे रूपं स्मर। पूर्व्ववदिति वा। अर्द्धपूर्व्वभागे अवा ओकारेण तथाऽमाऽनुस्वारेण मा पवर्गपञ्चमव्यञ्जनेन वा प्रणव-पादेनेत्यर्थः। तथा उत्तरभागे अवा ओकारेण तथाऽमाऽनुस्वा-रेण मा पवर्गपञ्चमव्यञ्जनेन वा प्रणवपादेनेत्यर्थः। तथा उत्त-रभागे अवा ओकारेण तथाऽमाऽनुस्वारेण व्यञ्जनमकारेण वा प्रणवेनोपलक्षितं प्रणवद्वयसम्पुटितमित्यर्थः। हरमयं हरेति नामरूपं मे मन्त्रं मया जप्यमानं रहस्यं स्मर चिन्तय जप। शिष्टं पूर्व्ववत्। हरस्य पक्षे तु तन्मे रूपं मन्त्रं अन्तर्मनसि स्मर शश्व-ज्जप। स च ते सिद्ध्यतु। कीदृशं मन्त्रं हरमयं हर रेफरूपं तथा निराकारं अस्य अस्य तयोराकारः स्वरूपं स्वरूपे च आ-कारौ निर्गतावाकारौ यस्मात्तं निराकारं हकाररेफयोरुच्चा-रणार्थं यदकारद्वयं तद्रहितं, ह्र, इति व्यञ्जनमात्रहकाररेफम यमित्यर्थः। तथा सेन्दु ईस्य इन्दुस्य ताभ्यां सह वर्त्तमानं ईकारेणार्द्धचन्द्रेण युक्तं। तथा कला अनुस्वारस्तत्सहितं ह्रीँका-ररूपमित्यर्थः। सकलं चन्द्रकलोपेतं। सेन्दुमीकारविन्दुयुत-मिति वा। अमलं शाक्तादिदोषरहितं। तत् किं। यत् रूपमर्द्धं पूर्व्ववद्दक्षिणवामभागयोरवामा वामा च उपलक्षितं प्रणव-द्वयसम्पुटितं। तथा यत् पूर्व्वमुभयोरकारयोर्घटनात्सम्बन्धा-द्द्विधाभूतं पृथग्भूतमसंयुक्तं सत् भगवान् हरोऽभिधेयो वाच्यो

यस्य तादृग्भवति। प्रत्येकमकारयोगाद्धरेति शिवनाम यद्भवतीत्यर्थः। यदा पूर्व्वं हर इति द्विधाभूतं। अनन्तरं अकारद्वयव्यतिरेकेण व्यञ्जनरूपतया संयोगात्मकत्वमेकीभूतमित्यर्थः। तथा भगवती भुवनेश्वरी अभिधेया यस्य तादृशमिति वा ॥

शिवान्यो वह्निसंयुक्तो ब्रह्मादित्रयमन्तरा ।
तुरीयस्वरशीतांशुरेव तारासमन्वितः ॥
एष चिन्तामणिर्नाम मन्त्रः सर्व्वार्थसाधकः ।
जगन्मातुः सरस्वत्या रहस्य परमं मतमित्यागमात् ॥

प्रणवद्वयसम्पुटितभुवनेश्वरीरूपं चिन्तामण्याख्यं मे सरस्वत्याः स्वरूपभूतं मन्त्रं स्मर जप, स च मन्त्रस्ते सिध्यतु। शैवादिचिन्तामणिमन्त्रसम्भवात् मन्मन्त्रेति विशेषणं। हस्य रस्य सस्य ईस्य तादृशं हकाररेफसकारेकारसमाहाररूपं। यद्यपीकारः पश्चान्निर्दिष्टस्तथापि सकारात् पूर्व्वमेव ज्ञेयः। तस्य पश्चान्निर्देशो मन्त्रगोपनार्थः। तथा सेन्दु सचन्द्रं निराकारं निर्गताकारचतुष्टयस्वरूपं तादृशं मे मन्त्रं स्मर। इतरत् पूर्व्ववदिति वा। अत्र पक्षे आकाररहिता मन्त्रः। कस्य लस्य कलौ ताभ्यां सहित मन्त्रोऽपि। निराकारं सेन्दुमिति सम्बध्यते। उभयाकारघटनादित्यादि पूर्व्ववत्। तथा च क्लीमिति कामराजबीजं सिध्यति। अस्मिन् श्लोके टीकान्तरकृता बहूनां शैववैष्णवादिमन्त्राणामुद्धारो विहितः। अत्र ग्रन्थविस्तरभिया कष्टकल्पनयानया नयोक्तः ॥ ८८ ॥

सर्व्वाङ्गीणरसामृतस्तिमितया वाचा स वाचस्पतिः
स स्वर्गीयमृगीदृशामपि वशीकाराय मारायते।
यस्मै यः स्पृहयत्यनेन स तदेवाप्नोति किं भूयसा
येनायं हृदये कृतः सुकृतिना मन्मन्त्रचिन्तामणिः ॥ ९० ॥

मन्त्रफलमाह। सर्व्वेति। अयं पूर्व्वश्लोकोपदिष्टः मन्मन्त्रश्चासौ चिन्तामणिश्च चिन्तामणिसञ्ज्ञको मन्मन्त्र इत्यर्थः सर्व्वकामदत्वान्मन्त्र एव चिन्तामणिः चिन्तामणितुल्यो मन्मन्त्र इत्यर्थः। स पुरश्चरणादिना क्षीणपापेन सुकृतिना येन साधकेन जपादिना हृदये चित्ते कृतः स साधकः सर्व्वाङ्गानि व्याप्नुवन्ति सर्व्वाङ्गीणानि तैः शृङ्गारादिरसैरेवातिस्वादुत्वादमृतस्तिमितया आर्द्रया काव्यादिरूपया वाचा हेतुभूतया वाचस्पतिर्वागीशो भवति। तथा स साधकः स्वर्गीयमृगीदृशां दिव्यानां मृगाक्षीणां रम्भादीनामपि वशीकाराय मारायते कन्दर्पायते। तं दृष्ट्वा उर्व्वशीप्रभृतयो देवाङ्गनाः कामपरवशा भवन्तीत्यर्थः। किञ्च यः पुरुषः कृतपुरश्चरणोऽपि यस्मै फलाय स्पृहयति फलमभिलष्यति सोऽनेन सकृत्पठितमात्रेण मन्त्रेण हेतुना तत्प्राप्नोत्येव किं भूयसा कथनेन मन्त्रविशेषेण वा। नात्र सन्देहः। तस्मात्त्वयाऽयमेव मन्त्रो हृदये धार्य्य इति भावः। सर्व्वाङ्गीणेत्यत्र तत्सर्व्वादेरित्यादिना (पा० ५।२।७) खः। वाचस्पतिः। षष्ठ्याः पतिपुत्रेत्यादिना (पा० ८।३।५३) सत्वं। स्वर्गीयेति। नामधेयत्वाद्वृद्धाच्छः (पा० ४।२।११४) मारायते। कर्त्तुः क्यङ् सलोपश्चेति (पा० ३।१।११) क्यङि। यस्मै। स्पृहेरो-

पुष्पैरभ्यर्च्य गन्धादिभिरपि सुभगैश्चारुहंसेन मां चे-
न्निर्यान्तीं मन्त्रमूर्त्तिं जपति मयि मतिं न्यस्य मय्येव भक्तः।
सम्प्राप्ते वत्सरान्ते शिरसि करमसौ यस्य कस्यापि धत्ते
सोऽपि श्लोकानकाण्डे रचयति रुचिरान्कौतुकं दृश्यमस्याः॥८१

प्सितं (पा० १।४।३६) इति सम्प्रदानत्वं। भूयसे। बहोर्लोपो भू चबहोः (पा० ६।४।१५८) इति भूआदेशः॥ ८०॥

पुष्पैरिति। यः साधकः चारुणा सुन्दरेण हंसेन निर्य्यान्तीं गच्छन्तीमूह्यमानां हंसवाहनामित्यर्थः। मन्त्रमूर्त्तिं यन्त्रमध्यस्थितमन्त्रवर्णरूपेण परिणमदाकारां मन्त्रस्थान्तरशरीरां वा मां देवीं सुभगैरतिमनोहरैः सुकुमारैः सुगन्धिभिश्च पुष्पैः गन्धधूपादिभिः षोडशोपचारैरपि अभ्यर्च्य तथा मयि मतिं न्यस्य विषयान्तरादाकृष्य ध्यानबलेन स्थिरीकृत्य देवतान्तरपरिहारेण मय्येव विषये भक्तः सर्व्वात्मकतया मामेव सेवमानः सन् चेद्यदि जपति तत्तर्हि असौ जापको वत्सरान्ते संवत्सरावसाने प्राप्ते जाते सति यस्य कस्यापि स्त्रीबालमूकादेरपि शिरसि करं धत्ते स्थापयति सोऽपि स्त्रीबालादिरप्यकाण्डेऽसमयेऽकस्माद्वा रुचिरान् रसभावगुणालङ्कारयुतान् दोषरहितान् श्लोकान्रचयति। यस्तु सिद्धमन्त्रः सन् विविधान् श्लोकान्रचयति, किं वाच्यमित्यपेरर्थः। एतदस्याः कौतुकं दृश्यं, अनुभवेनायमस्याश्चमत्कारो द्रष्टव्य इत्यर्थः। एवं सम्पूज्य हंसवाहनादिध्यानपूर्व्वमेकाग्र्येण मनसा चेज्जपति तर्हि वत्सरमात्रेण सिद्धमन्त्रः सन्नेवंविधं सामर्थ्यं लभत इति भावः॥ ८१॥

गुणानामास्थानीं नृपतिलक नारीतिविदितां
रसस्फीतामन्तस्तव च तव वृत्ते च कवितुः।

गुणानामिति। हे नृपतिलक राजश्रेष्ठ नल अहं वैदर्भीं भैमीमथ च वैदर्भीसञ्ज्ञां रीतिं अल्पपदसमासमसमासं वा रचनाविशेषं क्रमेण तव वृत्ते त्वत्सम्बन्धिनि चरित्रे विषये कवितुः काव्यकरणे युक्तस्य श्रीहर्षादेस्तु अधिकण्ठे अन्वहं सदा परीरम्भस्यालिङ्गनस्य चुम्बनादिविलासस्य यदाचरणं करणं तदेव शरणं जीवनोपायो यस्या एवम्भूतां परीरम्भक्रीडया वा हेतुभूतया त्वच्चरणशरणमालिङ्गनप्रार्थनार्थं त्वच्चरणयोः पतन्ती अथ च परीरम्भस्य श्लेषालङ्कारस्य क्रीडाया वक्रोक्त्यादिविलासस्य आ सामस्त्येन यच्चरणं ज्ञानं तदेव शरणं यस्यामेवंविधामधिकं यथा तथातितरां रचयितुं कर्त्तुं भवित्री भविष्यामि। किम्भूतां। गुणानां सौन्दर्य्यपातिव्रत्यादीनां, अथ च श्लेषप्रसादादीनां आस्थानीं समासरूपां अवस्थितिभूतां। तथा नारीति स्त्रीति विदितां। नारी चेत्तर्हि भैम्येव जातेति प्रसिद्धां। अथच रीतिषु पाञ्चाल्यादिषु विदिता तथा नेत्यरीतिविदिता तथाविधापि नेति नारीति विदिता तादृशीं पाञ्चाल्यादिरीतिषु मध्येऽतिप्रसिद्धामिति यावत्। तथा तवान्तर्हृदये रसेन स्वीयसौभाग्येन नलविषयानुरागेण स्वस्मिन् नलानुरागेण वा स्फीतामतिपुष्टां, अथ वान्तःश्लोकमध्ये रसैः शृङ्गारादिभिः परिपुष्टां एवम्भूतां भैमीं त्वत्कण्ठालिङ्गनपरां। त्वच्चरणशरणां त्वदे-

भविन्त्री वैदर्भीमधिकमधिकण्ठं रचयितुं
परीरम्भक्रीडाचरणशरणामन्वहमहम्॥ ९२॥
भवद्वृत्तस्तोतुर्मदुपहितकण्ठस्य कवितु-
र्मुखात् पुण्यैः श्लोकैस्त्वयि घनमुदेयं जनमुदे।
ततः पुण्यश्लोकः क्षिति भुवनलोकस्य भविता
भवानाख्यातः सन् कलिकलुषहारी हरिरिव॥ ९३॥

कवयित्रीं प्रत्यहमहं करिष्यामीति भावः। एतदपि वरदानं। नरिति सम्बुद्ध्यन्तं पृथक्कृत्य राजश्रेष्ठ नः पुरुषेति सम्बोध्य पाति प्रत्यादि रीत्या विदितां पाञ्चाल्यादिरीतिषु च विदितामिति वा।

श्लेषः प्रसादः समता माधुर्यं सुकुमारता।
अर्थव्यक्तिरुदारत्वमोजः कान्तिसमाधयः।

इति वैदर्भमार्गस्य प्राणा दशगुणाः स्मृता इति आलङ्कारिकाः।

आख्यानीं क्लीवमाख्यानमित्यमरः। आतिष्ठन्त्यस्यामधिकरणे ल्युट्। टित्वात् ङीप्। नारीत्यत्र पक्षे श्लोप (पा॰ ६।३।१११) इति दीर्घः। कवितुः। कवृ वर्णने, कवृङ् स्तुतावित्यस्य वा। अधिकण्ठं। सप्तम्यर्थे व्ययीभावः॥ ९२॥

वरान्तरमाह। भवदिति। मदुपहितकण्ठस्य मयाधिष्ठितकण्ठस्य भवता वृत्तस्य चरित्रस्य स्तोतुः कवितुः कवेर्मुखात् सकाशात्त्वयि विषये पुण्यैस्तादृभिरमलैश्च श्लोकैः पद्यैर्यशोभिश्च घनं निविडं यथा तथा जनानां मुदे हर्षाय उदेयं उदेतव्यं। ततोऽनन्तरं तस्माद्वा हेतोर्भवान् क्षितिभुवनलोकस्य भविष्णुप-

देवी च ते च जगदुर्जगदुत्तमाङ्ग-
रत्नाय ते कथय कं वितराम कामम्।
किञ्चित्त्वया न हि पतिव्रतया दुरापं
भस्मास्तु यस्तव वत व्रतलोपमिच्छुः॥ ९४॥

जनस्य कलियुगसम्बन्धिकलुषहारी पातकहरणशीलः सन् हरिः श्रीविष्णुरिव पुण्यश्लोक इति आख्यातो भविता भविष्यति। यद्वा पुण्यश्लोकः सन् क्षितिभुवनलोकस्य कलिकलुषहारी हरिरिव भविता। पुण्यौ चारू निर्मलौ श्लोकौ पद्ययशसी यस्येति विग्रहः। पुण्यश्लोको नलो राजेति पुण्यश्लोकत्वं। कर्कोटकस्येत्यनेन कलिनाशित्वमुक्तं। उदेयं। अचोयदिति (पा० ३।१।९७) यत्॥ ९३॥

देवीति। देवी च ते च इन्द्रादयः भैमीं जगदुरित्यूचुः। इति किं। हे भैमि त्वं जगतस्त्रैलोक्यस्योत्तमाङ्गं शिरस्तस्य रत्नाय भूषणमणिभूतायै अतिसौन्दर्य्ययुक्तायै ते तुभ्यं कं कामं वितराम ददाम अपि तु न कमपि। अस्मद्दानयोग्यं नास्तीत्यर्थः। हि यस्मात् यद्यपि पतिव्रतया त्वया किञ्चिदपि वस्तु दुरापं नास्ति किन्तु पातिव्रत्यात् सर्व्वमपि त्वया सुप्रापमेव तथापि यस्तव व्रतलोपं पातिव्रत्यभङ्गं इच्छुः अभिलषति त्वया सह रन्तुमिच्छेत् स भस्मैवास्तु। वत कष्टं, अनुचितकर्म्मा स इत्यर्थः। कामं। अकर्त्तरि च कारके संज्ञायां (पा० ३।३।१९) इति कर्म्मणि घञ्। त्वया। खल्वर्थयोगे षष्ठीनिषेधात् तृतीया। व्रतलोपं। न लोकाव्ययनिष्ठेत्यादिना (पा० २।३।६९) षष्ठीनिषेधात् द्वितीया॥ ९४॥

कृटकायमपहाय नो वपु-
र्बिभ्रतस्त्वमसि वीक्ष्य विस्मिता।
आप्नुमाकृतिमतो मनीषितां
विद्यया हृदि तवाप्युदीयताम्॥ ८५॥
इत्थं वितीर्य्य वरमम्बरमाश्रयत्सु
तेषु क्षणादुदलसद्विपुलः प्रणादः।

वरान्तरमाह। कूटेति। हे भैमि त्वं नोऽस्मान् वीक्ष्य यतो विस्मितासि अतो मनीषितामाकृतिं आकारं स्वेच्छाशरीरं प्राप्नुं तवापि हृदि मनसि विद्यया नाम्न्या देहस्वीकारहेतुभूतया मन्त्रादिशक्त्या उदीयतां उत्पद्यतां। अस्माकं हृदि यथोदितं तथा तवापीत्यपिशब्दार्थः। अपिशब्दान्नलस्यापीति केचित्। किम्भूतान्नः। कूटकायं स्वेच्छामात्रेण धृतं मायानलशरीरं अपहाय त्यक्त्वा पुनर्दिव्यं निजं वपुर्बिभ्रतो धारयतः। अद्यापि प्रभुर्यद्वस्तुदर्शनात् सेवकादिः साश्चर्य्या भवति तद्वस्तु तस्मै प्रयच्छति। उदीयतामिति। भावे लः॥ ८५॥

इत्थमिति। इत्थं पूर्व्वोक्तप्रकारेण नलाय भैम्यै च वरं वितीर्य्य दत्वा देवोमहितेषु तेष्विन्द्रादिषु अम्बरं आश्रयत्सु स्वर्गम्प्रति गन्तुं उद्यतेषु प्रारब्धगगनगमनोद्योगेषु सत्सु क्षणात् क्षणमात्रेण उत्तिष्ठतां स्वं स्वं शिविरं प्रति गन्तुं उत्थितानां नृपाणां परिजनालपनैः सेवकभाषणैः जयजीवादिशब्दैः, राज्ञामेववा अश्वाद्यानयनार्थं परिजनान् प्रति भाषणैः कृत्वा, विपुला दश-

उत्तिष्ठतां परिजनालपनैर्नृपाणां
स्वर्वासिवृन्दहतदुन्दुभिनादसान्द्रः ॥ ८६ ॥
न दोषं विद्वेषादपि निरवकाशं गुणमये
वरेण प्राप्तास्ते न समरसमारम्भसदृशं।

दिग्व्यापी प्रणादः उदलसत् उदित इत्यर्थः। कीदृशः। भैमी-नलविवाहोत्सवहर्षादागच्छन्नाकनायकहर्षाद्वा स्वर्वासिवृन्दैर्दे-वसङ्घैर्हतानां दुन्दुभीनां नादैः सान्द्रो निबिडीभूतः। देवेषु निर्गतेषु राजानोऽप्युत्थितास्तेषां तत्सेवकानाञ्च महान् कलश्च संजातः। देवैश्च दिव्यवाद्यान्याहतानीत्यर्थः। वरं। जात्यभि-प्रायेणैकवचनं। सा च ते च तेषु। पुमान् स्त्रिया (पा०१।२। ६७) त्येकशेषः। उत्तिष्ठतां। ऊर्द्धकर्म्मत्वात्तङ् न ॥ ८६ ॥

नेति। प्रतिकूला नृपतयः पुण्यश्लोके विद्वेषाद्भैमीप्राप्ति-जनितविशिष्टमत्सरादपि हेतोरसुन्दरशीलतादिकं दोषं न जगुर्जगदुः। यतो नले निरवकाशं अप्रसक्तं। यतः गुणमये सौन्दर्य्यसौशील्यादिगुणबहुले पुण्यश्लोके वा, वैरिणापि सन्नेव दोषः प्रकाश्यते नत्वसन्। सुहृदा तु सन्नपि दोषो गोप्यते। तथा च विद्वेषे सत्यपि गुणमयत्वात् दोषलेशसम्भावनाया अप्य-भावाद्दोषं नोचुरित्यर्थः। तथा बलाद्भैमीहरणार्थं समरसमार-म्भस्य सदृशं तद्योग्यमधिक्षेपपरुषभाषणादिकमपि च नोचुः। यतः यमवरेण प्राप्तास्ते लब्धदिव्यास्ते वा, यतःस्वतः शूरे वरेण च नितरां दुर्द्धर्षे। तस्मादसामर्थ्यात् किञ्चिन्नोचुरित्यर्थः। किन्तु

जगुः पुण्यश्लोकं प्रति नृपतयः किन्तु विदधुः
स्वनिश्वासैर्भैमीहृदयमुदयन्निर्भरदयम् ॥ ९७ ॥
भूभृद्भिर्लम्भितासौ करुणरसनदीमूर्त्तिमद्देवतात्वं
तातेनाभ्यर्थ्य योग्याः सपदि निजसखीर्दापयामास तेभ्यः।

गत्यन्तररहिताः सन्तो निजासामर्थ्यरूपास्यदवदनस्तवकैः स्वनिश्वासैः कवोष्णैर्निजमुखनासिकैः कृत्वा भैमीहृदयं उदयन्ती निर्भरा बहुला दया यस्य एवम्भूतं अतिसकृपं विदधुः चक्रुः। अतिदीनांस्तान् दृष्ट्वा भैमी नितरां सकृपाऽभूदिति भावः। भैम्या हृदयभूतं प्राणरूपं नलं स्वनिश्वासैः सकृपं चक्रुरिति वा ॥ ९७॥

भूभृद्भिरिति। भूभृद्भिः राजभिः करुणरसस्य शोकस्थायिभावस्य रसस्याथ च जलस्य नदी तस्या मूर्त्तिमत्या देवताया भावं लम्भिता प्रापिता जलदेवतास्थाने स्थापिता, तन्निश्वासैः करुणरसार्द्रीकृतचित्ता सती असौ भैमी सपदि समाशाप्राप्तेरेते नितरां दुःखितास्तस्मादतिसुन्दरीर्मत्सखीरेतेभ्यो देहीत्यञ्जलियोजनेनार्थात्तातमेवाभ्यर्थ्य सम्प्रार्थ्य निजसखीः सहचरीस्तातेन पित्रा तेभ्यो राजभ्यो दापयामास। तेभ्यः सखीदाने भीमं प्रावर्त्तयदित्यर्थः। ते राजानोऽपि वैदर्भ्या अलाभात् कृतं गमनं देहत्यागे विषयं मनो यैः तेषां प्राणानां वाञ्छा सतीः सखीभिर्विजह्नुः। भैमीसखीलाभात् प्रारब्धगमनात्प्राक् पुनर्न्यवर्त्तयन्नित्यर्थः। किम्भूताभिः सखीभिः। यतः भैम्याः सकाशात् दम्भादिदेवेभ्यः वरप्राप्तया दृश्यकस्तरीरनिर्माणादिरूपां विद्यां संशिक्ष्य

वैदर्भ्यास्तेऽप्यलाभात् कृतगमनमनःप्राणवाञ्छां विजह्रुः
सख्याः संशिक्ष्य विद्यां सततधृतवयस्यानुकाराभिराभिः॥९८॥
अहह सह मघोना श्रीप्रतिष्ठासमाने
निलयमभि नलेऽथ स्वम्प्रतिष्ठासमाने।

सम्यगभ्यस्य सततं प्रत्यहं धृतो वयस्याया भैम्या अनुकारो याभिः तुल्यशरीरकलाकौशलाभिरित्यर्थः। ततश्च सर्व्वेऽपि भैमीप्राप्तिबुद्धैव स्वप्राणान् रचितवन्त इति भावः। लभ्भिर्द्विकर्म्मा। सख्याः। आख्यातोपयोगे (पा० १।४।२९) इत्यपादानत्वं॥९८॥

अहहेति। अथ राजभ्यः सखोदानानन्तरं मघोना इन्द्रेण सह श्रीः सम्पत् प्रतिष्ठा माहात्म्यं ताभ्यां समाने, स्वं निजं निलयं स्थानं अभिलक्षीकृत्य प्रतिष्ठासमाने जिगमिषति नले नभसो गगनात्सकाशात्पारिजातादिदेववृक्षाणां पुष्पवृष्टिरपतत्। अहहेति हर्षे। भैम्या नले वृते हृष्टैर्देवैर्नलस्योपरि पुष्पवृष्टिः कृतेत्यर्थः। उत्प्रेक्षते। बद्धा धृता मूर्त्तिर्यया सा मूर्त्तिबद्धा यद्वा मूर्त्त्या बद्धा युता साकारा, गलन्तः पतन्तोऽलयो भ्रमरा यत्रैवंविधं मध्वेव वाष्पो यस्याः। अधःपतनजनितदुःखमुक्तसकज्जलाश्रुबिन्दवो यस्याः। एवम्भूतामरभर्त्तुः इन्द्रस्य कीर्त्तिरिति वा। पुष्पाणां शुभ्रत्वात् कीर्त्तित्वं। भैम्या चावृतत्वादिन्द्रस्य कीर्त्तिर्गलितेति युक्तं। स्वर्गादधःपाते दुःखादश्रु च युक्तं। स्त्रीणाञ्चाश्रु सकज्जलं भवति। मकरन्दो वाष्पस्थाने। तदनुगतो भ्रमरः कज्जलस्थाने। समानशब्दस्य समासान्तर्गतत्वात्साचात्

अपतदमरभर्त्तुर्मूर्त्तिबद्धेव कीर्त्ति-
र्गलदलिमधुवाष्पा पुष्पवृष्टिर्नभस्तः ॥ ९९ ॥
स्वस्यामरैर्नृपतिमंशममुं त्यजद्भि-
रंशच्छिदा कदनमेव तदाध्यगामि।
उत्का स्म पश्यति निवृत्य निवृत्य यान्ती
वाग्देवतापि निजविभ्रमधाम भैमीम् ॥ १०० ॥

तुल्यार्थयोगाभावात्समघोनेति तृतीयार्थमनुप्रासार्थं च साक्षात् सहशब्दः समयोजि। प्रतिष्ठासमान इति। समवप्रेति (पा० १। ३।२२) तङो विधानात्, पूर्ववत् सन (पा० १।३।६२) इति तङ् ॥ ९८ ॥

स्वस्येति। तदा स्वर्गगमनसमये अमुं नृपतिं नलं त्यजद्भिरमरैः अंशस्य छिदा कर्त्तनेन यत्कदनं दुःखं तदेवाध्यगामि प्रापि। यतः स्वस्येन्द्रादेरंशं। लोकपालांशत्वाद्राज्ञः। स्वहस्तादिकर्त्तने यादृग् दुःखं भवति तादृशमेव तेषां नलपरित्यागे जातमिति भावः। यान्ती स्वर्गं प्रतिगच्छन्ती वाग्देवतापि भैमीं निवृत्य निवृत्य पुनः पुनः व्याघूर्ण्य वलितग्रीवं यथा तथा पश्यति स्म। किम्भूतां। निजविभ्रमाणां स्वीयवचनवागर्थादिविलासानां धाम स्थानभूतां। किम्भूता। उत्का, कियत्सहवासमात्र भूतगुणगणप्रेमभरतया सोत्कण्ठा परित्यक्तुमशक्तेत्यर्थः। अथवा निजसारस्वतं विलासगृहं यान्ती गच्छन्ती। छिदा षिद्भिदादिभ्योऽङ् (पा० ३।३।१०४) ॥ १०० ॥

सानन्दं तनुजाविवाहनमहे भीमः स भूमीपति-
र्वैदर्भीनिषधाधिपौ नृपशतानिष्टोक्तिनिर्मृष्टये।
स्वानि स्वानि धराधिपाश्च शिविराण्युद्दिश्य यान्तः क्रमा-
देको द्वौ बहवश्चकार सृजतः स्मातेनिरे मङ्गलं॥ १०१॥

सानन्दमिति। स भीम एको भूमीपतीराजा तनुजाया भैम्या विवाहनं पाणिग्रहणं तल्लक्षणे महे महोत्सवे विषये माङ्गलिकतूर्य्यवादनादिकं मङ्गलं सानन्दं सहर्षं यथा तथा चकार। वैदर्भीनिषधेश्वरौ च द्वौ क्षणमात्रं तत्र स्थितावेव असूयका ये नृपसङ्घाः नृपाणां वा ये जनास्सेवकास्तेषां अनिष्टोक्तयः कर्णकठोराणि यानि मृषादोषारोपणवचनानि तासां नितरां मृष्टये परिमार्जनाय अशुभवचनानाकर्णनाय नृत्तगीतवाद्यबहुले प्रेक्षणीयकादिदर्शनश्रवणादिरूपं मङ्गलं सृजतः स्म चक्राते। अमङ्गलं नाकर्णनीयमिति नृत्यगीताद्याकर्णनव्याजेनामङ्गलपरिहारं चक्रतुः। बहवः सर्व्वे धराधिपाश्च राजानोऽपि स्वानि स्वानि शिविराणि सेनानिवेशानुद्दिश्य लक्षीकृत्य यान्तो गच्छन्तः सन्तः प्राप्तभैमीसदृशवनिताः पटहनिस्वनादिरूपं मङ्गलमातेनिरे चक्रुः। वाद्यानि वादयामासुरित्यर्थः। एतच्च सर्व्वं क्रमशः पूर्व्वं भीमस्ततःकारानन्तरं भैमीनलौ चक्राते ततो राजानश्चक्रुरिति क्रमः। किञ्चैको द्वौ बहवः इति क्रमः। तथा चकार सृजतःस्म चक्रिर इति च क्रमः। सानन्दमिति सर्व्वत्र सम्बन्धः। श्रेष्ठजामातृलाभाद्भीमस्य हर्षः।

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यं।
यातस्तस्य चतुर्द्दशः शरदिजज्योत्स्नाच्छसूक्तेर्महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥१०२॥

परस्परलाभाद्भैमीनलयोः। सुन्दरभैमीसखीलाभाद्राज्ञामिति च यथासङ्ख्यं। विवाहनं। ण्यन्तान्नपुंसके भावे, ल्युट् चेति (पा० ३।३।११५) ल्युट् ॥ १०१ ॥

श्रीहर्षमिति। अर्द्धं पूर्व्ववत् ॥ शरदिजा शरत्कालीना ज्योत्स्ना चन्द्रिका तद्वदमला निर्म्मला निर्दोषा प्रसन्ना ह्लादजनिका च शोभना उक्तिर्यस्य तस्य श्रीहर्षस्य कवेः कृतौ महाकाव्ये चतुर्द्दशानां पूरणः सर्गः समाप्तः ॥ चतुर्द्दशानां पूरण इत्यर्थे। तस्य पूरणे डडिति (पा० ५।२।४८) डट्। शरदिजेति। सप्तम्यां जनेर्ड इति (पा० ३।२।९७) डप्रत्यये, प्रावृट्शरत्कालदिवां ज इति (पा० ६।३।१५) सप्तम्या अलुक् ॥ १०२ ॥

इति श्रीबिदरकरोपनामकश्रीनरसिंहपण्डितात्मजनारायणकृते नैषधीयप्रकाशे चतुर्द्दशः सर्गः ॥

पञ्चदशः सर्गः ।

ॐ गणेशाय नमः।

श्रीर्जयति।

अथोपकार्य्यां निषधावनीपति-
र्निजामयासीद्वरणस्रजाञ्चितः।
वसूनि वर्षन् सुबहूनि वन्दिनां
विशिष्य भैमीगुणकीर्त्तनाकृतां ॥ १ ॥

श्रीलक्ष्मीनृसिंहो जयति। अथ भैम्याः स्वयम्वरे वरणस्रजा मधूकमालया अञ्चितः पूजितः स निषधावनीपतिर्नलोऽप्येवं देवान् प्रसाद्य भैम्या नले वृते ताभ्यां वरान् दत्त्वा देवेषु प्रारब्धस्वर्गगमनेषु सत्सु अनन्तरं भीमेन स्वनिवासार्थं रचितां निजां स्वीयां नलेनैव वा कारितां पटमयद्रव्यादिरूपामुपकार्य्यामयासीत् ययौ। किं कुर्व्वन्। अन्येषां वन्दिनां साधारण्येन सुबहूनि वसूनि वर्षन् भैमीगुणानां कीर्त्तनमासामस्त्येन कुर्व्वन्तीति कृतः तेषां तु वन्दिनां विशिष्य विशेषं कृत्वा वर्षन् अन्यापेक्षया तेभ्योऽधिकं प्रयच्छन्। वन्दिनां। सम्बन्धसामान्ये षष्ठी॥१॥

तथा पथि त्यागमयं वितीर्णवान्
यथाऽतिभाराधिगमेन मागधैः।
तृणीकृतं रत्ननिकायमुच्चकै-
श्चिकाय लोकश्चिरमुञ्छमुत्सुकः॥ २॥

धनदानस्य सुबहुत्वमेव वर्णयति। तथेति। अयं नलः पथि त्यागकीर्त्त्यर्थं साधारण्येन दीयमानं धनं तथा तेन प्रकारेण वितीर्णवान् दत्तवान् यथा येन प्रकारेण मागधैर्वन्दिजातिविशेषैः अतिभाराधिगमेन अतिशयितगुरुत्वप्राप्त्या बहुतरलब्धधनस्य वोढुमशक्यत्वात् परिपूर्णत्वाच्च निरपेक्षत्वात् तृणीकृतं तृणवत्त्यक्तं रत्ननिकायं रत्नसमूहं उच्चकैर्नितरामुत्सुकोऽहमहमिकया ग्रहीतुं प्रवृत्तो लोक उञ्छं भूपतितमणुकणगणं चिरं बहुकालं चिकाय उच्चित्यादद्दे रत्ननिकायं उञ्छमिति रूपकं। उच्चकैर्बहुमूल्यं रत्ननिकायमिति वा। अनेनास्य दानशूरत्वमुक्तम्। उञ्छो धान्यानां कणश आदानं। रत्नादाने त्वौपचारिकः प्रयोगः। न कर्म्मणि घञ्। वितेनिवानिति पाठे त्यागमिति भावे घञ्। दानं चकारेत्यर्थः। निकाय्येति पाठे निवासः। अधिकरणे ण्यत्। आय् धात्वादेः कत्वञ्च, पाय्यसान्नाय्यनिकाय्येत्यादिना (पा० ३।१।१२९) निपात्यते। चिनोतेर्ण्यत्यायादेश चिकायेति भाषायां, चजोरिति (पा० ७।३।५२) कुत्वम्॥ २॥

त्रपास्य न स्यात् सदसि स्त्रियान्वयात्
कुतोऽतिरूपः सुखभाजनं जनः।
अमूदृशी तत्कविवन्दिवर्णनै-
रवाकृता राजकरञ्जिलोकवाक्॥ ३॥

त्रपेति। असाविव दृश्यत इत्यमूदृश्येतत्सदृश्यन्यापि, भैम्यद-त्तानि राजकानि नृपसङ्घास्तानि रञ्जयन्त्येवंशीलास्तदनुजीवि-नो लोकास्तेषां मृषा वाक् दोषारोपणरूपा, तस्य तयोर्वा भैमी-नलयोः कवयः प्रबन्धकर्त्तारो वन्दिनश्च प्राकृतादिभाषावर्णन-चतुरास्तेषां वर्णनैः कर्तृभिरवाकृता तिरस्कृता। तेषां प्रचुरतर-तारस्वरवर्णनतिरोहितत्वात् सा वाक्ताभ्यां नाकर्णितेत्यर्थः। वाग-वाकृता अशब्दरूपा कृता ध्वनिमात्रं श्रुतं, न त्वर्थव्यञ्जकः शब्दः श्रुत इति वा। असौ का। सदसि नानादेशमिलितजनसमाजे तत्समक्षं स्त्रियान्वयात् सम्बन्धादस्य नलस्य लज्जा न स्यात् अपि तु लज्जया भवितुं युक्तं न च तया जातमिति निर्लज्जोऽय-मित्येका वाक्। तथाऽतिरूपः सुन्दरो जनः श्रीरामचन्द्रजा-नकीवत् कुतः सुखभाजनं सुखस्थानं अपि तु रूपवान् जनो दुःखमेवैति दृष्टत्वात्। सुरूपयोरनयोरपि दुःखञ्च भवितैवेत्यन्या वागवाकृतेति विरोधाभासः। सदसि स्त्रियान्वयाद्धेतोर्लज्जास्य न स्यादन्यस्य तु स्यादेवेति। अयं निर्लज्जोऽतिसुरूपश्च। भवा-दृशो जनो भैमीप्राप्तिजनितसुखभाजनं कुतोऽपि न। रूपवान् हि रम्यां प्रियां न लभते। अतो रूपवन्तो भवन्तोऽपि प्रियां

अदोषतामेव सतां विवृण्वते
द्विषां मृषादोषकणाधिरोपणाः।

रम्यां नालभतेति स्वं स्वं प्रभुं प्रति सेवकवचनमिति वा। अति-सुरूपो भैमीलक्षणो जनः। अतः सुखभाजनमपि तु न एवंभूतानां राज्ञामप्राप्तेरिति वा। अमूदृशी। अदःशब्दे उपपदे दृशः, त्यदादिषु दृश (पा० ३।२।६०) इति कञि, दृग्दृशवतुषु आ सर्व्वनाम्न (पा० ६।३।८९) इत्यात्वे, अदसोऽसेर्दादुरिति (पा० ८।२।८०) उत्वे च, टिड्ढाणञिति (पा० ४।१।१५) ङीप्। अवाक्कृतेति पदद्वयं॥ ३॥

राजकीयैर्जनैर्निन्दायां कृतायामपि तयोर्निर्दोषत्वमाह। अदोषतामिति। द्विषां मृषाऽविद्यमानस्य दोषकणस्य दोषलेशस्याधिरोपणा आरोपाः सतां अदोषतामेव निर्दोषत्वमेव विवृण्वते प्राकट्येन कथयन्ति। कथं। यतः सत्ये दूषणे सति विद्यमाने ऽलीकं असत्यमविद्यमानं आधातुं आरोपयितुं खलानां जातु कदाचित् उद्यमः प्रयत्नारम्भो न भवेत्। सति दोषे विद्यमानत्वादेव नारोपः। अयं तावदारोप्यते। अतस्त्वासति दोषे तदारोपणं निर्दोषतामेव वक्तीत्युभयथापि परदोषोद्घाटनमनुचितमित्यर्थः। सर्व्वथा तौ निर्दोषाविति भावः। सत्ये दूषणे सति खलानामलीकं दोषमाधातुं उद्यमः कदापि न भवेत्-अपि तु सत्यदोषाभावेऽलीकमपि दोषं वदन्ति, ततश्च निर्दोषत्वमेवागतमिति वा। अथ च सत्ये परब्रह्मस्वरूपे श्रीरघुनाथे विषये सति असाधौ दूषणाख्ये राक्षसे अवद्यं अलीकं दुष्टम-

न जातु सत्ये सति दूषणे भवे-
द्लीकमाधातुमवद्यमुद्यमः ॥ ४ ॥
विदर्भराजोऽपि समं तनूजया
प्रविश्य हृष्यन्नवरोधमात्मनः।
शशंस देवीमनुजातसंशयां
प्रतीक्ष जामातरमुत्सुके नलं ॥ ५ ॥

प्रियं कर्त्तुं उद्यमः किं कदाचिन्न भवेत् अपि तु श्रीरामचन्द्रे-
विषयेऽपि दूषणाख्येन राक्षसेनाप्रियं कर्त्तुं उद्यमः कृत एव।
तथापि यथा स निर्दोषस्तथा तैर्निन्दायां कृतायामपि निर्दोषा
वेव तावपीत्यर्थः। यद्वा वक्ता सीतायाः पातिव्रत्यपरीक्षणाद-
परीक्ष्यपरिग्रहादिदोषे असत्यपि परब्रह्मस्वरूपे श्रीरघुनाथे
कदाचित्तमेवालीकं दोषमाधातुं प्रयत्नः किं न स्यादपि तु
लोकः प्रयतत एव तथापि तत्त्वतः स निर्दोष एव तथा ताव-
पीति भावः। वैरिभिः सत्यमप्युक्तमलीकं भवति। मृषोद्यन्तु
किमुतेति सूचितं। द्विषां। कर्त्तरि षष्ठी ॥ ४ ॥

विदर्भेति। विदर्भराजोऽपि उत्तमजामातृप्राप्त्या हृष्यन्
सन् तनूजया समं सह आत्मनोऽवरोधमन्तःपुरं प्रविश्य भैमी
नलं वरिष्यत्यन्यं वेति अनुजातः पुनः पुनर्जातः संशयो यस्याः
तां देवीं भैमीमातरं शशंस इदमवोचत्। इति किं। हे उत्सुके
जामातरि नले उत्कण्ठिते त्वं नलं जामातरं भैमीपतिं प्रतीच्छ
जानीहि ॥ ५ ॥

तनुत्विषा यस्य तृणं स मन्मथः
कुलश्रिया यः पविताऽस्मदन्वयं।
जगत्त्रयीनायकमेलके वरं
सुता परं वेद विवेक्तुमीदृशं॥ ६॥
सृजन्तु पाणिग्रहमङ्गलोचिता
मृगीदृशः स्त्रीसमयस्पृशः क्रियाः।

नामग्रहमात्रेण सूचितस्य नलस्य गुणगणं वर्णयति। तन्विति। यस्य तनुत्विषा कायकान्त्या हेतुना स सौन्दर्य्येण प्रसिद्धो मन्मथः तृणमिवाकिञ्चित्करः। तथा यः कुलश्रिया वंशपरिशुद्ध्या कृत्वा कौलीन्यात् प्रसिद्धतराणामस्माकमन्वयं पविता पावनं कर्त्ता। अस्मत्तोऽपि महान् कुलीन इत्यर्थः। जगत्त्रय्यां नायकमेलके वरसमूहे ईदृशमीदृग्गुणं नायकरत्नं वरं परिणेतारं विवेक्तुं निर्णेतुं परं केवलं तव सुता वेद जानाति नान्योऽस्मदादिः। न विद्यते परः श्रेष्ठो यस्मादिति वरविशेषणं वा। पविता। लुट्॥ ६॥

सृजन्त्विति। स भीमः इति आह स्म च ब्रूते स्म निर्ययौ चान्तःपुरान्निरगाच्च। चकारो विवाहत्वरां द्योतयति। इति किं। हे मृगीदृशो हरिणेक्षणाः सुवासिन्यो भवत्यः पाणिग्रहो विवाहस्तद्रूपे मङ्गले उचिताः तथा स्त्रीणां समय आचारस्तं स्पृशन्ति योषिदाचारप्राप्ता दुर्गादिकुलदेवतापूजा तैलयवारम्भादिक्रियाः सृजन्तु कुर्व्वन्तु। वयन्तु पुनः श्रुतीनां स्मृतीनां विधीन्

श्रुतिस्मृतीनान्तु वयं विदध्महे
विधीनिति स्माह च निर्ययौ च सः ॥ ७ ॥
निरीय भूपेन निरीक्षितानना
शशंस मौहूर्त्तिकसंसदंशकम्।
गुणैररीणैरुदयास्तनिस्तुषं
तदा स दातुं तनयां प्रचक्रमे ॥ ८ ॥

पूर्व्वेण जुहोतीत्यादीन् मधुपर्क्कादिकान् स्मार्त्तान् वैदिकांश्च विदध्महे कुर्म्मह इति। एवमादिश्य तदानीमेव निर्गत इत्यर्थः। पाणिग्रहमङ्गलोचिता योषिदाचारज्ञा वृद्धाः। सुवासिनीति-शेषणं वा। समयस्पृशः। स्पृशोऽनुदके (पा० ३।२।५८) इति क्विन्। वयं। अस्मदो द्वयोश्चेति (पा० १।२।५९) बहुवचनं ॥ ७ ॥

निरीयेति। भूपेन भीमेन निरीयान्तःपुरान्निर्गत्य वैवाहिकं लग्नं शशंस। निरीक्षितानना मौहूर्त्तिकानां ज्योतिषिकाणां संस-त्सभा अंशकं वैवाहिकं मुहूर्तं शशंस। स च भीमस्तदा तस्मि-न्नंशके नलाय भैमीं दातुं प्रचक्रमे मुहूर्त्तविलम्बानुरोधेन प्रा-थमिकान्श्रौतस्मार्त्तान् विधीन् अचीकरदित्यर्थः। किम्भूतमं-शकं। अरीणैः सम्पूर्णैर्जामित्रगुणैरुपलक्षितं। तथा शुक्रगुर्वाद्युदया-स्तमयप्रयुक्तदोषैर्निस्तुषं रहितं। ग्रहाणां गुणदोषादिकं ज्योतिः-शास्त्रादवगन्तव्यं। निरीय। इण्गतौ। मौहूर्त्तिका मुहूर्त्तज्ञा इत्यमरः। मुहूर्त्तं वेदेत्यर्थे क्रतूक्थादी (पा० ४।२।६०) त्यादिना उक्थादित्वाट्ठक्। अंशमेवांशः, स्वार्थे कप्। अरीणैः। स्वादि-

अथावदद्दूतमुखः स नैषधं
कुलञ्च बाला च ममानुकम्प्यताम्।
स पल्लवत्वद्य मनोरथाङ्कुरं
चिरेण नस्त्वच्चरणोदकैरिति॥ ९॥
तथोत्थितं भीमवचःप्रतिध्वनिं
निपीय दूतस्य स वक्त्रगह्वरात्।

त्वात्, ओदितश्चेति (पा० ८।२।४५) निष्ठानत्वं। निस्तुषं। निर्गतं तुषात्। तुषो दोषलेशः॥ ८॥

अथेति। अथ लग्नांशके सन्निहिते दूता एव मुखं यस्य स भीमः नैषधमित्यवदत्। इति किं। भवता मम कुलं बाला च कृपयाऽनुकम्प्यतां अङ्गीक्रियतां। बालायामनुगृहीतायां सर्वोऽपि मम वंशोऽनुगृहीतःस्यादित्यर्थः। तथा चिरेण चिरन्तनेन नोऽस्माकं सर्व्वेषां स प्रसिद्धस्त्वत्सम्बन्धविषयो मनोरथरूपाङ्कुरः अथास्मिन् दिने त्वच्चरणोदकैः त्वदीयचरणक्षालनोदकैः पल्लवतु पल्लववदाचरतु पल्लवितो भवत्वित्यर्थः। पल्लवसहितो भवत्वित्येकं पदं। कञ्चन सन्देशहरं प्रेष्य तं सविनयमाकारयति स्मेति भावः। अन्यत्रापि चिरं सञ्चितोऽङ्कुरो जलैः पल्लवितो भवति। पल्लवतु। आचारे क्विप्॥ ९॥

तथेति। स नलः दूतस्य वक्त्रादेव गह्वरात् तथा पूर्व्वोक्तप्रकारेण यथा भीमेनोक्तं तथैवोदितं भीमवचसः प्रतिध्वनिं निपीय सादरमाकर्ण्य इति ब्रुवन् तस्मै दूताय बहु प्रचुरं वस्त्रा-

व्रजामि वन्दे चरणौ गुरोरिति
ब्रुवन् प्रदाय प्रजिघाय तं बहु ॥ १० ॥
निपीतदूतालपितस्ततो नलं
विदर्भभर्त्ताऽऽगमयाम्बभूव सः।
निशावसाने श्रुतताम्रचूडवाग्-
यथा रथाङ्गस्तपनं धृतादरः ॥ ११ ॥
क्वचित्तदा लेपनदानपण्डिता
कमप्यहङ्कारमगात्पुरस्कृता।

लङ्कारादि प्रदाय तं दूतं प्रजिघाय प्राहिणोत्। इति किं। हे दूत अहं व्रजामि गत्वा च मदीयगुरोः श्वशुरस्य चरणौ वन्दे नमस्करोमीति। प्रतिशब्दत्वरूपेण न राजादेशानुवादस्य न्यूनाधिकताशंका परिहृता। व्रजामि। वन्दे। वर्त्तमानसामीप्य इति (पा॰ ३।३।१३१) भविष्यति लट् ॥ १० ॥

निपीतेति। ततो दूतप्रत्यागमनानन्तरं निपीतं सादरं श्रुतं दूतालपनं दूतवचनं येन स विदर्भभर्त्ता भीमो धृतादरः सादरः सन् नलमागमयांबभूव प्रतीक्षितवान्। पुनरपि दूतैरानाययति स्मेति वा। यथा निशावसाने ब्राह्मे मुहूर्त्ते श्रुता प्राभातिकी ताम्रचूडस्य कुक्कुटस्य वाक् येन स रथाङ्गश्चक्रवाको धृतादरः सन् तपनं सूर्य्यं प्रतीक्षते कदा वा उदेष्यतीति। कृकवाकुस्ताम्रचूड इत्यमरः ॥ ११ ॥

क्वचिदिति। तदा नलागमनसमये क्वचित् स्थाने लेपनदाने

अलम्भि तुङ्गासनसन्निवेशना-
दपूपनिर्म्माणविदग्धयादरः ॥ १२ ॥
मुखानि* मुक्तामणितोरणैस्तदा
मरीचिभिः पान्थविलासमाश्रितैः ।

सुधालेपचित्रादिकर्म्मणि पण्डिता कुशला काचिद्रमणी पुरस्कृता निर्म्माणार्थमेव सम्भाविता सती स्वप्रार्थनावशात् कमप्यहङ्कारमभिमानमगात् प्राप अनिर्व्वचनीयं गौरवं धृत्वा सुधालेपादि चकारेत्यर्थः । चतुष्कनिर्म्माणार्थं हरिद्राचूर्णमिश्रितं तण्डुलपिष्टं तस्य दाने आलेपकरणे कुशला । काचिद्विजने रमणीये वा प्रदेशे तस्यां भैम्यां अङ्गोद्वर्त्तने कुशलेति वा । तयोर्भैमीनलयोर्वा । तथा क्वचित् प्रदेशेऽपूपनिर्म्माणे मण्डकरचनायां विदग्धया चतुरया कयाचित्तुङ्गासने उच्चतुङ्गाख्यासने सन्निवेशनादुपवेशनाद्धेतोरादरो गौरवमलम्भि प्राप्तं । उच्चासनसन्निवेशादादरो वह्नितापभयाभावः प्राप्त इति वा । जातावेकवचनं । काश्चिच्चित्रादिकर्म्म काश्चिच्च अपूपादिनिर्म्माणं चक्रुरिति भावः ॥ १२ ॥

मुखानीति । तस्य पुरस्य तथा तत्सम्बन्धिनामखिलवेश्मनामपि मुखानि द्वारोपान्तरूपाण्याननानि मुक्तायुक्तानां मणीनां रत्नानां मुक्तानाञ्च मणीनाञ्च वा तोरणैस्तेभ्यः उद्गतैर्निर्गतैः अत एव पान्थविलासं उत्थाय दूरं प्रसर्पणशीलानां पान्थानां विलासमाश्रितैर्मरीचिभिः किरणैः कृत्वा वरागमनसमये प्रमो-

* मुक्तामयेति पाठोऽर्कोद्यतकरः ॥

पुरस्य तस्याखिलवेश्मनामपि
प्रमोदहासस्फुरितानि रेजिरे ॥ १३ ॥
पथामनीयन्त तथाधिवासना-
न्मधुव्रतानामपि दत्तविभ्रमाः ।
वितानतामातपनिर्भयास्तदा
पटच्छिदाकालिकपुष्पजाः स्रजः ॥ १४ ॥

हासेन हर्षजहास्येन स्फुरितानि मिश्रितानि च रेजिरे सर्व्वा-ण्यपि पुरद्वाराणि गृहद्वाराणि वा मुक्तामणितोरणैरलङ्कृता-नि। सर्व्वं पुरञ्च सानन्दमभूदिति भावः। हास्यं मुखे भवति। तस्य पुरस्य सम्बन्धिनां वेश्मनामिति व्याख्याने न केवलं पुरलो-कानां मुखानि प्रमोदहासस्फुरितानि किन्तु गृहाणामपीत्यपे-रर्थः। तोरणात्तदेति पाठे तोरणात् पान्थविलासमाश्रितैः उत्थाय द्वारप्रसर्पणशीलैरिति व्याख्येयं ॥ १३ ॥

पथामिति। पटच्छिदाभिर्वस्त्रच्छेदैर्निर्मितानि अकालिका-न्यसमयजानि यस्मिन् काले यानि न भवन्ति तादृशानि पु-ष्पाणि तेभ्यो जातास्तन्निर्मिताः स्रजो मालाः तदा वरागम-नसमये पथां पुरमार्गाणां वितानतां उल्लोचतां अनीयन्त प्रापिताः। किम्भूताः। यथा मालत्यादिपुष्पाणां वासस्तथाधि-वासनात् सुगन्धिद्रव्यैः परिमलारोपणान्मधुव्रतानामपि दत्तो विशिष्टो भ्रमो याभिः। सर्व्वदा मधुन्येव ये निवसन्ति तेषामपि अकृत्रिमाण्येवैतानि पुष्पाणीति तेषामपि दत्तभ्रान्तयः किमु-

विभूषणैः कञ्चुकिता बभुः प्रजा
विचित्रचित्रैः स्नपितत्विषो गृहाः।
बभूव तस्मिन्मणिकुट्टिमैः पुरे
वपुः स्वमुर्व्याः परिवर्त्तितोपमं॥ १५॥

तान्येषामिति मधुव्रतपदेन सूचितम्। तथा वस्त्रमयत्वादातपनिर्भया उष्णत्वमात्ररहिताः। अस्त्री वितानमुल्लोच इत्यमरः। छिदाकालिकेति च पूर्व्ववत्॥ १४॥

विभूषणैरिति। तस्मिन् पुरे प्रजाः पौरा जानपदाश्च विभूषणैरलङ्कारैः कञ्चुकिताः नानारत्नकान्तिच्छादितसर्व्वावयवाः सन्तः बभुः शुशुभिरे। तथा वर्णमात्रकल्पितेषु निर्जीवेष्वपि रूपकेषु जीवद्भ्रमापादनादिचमत्कारकरणाद्विचित्रैः आश्चर्य्यकारिभिः कुड्यलिखितनानावर्णरूपकैः स्नपितत्विषः उज्ज्वलीकृतदीप्तयो गृहा बभुः। एवं जङ्गमस्थावररूपान्यतया तथा मणिकुट्टिमैश्च मणिबद्धभूमिभिश्च कृत्वा उर्व्याः स्वं सहजं मृन्मयवपुः केनापि ब्रह्मादिना परिवर्त्तिता उपमा यस्य तद्रूपान्तरं प्रापितमिव बभूव। पातालस्य रम्यत्वात् पातालमुपरि जातमिवेत्यर्थ इत्युत्प्रेक्षा। परिवर्त्तिता विनिमयिता उपमा उपमानं स्वर्गादि येन उपमानत्वेन प्रसिद्धस्य स्वर्गस्य उपमेयत्वं कृतं, स्वयञ्च तस्योपमानं जातमित्यर्थः इति वा। स्वरुच्या इति पाठे स्वर्गात् सकाशात् परिवर्त्तितोपममिव बभूवेत्यर्थः। मणिकुट्टिमैः उपलक्षिते पुरे वा। सर्व्वमपि तदा सालङ्कारं जातमिति भावः। कञ्चुकस्तारकादिः॥ १५॥

तदा निसस्वानतमां घनं घनं
ननाद तस्मिन्नितरान्ततं ततं ।
अवापुरुच्चैः सुषिराणि राणिता-
ममानमानद्धमियत्तयाऽध्वनीत् ॥ १६ ॥
विपञ्चिराच्छादि न वेणुभिर्न ते
प्रणीतगीतैर्न च तेऽपि झर्झरैः ।

तदेति । तदा नलागमनसमये तस्मिन् घनं कांस्यतालादिकं घनं निविडं यथा निसस्वानतमां निरतिशयं शब्दं चकार तथा ततं वीणादिवाद्यं ततं विस्तृतं यथा तथा नितरां ननाद शब्दं चकार । तथा सुषिराणि सच्छिद्राणि वंशादिवाद्यानि उच्चैर्नितरां राणितां शब्दत्व अवापुः । तथा आनद्धं मुरजादिवाद्यमियत्तयेदंपरिमाणत्वेनामानमपरिच्छेद्यं यथा तथाऽध्वनीत् । घनं दृढावयवं बहुमद्धञ्चेति घनविशेषणं वा । तथा ततं तत्स्वरूपेण विस्तृतं बहुमद्धाकञ्चेति ततविशेषणं वा । तथा इयत्तयाऽमानं बहुमद्धमित्यानद्धविशेषणं वा । चतुर्विधमपि वाद्यं तत्र वादितमित्यर्थः । ततं वीणादिकं वाद्यमानद्धं मुरजादिकं । वंशादिकं तु सुषिरं कांस्यतालादिकं घनमित्यमरः ॥ राणितां । अवश्यं रणतीति, आवश्यकाधमर्ण्ययोर्णिनिः (पा० ३ । ३ । १७०) इति णिनौ राणीति तेषां भावस्तत्ता तां । अध्वनीत् अतो हलादेरिति (पा० ७ । २ । ७) वृद्धिविकल्पः ॥ १६ ॥

विपञ्चिरिति । वेणुभिर्वंशध्वनिभिर्विपञ्चिर्वीणाध्वनिर्ना-

न ते झडुक्केन न सोऽपि ढक्कया
न मर्द्दलैः सापि न तेपि ढक्कया ॥ १७ ॥
विचित्रवादित्रनिनादमूर्च्छितः
सुदूरचारी जनतामुखारवः।
ममौ न कर्णेषु दिगन्तदन्तिनां
पयोधिपूरप्रतिनादमेदुरः ॥ १८ ॥

च्छादि। ते च वेणुध्वनयः प्रणीतं प्रारब्धं गीतं यैः द्रुतमध्यादिमूर्च्छनादिपूर्व्वमुच्चैर्गायद्भिर्गायकैर्गायकगीतैर्नाच्छादिषतेति सर्व्वत्र विपरिणामेन व्याख्येयम्। झर्झरैर्झर्झराख्यैः कांस्यमयैर्वाद्यविशेषैर्ध्वनिभिः कृत्वा तेऽपि गायकध्वनयोऽपि न च नैवाच्छादिषत। झडुक्केन लघ्वीयसा कांस्यमयेन वाद्यविशेषेण ते झर्झरध्वनयो नाच्छादिताः। ढक्कया वादित्रविशेषेण सोऽपि झडुक्कध्वनिर्नाच्छादि। मर्द्दलैर्मृदङ्गध्वनिभिः सा ढक्काऽपि नाच्छादि। ढक्कया तेऽपि मर्द्दला अपि नाच्छादिताः। अनपेक्षितगौरवलाघवं वाद्यमात्रं तत्र मिलितं। समश्रुतितालमाना अपि विपञ्च्यादिध्वनयः वादककौशलात् प्रव्यक्तं भेदेनोपलब्धा इति भावः। विपञ्च्यते स्वरोऽस्यां विपञ्चिः, औणादिक इप्रत्ययान्तः ॥ १७ ॥

विचित्रेति। विचित्राणि नानाविधानि वादित्राणि तेषां निनादैः मूर्च्छितः वर्द्धितः तथा सुतरां दूरचारी दूरसञ्चरणशीलः,जनता जनसङ्घातस्तस्यारवो मुखशब्दः,पयोधिपूरे समुद्र-

उदस्य कुम्भीरथ शातकुम्भजा-
श्चतुष्कचारुत्त्विषि वेदिकोदरे
यथाकुलाचारमथावनीन्द्रजां
पुरन्ध्रिवर्गः स्नपयाम्बभूव तां ॥ १९ ॥

प्रवाहे प्रतिनादेन प्रतिशब्देन पयोधिपूरस्य तटे प्रतिशब्द-
स्तेन वा मेदुरः परिपुष्टः सन् दिगन्तदन्तिनां दिक्प्रान्तवर्त्ति
दिक्पालहस्तिनां कर्णेषु न ममौ तत्कर्णानपि परिपूर्य्य वहि-
र्निर्गत इत्यर्थः। नानाजातीयमिश्रणादेकीभूतो जनशब्दो
दिगन्तपर्य्यन्तं समुल्ललासेति भावः। स दूरेति पाठे स महानि-
त्यर्थः ॥ १८ ॥

उदस्येति। अथ सर्व्ववाद्यवादनानन्तरं पुरन्ध्रिवर्गः स्त्रीसम-
यज्ञकुलवृद्धसुवासिनीसमूहः चतुष्कसंज्ञेन नानावर्णकल्पितस्व-
स्तिकसर्व्वतोभद्रादिमण्डनेन चार्व्वी रमणीया त्विट् कान्ति-
र्यस्य एवम्भूते कूर्म्मपृष्ठचतुरस्रहस्तमात्रोच्छ्रितत्वादिसुकल्पिते
वेदिकाया उदरे मध्ये शातकुम्भजाः सुवर्णघटिताः कुम्भीः उद-
स्योत्क्षिप्य यथाकुलाचारं स्त्रीणां भैम्याश्च कुलाचारानतिक्र-
मेणाथ मङ्गलं मङ्गलगीतिपूर्व्वं यथा तथा तामवनीन्द्रजां भैमीं
स्नपयांबभूव। मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येऽप्यथो अथेति वच-
नादेकोऽथशब्द आनन्तर्य्ये, द्वितीयस्तु मङ्गले इति ज्ञेयं। यथा
विधानं नरनाथनन्दिनीमिति च पाठः। स्नपयाम्बभूव। मित्त्वा-
दुपधाह्रस्वः ॥ १९ ॥

विजित्य दास्यादिव वारिहारिता-
मवापितास्तत्कुचयोर्द्वयेन ताः ।
शिखामवाहुः सहकारशाखिन-
स्त्रपाभरम्लानिमिवाननैर्मुखैः ॥ २० ॥

असौ मुहुर्जातजलाभिषेचना
क्रमाद्दुकूलेन सितांशुनोज्ज्वला ।
द्वयस्य वर्षाशरदान्तदातनीं
सनाभितां साधु बबन्ध सन्ध्यया ॥ २१ ॥

विजित्येति । ताः कुम्भ्यः तस्या भैम्याः कुचयोर्द्वयेन गौरवत्वकाठिन्यादिगुणातिशयेन विजित्य दास्यादिव वारिहारितां जलवाहित्वमवापिताः प्रापिताः सत्यः आननैर्मुखैः सहकारशाखिन आम्रवृक्षस्य शिखां त्रपाभरेण जनितां म्लानिं वैवर्ण्यं कालिमानमिव अवाहुः वहन्ति स्म । पराजितोऽपि ह्रीभरेण नम्रमुखो वारिवाहितां प्रापितः सन् म्लानिं धत्ते । कलशीमुखे माङ्गलिकाम्रूतपल्लवा निक्षिप्यन्ते इत्याचारः । अवाहुः । वह प्रापणे लङि ॥ २० ॥

असाविति । मुहुर्जातं जलाभिषेचनं यस्या असौ भैमी, क्रमात्सितांशुना सिततन्तुदुकूलेन क्षौमाम्बरेणोज्ज्वला भूषिता सती, वर्षासु शरदस्तु तासां द्वयस्य सन्ध्यया सन्धिना तदातनीं तदाभवां तात्कालिकीं सनाभितां तुल्यतां साधु सम्यक् बबन्ध दधौ । वर्षाश्च कृतजलाभिषेका, शरच्च शीतांशुना चन्द्रेणो-

असौ प्रभिन्नाम्बुददुर्द्दिनोक्षिता
निनिन्द चन्द्रद्युतिसुन्दरीं दिवं ।
शिरोरुहौघेन घनेन संयुता
तथा दुकूलेन सितांशुनोज्ज्वला ॥ २२ ॥
विरेजिरे तच्चिकुरोत्कराः किराः
चणं गलन्निर्मलवारिविप्रुषां ।
तमःसुहृच्चामरनिर्ज्जयार्ज्जिताः
सिता वमन्तः खलु कीर्त्तिमुक्तिकाः ॥ २३ ॥

ज्ज्वला द्वयोः सर्व्वाप्युभयगुणोपेता, वस्त्रपरिधानात् पूर्व्वं प्रावृट्सदृशी अनन्तरं शरत्सदृशी जातेत्यर्थः ॥ २१ ॥

असाविति । असौ दिवं निनिन्द तत्तुल्या जातेत्यर्थः । किम्भूतां दिवं । आदौ वर्षासु प्रभिन्नैरतिघनैः चरद्भिर्वा अम्बुदैः दुर्द्दिनोक्षितां जलप्लावितां, अनन्तरं शरदारम्भे चन्द्रद्युतिसुन्दरीं । किंभूतासौ । कचिद्दर्षता शिरोरुहौघेन केशपाशरूपेण घनेन मेघेनोपलक्षिता । तथा दुकूलेनैव सितांशुना चन्द्रेणोज्ज्वला । जलाभिषेकस्थानेषु वर्षोदकचरणं चन्द्रिकास्थाने दुकूलमिति बोध्यं ॥ २२ ॥

विरेजिर इति । तस्याश्चिकुरोत्कराः केशसङ्घा विरेजिरे शोभन्ते स्म । किम्भूताः । गलतां निर्मलानां वारिविप्रुषामुदकविन्दूनां चणं किरन्तीति किरा विक्षेपका उदबिन्दून् मुञ्चन्त इत्यर्थः । किंभूता इव । तमसः सुहृदीनि सदृशानि अतिश्यामानि चाम-

मदीयसा स्नानजलस्य वाससा
प्रमार्ज्जनेनाधिकमुज्ज्वलीकृता ।
अदभ्रमभ्राजत साऽश्मशाणनात्
प्रकाशरोचिः प्रतिमेव हैमजा ॥ २४

तदा तदङ्गस्य बिभर्त्ति विभ्रमं
विलेपनामोदमुचः स्फुरद्रुचः ।

राणि तेषां निर्ज्जयेनार्ज्जिताः स्वीकृत्य सङ्गृहीताः सिताः शुभ्राः कीर्त्तिरूपा मुक्तिका वमन्तः खलु। इवार्थे खलुशब्दः। कृष्णचामरादप्यतिसुन्दरस्तत्केशपाश इति भावः। विप्रुषां। कर्म्मणि षष्ठी ॥ २३ ॥

मदीयमेति। सा भैमी अदभ्रमधिकं अभ्राजत अशोभत। किंभूता। मदीयसा स्नानजलस्य प्रमार्ज्जनेन प्रोञ्छनकारिणा वाससा मदीयसा वाससा कर्त्रा स्नानजलस्य प्रमार्जनेन करणेन पूर्व्वापेक्षया अधिकं यथा तथा उज्ज्वलीकृता। केव। अश्मशाणनात् शिलात्तेजनाद्धेतोः प्रकाशं पूर्व्वापेक्षयाऽतिदीप्ता रोचिर्दीप्तिर्यस्याः सा हैमजा सौवर्णा देवादीनां प्रतिमेव। शिला घर्षणादीपितेति सुवर्णकारपरिभाषा। प्रमार्जनेन। प्रथमपक्ष नंद्यादित्वात् कर्त्तरि ल्युः। द्वितीयपक्षे भावे ल्युट्। शाण तेजने। भौवादिकः। तस्माल्ल्युट् ॥ २४ ॥

तदेति। सुवर्णं दरमीषत् स्फुटद्विकसत्काञ्चनकेतकीदलं तस्मात् सौरभं सौगन्ध्यं यद्यभ्यस्यति शिक्षते तदा तर्हि तदङ्गस्य

दरस्फुटत्काञ्चनकेतकीदलात्
सुवर्णमभ्यस्यति सौरभं यदि ॥ २५ ॥
अवापितायाः शुचिवेदिकान्तरं
कलासु तस्याः सकलासु पण्डिताः ।
क्षणेन सख्यश्चिरशिक्षणस्फुटं
प्रति प्रतीकं प्रतिकर्म्म निर्ममुः ॥ २६ ॥
विनापि भूषामवधिः श्रियामियं
व्यभूषि विज्ञाभिरदर्शि चाधिका ।

भैमीशरीरस्य विभ्रमं विलासं विशिष्टां भ्रान्तिं वा बिभर्त्ति । किंभूतस्य विलेपनस्य । यत्तकर्द्दमादेरङ्गरागेण आमोदं मुञ्चति तस्य । तथा स्फुरन्ती रुक् दीप्तिर्यस्य । स्वाभाविकगौरकान्तिनः अभ्यङ्गानन्तरमङ्गरागः कृत इति भावः । यदि तर्हीति सम्बन्धादभ्यस्यति बिभर्त्तीति न लिङ्, लिङर्थे लट् । क्रियानिष्पत्तिस्तु न विवक्षणीया ॥ २५ ॥

अवापितायां इति । सकलासु गीतालङ्करणादिषु कलासु विद्यासु पण्डिताः कुशलाः सख्यः शुचिगोमयाद्यनुलिप्तं सर्व्वतोभद्रादिभूषितं वेदिकाया अन्तरं मध्यं शृङ्गारस्थानं अवापितायाः प्रापितायास्तस्याः भैम्याः प्रति प्रतीकं प्रत्यवयवं चिरशिक्षणाद्बहुकालाभ्यासात् स्फुटं निरतिशयं अत एव क्षणेन प्रतिकर्म्म अलंकरणं निर्ममुश्चक्रुः ॥ २६ ॥

विनेति । भूषां मण्डनं विनापि श्रियां कान्तीनामवधिः

न भूषयैषाऽतिचकास्ति किन्तु सा
ऽनयेति कस्यास्तु विचारचातुरी॥ २८॥

परमशोभा इयं भैमी विज्ञाभिः अलङ्कारचतुराभिः सखीभिः व्यभूषि विशेषेणामण्डि। अधिका अनलङ्कृताङ्गकान्तितोऽधिककान्तिरदर्शि च। परंतु विचारचातुरी एकतरनिश्चयरूपे विचारे प्रावीण्यं कस्यास्तु न कस्यापि। इति किं एषा भूषया पूर्व्वापेक्षया अधिकं न चकास्ति किन्तु सा भूषैवानया भैम्या कृत्वाऽधिकं शोभते। भैम्या भूषणानाञ्च परस्परसम्पर्काच्छोभातिशयो यो दृश्यते तत्र भूषणैर्भैम्याः शोभातिशयो न जनितः किन्तु भैम्या भूषणानामिति विवेकः कस्यापि नाभूदित्यर्थः। पूर्व्वापेक्षयाधिकं वा शोभते स्मेति भावः। भूषां विनापि श्रियामवधिरियं विज्ञाभिर्विशेषेण बहुना प्रयासेनाभूषि पूर्व्वापेक्षया इयमधिका किमिति तारतम्यज्ञानार्थं पुनः पुनः विलोकिता च। परमियं भूषया नाधिचकास्ति किन्तु सा भूषाऽनयेति तात्त्विकविचारचातुरी कस्यास्तु पुनः सख्या जातत्यर्थादपि तु न कस्याश्चित्। प्रयासेनालङ्कृत्य पुनः पुनर्विलोक्यापि विज्ञाभिरपि अनया मण्डनं मण्डितं मण्डनैर्वा इयं मण्डिते इति तारतम्यं न ज्ञातमेव। परं भूषणानां वैयर्थ्यं साधारणत्वं वाधिकशोभाकारित्वं वेति किमपि न निश्चितं किन्तु भ्रान्ता एव जाता इत्यर्थ इति वा। तस्या निरतिशया कान्तिर्जातेति भावः। पूर्व्वोक्ता चातुरी कस्यास्तु कस्याश्चिदेव विदुष्या न

विधाय बन्धूकपयोजपूजने
कृतां विधोर्गन्धफलीबलिश्रियम्।
निनिन्द लब्धाधरलोचनार्चनं
मनःशिलाचित्रकमेत्य तन्मुखम्॥ २८॥

तु सर्व्वस्या इति वा। अलङ्कृतं तद्वपुषेव मण्डनमिति विचारचातुरी कस्यचिन्मल्लक्षणस्य महाप्राज्ञस्य कस्य ब्रह्मणो वाऽस्तु। मया श्रीहर्षेण ब्रह्मणा वा एवं निर्म्मितुं शक्यते नान्येनेत्यर्थ इति वा। कस्याः पुनर्न जाता अपि तु सर्व्वस्या अपीति वा॥ २७॥

विधायेति। लब्धं प्राप्तं अधराभ्यां लोचनाभ्याञ्च कृत्वा अर्चनं पूजनं येन। श्रोष्ठनेत्रेण रमणीयमिति यावत्। एवंविधं तन्मुखं भैमीमुखं कर्त्तृ माङ्गलिकं मनःशिलाख्यगैरधातुविशेषनिर्म्मितं चित्रतिलकं एत्य प्राप्य बन्धूकेन पयोजाभ्यां नीलोत्पलाभ्याञ्च पूजने पूजाद्वयं कृत्वा, अनन्तरं कृतां विधोश्चन्द्रसम्बन्धिनीं गन्धफल्या चम्पककलिकया कृत्वा बलिः पूजा तज्जनितां श्रियं कान्तिं निनिन्द। यदि बन्धूकोत्पलैः चन्द्रस्य पूजां कृत्वा चम्पककलिकां चन्द्रस्य शिरसि न्यस्यति तदा तां चान्द्रलक्ष्मीं न्यक्करोतीत्यभूतोपमेत्यर्थः। बन्धूकस्य अधरस्य नीलोत्पलयोर्लोचनयोश्चम्पककलिकाया मनःशिलातिलकस्य चन्द्रस्य वदनस्य चोपमानोपमेयभावः। चम्पको हेमपुष्पकः। एतस्य कलिका गन्धफलीत्यमरः॥ २८॥

महीमघोनां मदनान्धतातमी
तमःपटारम्भणतन्तुसन्ततिः।
अबन्धि तन्मूर्द्धजपाशमञ्जरी
कयापि धूपग्रहधूमकोमला ॥ २९ ॥
पुनः पुनः काचन कुर्वती कच-
च्छटाधिया धूपजधूमसंयमं।

श्लोकत्रयेण केशप्रसाधनं वर्णयति। महीति। कयापि केशप्रसाधनचतुरया सख्या तस्या भैम्या मूर्द्धजपाशः केशपाशः तद्रूपा सौगन्ध्याद्दैर्घ्याच्च मञ्जरी प्रथमोद्भिन्नकलिकाङ्कुरदण्डः अबन्धि संयता। किंभूता मञ्जरी। महीमघोनां भूमीन्द्राणां मदनेन कामविकारेण अन्धता विवेकशून्यता सैव तमी तामसी रात्रिस्तस्यास्तमोरूपस्य पटस्यावरकत्वादविवेकरूपस्यारम्भणे निर्माणे विषये तन्तुसन्ततिः सूत्रपरम्परा तानकरूपा। तथा धूपग्रहणसाधनस्य सच्छिद्रस्य धातुमयस्य करण्डकादेः सम्बन्धिना दह्यमानकर्पूरागरुचन्दनादिपरिमलबहुलेन धूमेन कोमलेषच्छुष्का तद्वदतिसुन्दरी नितरां श्यामा। राजानो रात्रौ नीलं पट्टवस्त्रादिकं परिधाय विचरन्तीति वा। नलपराया अपि तस्याः केशपाशं दृष्ट्वा राज्ञां कामोद्रेकाद्विवेकशून्यता भवतीति भावः ॥ २९ ॥

पुनः पुनरिति। काचन सखी तस्याः भैम्या मूर्द्धजः केशपाश स्तल्लक्षणं सूक्ष्मघनप्रलम्बकृष्णत्वसाम्याच्चामरं चिराद्बहुना

सखीस्मितैस्तर्कितनिजभ्रमा
बबन्ध तन्मूर्द्धजचामरं चिरात् ॥ ३० ॥
बलस्य कृष्टेव हलेन भाति या
कलिन्दकन्या घनभङ्गभङ्गुरा।
तदार्पितैस्तां करुणस्य कुड्मलै-
र्जहास तस्याः कुटिला कचच्छटा ॥ ३१ ॥

कालेन बबन्ध। चिरकालहेतुमाह। किंभूता। कचच्छटाधिया भैमीकेशपाशभ्रान्त्या सादृश्यात् धूपजस्य धूमस्य मुहुर्मुहुः संयमनं बन्धनं कुर्व्वती। तथा तद्भ्रान्तिदर्शनीनां स्मितैरन्योन्यमुखविलोकनपूर्व्वविलसदीषद्धास्यैः कृत्वा तर्कितः केशपाशभ्रमेण धूपजधूमसंयमनरूपो निजः स्वीयः भ्रमो यया ॥ ३० ॥

बलस्येति। कुटिला अतिवक्रा या तस्याः कचच्छटा कुन्तलश्रेणिः बलस्य बलभद्रस्य हलेनाकृष्टा सती घनैर्निविडैर्भङ्गैस्तरङ्गैर्भङ्गुरा उच्चावचा कलिन्दस्य पर्व्वतस्य कन्या यमुनेव भाति च। कचच्छटा तां यमुनां तदा तस्मिन् समये अर्पितैः शिरसि न्यस्तैः करुणाख्यस्य वृक्षस्य कुड्मलैः कलिकाभिर्जहास। यमुना पराकर्षणकृतेन महीयसा भङ्गेन पराभवेन भग्ना पुष्परहिता च। स्वयं तु स्वभावकुटिला पुनरपि कुसुमैरञ्चिता चेति हासोयुक्त इत्यर्थः। श्यामा अतिवक्रा पुष्पालङ्कृता च तस्याः कुन्तलश्रेणिर्नितरां शोभते स्मेति भावः। पूर्व्वं तत्तुल्या अभूत्

धृतैतया हाटकपट्टिकालिके
बभूव केशाम्बुदविद्युदेव सा ।
मुखेन्दुसम्बन्धवशात् सुधाजुषः
स्थिरत्वमूहे नियतं तदायुषः ॥ ३२ ॥
ललाटिकासीमनि चूर्णकुन्तला
बभुः स्फुटं भीमनरेन्द्रजन्मनः ।

इदानीं तु अधिका जातेति भावः । जहामेवेति वा । यमु-
नाकर्षणं हरिवंशादौ ज्ञेयम् ॥ ३१ ॥

ललाटप्रसाधनं वर्णयति । धृतेति । एतया अलिके ललाटे
या हाटकस्य सुवर्णस्य पट्टिका धृता सा केशाम्बुदानां कुन्तल-
रूपजलदानां तेषु वा विद्युदेव बभूव । क्षणप्रभायास्तस्याः कथं
स्थिरत्वमित्यत आह । मुखेन्दुसम्बन्धवशाद्धेतोः सुधाजुषोऽमृतं
सेवमानस्य तदायुषो विद्युदवस्थानस्य स्थिरत्वं नियतं निश्चितं
अहमूहे तर्कयामि । अमृतपानादमृतत्वं तस्या जातमित्यर्थः ।
सुवर्णपट्टिकया ललाटमलङ्कृतमिति भावः । यदायुष इति वा
पाठः । ऊहे । ऊह वितर्के ॥ ३२ ॥

कुन्तलान् वर्णयति ॥ ललाटिकेति । ललाटे रचितायाः
रेखाकारायाः ललाटिकायाः पत्रपाश्याया अलङ्कारविशेषस्य
सीमनि पर्यन्तप्रदेशे भीमनरेन्द्रजन्मनो भैम्याश्चूर्णकुन्तला वक्र-
कुण्डलीभूताः केशाः कज्जलरूपस्य धूमस्य वल्लयः श्रेण्यः स्फुट-
मिव बभुः । किंभूता वल्लयः । मनःशिलायाश्चित्रकं तिलकं

मनःशिलाचित्रकदीपसम्भवा
भ्रमीभृतः कज्जलधूमवल्लयः ॥ ३३ ॥
अपाङ्गमालिङ्ग्य तदीयमुच्चकै-
रदीपि रेखा जनिताञ्जनेन या ।
अपाति सूत्रं तदिव द्वितीयया
वयःश्रिया वर्द्धयितुं विलोचने ॥ ३४ ॥

तद्रूपो यो दीपः तस्मात्सम्भवो यासान्ताः । तथा भ्रमीः भङ्गुरा वक्रीभावान् बिभ्रति भृतः धारयन्त्यः । नलस्य मनःशिलाति लकेनैव कामोद्दीपनात् तस्य दीपत्वं । धूपधूमसम्भवा कज्जलश्रेणिः किल भ्रमियुक्ता भवति । पत्रपाश्या ललाटिकेत्यमरः । कर्णललाटात् कनलङ्कारे (पा० ४।३।६५) इति कन् ॥ ३३ ॥

श्लोकचतुष्टयेन कज्जलालङ्कारं वर्णयति । अपाङ्गमिति ॥ अञ्जनेन जनिता या रेखा सा तदीयमपाङ्गमालिङ्ग्य स्पृष्ट्वा उच्चकैर्नितरामदीपि शुशुभे । द्वितीयया तारुण्यरूपया वयःश्रिया कर्त्र्या विलोचने भैमीनेत्रे वर्द्धयितुं शैशवापेक्षया विशाले कर्त्तुं तद्रेखादीपनं सूत्रमिव अपाति । प्राच्यो हि सुन्दर्यो नेत्रे तत्प्रान्तनिर्गतया कपोलकर्णापान्तस्पर्शिन्याञ्जनरेखया भूषयन्ति । शिल्पिनस्तु किमपि लेखितुं वर्द्धयितुं चालिख्यमानस्य वर्द्धमानस्य चाकारवक्रिमपरिहाराय मषीखटिकाद्युपलिप्तसूत्राभिघातेन रेखापातनं कुर्व्वन्ति । यद्यपि नेत्रयोर्वृद्धिर्नास्ति तथापि

अनङ्गलीलाभिरपाङ्गधाविनः
कनीनिका नीलमणेः पुनः पुनः ।
तमिस्रवंशप्रभवेन रश्मिना
स्वपद्धतिः सा किमरञ्जि नाञ्जनैः ॥ ३५ ॥
असेविषातां सुषमां विदर्भजा-
दृशाववाप्याञ्जनरेखयान्वयं ।

शैशवापेक्षया तारुण्येन कटाक्षविक्षेपादिविलासवशाद्दैर्घ्यप्रतीते दैर्घ्यकरणार्थं सूत्रपातो युक्तः । नेत्रे कज्जलाञ्चिते इति भावः ॥ ३४ ॥

अनङ्गेति । अनङ्गलीलाभिः कटाक्षविक्षेपरूपैः कामविलासैः कृत्वा पुनः पुनरपाङ्गधाविनो नेत्रप्रान्तस्पर्शिनः कनीनिका नीलमणेर्नेत्रतारकारूपस्येन्द्रनीलरत्नस्य तमिस्रवंशप्रभवेनाथ च श्यामान्वयजेनातिकृष्णेन रश्मिना सकज्जलरेखारूपा सा स्वपद्धतिर्निजागमनसरणिः किमरञ्जि अञ्जनैर्न । सदा तन्मार्गगमनेन स्वसम्बन्धात्तारकानीलमणिकिरणैरेव नेत्रप्रान्तो नीलीकृतो न तु कज्जलैरिति उत्प्रेक्षा । कामोल्लिखितनिरतिशयकटाक्षश्रीतुल्याञ्जनशोभालङ्कारतां जगामेति भावः ॥ ३५ ॥

असेविषातामिति । विदर्भजादृशौ अञ्जनरेखया अन्वयं सम्बन्धमवाप्य स्मरेण बाणीकृतयोर्बाणत्वं प्रापितयोः पयोजयोः नीलोत्पलयोः सुषमां परमां शोभां असेविषातां अलभेतां । किंभूतयोः । सव्यापसव्यबाणाकर्षणाद्भुजद्वयेऽधिकरणे ज्याकिण

भुजद्वयज्याकिणपद्धतिस्पृशोः
स्मरेण बाणीकृतयोः पयोजयोः ॥ ३६ ॥

तदक्षितत्कालतुलागसा नखं
निखाय कृष्णस्य मृगस्य चक्षुषी ।
विधिर्यदुद्धर्त्तुमियेष तत्तयो-
रदूरवर्त्तिक्षतता स्म शंसति ॥ ३७ ॥

पद्धतिः ज्याघातजवैवर्ण्यरूपकिणमार्गः तां स्पृशत इति स्पृशौ तयोः । नलमुद्दिश्याकर्णबाणाकर्षणात् कर्णान्तविश्रान्तयोर्नेत्रनीलोत्पलबाणयोर्भुजज्याकिणसम्भावना युक्ता । अञ्जनरेखे किणतुल्ये नेत्रे च स्मरनीलोत्पलबाणतुल्ये इति भावः ॥ ३६ ॥

तदक्षीति। विधिर्ब्रह्मा तदक्ष्णोर्मृगनेत्राधिकयोर्भैमीनेत्रयोः तत्काले तस्मिन् पाणिग्रहोचिताञ्जनप्रसाधनसमये तुला साम्यकरणं तद्रूपेणागसाऽपराधेन हेतुना नखं निखाय कृष्णस्य कृष्णसारहरिणस्य चक्षुषी उद्धर्त्तुं उन्मूलयितुं यत् इयेष अभिललाष तयोः कृष्णसारनेत्रयोः अदूरवर्त्ति समीपवर्त्ति यत् क्षतं तस्य भावस्तत्ता सा तन्नखनिखननकर्म्म शंसति स्म। क्षतमाख्यत स्फुटमिति पाठे स्फुटं प्रकटमुत्प्रेक्षायां वा अदूरवर्त्ति च क्षतं ययोस्ते अदूरवर्त्तिक्षते तयोर्भाव इति वा। मृगनेत्रसमीपे नखनिखससाकारं क्षतं भवति॥ ३७ ॥

विलोचनाभ्यामतिमात्रपीडिते
ऽवतंसनीलाम्बुरुहद्वयीं खलु।
तयोः प्रतिद्वन्द्विधियाऽधिरोपया-
म्बभूवतुर्भीमसुताश्रुती ततः॥ ३८॥
धृतं वतंसोत्पलयुग्ममेतया
व्यराजदस्यां पतिते दृशाविव।

श्लोकद्वयेनावतंसनीलोत्पले वर्णयति। विलोचनाभ्यामिति। खलु यतः भीमसुतायाः श्रुती कर्णौ विलोचनाभ्यां आकर्णपूर्णत्वादतिमात्रमतितरां पीडिते पराक्रान्ते ततस्तस्मादात्मपराभवकारिणोस्तयोर्नेत्रयोः प्रतिद्वन्द्विनौ तुल्यबले इमे नीलोत्पले इति धिया बुद्ध्येव स्वशिरसि अवतंसरूपनीलाम्बुरुहद्वयीं अधिरोपयाम्बभूवतुः आरोपितवन्तौ दधतुरित्यर्थः। लुप्तोत्प्रेक्षा। खलु वोत्प्रेक्षायां। अन्योऽप्यधिकेन पराभूतस्तस्मादात्मानं तद्विरोधिनं सन्निधापयति। नीलोत्पलकरणीयं कर्म नेत्राभ्यामेव कृतं न तु नीलोत्पलाभ्यामधिकं किञ्चित् कृतं, नीलोत्पले कर्णभूषणीकृते इति च भावः॥ ३८॥

धृतमिति। एतया कर्णयोरुपरि धृतं वतंसोत्पलयुग्मं, भैमीं तत्कर्णौ वा पश्यतः कस्यचिद्रसिकस्य विलासिनो दृशाविव व्यराजत्। किंभूतस्य। मनोभुवा कामेन अविवेकित्वमेवान्ध्यं उद्धूतनेत्रत्वं गमितस्य प्रापितस्य। किंभूते दृशौ। अस्यां भैम्यां पतिते निषण्णे। ततो रसिकत्वादेवापरावृत्य लगित्वा सम्बध्य स्थिते

मनोभुवान्ध्यङ्गमितस्य पश्यतः
स्थिते लगित्वा रसिकस्य कस्यचित् ॥ ३९ ॥
विदर्भपुत्रीश्रवणावतंसिका-
मणीमहःकिंशुककार्म्मुकोदरे ।
उदीतनेत्रोत्पलबाणसम्भृति-
र्नलं परं लक्ष्यमवैक्षत स्मरः ॥ ४० ॥

स्थिरतरे इत्युत्प्रेक्षा। कश्चिद्विलासी भैम्याः कर्णौ प्रथममेव दृष्टवान् ततस्तस्य नेत्रे कर्णयोरेव लग्ने स्थिते नोत्पलद्वयमित्यर्थः। नेत्रगमनादेवास्यान्ध्यं। अन्यदपि पतितं वस्तु कुत्रापि लगित्वा तिष्ठति ॥ ३९ ॥

रत्नावतंसं वर्णयति। विदर्भेति। स्मरः नलं परं केवलं श्रेष्ठं वा लक्ष्यमवैक्षत आगच्छन्तं प्रतीक्षितवानित्यर्थः। किंभूतः। विदर्भपुत्रीश्रवणयोरुपरि अवतंसिकाया मण्यः भूषणभूता या माणिक्यादिरत्नखचितसुवर्णकम्बिका तत्सम्बन्धीनि माणिक्यादिरत्नानि तासां महस्तेजस्तदेव किंशुककार्मुकं पलाशकुसुमधनुः तस्योदरे विषये उदीता समुत्पन्ना नेत्रयोरवतंसोत्पलयोश्च तद्रूपाणां चतुर्णां बाणानां सम्भृतिः सामग्री नेत्ररूपाभ्यां वा नीलोत्पलाभ्यां बाणसामग्री यस्य। एवंविधचापे समारोपितबाण इत्यर्थः। स्वलङ्कृतकर्णकज्जलाञ्चितनेत्रसौन्दर्य्यविलोकनमात्रेण नलः कामपरो भविष्यतीति भावः। अवतंसिकापदेनैव श्रवणलब्धावप्यतिसन्निधिसूचनार्थं श्रवणपदप्रयोगो युक्तः। लक्ष्यस्मरणात स्मरः ॥ ४० ॥

अनाचरत्तथ्यमृषाविचारणा
तदाननं कर्णलतायुगेन किं।
बबन्ध जित्वा मणिकुण्डले विधू
द्विचन्द्रबुद्ध्या कथितावसूयकौ॥ ४१॥
अवादि भैमी परिधाप्य कुण्डले
वयस्यया‌भ्यामभितः समन्वयः।

श्लोकद्वयेन कुण्डलप्रसाधनमाह। अनाचरदिति॥ सादृश्यात् स्फुरितया द्विचन्द्रबुद्ध्या द्वौ चन्द्राविति भ्रान्तिज्ञानेनैतौ द्वौ चन्द्रौ तवोत्कर्षं न सहेते इति भैम्यास्तदाननस्य वा पुरस्तादसूयकौ स्पर्द्धाकारिणौ कथितौ प्रतिपादितौ मणिकुण्डले रत्नखचिते सुवर्णताटङ्के एवंविधौ द्वौ चन्द्रौ जित्वा तदाननं-कर्त्तृ, कर्णलतायुगेन कृत्वा बबन्ध किं। ननु द्विचन्द्रबुद्धेरेव स्वरूपेणासत्यत्वात् स्त्रीत्वाच्च तदुक्तेऽर्थे कथं तस्य प्रवृत्तिरित्याशङ्क्याह। किम्भूतं। तथ्यमृषा विचारणां अनया कथितं सत्यमसत्यं वेति विमर्शनमनाचरदकुर्व्वाणं। शोभासम्पन्मदेन मत्तत्वादित्यर्थः। किं किमिति बबन्ध न अपित्वनुचितमेतत्कृतं। यतः सत्यासत्यविचारणाभावादिति भाव इति वा। अन्योऽपि दुर्मदः सत्यासत्यविचारमकुर्व्वन् कस्यचिदसूयकस्य वचनादनपराधिनमपि कञ्चित्पाशादिना बध्नाति। चन्द्राकारे मणिताटङ्के तया धृते इति भावः॥ ४१॥

अवादीति। कयाचिद्वयस्यया सख्या कुण्डले परिधाप्य

त्वदाननेन्दोः प्रियकामजन्मनि
अयत्ययं दौरधरीं धुरं ध्रुवं ॥ ४२ ॥
निवेशितं यावकरागदीप्तये
लगत्तदीयाधरसीम्नि सिक्थकं ।

कर्णयोर्निश्चिप्य भैमी अवादि इत्युक्ता। इति किं। हे भैमि तवाननेन्दोः आभ्यां कुण्डलाभ्यां अभित उभयोः पार्श्वयोरयं समन्वयः समीचीनःसम्बन्धः। प्रियस्य नलस्य कामो रत्यभिलाषः तस्य जन्मन्युत्पत्तौ विषये दौरधरीं पूर्वोत्तरराशिस्थगुरुशुक्रयोर्मध्यगराशिस्थचन्द्रस्य दुर्धराख्यस्य महायोगस्य सम्बन्धिनीं धुरं भारं ध्रुवं निश्चितं आश्रयतीति। ध्रुवमुत्प्रेक्षायां वा। दुर्धराख्ये महायोगे जातपुत्रादिर्यथा वृद्धिं प्राप्नोति तथा कुण्डलालङ्कृतमुखचन्द्रदर्शनमात्रेण नलस्य रमणाभिलाषो वृद्धिं प्राप्नोतीति भावः। गुरुभार्गवयोर्योगश्चन्द्रेणैव यदा भवेत्। तदा तु दुर्धरायोग इति ज्योतिर्विदांमतमिति शास्त्रादनुसन्धेयम् ॥ ४२ ॥

अधरप्रसाधनमाह। निवेशितमिति ॥ तदीयोऽधरोष्ठस्तस्य सीम्नि ऊर्द्धदेशे यावकस्यालक्तकस्य रागो लोहितिमा तस्य दीप्तये प्रकाशनाय निवेशितं न्यस्तं यच्चानेन लगत्संलग्नं सिक्थकं मधूच्छिष्टं, स्वस्य जनकानि मधूनि हीनरसतया परित्यज्य माधूर्य्यातिशयात् सुधयाऽमृतस्य सधर्म्मिणि तुल्यायां तत्रैवाधरसीम्नि निवस्तुं नित्यं स्थातुं उत्सुकमुत्कण्ठितमिव रराज। सुधया

रराज तत्रैव निवस्तुमुत्सुकं
मधूनि निर्धूय सुधासधर्म्मिणि ॥ ४३ ॥
स्वरेण वीणेत्यविशेषणं पुरा
ऽस्फुरत्तदीया खलु कण्ठकन्दली ।
अवाप्य तन्त्रीरथ सप्त मुक्तिका-
सरानराजत् परिवादिनी स्फुटं ॥ ४४ ॥

सिक्थकस्य कदाचिदप्यसम्बन्धात्तल्लाभात्तां परित्यक्तुमशक्तमिव तत्रैव स्थितमित्यर्थः । प्रसाधिका अलक्तकस्य स्थित्यर्थं अधरे सिक्थकं निवेशयन्ति, अधरस्य मधुनोऽधिकत्वं सूचितं । अन्यदपि हीनमाश्रयं परित्यज्योत्तममाश्रयति । लुप्तोत्प्रेक्षा । सधर्म्मिणि धर्मादनिच् केवलात् (पा० ५।४।१२४) इति धर्म्मशब्दादनिचि, समानस्य छन्दसीत्यत्र (पा० ६।३।८४) छन्दसीति योगविभागात् समानस्य स आदेशः । समानधर्म्मा या सा सधर्म्मा तस्यां, मन इति (पा० ४।१।११) न ङीप् ॥ ४३ ॥

कण्ठप्रसाधनमाह । स्वरेणेति । तदीया कण्ठ एव कन्दली अतिमौकुमार्य्यादिगुणत्वाद्द्रढोद्गतप्रथमाङ्कुरदण्डोऽतिमधुरेण स्वरेण कृत्वा पुरा पूर्व्वं अविशेषणं विशेषणरहितं यथा तथा सामान्येन वीणेयमित्येव खलु निश्चितं अस्फुरत् अभासत, न तु रुद्रवीणादिबहुवीणाभेदेषु विशिष्टतयेयमिदंसञ्ज्ञेत्यर्थः । अथालङ्कारसमये सप्त मुक्तिकासरान् सूत्रप्रोतमौक्तिकहारानेव तर्ज्जनीमध्यमाभिघातोत्पद्यमानध्वनिव्यञ्जितपञ्चमादिरागाः

उपास्यमानाविव शिक्षितुं ततो
मृदुत्वमप्रौढमृणालनालया ।
विरेजतुर्माङ्गलिकेन सङ्गतौ
भुजौ सुदत्या वलयेन कम्बुनः ॥ ४५ ॥

पट्टसूत्रादिरचिताः सप्त तन्त्रीरवाप्य, विपञ्ची सा तु तन्त्रीभिः सप्तभिः परिवादिनीत्यमरवचनात् स्फुटं प्रकटं परिवादिनीति विशिष्टसञ्ज्ञा सती अराजत् अशोभत । स्फुटमुत्प्रेक्षायां वा । वीणाभ्योऽपि मधुरतरस्वरा, कण्ठकन्दलीसप्तसरमुक्ताहारालङ्कृता चेति भावः ॥ ४४ ॥

भुजप्रसाधनमाह । उपेति ॥ माङ्गलिकेन मङ्गलं प्रयोजनमस्य मङ्गलार्थरचितेन कम्बुनः शङ्खस्य वलयेन कङ्कणेन सङ्गतौ युक्तौ सुदत्या भैम्या भुजौ विरेजतुः । उत्प्रेक्ष्यते । अप्रौढा बाला या मृणालनाला तया बिसदण्डेन ततः भुजाभ्यां सकाशात् मृदुत्वं शिक्षितुं उपास्यमानाविव सेव्यमानाविव । मृणालादपि कोमलतरौ भुजावित्यर्थः । गौडदेशे विवाहकाले शङ्खवलयधारणमाचारः । बालेन चाभ्यासः सुकर इत्यप्रौढपदं । नालानालमथास्त्रियामित्यपि क्वचित्पाठात् महाकविप्रयोगान्नालाशब्द आबन्तोऽपि । ततः । आख्यातोपयोग (पा० १।४।२९) इत्यपादानलम् । माङ्गलिकेन । प्रयोजनमिति (पा० ५।१।१०९) ठञ् ॥ ४५ ॥

पदद्वयेऽस्या नवयावरञ्जना
जनैस्तदानीमुदनीयतार्पिता।
चिराय पद्मौ परिरभ्य जाग्रती
निशीव विश्लिष्य नवा रविद्युतिः॥ ४६॥
कृतापराधः सुतनोरनन्तरं
विचिन्त्य कान्तेन समं समागमम्।

श्लोकद्वयेन पदप्रसाधनमाह। पदेति॥ तदानीं तस्मिन् प्रसाधनसमये अस्याः पदद्वये ऽर्पिता रचिता नवा आर्द्रा यावकरञ्जना अलक्तकरञ्जना जनैर्नवोदयसमये जाता अतिरक्ता रविद्युतिरिव उदनीयत अतर्क्यत। किम्भूता रविद्युतिः। निशि रात्रौ सूर्य्यस्यास्तसमयवशात् पद्माभ्यां सह विश्लिष्य दिने पुनः पद्मौ चिराय परिरभ्य जाग्रती तिष्ठन्ती। रविद्युतिर्यथा पद्मेषु श्रियमधिकां करोति तथा यावकरञ्जना तत्पादयोरिति भैमीचरणौ पद्मतुल्याविति भावः। चिराय विश्लिष्येति वा। चिरवियुक्तावन्योन्यं प्राप्य गाढमालिङ्ग्य तिष्ठत इति उक्तिः॥ ४६॥

कृतेति॥ पूर्व्वं विरहावस्थायां बहुतरसन्तापकारित्वात् सुतनोर्भैम्याः कृतोऽपराधो येन स कुसुमेषुः काम एव पावकः अनन्तरं तु अधुना कान्तेन नलेन समं सह भैम्याः समागमं विचिन्त्य स्फुटं निश्चितं चरणौ सिषेवे अपराधमार्जनायेत्यर्थः। कामस्याग्नित्वे हेतुमाह। यतः सोऽग्निः रागचिह्नः रागो लोहितिमैव चिह्नं यस्य रक्तिम्ना वह्निरयमिति ज्ञायते। अथवा अन-

स्फुटं सिषेवे कुसुमेषुपावकः
स रागचिह्नश्चरणौ न यावकः ॥ ४७ ॥
स्वयं तदङ्गेषु गतेषु चारुतां
परस्परेणैव विभूषितेषु च ।

राग एव चिह्नं यस्य। अनुराग एव हि काममनुभावयति। तस्मात् कामाग्निरेवायं न लयं यावकोऽलक्तकः स पावको नेति वा। अन्योऽपि प्रोषितभर्तृकायाः कस्याश्चित् कृतापराधः संस्तत्प्रियागमनं विचिन्त्यापराधमार्जनाय तत्पादयोः पतति। सालक्तक तत्पददर्शनादेव नलस्य कामोद्रेको भवितेति भावः ॥ ४७ ॥

सहजशोभामाहात्म्यं वर्णयति । स्वयमिति ॥ स्वयं भूषणं विनैव परस्परानपेक्ष्यश्च तस्या भैम्या अङ्गेषु मुखाद्यवयवेषु प्रत्येकं स्वीयस्वीयसौष्ठववशात्तरुणिमारोहवशाच्च चारुतां गतेषु सत्सु परस्परेणैवान्योन्येनैव च विशेषेण भूषितेषु प्रत्येकं सौन्दर्य्ये सत्यपि अन्योन्यसाहचर्य्यवशात् करानुगुणौ भुजौ भुजानुगुणौ करावित्येकस्याङ्गस्यापरेण तस्य च तेनैव सर्व्वाङ्गयोग्याङ्गसामग्रीसङ्घट्टनात् सुन्दरतरेषु सत्सु तानि मनःशिलातिलकादीनि अलङ्करणानि किमूचिरे अपि तु स्वकरणप्रयोजनं न किञ्चिदूचुः। यद्यस्मात्तेषामलङ्करणानां तत्पूर्व्वोक्तं प्रकारं करणं निर्म्माणं वृथैव बभूव दुःखवशान्न किञ्चिदूचुः। किमप्यधिकं न चक्रुरित्यर्थः। आश्रितत्वादनिराकार्य्यत्वेन स्थितान्येवेति भावः। तत्तेषां करणं वृथैवाभूत्। अत एव करणमलं इत्य-

किमूचिरेऽलङ्करणानि तानि तत्
वृथैव तेषां करणं बभूव यत् ॥ ४८ ॥

क्रमाधिकामुत्तरमुत्तरं श्रियं
पुपोष यां भूषणचुम्बनैरियं।
पुरः पुरस्तस्थुषि रामणीयके
तया ववाधेऽवधिबुद्धिधोरणिः ॥ ४९ ॥

नन्वयनाम सान्वयं जातमिति भावः। अलं वृथाकरणं येषामिति च बहुव्रीहिणापि सान्वयं जातमित्यर्थः। पूर्व्वमलंशब्दस्य भूषणार्थत्वं पश्चादप्रयोजकत्वान्निषिद्धार्थत्वमिति चेत्यर्थः। किमूहिरे इति पाठे किमर्थं धृतानि न जाने इति शेष इति वा ॥ ४८ ॥

भूषणकान्त्युत्कर्षं वर्णयति। क्रमेति। इयं भैमी भूषणचुम्बनैर्भूषणसम्बन्धैः कृत्वा उत्तरमुत्तरं यथा तथाऽग्रे क्रमेण पूर्व्वपूर्व्वभूषणापेक्षया उत्तरोत्तरभूषणेनाधिकामतिशयितां यां श्रियं पुपोष तयालङ्कारशोभया रामणीयके सौन्दर्य्ये पुरः पुरस्तस्थुषि स्थिरतरे सति अवधिः बुद्धेरियत्ता बुद्धेर्धोरणिः परम्परा ववाधे वाधिता। इतोऽन्यद्रामणीयकं नास्तीति यदि बुद्धिर्भवेत्तदा अवधिर्भवेत् पूर्व्वरामणीयकेयत्तावाधेन रामणीयकान्तरेण पुनर्न स्फुरति सति अवधिर्वाधित इत्यर्थः। तस्या भूषणे शोभा निरवधिरभूदिति भावः। धोरणिरिति देश्यशब्दः ॥ ४९ ॥

मणीसनाभौ मुकुरस्य मण्डले
बभौ निजास्यप्रतिविम्बदर्शिनी।
विधोरदूरं स्वमुखं विधाय सा
निरूपयन्तीव विशेषमेतयोः॥ ५०॥
जितस्तयास्येन कलानिधिर्दधे
द्विचन्द्रधीसाक्षिकमायतां।

मणीति। मणीसनाभौ मौक्तिकादिरत्नतुल्येऽतिस्वच्छे मुकुरस्य मण्डले दर्पणतले पुनर्निजास्यस्य स्वमुखस्य दर्पणसङ्क्रान्तप्रतिविम्बं पश्यत्येवंशीला दर्शिनी सा भैमी मुखं विधोः दर्पणरूपस्य प्रतिविम्बरूपस्य वा चन्द्रस्य अदूरं निकटवर्त्ति विधाय कृत्वा एतयोर्मुखचन्द्रयोर्विशेषं तारतम्यं निरूपयन्तीव विचारयन्तीव बभौ। सन्निधौ हि विशेषः स्फुरति। विम्बापेक्षया प्रतिविम्बस्य न्यूनत्वात्तस्यैव चन्द्रत्वमिति विशेषो निरूपित इति भावः। भूषणानन्तरमादर्शविलोकनमिति स्त्रीजातिस्वभावः। प्रतिविम्बदर्शिनी। आभीक्ष्ण्ये णिनिः॥ ५०॥

जित इति। तया आस्येन जितः कलानिधिश्चन्द्रो नेत्रचिपिटीकरणादिनिमित्ता हस्तस्थितादर्शनिमित्ता वा द्वौ चन्द्राविति धीर्यस्य पुरुषस्य स एव साक्षी साक्षाद्द्रष्टा यस्याः सा माया यस्यैवम्भूतः कायो यस्य चन्द्रस्य तस्य भावस्तत्ता तां दधे बभार। एकत्वादहं भैमीमुखेन जित इति मायामयानेककायत्वं चन्द्रेण धृत इत्यर्थः। अत्र च पूर्व्वोक्तप्रकारद्वयेन

तथापि जिग्ये युगपत् सखीयुग-
प्रदर्शितादर्शबहुभविष्णुना ॥ ५१ ॥
किमालियुग्मार्पितदर्पणद्वये
तदास्यमेकं बहु चान्यदम्बुजम् ।

साक्षिणो द्वौ चन्द्राविति बुद्धिरेव प्रमाणं।कलानिधिपदेनानेक-
शिल्पज्ञत्वान्मायिककायव्यूहनिर्म्माणकलामपि वेत्तीति सूचितं ।
द्वाभ्यामेकजयस्य सुकरत्वात् करस्थितादर्शच्छलेनानेककायत्वं
यद्यप्यङ्गीकृतं तथापि युगपत् समकालं सखीयुगेन प्रकर्षेण दर्शि-
ताभ्यामादर्शाभ्यां कृत्वा तयोर्बाहुना अनेकेनापि बहुभविष्णुना
बहुभवनशीलेन सता तन्मुखेन चन्द्रो जिग्ये जित एव। हस्तस्थ-
दर्पणसहितसखीदर्पणद्वयं प्रतिफलितमुखप्रतिबिम्बैः सह बिम्ब-
भूतस्य मुखस्यानेकत्वान्मुखतुल्यदर्पणद्वयेन सह बिम्बभूतस्य मु-
खस्य स्वसदृशैरादर्शैः स्वप्रतिबिम्बैः सह वा अनेकत्वात् पञ्चसु
द्वयोर्विजयस्य सुकरत्वादित्यर्थः । पूर्व्वं शोभया जितोऽपि स-
ङ्ख्याधिक्येन मुखं जेतुमारब्धवांस्तथापि मुखस्याधिकतरसङ्ख्य-
त्वान्न शशाकेति भावः । बहुभविष्णुनेति च्विः ॥ ५१ ॥

किमिति। आलियुग्मेनार्पिते दर्शिते दर्पणद्वये बहुषु प्रति-
बिम्बेषु मध्ये एकमेकं संख्यायोग्यमथ च मुख्यं तदास्यं भैमीमुखं
अन्यच्च हिमेषु शिशिरर्त्तुषु अथ च काम्येषु केदारादिहिमेषु
निर्वाप्य निवार्य्य निर्वाणं विनाशमथ च मोक्षं कृत्वा प्राप्येति
यावत्, निशासमाधिभिः रात्रिसम्बन्धिभिः सङ्कोचैरथ च पर-

हिमेषु निर्वाप्य निशासमाधिभि-
स्तदीयसालोक्यमितं व्यलोक्यत ॥ ५२ ॥
पलाशदामेति मिलच्छिलीमुखै-
र्वृता विभूषामणिरश्मिकार्मुकैः ।
अलक्षि लक्ष्यैर्धनुषामसौ तदा
रतीशसर्व्वस्वतयाभिरक्षिता ॥ ५३ ॥

मात्मदर्शनोपायैः कृत्वा तदीयं भैमीमुखसम्बन्धि सालोक्यं सादृश्यमथ च सालोक्यलक्षणां मुक्तिं इतं प्राप्तं बहु अनेकमम्बुजं किं लोकैर्व्यलोक्यत । किमुत्प्रेक्षायां । भैमीमुखप्रतिविम्बतो हीनत्वात् पद्मानि केदारादिहिमचूर्णनानि भूत्वा तन्मुखप्रतिविम्बस्य समीपे स्थितानि किमित्यर्थः । पद्मेभ्यो मुखमधिकमिति भावः । अम्बुजमिति जात्येकवचनं । निर्वापणं निर्वापस्तं करोति णिजन्तात्ल्यपि निर्वाप्येति हिमेष्वात्मानं विनाश्येत्यर्थः । सालोक्यं । समानस्येति योगविभागात् स आदेशः ॥ ५२ ॥

पलाशेति । असौ भैमी पलाशानां किंशुकानां दाम मालेयमिति भ्रान्त्या मिलन्त आगच्छन्तः शिलीमुखा भ्रमरा यत्रैवम्भूतैरथ च किंशुकानां धनुराकारत्वात् मिलद्बाणैर्विभूषामणीनां विशिष्टालङ्कारसम्बन्धिमाणिक्यादिरत्नानां रश्मिरूपैः कार्मुकैरिन्द्रधनुर्भिर्वृता वेष्टिता सती तदा भूषणानन्तरकाले रतीशस्य कामस्य सर्व्वस्वतया परमधनत्वेन हेतुना धनुषां लक्ष्यैर्लक्ष्यसङ्ख्यैर्धनुर्भिः अभि सामस्त्येन रक्षितेव लोकैरलक्षि

विशेषतीर्थैरिव जह्नुनन्दिनी
गुणैरिवाजानिकरागभूमिता।
जगाम भाग्यैरिव नीतिरुज्ज्वलै-
र्विभूषणैस्तत्सुषमा महार्घताम्॥ ५४॥

न्वङ्किता। कुन्ताः प्रविशन्तीतिवद्धनुषां धनुर्द्धराणामित्यर्थः। कान्तिसाम्यान्मित्रतया नलसर्व्वस्वभैमीं कामो रक्षतीत्यर्थः॥५३॥

विशेषेति। तस्या भैम्याः सुषमा स्वाभाविकी परमा शोभा विशिष्टैर्भूषणैः कृत्वा महार्घतामतिश्रैष्ठ्यं जगाम। का कैरिव। जह्नुनन्दिनी स्वत एव श्रेष्ठापि गङ्गा विशेषतीर्थैः प्रयागादिभिरिव। तथा आजानिकरागभूमिता जननं जनः न जनोऽजनः अजनेन निर्वृत्तं। तेन निर्वृत्तं (पा० ५।१।७९) इति ठक् इकादेशः अनुशतिकादित्वादुभयपदवृद्धिः। आजानिकः सहजो रागस्तस्य भूमिः स्थानं पुत्रादिस्तस्य भावस्तत्ता सहजा स्नेहपात्रता गुणैः शीललावण्यादिभिरिव। तथा नीतिरुज्ज्वलैर्नीतिसाधितफलप्रतिबन्धनाशनात् प्रकाशैर्भाग्यैः पूर्व्वकृतशुभकर्म्मभिरिव। भागीरथी सर्व्वत्र श्रेष्ठैव परं प्रयागादौ माहात्म्यातिशयः। यत्रानुरागस्तत्र श्रैष्ठ्यं परंतु शीलादिना अनुरागस्य निरतिशयत्वं। तथा नीतिमार्गानुसरणं श्रेष्ठमेव परन्तूज्ज्वलैर्भाग्यैरनुगृहीतं श्रेष्ठतरं भवतीत्यर्थः। मण्डनैस्तस्या निरतिशया शोभाऽभूदिति भावः। उज्ज्वलैरिति उपमानोपमेयैः सम्बन्धनीयं। अशुभकर्म्मणोऽपि भाग्यस्याभिधायकत्वात्

नलात् स्ववश्वस्त्यमनाप्नुमानता
नृपप्रिया भैमिमहोत्सवागताः ।
तदङ्घ्रिलाक्षामदधन्त मङ्गलं
शिरःसु सिन्दूरमिव प्रियायुषे ॥ ५५ ॥

तन्निवृत्त्यर्थं भाग्यविशेषणमेव वा। उपमानत्रयेण क्रमेण पावित्र्यं गुणवत्त्वं भाग्यवत्त्वञ्च सूचितं। विशिष्यन्ते इति विशेषाः पचाद्यच् ॥ ५४ ॥

नलादिति। नलात् सकाशात् स्वस्यात्मनो वैश्वस्त्यं वैधव्यमनाप्नुं अप्राप्नुमानता भैमीचरणप्रणामप्रवणा भीमस्य कन्यास्वयम्वररूपे महोत्सवे आकारिताः सत्य आगता नृपप्रिया अन्यराजमहिष्यः प्रियायुषे स्वप्राणेश्वरजीवनाय मङ्गलरूपसिन्दूरमिव स्वशिरःसु तस्या भैम्या अङ्घ्र्योश्चरणयोर्लाक्षां अलक्तकं अदधन्त अधारयन्। पत्युरायुर्विवृद्धये अन्याः स्त्रियः ता एव वा यथा शिरःसु सिन्दूरं धारयन्ति। तथा प्रणामप्रसन्नया भैम्या एतदीयाः प्राणेशा रक्षणीया इति प्रार्थितो नलः स्वप्राणेशान् रक्षिष्यतीति बुद्ध्या स्वभर्तृचिरञ्जीवनाय भैमीचरणयोः प्रणामं कृतवत्य इति भावः। प्रणामादेव वा आर्द्रा लाक्षा लग्ना। विश्वस्ताविधवे समे इत्यमरः। वैश्वस्त्यं। ब्राह्मणादित्वात् ष्यञ् (पा० ५।१।१२४)। दध धारणे, लङि।

हरिद्रा कुङ्कुमञ्चैव सिन्दूरं कज्जलं तथा।
कूर्पासकञ्च ताम्बूलं माङ्गल्याभरणं शुभम्॥

अमोघभावेन सनाभितां गताः
प्रसन्नगीर्वाणवराक्षरस्रजाम्।
ततः प्रणम्राधिजगाम सा ह्रिया
गुरुर्गुरुब्रह्मपतिव्रताशिषः ॥ ५६ ॥
तथैव तत्कालमथानुजीविभिः
प्रसाधनासञ्जनशिल्पपारगैः।

केशसंस्कारकवरीकरकर्णविभूषणं।
भर्त्तुरायुष्यमिच्छन्ती दूरयेन्न पतिव्रता ॥
इति स्कान्दावचनम् ॥ ५५ ॥

अमोघेति। ततो मण्डनानन्तरं प्रणम्रा कृतगुर्वादिचरणप्रणामा सती ह्रिया गुरुः अधिकलज्जेत्यर्थः, सा भैमी गुर्वोः पूज्यतमयोः पित्रोस्तथा ब्राह्मणानां वाङ्मनःकायकर्म्मभिः पतिमव्यभिचरन्तीनां पतिव्रतानां वृद्धशोभनसुवासिनीनाञ्च अविधवा सुभगा अष्टपुत्रा भवेति आशिष अधिजगाम आलभत। किम्भूता आशिषः। अमोघभावेन सफलत्वेन प्रसन्नानां गीर्वाणानां देवानां पूर्व्वोक्ता वरास्तत्सम्बन्धिन्योऽक्षरस्रजो वर्णमालास्तासां सनाभितां बन्धुत्वं गताः प्राप्ताः, सत्यत्वेन तत्तुल्याः ॥ ५६ ॥

तथैवेति। तथैव भैम्या वेदिकोदरे यथा मङ्गलस्नानादि कृतं तेनैव प्रकारेण क्रमेण च तत्कालं तस्मिन्नेव कालेऽथ मङ्गलस्नानानन्तरं प्रसाधनासञ्जनं भूषणकरणं तत्सम्बन्धि शिल्पं

निजस्य पाणिग्रहणक्षणोचिता
कृता नलस्यापि विभोर्विभूषणा ॥ ५७ ॥
नृपस्य तत्राधिकृताः पुनः पुन-
र्विचार्य्य तान् बन्धमवापयन् कचान् ।

विज्ञानं कौशलं तस्य पारगैः विशेषविशेषज्ञैः शृङ्गारादिभिः अनुजीविभिः सेवकैर्निजस्य विभोः स्वस्वामिनो नलस्यापि पाणिग्रहणक्षणोचिता विवाहकाले योग्या विवाहरूपोत्सवयोग्या वाविभूषणा कृता रचिता। निजस्येति स्वयंप्रवृत्तिः सूचिता। विभोरित्यविलम्बः सूचितः। भूषयतिश्चुरादिः तस्माद्युच ॥ ५७ ॥

श्लोकद्वयेन केशप्रसाधनमाह। नृपस्येति। तत्र केशप्रसाधनेऽधिकृता नापितादयः पुनः पुनर्विचार्य्य धूपजधूमसंशोषणं कङ्कतिकादिना प्रसाधनं कृत्वा, अथ च धूपजधूमस्यापि विद्यमानत्वात् पुनः पुनस्तद्भ्रान्तिवशादेते केशा एव न धूम इति चिरान्निश्चित्य, कानि पुष्पाणि कुत्र स्थाप्यानीति योग्यायोग्यभावं विचार्य्य वा, नृपस्य तान् कचान् धम्मिल्लादिरचनाविशेषग्रन्थिरूपं बन्धं अवापयन् प्रापयामासुः। तान् कान्। यैः कचैः शरदि गरुतः पक्षान् त्यजति गरुत्पक् तस्य कलापिसंसदो मयूरसङ्घस्य सम्बन्धी कलापलीलोपनिधिः कलापलीलाया उपनिधिः साम्यमपालापि आच्छादितः, तदपेक्षयाधिकैर्जातमित्यर्थः। कलापलीलारूपो य उपनिधिः कविसमयसिद्धः प्रति-

कलापलीलोपनिधिर्गरुत्त्यजः
स यैरपालापि कलापिसंसदः ॥ ५८ ॥
पतत्त्रिणां द्राघिमशालिना धनु-
र्गुणेन संयोगजुषां मनोभुवः ।

निधिः स यैराच्छादि जित इवेत्यर्थ इति वा । नलकेशैर्विला-
सस्य गृहीतत्वात् निर्विलासतया निरर्थकं बर्हिभारं त्यजति
इति सूचनाद्गरुत्त्यज इति पदं साभिप्रायं । यैः केशैः पत्त्या-
गिन्या मयूरसंहतेः कलापशोभानिक्षेपः अपालापि गृहीत्वा
नास्तीत्यपलापितः । यः परस्य निक्षेपं गृहीत्वा न दत्त्वा परं प्रता-
रयति स राज्ञोऽधिकृतैः पुरुषैः पश्चाद्बद्धा शिक्षणीयो भवति ।
मयूराः शरदि पत्त्रान्मुञ्चन्ति । पुमानुपनिधिर्न्यास इत्यमरः ।
अवापयन् । आप्नोतेर्ण्यन्ताल् लुङि द्वितीयस्यैकाचो द्वित्वं गत्यर्थ-
त्वादणौ कर्तुर्णौ कर्मत्वम् । अलम्भयन्निति वा पाठः ॥ ५८ ॥

पतत्त्रिणामिति । अर्जिता लब्धा मार्जनश्रीरभ्यङ्गजनिता स्नि-
ग्धशोभा येन । तथा द्राघिम्ना शालते एवंशीलेन तस्य नलस्य
कचेन केशपाशेन सह समेत्य सम्बन्धं प्राप्य कुड्मलैर्मल्लिकादि-
कोरकैः कर्तृभिः, द्राघिमशालिना तथा अर्जितमार्जनश्रिया
पुनः पुनः अङ्गुल्यादिना घर्षणाल्लब्धमार्जनसम्बन्धिस्निग्धशोभे-
नेव भ्रमरमालारूपेण धनुर्गुणेन संयोगजुषां सहितानां मनो-
भुवः कामस्य पतत्त्रिणां सौभाग्यं सादृश्यमालम्भि केशपाशस्य
भ्रमरमालारूपेण कामधनुर्गुणेन साम्यं । कोरकाणाञ्च पुष्प-

कचेन तस्यार्जितमार्जनश्रिया
समेत्य सौभाग्यमलम्भि कुड्मलैः ॥ ५९ ॥
अनर्घ्यरत्नौघमयेन मण्डितो
रराज राजा मुकुटेन मूर्द्धनि ।
वनीपकानां स हि कल्पभूरुह-
स्ततो विमुञ्चन्निव मञ्जुमञ्जरीं ॥ ६० ॥
नलस्य भाले मणिवीरपट्टिका-
निभेन लग्नः परिधिर्विधोर्बभौ ।

रूपैर्बाणैः नलस्य च कामेनेत्यर्थः । अतिविशालनीलतरकलि कालङ्कृतनलकेशपाशदर्शनमात्रेण भैमी कामवशा भवितेति भावः । कचेन । जात्येकवचनम् ॥ ५९ ॥

मूर्द्धप्रसाधनमाह । अनर्घ्येति ॥ अनर्घ्यरत्नौघमयेन अमूल्य-दिव्यमाणिक्यादिरत्नघटितेन मुकुटेन मूर्द्धनि मण्डितो राजा स नलः हि यस्माद्वनीपकानां याचकानां अतिधनदानात् कल्प-भूरुहः कल्पवृक्षस्ततो हेतोः मञ्जुमञ्जरीं कल्पवृक्षोचितां रम्यां रत्नाङ्कुरपरम्परां विमुञ्चन्नुद्गिरन्निव रराज । वृक्षो हि बाल-पल्लवपुष्पफलयुक्तां मञ्जरीमुद्गिरति । कल्पवृक्षस्य मञ्जरी रत्न-फलत्वाद्रत्नमयी । मञ्जरीस्थाने मुकुटस्तत्किरणा वा । मञ्जर्या-कारा मुकुटमणिकिरणा ऊर्द्धं निर्गच्छन्तीत्यर्थः । अर्घमर्हतीत्यर्घ्यं दंडादित्वाद्यः । मञ्जरीरिति च पाठः ॥ ६० ॥

भालप्रसाधनमाह । नलस्येति । रत्नखचिताया वीरसम्ब-

तदा शशाङ्काधिकरूपतां गते
तदानने मातुमशक्नुवन्निव॥ ६१॥
बभूव भैम्याः खलु मानसौकसं
जिघांसतो धैर्य्यभरं मनोभुवः।

न्विन्या वीरपुरुषधार्य्यायां वीरपट्टिकानाम्ना वाऽऽख्यातायाः सुवर्णपट्टिकायाः श्रवणयुगपश्चाद्भागमात्रव्यापिन्या निभेन व्याजेन नलस्य भाले ललाटे लग्नः सन् विधोश्चन्द्रस्य परिवेषो बभौ। मुखचन्द्रेऽपि चेत् परिवेशः सम्पूर्णमण्डले किमिति न दृश्यत इत्यत आह। किं कुर्व्वन्निव। तदा प्रियासङ्गमकाले भूषणकाले च हर्षवशाद्भूषणवशाच्च शशाङ्काधिकरूपतां चन्द्रापेक्षयाधिकपरिमाणत्वं गते प्राप्ते तदानने मातुं तुल्यप्रमाणताञ्च प्राप्तुमशक्नुवन्निव। अल्पपरिमाणस्य यदलङ्करणं तदधिकपरिमाणस्यैकदेश एव तिष्ठति न तु सर्व्वं मण्डयितुं शक्नोति तस्मात् मुखैकदेशे भाल एव परिधिः स्थित इति युक्तमिति भावः। मणिकिरणानां मण्डलाकारत्वेन पट्टिकायाः परिवेशाकारत्वं युक्तम्। अशक्तिमुद्वहन्निति च पाठः॥ ६१॥

श्लोकत्रयेण तिलकं वर्णयति। बभूवेति। मनोभुवो धनुःसमीपे सम्भृता सञ्जीकृता उपभ्रु भ्रुवोः समीपे तस्य नलस्य वर्त्तुलं चित्रं तिलकस्तद्रूपिणी गुलिकेव मृन्मयगोलक इव बभूव। किम्भूतस्य। भैम्या मानसौकसं मनसि वर्त्तमानं धैर्य्यभरं धैर्य्यबा-

उपभ्रतदर्त्तुलचित्ररूपिणी
धनुःसमीपे गुलिकेव सम्भृता ॥ ६२ ॥
अचुम्बि या चन्दनबिन्दुमण्डली
नलीयवक्त्रेण सरोजतर्जिना।

कुल्यमथ च धैर्य्यभरमेव मानससरोनिवासिनं हंसं पक्षिलान्न-
विद्यते धैर्य्यभरो यस्यैवंविधं वा हंसं जिघांसतो हन्तुमिच्छतः।
भ्रुवोः कामधनुस्त्वं तिलकस्य च गुलिकात्वं। भ्रूसमीपस्थितवर्त्तु-
लतिलकदर्शनमात्रेण भैमी कामवशा भविष्यतीति भावः। अन्यो
ऽपि हंसं हन्तुमिच्छन् क्षत्रियो धनुषि गुलिकां सन्धत्ते। राज्ञश्च
तिलको वृत्तो वर्त्तुलो नृपवैश्ययोरिति वचनात्। मानसौक-
स्त्वोत्प्रेक्षायां खलु। चित्रं स्यादद्भुतालेख्यतिलकेष्विति विश्वः।
चित्रश्च तद्रूपश्चेति कर्म्मधारयादिर्निर्वा। चित्ररूपतेति वा पाठे
तिलकस्वरूपतेत्यर्थः ॥ ६२ ॥

अचुम्बीति। वृत्तत्वादिना गुणेन सरोजतर्जिना कमलजैत्रेण
तदधिकेनापि च कमलतर्जनवशादेव चन्द्ररूपेण नलीयेन व-
क्त्रेण या चन्दनबिन्दुमण्डली मण्डलाकारश्चन्दनतिलकः अचुम्बि
विधृता, तया चन्दनबिन्दुमण्डल्या चन्द्रस्यैव सखी श्रियं श्रिता
सलक्ष्मीका का चन रोहिण्यादिमध्ये तारका शशांकवर्त्तिनी
मध्यवर्त्तिनीकृता। तथा चन्द्रमध्यवर्त्तिनी का चन सश्रीका
तारका खस्य सखी सहचरी कृता सा तत्तुल्या जातेत्यर्थ इति
वा। का चन कापि तारका सखी न कृता किन्तु या का चन

श्रियं श्रिता का चन तारका सखी-
कृता शशाङ्कस्य तयाङ्कवर्त्तिनी ॥ ६३ ॥
न यावदग्निभ्रममेत्युदूढतां
नलस्य भैमीति हरेर्दुराशया ।
स विन्दुरिन्दुः प्रहितः किमस्य सा
न वेति भाले पठितुं लिपीमिव ॥ ६४ ॥

चन्द्राङ्कवर्त्तिनी भवेत् सा सर्व्वापि सख्येव कृतेति वा । सरोजतर्जिनश्चन्द्रस्य मध्यवर्त्तिनी रोहिण्यादिर्भवेत्तर्हि चन्दनवृत्ततिलकसरोजतर्जी नलमुखचन्द्रस्तत्तुल्यो भवेन्न चैवमित्यर्थः । तदा तन्मुखपद्मचन्द्राभ्यामधिकतमं जातमिति भावः । काञ्चनेति पाठे अतिशयितां श्रियं श्रिता ॥ ६३ ॥

नेति । हरेरिन्द्रस्य इति एवंरूपया दुराशया अनुपपद्यमानासम्भावितचिन्तयास्य नलस्य भाले ललाटे सा भैमी किमस्ति न वेति सन्दिह्यमानरूपां लिपीं ब्रह्मलिपीं अक्षरपङ्क्तिं सन्देहनिरासाय स्पष्टं पठितुं वाचयितुं स चन्दनविन्दुरेवेन्दुश्चन्द्रः प्रहितः प्रेषित इव इत्युत्प्रेक्षा । इति र्किं । भैमी यावदग्निभ्रमं अग्निप्रदक्षिणीकरणपर्य्यन्तं नलस्य उदूढतां परिणीततां भार्य्यात्वं नैति गच्छतीति । यद्यपि स्वयम्वरो जातस्तथापि यावत्सप्तपदी गमनं भैमी नलभार्य्या न भवतीतीन्द्रस्य दुराशया स विन्दुश्चन्द्र एव प्रहितः किं । पतित्वं सप्तमे पदे इति स्मृतिप्रामाण्याद् यावदग्निभ्रमणं भैमी नलभर्त्तां नैति । ब्रह्मलिपेर्नि-

कपोलपालीजनितानुबिम्बयोः
समागमात् कुण्डलमण्डलद्वयो।
नलस्य तत्कालमवाप चित्तभू-
रथस्फुरच्चक्रचतुष्कचारुताम् ॥ ६५ ॥
श्रितास्य कण्ठं गुरुविप्रवन्दना-
द्विनम्रमौलेश्चिबुकाग्रचुम्बिनी।

स्वयं चन्द्रद्वारा बुद्धा तत्प्राप्त्यर्थं वयं प्रयतामह इति दुराशया लिपिवाचनार्थं प्रेषितो ललाटे स्थितश्चन्द्र इव तिलको रराज इति भावः। यावदग्निभ्रममव्ययीभावः। लिपौं। कृदिकारा-दितोकारः (पा० ४।१।४५। सि० कौ) ॥ ६४ ॥

कर्णभूषणं वर्णयति। कपोलेति। तत्कालं तस्मिन्मण्डन-समये नलस्य कुण्डलमण्डलद्वयी कर्णभूषणीभूतमण्डलाकारकु-ण्डलद्वयी कपोलपाल्यां प्रशस्तातिस्वच्छनलकपोलयुग्मे जातौ निजौ स्वीयौ अनुबिम्बौ प्रतिबिम्बौ तयोः समागमात् सम्बन्धा-द्धेतोश्चित्तभूरथे कामरथे स्फुरद्विलसत् चक्रचतुष्कं तस्य चारु-तां सौन्दर्य्यमवाप।-रथस्तु चक्रो भवति। पाली फलकं, चतुष्कं परिमाणोपाधिके सङ्ख्यार्थे। सङ्ख्यायाः सञ्ज्ञा सङ्घेति (पा० ५। १।५८) कन्। तत्र प्राणिसङ्घे यद्यपि प्रत्ययस्तथाप्यत्रौपचारि कः प्रयोगः ॥ ६५ ॥

श्रितेति। अस्य कण्ठं श्रिता मुक्तावलिः मौक्तिकहारलता आस्यमेव चन्द्रमास्तस्मात् स्रवन्ती या सुधा तस्यास्तुन्दिलं स्थूलं

अवाप मुक्तावलिरास्यचन्द्रमः-
स्रवत्सुधातुन्दिलविन्दुवृन्दताम् ॥ ६६ ॥
यतोऽजनि श्रीर्बलवान् बलं द्विषन्
बभूव यस्याजिषु वारणेन सः ।

विन्दुवृन्दं तस्य भावस्तत्ता तामवाप। किम्भूतस्य। गुरूणां पित्रादीनां विप्राणाञ्च वन्दनया विनम्रो मौलिर्यस्या अत एव किम्भूता हारावली चिवुकाग्रचुम्बिनी हन्वग्रस्पर्शिनी । मुक्तानां स्थूलत्वं वर्त्तुलत्वं च सूचितं। पूर्णचन्द्रदर्शनवन्नलदर्शनाद् गुर्वादीनां प्रीतिर्जातेति भावः ॥ ६६ ॥

श्लोकत्रयेण भुजभूषणं वर्णयति। यदिति। स तद्भुजो नलभुजो मुद्राभिरङ्गुलीयकैः सहितः समुद्रस्तस्य भावं अथ च दण्ड्यादण्डनादिराजधर्म्मपरिपालनान्मुद्रा नियमस्तत्साहित्यं बभार भेजे। ऊर्मिका दधारेति भावः । स कः। यतः यस्माद्भुजाद्धेतोः श्री शोभा राज्यलक्ष्मीर्वा अजनि उत्पन्ना। तथा आजिषु यस्य भुजस्य वारणेन यत्कर्तृकेन शत्रुविमर्द्दनेन कृत्वा बलं शत्रुसैन्यं द्विषन् पराभावुकः सन् स नलो बलवानुत्साहयुक्तः शक्तियुक्तो वा बभूव। यत्कृतनिवारणेन बलवान् शत्रुसैन्यं पराभावुकोऽभूदिति वा। वाशब्दस्सार्थे। ततस्त्वाजिषु बलं द्विषन् स नलो यस्य यत्कर्तृकेण सङ्ग्रामेण बलवानभूदिति भावः। शत्रुसैन्यं द्विषन् स प्रसिद्धोऽतिबलोऽपि शत्रुः सङ्ग्रामेषु यस्य कर्म्मभूतस्य वारणे निराकरणे बलवान् न बभूवेति वा। आजिषु बलं द्विषन् स

अपूपुरत्तान् कमलार्थिनो घनान्
समुद्रभावं स बभार तद्भुजः ॥ ६७ ॥

प्रसिद्धः शत्रुर्यस्य सङ्ग्रामे विषये बलवान्नाभूदिति वा। वारणानामिनः स्वामी वारणेनस्त्वाशो स च अतिप्रसिद्ध ऐरावतः स वारणेनः सः यस्य नलभुजबलं द्विषन् बलेन सह स्पर्द्धमानः सङ्ग्रामेषु बलवानभूत्। हीनबलोऽप्युत्तमैतद्भुजबलस्पर्द्धया बलवत्त्वप्रतिष्ठां लेभे। वरं विरोधोऽपि समं महात्मभिरितिन्यायादिति भाव इति वा। सङ्ग्रामेषु बलं दैत्यं पराभावुकः स इन्द्रोऽपि यस्याजिषु येन भुजेन सह सङ्ग्रामे बलवान्नाभूत् इन्द्रादप्ययं बलीति भाव इति वा। वबयोरभेदाद्वलनं वलः पलायनं तद्वा, सङ्ग्रामेषु यत्कृतेन निवारणेन स बलारातिरपि बलवान् पलायनपरोऽभूत् न तु स्थातुं शक्त इति वा। यत्करस्तानतिप्रसिद्धान् घनान् बहून् कमलां लक्ष्मीमर्थयन्ते एवं शीलान् याचकान् अपूपुरत् परिपूर्णांश्चकार अतिवदान्य इत्यर्थः। बहून् सुन्दरवधूकाङ्क्षिणो वरान् यः पपार, बहवो ब्राह्मणा येन विवाहिता इत्यर्थ इति वा। अथ च सागरत्वं भेजे यस्मात्सागराल्लक्ष्मीरजनि यदुत्पन्नेन वारणेनैरावताख्येन सबलारातिः आजिषु बलवानभूत्। यस्य वृष्ट्यर्थं जलाभिलाषिणो मेघान् पूरयति। रामनामाद्यङ्किता मुद्रिका मुद्रा। यदुद्भुता, पपार यस्तानिति च पाठः। सलिलं कमलं जलमित्यमरः। कमला श्रीवरस्त्रियोरिति विश्वः। वलनं वलः।

कृतार्थयन्नर्थिजनाननारतं
बभूव तस्यामरभूरुहः करः ।
तदीयमूले निहितं द्वितीयवत्
ध्रुवं दधे कङ्कणमालवालताम् ॥ ९८ ॥
रराज दोर्मण्डनमण्डलीजुषो:
स वज्रमाणिक्यसितारुणत्विषो: ।

घञर्थे कविधानात्कः । अपूपुरदिति पूरयते र्लुङि ह्रस्वे, दीर्घो लघोरिति (पा० ७।४।९४) अभ्यासस्य दीर्घः । पपार, पृधातोः पूरणार्थाल्लिट्, इटं बाधित्वा परत्वाद् वृद्धिः ॥ ९७ ॥

कृतेति । तस्य करः अमरभूरुहः कल्पवृक्षो यतः बभूव । किं कुर्व्वन् अर्थिजनान् याचकलोकान् बहुधनदानादनारतं सदा कृतार्थयन् प्राप्तप्रयोजनान् कुर्व्वन् । तस्मात्मणिबन्धरूपे तदीयकरमूले निहितं स्थापितं द्वितीयवद्द्वितीयेन वैवाहिकेन सूत्रमयेन माङ्गलिकेन कङ्कणेन युक्तम् सौवर्णं कङ्कणमालवालतां दधे तदीयकरकल्पतरोः कङ्कणमालवालस्थाने जातमित्यर्थः । वृक्षमूले चालवालद्वयं भवति । मिलितमुद्रिकाद्वयवत् द्वयोर्मिलितयोर्घटनात् द्वितीयवदिति वा । ध्रुवमुत्प्रेक्षायां । विनिवेशितं तदेति पाठः साधुः ॥ ९८ ॥

रराजेति । स नलः रराज । किं कुर्व्वन्निव । दोर्मण्डनं बाहुभूषणं तस्य मण्डलीं श्रेणीं जुषेते इति जुषौ तयोरङ्गदादिवर्त्तुलबाहुभूषणाश्रयोर्व्वज्रमाणिक्यानां क्रमेणसितारुणत्विषोः

मिषेण वर्षन् दशदिङ्मुखोन्मुखौ
यशःप्रतापाववनीजयार्जितौ ॥ ६९ ॥
घने समस्तापघनावलम्बिनां
विभूषणानां मणिमण्डले नलः ।
स्वरूपरेखामवलोक्य निष्फली-
चकार सेवाचणदर्पणार्पणं ॥ ७० ॥

श्वेतरक्तदीप्त्योर्मिषेणोर्ध्वाधोदिक्सहितप्राच्यादिदशदिग्मुखाना मुन्मुखौ तत्र प्रसरन्तौ अवनीजयेनार्जितौ क्रमेण यशःप्रतापौ वर्षन् प्रसारयन्निव । हीरकमाणिक्यानां मण्डनाश्रितत्वात् तद्दीप्त्योरपि मण्डनाश्रितत्वं युक्तं । यशःप्रतापौ सितरक्तौ भावितिति कविसङ्केतः । इवाध्याहारः ॥ ६९ ॥

घन इति । नलः समस्ता ये अपघनाः हस्तमस्तकाद्यङ्गानि तानवलम्बन्ते एवं शीलानि तत्र स्थितानि तेषां विभूषणानां घने सान्द्रे मणिमण्डले रत्नसङ्घे स्वरूपस्य स्वाकारस्य रेखां परमां शोभां स्वलावण्यपरमां मर्य्यादां वावलोक्य सेवायां चणाः प्रसिद्धाः सेवाचतुरा नापितादयस्तेषां दर्पणार्पणं प्रतिबिम्बदर्शनार्थं मुकुरार्पणं निष्फलीचकार । आदर्शकृत्यस्य रत्नै-रेव कृतत्वादिति भावः । मङ्गलमादर्श इति बुद्ध्या तैर्दर्पणं आनीतं तेन च विलोकितं इति तेषां सेवाचातुर्यं । सेवाचणेति तेनवित्त (पा॰ ५।२।२६) इति चणप् ॥ ७० ॥

व्यलोकि लोकेन न केवलं चलन्-
मुदा तदीयाभरणार्पणद्युतिः ।
अदर्शि विस्फारितरत्नलोचनैः
परस्परेणैव विभूषणैरपि ॥ ७१ ॥
ततोऽनु वार्ष्णेयनियन्तृकं रथं
युधि क्षतारिक्षितिभृज्जयद्रथः ।

व्यलोकीति। चलन्ती व्याघुट्य व्याघुट्योत्पद्यमाना मुत् यस्य तेन निरन्तरहर्षेण लोकेन तदीयानां नलीयानां आभरणानां अर्पणद्युतिः संस्थानविशेषे स्थापनजनिता शोभा केवलं न व्यलोकि किन्तु विस्फारितानि प्रसारितकिरणानि रत्नान्येव लोचनानि येषामेवंविधैर्विस्फारितैर्रत्नलोचनैः कृत्वा वा अचेतनैर्विभूषणैरपि परस्परेणान्योन्यस्यादर्शीव विलोकितेव अन्योन्यशोभाविलोकनार्थं अचेतनैरपि तैर्नेत्राणि प्रसारितानीत्यर्थः। आभरणशोभा सर्व्वैर्विलोकिता मण्डनमात्रस्य खचितरत्नमिति भावः ॥ ७१ ॥

तत इति। ततो भूषणधारणादनु पश्चात् स नलो नृपः वार्ष्णेयनामा नियन्ता सारथिर्यस्य, अथ च कृष्णः सारथिर्यस्य तं रथं किरीटवान् सहजकिरीटयोगात् किरीटिनामा पृथासूनुरर्जुन इवारूढवान्। किम्भूतो नलो अर्ज्जुनस्य। युधि क्षताःभङ्गं प्रापिताः अरिक्षितिभृतां वैरिनृपाणां जयन्तो जयदातारोऽपि रथा येन। क्षतवैरिनृपस्यासौ जयद्रिपुरथो यस्येति वा। क्षता

नृपः पृथास्वनुरिवाधिरूढवान्
स जन्ययात्रामुदितः किरीटवान् ॥ ७२ ॥
विदर्भनाम्नस्त्रिदिवस्य वीचितुं
रसोदयादप्सरसस्तमुज्ज्वलं ।
गृहाद्गृहादेत्य धृतप्रसाधना
व्यराजयन् राजपथानथाधिकं ॥ ७३ ॥

वैरिनृपाणां जयन्तो रथा लक्षणया‸अर्शआदित्वाद्वा महारथा-तिरथार्द्धरथप्रमुखा योधा येनेति वा। अर्ज्जुनपक्षे युद्धे हतोऽभिमन्युवधादरिः शत्रुभूतः क्षितिभृद्राजा जयद्रथो येन। हतोऽरीणां कौरवाणां सम्बन्धी राजा जयद्रथो येनेति वा। तथा जनी वधूर्महती जन्यो वरस्तत्सम्बन्धिन्यां यात्रायां मुदितो हृष्टः। जन्या वरपक्षीयास्तैः सह यात्रया वा हृष्टः। अथ च युद्धसम्बन्धिन्यां विजययात्रायां हृष्टः। तथा मुकुटेन मण्डितः, वरयात्रार्थं निर्गत इत्यर्थः। वार्ष्णेयः। वृष्णेरपत्यं, इतश्चानिञ (पा० ४।१।१२२) इति ढक्। नियन्तृकं। नद्यृतश्चेति (पा० ५।४।१५३) कप् ॥७२॥

इदानीं वरसन्दर्शनार्थं पुरनारीसम्भ्रममाह। विदर्भेति। अथ रथारोहणानन्तरं विदर्भेति नाम त्रिदिवस्य कुण्डिनरूपस्य स्वर्गस्याप्सरसः सुन्दरनार्य एव स्वर्वेश्या उज्ज्वलं प्रकाशमानं मूर्त्तं शृङ्गाररूपं वा तं नलं रसोदयदर्शनानुरागाभिवृद्धिहेतो वीक्षितुं विशेषेण द्रष्टुं धृतप्रसाधनाः सालङ्काराः सत्यः गृहात्

अजानती कापि विलोकनोत्सुका
समीरधूतार्द्धमपि स्तनांशुकं ।
कुचेन तस्मै चलतेऽकरोत् पुरः
पुराङ्गना मङ्गलकुम्भसम्भृतिं ॥ ७४ ॥

सखीं नलं दर्शयमानयाङ्कतो
जवादुदस्तस्य करस्य कङ्कणे ।

गृहादेत्यागत्य निसर्गरम्यान् राजपथान् अधिकं नितरां व्यराजयन् तद्योगात्तेऽप्यधिकं शुशुभिरे इत्यर्थः । तासामति-सौन्दर्य्यमुक्तम् । सर्व्वाऽपि तद्दर्शनार्थमागता इति भावः ॥ ७३ ॥

अजानतीति। नलस्य दर्शनोत्सुका अत एव समीरेण धूतार्द्धं कम्पितार्द्धमपि स्तनांशुकं चोलकाख्यं कुचावरणवस्त्रं अजानती अनावृण्वती कापि पुराङ्गना चलते वरयात्रोन्मुखाय तस्मै नलाय पुरोऽग्रभागे कुचेन कृत्वा मङ्गलकुम्भस्य शुभसूचकशकु-नरूपपूर्णकुम्भस्य सम्भृतिं सम्भारमुपदामकरोत्। समीरधूतेत्य-नेनाचेतनस्याप्यनुरागोत्पादना कुचस्यातिसौन्दर्य्यमिति च व्य-ज्यते। वरस्य च पुरः पूर्णकलशप्रदर्शनेन शुभाय भवति । तस्मै। क्रियया यमभिप्रैति स सम्प्रदानं ॥ ७४ ॥

सखीमिति। सोऽयं नलः समागच्छतीत्येवं करेण सखीं नलं दर्शयमानया दर्शयन्त्या कयापि प्रदर्शनार्थमेवाङ्कत उत्सङ्गात् सकाशाज्जवाद्वेगादुदस्तस्य करस्य सुवर्णहीरकधारातीक्ष्णा-

विषज्य हारैस्त्रुटितैरतर्कितैः
कृतं कयापि क्षणलाजमोक्षणं ॥ ७५ ॥
लसन्नखादर्शमुखाम्बुजस्मित-
प्रसूनवाणीमधुपाणिपल्लवम् ।
यियासतस्तस्य नृपस्य जज्ञिरे
प्रशस्तवस्तूनि तदेव यौवतं ॥ ७६ ॥

यभागे कङ्कणाख्ये भूषणे विषज्य वेगाभिघातवशाल्लगित्वा त्रुटितैश्छिन्नैर्हारैर्नलविलोकनरसादतर्कितैरज्ञातविच्छेदाधःपतनैर्हारैस्तदीयमुक्ताफलैः कृत्वा क्षणमात्रं क्षणं उत्सवस्तत्सम्बन्धि वा लाजमोक्षणं कृतम् । अन्यरमणीनिरन्तरक्रियमाणलाजमोक्षणमध्ये मौक्तिकमोक्षणमपि तद्भ्रमकार्य्यभूदित्यर्थः । दर्शयमानया । णिचश्चेति(पा० १।३।७४)कर्त्रभिप्राये क्रियाफले शानचि हृक्रोरित्यत्र अभिवादिदृशोरात्मने पदे चेति वक्तव्यात् (पा० १।४।५३।वा०) द्विकर्म्मकत्वात् सखीमिति कर्म्मत्वं । सखीरिति वा पाठः ॥ ७५ ॥

लसदिति । तत् युवतीनां समूहो यौवतमेव यियासतः वरयात्रोन्मुखस्य तस्य नृपस्य प्रशस्तवस्तूनि शुभसूचकमङ्गलद्रव्याणि जज्ञिरे । किम्भूतं । नखा एवादर्शं मुखान्येवाम्बुजानि स्मितान्येव प्रसूनानि पुष्पाणि वाण्य एव मधूनि पाणय एव पल्लवानि इतरेतरयोगद्वन्द्वः समाहारो वा लसन्तः स्फुरत्कान्तयो नखादर्शादयो यस्य तत् । एवंविधपरनारीदर्शनाद्भैमी-

करस्थताम्बूलजिघत्सुरेकिका
विलोकनैकाग्रविलोचनोत्पला ।
मुखे निचिक्षेप मुखद्विराजता-
रुषेव लीलाकमलं विलासिनी ॥ ७७ ॥

पाणिग्रहो नितरां मम शुभायैव भवितेति तस्य बुद्धिरुदभू-
दिति भावः । अतिसौन्दर्यं तासां सूचितं । दध्याज्यादर्शादि-
दर्शनं शुभावहमिति वसन्तराजग्रन्थे ज्ञातव्यम् । आरोप्यमा-
णस्य प्राधान्यात्स्रक्स्रगे इति बहुवचनम् ॥ ७६ ॥

करेति । एकिका कापि विलासिनी पुरनारी करस्थं
ताम्बूलं जिघत्सुर्भक्षयितुमिच्छुः सती करस्थलीलाकमलं मुखे
निचिक्षेप । यतो नलविलोकने विषये एकाग्रे तत्परे विलोच-
नोत्पले यस्याः सा । ताम्बूलभ्रान्त्या कमलं मुखे निक्षिप्तमि-
त्यर्थः । कयेव मुखलक्षणे राजनि विद्यमाने कमलस्य द्वितीया
राजता तया जातया रुट् क्रोधस्तयेव उत्तमेन मन्मुखेन सहै-
तत् स्पर्द्धत इति क्रोधादिव मुखे कमलं निक्षिप्तमित्यर्थः ।
नलसौन्दर्यातिशयदर्शनेन विमनस्कतोक्ता । जिघत्सुः । लुङ्-
सनोरित्यादिना (पा० २।४।३७) घसादेशः, घस्लृ अदने इत्ये-
तस्माद्वा सन्नन्तादुः । न लोकेति (पा० २।३।६८) षष्ठीनि-
षेधात्ताम्बूलं जिघत्सुरिति द्वितीयेति योगविभागात् समासः
॥ ७७ ॥

कयापि वीक्षाविमनस्कलोचने
समाज एवोपपतेः समीयुषः ।
घनं सविघ्नं परिरम्भसाहसै-
स्तदा तदालोकनमन्वभूयत ॥ ७८ ॥
दिदृक्षुरन्या विनिमेषवीक्षणा
नृणामयोग्यां दधती तनुश्रियं ।

कयेति । कयापि स्वैरिण्या वीक्षया नलदर्शनेन विमनस्के त्यक्तविषयान्तरे लोचने यतस्तस्मिन् समाजे जनसङ्घे एव समीयुषः समागतस्योपपतेर्जारस्य परिरम्भे आलिङ्गनविषये साहसैर्निर्विचारिभिः निर्भयप्रवर्त्तनैः कृत्वा तदा नलविलोकनसमये तदालोकनं नलदर्शनं घनं नितरां सविघ्नं यथा तथान्वभूयत । जारकर्तृकैर्जारकर्मकैर्वा आलिङ्गनैर्व्यवधानतया नलः सम्यक् नादर्शीत्यर्थः । तदा तदापि तत् कदाचित्कृतत्वान्नलस्यालोकनं कृतं न तु निरन्तरमिति वा । ईदृशया वीक्षया कारयाद्यादिके जारादीनां कामशास्त्रे समय उक्तः ॥ ७८ ॥

दिदृक्षुरिति । नलदिदृक्षुरत एव दर्शनानुरागवशेन विगतपक्ष्मसङ्कोचे वीक्षणे विशिष्टे नेत्रे यस्याः सा । तथा नृणां भूलोकवासिनामयोग्यां दिव्यां तनुश्रियं दधती अन्या काचिन्नारीत्थं प्राप्तदेवाङ्गनासाम्यापि दर्शनौत्सुक्यात् पदाग्रमात्रेणैव यद्यस्मान्महीमस्पृशत् तावता केवलं तावन्मात्रेणैव नाप्सरोऽभवत् । अप्सरसोऽप्यनिमेषनेत्रा अमनुष्यां दैवैकभोग्यां कायकान्तिं

पदाग्रमात्रेण यदस्पृशन्महीं
न तावता केवलमप्सरोऽभवत् ॥ ७९ ॥
विभूषणस्रंसनशंसनार्पितैः
करप्रहारैरपि धूननैरपि।

विबुधाः पदैकदेशेनापि भूमिं न स्पृशन्ति, इयं तु निर्निमेष-दर्शनात्मकतयाङ्गुष्ठादिमात्रेण केवलं भूमिं स्पृशती तेनैव धर्मेण तत्तुल्या नाभूत् अन्यत् सर्व्वं सादृश्यमेवेत्यर्थः। अप्सरोऽभव-दिति। अप्सरःशब्दस्य बहुत्वेऽपि अन्येत्यपेक्षयाऽभवदित्येकवच-नमपि युक्तम्। आपः सुमनसो वर्षा अप्सरसः सिकताः समाः। एता. स्त्रियां बहुत्वे स्युरेकत्वेऽप्युत्तरक्रममिति वचनादेकवच-नान्तादप्सरःशब्दात् न चिः। बहुजनपृष्ठवर्त्तिनो भित्त्यादिव्य-वहिता वा पदाङ्गुष्ठमात्रेण भुवं स्पृशन्तः प्रोन्नमिताङ्गाः पश्य-न्तीति दिदृक्षूणां स्वभावः ॥ ७९ ॥

विभूषणेति। अपरा अन्तःकरणे शरीरमध्ये अमान्तं सम्मदं शरीरमानाधिकमानं वहिरर्वास्थितं नलदर्शनजं प्रमोदं विभू-षणानां स्रंसनस्य शंसने तव मण्डनं गलितं तव मण्डनं गलित-मिति प्रत्येकं कथने विषयेऽपि तैर्दत्तैः करप्रहारैरपि धून-नैरपि तच्छरीरकम्पनैश्च छलात् प्रसभं बलात्कारेण स्वसखीषु पुरा सम्पापयतीव प्रावीविशदिव, विचित्तत्वेन शब्दमशृण्वन् करेण ताड्यते पतितविस्मृतभूषणादिसंवेदनाय कम्प्यते चेति। तथान्यदपि कुसूलमानमध्याद्गोधूमादि वहिरवसंस्थितं सत्

अमान्तमन्तःप्रसभं पुरा ऽपरा
सखीषु सम्भापयतीव सम्मदं ॥ ८० ॥
वतंसनीलाम्बुरुहेण किं दृशा
विलोकमाने विमनीबभूवतुः।
अपि श्रुती दर्शनसक्तचेतसां
न तेन ते शुश्रुवतुर्मृगीदृशाम् ॥ ८१ ॥

बलात्कारेण करताडनैः करकृतैर्धूननैश्चान्तर्माप्यत इति च लौकिकी रीतिः। नलदर्शनानुरागादतिविमनस्का जाता इति भावः। पुरा सम्भापयतीति। पुरिलुङ्चास्मे (पा० ३।२।१२२) इति भूते लट् ॥ ८० ॥

विभूषणभ्रंशशब्देन किमिति ज्ञापित इत्यत आह। वतंसेति। नलदर्शने सक्तं चेतो यासां मृगीदृशां श्रुती कर्णावपि वतंसनीलोत्पलेन कर्णभूषणनीलाम्बुरुहेणैव दृशा नेत्रेण नलं विलोकमाने सत्यौ यस्माद्विमनीबभूवतुर्व्याकुले जाते तेन हेतुना ते श्रुती किं भूषणस्रंसनं न शुश्रुवतुः। चक्षुषी किल श्रवणानर्हत्वान्न शृणुतां, कर्णौ तु श्रोतुं योग्यावेवेत्यपेरर्थः। ताः सुदृश्यो यथा नलविलोकनेन विमनस्का जातास्तथा तत्कर्णावपि विमनस्कौ जाताविति वा अपेरर्थः। विमनीबभूवतुः। अरुर्मनश्चक्षु (पा० ५।४।५१) इति च्विः। सलोपश्च ॥ ८१ ॥

काश्चिन्निर्माय चक्षुःप्रसृतिचुलुकितं तास्वशङ्कन्त कान्ता
मौग्ध्यादाचूडमोघैर्निचुलितमिव तं भूषणानां मणीनां।
साहस्रीभिर्निमेषाकृतमतिभिरयं दृग्भिरालिङ्गितः किं
ज्योतिष्टोमादियज्ञश्रुतफलजगतीसार्व्वभौमभ्रमेण ॥ ८२ ॥

काश्चिदिति। पश्यन्तीषु तासु मध्ये कान्ताः सुन्दर्य्यः काश्चित्पुरनार्य्यः भूषणानां ये मणयः तेषां भूषणभूतानां वा मणीनां रत्नानामोघैः समूहैः आचूडं शिखामभिव्याप्य निचुलितमाच्छादितमिव तत्र वुडितमिव तं नलं चक्षूरूपाभ्यां प्रसृतिभ्यां अर्द्धसङ्कुचितकरकुड्मलाभ्यां चुलुकितं पीतं निर्माय कृत्वा प्रसृतिप्रमाणाभ्यामतिविशालाभ्यां चक्षुर्भ्यां सादरं दृष्टिं कृत्वा इति मौग्ध्यान्नैपुण्यादशङ्कन्त तर्कयामासुः। इति मौग्ध्यं किं। निमिषे पक्ष्मसङ्कोचेऽकृतमतिभिरनिमिषाभिः साहस्रीभिः सहस्रसङ्ख्याभिर्दृग्भिर्दृष्टिभिर्ज्योतिष्टोमराजसूयादियज्ञानां वेदाच्छ्रुतं यत्फलं साध्यं तद्रूपा या जगती भुवनं स्वर्गस्तस्याः सार्व्वभौमश्चक्रवर्त्तीन्द्रस्तस्य भ्रमेणायं नल आलिङ्गितः स्पृष्टः किं। अचेतनैरपि रत्ननेत्रसहस्रैर्वैभववशादिन्द्रोऽयमिति भ्रान्त्या इन्द्रस्य सहस्रनेत्रत्वादनेनास्माभिः सम्बन्धं युक्तमिति बुद्ध्या समालिङ्गितः। किमिति उत्प्रेक्षा। एतदेव च मौख्यं सौन्दर्य्यं रत्नबाहुल्यं चोक्तं। सहस्रशब्दो यत्रेऽपरिमितवाची। सहस्रं परिमाणंयासान्ताः साहस्र्यः तदस्य परिमाणमित्यर्थे, शतमानविंशतिकसहस्रवसनादणित्यण् (पा०५।१।२७) ॥ ८२ ॥

भवन् सुद्युम्नः स्त्री नरपतिरभूद्यस्य जननी
तमूर्वश्याः प्राणानपि विजयमानस्तनुरुचा ।
हरारब्धक्रोधेन्धनमदनसिंहासनमसा-
वलंकर्मीणश्रीरुदभवदलङ्कर्त्तुमधुना ॥ ८३ ॥

भवन्निति । सूर्यनप्ता मनोः पुत्रः सुद्युम्नाख्यो नरपतीराजा पार्व्वतीवनप्रवेशनिमित्तेन शिवशापेन हेतुना इलाख्या स्त्री भवन् स्त्रीत्वं प्राप्तः सन् बुधाद्गर्भधारणेन यस्य जननी अभूत् । उर्वश्याः प्राणान् रूपातिशयात् स्वर्वेश्यायाः प्राणभूतं प्राणप्रियमतिसुन्दरं तं पुरूरवसमपि तनुरुचा कायकान्त्या विजयमानः पराभावुकोऽसौ नलः अधुनेदानीं हरेणारब्धः कृतः क्रोधस्तस्येन्धनं दारुर्यो मदनस्तस्य सिंहासनं दग्धत्वात्कामेन शून्यमलङ्कर्त्तुं योग्यतया भूषयितुं अलङ्कर्मीणा कर्म्मक्षमातिसमर्था स्वाभाविकी भूषणजनिता च श्रीः शोभा यस्यासौ एवम्भूत उदभवत् जात इति पुरस्त्रिय आलपुरित्यन्तिमश्लोकेन सम्बन्धः । जीर्णः कामो दग्धः पुरूरवास्त्वनेनैव जितः तस्मात् शून्यं कामसिंहासनं भूषयितुमयं काम एवोत्पन्नः । अतिसुन्दरोऽयमिति भावः । कृतयुगादौ तु इलो नाम राजा मृगयासङ्गाद्धरनिवारितमुमावनमेकाकी प्रविष्टः स्त्री बभूव । तामेकाकिनीं सुन्दरीं दृष्ट्वा चन्द्रपुत्रो बुधः कामातुरः सन् स्वाश्रमं नीत्वा तस्यां पुरूरवोनामानं पुत्रमजीजनदिति भविष्योत्तरपुराणे कथा । विजयमानः । विपराभ्यामिति (पा० १।३।१९) शानच् । कर्म्मक्षमोऽलङ्कर्मीण इत्यमरः ॥ ८३ ॥

अर्थी सर्व्वसुपर्व्वणां पतिरसावेतस्य यूनः कृते
पर्य्यत्याजि विदर्भराजसुतया युक्तं विशेषज्ञया।
अस्मिन्नाम तया वृते सुमनसः सन्तोऽपि यन्निर्ज्जरा
जाता दुर्मनसो न सोढुमुचितास्तेषां तु सानौचिती ॥८४॥
अस्योत्कण्ठितकण्ठलोठिवरणस्रक्सान्त्विभिर्दिग्धवैः
स्वं वक्षः स्वयमस्फुटन्न किमदःशस्त्रादपि स्फोटितं।

अर्थीति। विशेषज्ञया गुणानामधिकतरत्वं विदुष्या विदर्भराजपुत्र्या अर्थी मां वृणीष्वेत्यर्थयमानः सानुरागोऽप्यसौ सर्व्वसुपर्व्वणां सर्व्वदेवतानां पतिरिन्द्रोऽपि एतस्य प्रत्यक्षलक्ष्यातिसौन्दर्य्यस्य यूनः पूर्णतारुण्यस्य नलस्य कृते निमित्तं पर्य्यत्याजि। सानुरागत्वे प्रभुत्वेऽपि सौन्दर्य्यादिगुणानां न्यूनत्वाद्यत् परित्यक्तस्तद्युक्तमुचितमेव कृतमित्यर्थः। नाम प्राकाश्ये, तु पुन र्निर्जरा इन्द्रादयस्त्वारोऽपि देवाः शिष्टा नाम प्रसिद्धाः शोभनान्तःकरणा अपि सुमनसः प्रसिद्धाः सन्तोऽपि वा सुमनस इति सञ्ज्ञया ख्याताः सन्तोऽपि तया भैम्या अस्मिन्नले वृते सति यद्दुर्मनसः सविषादमनसो जाताः सा तेषामनौचिती अनुचितकारिता, सोढुं क्षन्तुं नोचिता न युक्ता। न हि साधुभिः कार्य्यवशादपि स्वधर्मः परित्यज्यते, एतैस्तु परित्यक्तस्तद्रूपं न सहामहे इत्यर्थः। कृतेऽव्ययम् ॥ ८४ ॥

अस्येति। अस्य नलस्य चिरकालं वरणमालाश्लेषार्थमुत्कण्ठिते कण्ठे लोठिन्यास्खलन्त्या हृदयावलम्बिन्या वरणस्रजः

व्यावृत्योपनतेन हा शतमखेनाद्य प्रसाद्या कथं
भैम्या व्यर्थमनोरथेन च शची साचीकृतास्याम्बुजा ॥ ८५ ॥

साचिभिः प्रत्यक्षदर्शिभिर्दग्धैस्तुभिरिन्द्रादिभिर्दिक्पालैस्त्र-
पाभावात् स्वयमस्फुटदविदीर्यमाणमपि स्वं वक्षः अमुष्य नलस्य
शस्त्रादपि हेतोः किमिति न स्फोटितं विदारितं नलेन सार्द्धं
भैम्यर्थं युद्धमपि कृत्वा किमिति न मृतं। शूराणां रणे मरणमपि
यशसे भवति न तु लज्जापरित्याग इति भावः। क्षुरिकादि-
प्रक्षेपेण स्वयमेव वा किमिति न स्फोटितमिति वा। अन्यादय-
स्तावत्तिष्ठन्तु हा सोपहासं कष्टं अद्य भैम्यां विषये व्यर्थमनोरथेन
सता व्यावृत्य परावृत्य उपनीतेन शचीसमीपे प्रणामवशान्न-
म्रेण शतमखेन शतयज्ञकरणालब्धस्वर्गाधिपत्येन देवेन्द्रेणापि
शचीन्द्राण्यपि च कथं प्रसाद्यानुनेतुं शक्या। यतः कोपवशादव-
ज्ञावशाद्वा साचीकृतं वक्रीकृतमास्यमेवाम्बुजं यया। सम्मुखान-
वलोकनात् प्रसादनार्थमनेन कृतमपि प्रणामाञ्जल्यादिकं न
द्रक्ष्यति ततः कथं प्रसाद्या। भैमी न लब्धा शची च रुष्टेत्यपय-
शोऽपि जातमितीन्द्रस्य महत् कष्टं जातमिति भावः। दिक्षु
भटैः शूरैर्नृपैः स्वं वक्षः किमिति न स्फोटितं। नृपा मनुष्या-
स्तिष्ठन्तु देवेन्द्रस्यापीदृशी दशा जातेति वा। उपगतेति पाठे
शचीसमीपे गतेनेत्यर्थः ॥ ८५ ॥

मा जानीत विदर्भजामविदुषीं कीर्त्तिं मुदः श्रेयसीं
सेयं भद्रमचीकरन्मघवता न स्वं द्वितीयां शचीं ।
कः शच्या रचयाञ्चकार चरितं काव्यं स नः कथ्यता-
मेतस्यास्तु करिष्यते रसधुनीपात्रे चरित्रे न कैः ॥ ८६ ॥

मा जानीतेति। भोः सख्यो यूयं विदर्भजां मुदो हर्षात् सकाशात् कीर्त्तिं श्रेयसीं श्रेष्ठतरामविदुषीमजानतीं मा जानीत किन्तु हर्षापेक्षया कीर्त्तिः प्रशस्यतरेति भैमी वेत्त्येवेति जानीत। यस्मात् सेयं भैमी मघवता प्रयोज्येन स्वमात्मानं द्वितीयां शचीं भद्रं साधु नाचीकरत् न कारयामास । इन्द्रे वृते तत्पत्नीत्वाच्छचीशब्दवाच्यत्वं भवेत् न त्वसौ वृतस्तस्माद्द्वितीया शची नाभवदिति युक्तमेव अनया कृतमित्यर्थः।इन्द्रे वृतेऽपि कीर्त्तिर्भविष्यतीत्याशङ्क्य नेत्याह। शच्याश्चरितं कः कविः सर्गबन्धनादिरूपेण वर्णनात्मकं काव्यं प्रबन्धं रचयाञ्चकार स शचीवर्णनकारी नोऽस्माकमग्रेऽस्मभ्यं च कथ्यतां यद्यस्ति, अपि त्वनिरूपणान्नास्त्येव। एतस्यास्तु भैम्याः पुनारसानां शृङ्गारादीनामेव रसानां जलानां धुनी नदी तस्याः पात्रे स्थानभूतेऽथ च रसनदीप्रवाहरूपे शीलादिचरित्रे विषये कैः पराशरव्यासशुकादिभिः काव्यं न करिष्यतेऽपि तु तैरपि भारतादौ तद्वर्णनकाव्यं करिष्यते किं पुनः श्रीहर्षादिकविभिरित्यर्थः। इन्द्रवरणेन यद्यपि स्वर्गसुखप्राप्तिस्तथापि तत्पत्नीत्वाच्छचीत्वेऽपि तस्याः कुत्रचित् केनाप्यवर्णितत्वादिन्द्रापेक्षयाधिककीर्त्तेर्नलस्य वरणे पुण्यश्लोकत्वात सर्व्वै-

वैदर्भीबहुजन्मनिर्म्मिततपःशिल्पेन देहश्रिया
नेत्राभ्यां स्वदते युवायमवनीवासः प्रसूनायुधः ।
गीर्व्वाणालयसार्व्वभौमसुकृतप्रागभारदुःप्रापया
योगं भीमजयानुभूय भजतामद्वैतमद्य त्विषां ॥ ८७ ॥

रपि वर्णनीयत्वात्तत्प्रसङ्गात् स्वस्यापि वर्णनीयत्वान्महती कीर्त्ति-र्भविष्यति सा च स्वर्गसुदः सकाशाच्छ्रेयसीति विचार्य्येन्द्रपरि-त्यागद्वारा स्वर्गसुखमपि परित्यज्य भैम्या नलो वृत इति युक्त-कारित्वादेतादृशी कापि विदुषी नास्तीति भावः। दिव इति पाठे स्वर्गसुखादित्यर्थः। कथिष्यते च्छदन्तत्वादिट् ॥ ८६ ॥

वैदर्भीति। हे सख्यः अवन्यां वासः स्थितिर्यस्य स प्रसूना-युध इव कामरूपोऽयं नलनामा युवा तरुणो देहश्रिया काय-कान्त्या कृत्वा पश्यन्तीनामस्माकं नेत्राभ्यां स्वदते रोचते। किम्भू-तया। वैदर्भ्या बहुजन्मभिरनेकजन्मसु वा निर्म्मितस्य कृच्छ्रचा-न्द्रायणादिजन्यस्य तपसः सुकृतस्य शिल्पेन फलभूतया। अतिसु-न्दरममुं प्रीत्यास्मन्नेत्रे पश्यत इत्यर्थः। विशिष्टया देहश्रियोप-लक्षितो वा। अशरीरोऽपि भैमीपुण्यबाहुल्यवशात् सशरीरकाम इवेति भाव इति वा। सोऽयं नलः भीमजया सह योगमद्य दा-म्पत्यसम्बन्धमनुभूय त्विषां कान्तिभराणामन्यत्रात्यन्तासत्त्वेना-द्वैतं सामस्त्यं भजतां आश्रयतु। उभयोरेकत्र मेलनादयमेव कान्तीनामाश्रयः कान्तिस्वरूपो वा भवतु नान्य इत्यर्थः। किम्भू-तया। गीर्व्वाणालये स्वर्गलोके सार्व्वभौम इन्द्रस्तस्य सुकृतप्राग्-

स्त्रीपुंसव्यतिषञ्जनं जनयतः पत्युः प्रजानामभू-
दभ्यासः परिपाकिमः किमनयोर्दाम्पत्यसम्पत्तये ।
आसंसारपुरन्ध्रिपूरुषमिथःप्रेमार्पणक्रीडया-
प्येतज्जम्पतिगाढरागरचनात् प्राक्कर्षि चेतो भुवः ॥८८॥

भारः पुण्यराशिस्तेनापि दुष्प्रापया अलभ्यया । शतमखजन्येन पुण्येन स्वर्गचक्रवर्त्तित्वं येन लब्धं तेनापि दुष्प्रापत्वाङ्गैम्याः सौभाग्यातिशयो नलस्य चन्द्रापेक्षया सौभाग्यातिशयः पुण्यातिशयश्च गीर्व्वाणालयेत्यादिना सूचितः । अन्योऽप्यष्टाङ्गयोगमनुभूय बहुपुण्यदुष्प्रापयापि भीमात् हराज्जातया ईश्वरप्रसादलब्धया विद्ययाऽद्वैतं परमात्मस्वरूपं भजति । नेत्राभ्यां । रुच्यर्थाना-मिति (पा० १।४।३३) सम्प्रदानत्वं । प्राग्भारदुःप्रापया । तृतीयेति योगविभागात् समासः ॥ ८७ ॥

स्त्रीति । स्त्रीपुंसयोः सर्व्वयोः व्यतिषञ्जनं विशेषेणातितरां सम्मेलनं जनयतः कुर्व्वतः प्रजानां पत्युर्ब्रह्मणः पुनरसंयोजनशिक्षणलक्षणोऽभ्यासोऽनयोर्नलभैम्योर्दाम्पत्यसम्पत्तये जायापतिभावस्योत्कर्षाय परिपाकिमः परिपाकेन निर्वृत्तः स्वारस्येन परिणततया कोऽभूत्किं, सर्व्वस्त्रीपुंसयोजनाभ्यासः अत्युत्तमानुरूपतदुभयसङ्घट्टेन फलितःकिमित्यर्थः । तथा चेतोभुवः कामस्यापि आसंसारं संसारं मर्य्यादीकृत्य सर्गादिमारभ्य प्रलयपर्य्यन्तं पुरन्ध्रिपूरुषयोः स्त्रीपुंसयोर्मिथः प्रेमान्योन्यमनुरागस्तस्यार्पणमासञ्जनं तदेव सदा मनोविनोदनरूपा क्रीडा लीला तयापि

ताभिर्दृश्यत एष यान् पथि महाज्यैष्ठीमहे मन्महे
यद्दृग्भिः पुरुषोत्तमः परिचितः प्रागप्यमञ्चन् कृतः।

एतज्जम्पत्योरनयोर्नलभैमीरूपयोर्गाढस्नेहेणाप्यनेन यस्य मिथोऽनुरागस्य रचनाज्जननाद्धेतोः प्राकर्षि प्रकृष्टकाष्ठापन्नया जातं। अनुरागजननक्रीडाया प्रकर्षोऽत्रैव विश्रान्तः। उत्तरत्राप्येवमनुरागस्याभावादित्यर्थः। एतादृशौ स्वरूपौ समानानुरागौ चान्यौ स्त्रीपुंसौ कालत्रये न स्त इति भावः। व्यतिषक्तं। उपसर्गात् सुनोतीति (पा० ८।३।६५) षत्वं। परिपाकिमः। भावप्रत्ययान्तात्, पृथ्वादिभ्य (पा० ५।१।१२२) इति इमनिच्। जम्पती। जायाया जभावः॥ ८८॥

ताभिरिति। महत्या अतिप्रसिद्धाया ज्येष्ठानक्षत्रयुक्ताया ज्येष्ठपूर्णिमायाः सम्बन्धिनि महे उत्सवे, महत्यतिप्रसिद्धे वा ज्यैष्ठीमहे यद्दृग्भिर्यासां नेत्रैः प्राग् जन्मान्तरेऽथवान्यापेक्षया प्रथमं मञ्चं पर्य्यङ्कं अञ्चन् प्राप्तः मञ्चस्थो मार्गे गच्छन् श्रीपुरुषोत्तमः परिचितो बहुवारं दृष्टः कृतस्ताभिरेव स्त्रीभिः पथि वरयात्रायां यान् रथस्थ आगच्छन्नेष नलो दृश्यते। एतादृक्पुण्यं याभिरस्मादृशाभिरर्जितं ताभिरेवायं द्रष्टुं शक्यो न त्वन्याभिरित्यर्थः। अथ च याभिः पुरुषोत्तमो दृष्टस्ताभिरेव तत्तुल्योऽयमपीति ज्ञातुं शक्यते न त्वन्याभिरित्यर्थः। ताभिरेव साभिलाषं कटाक्षैर्दृश्यते याभिरेवं सुकृतं कृतं। अन्याभिस्तु कौतुकेनापि वीक्षितुं न शक्यते किं पुनः सानुरागं कटाक्षैरिति।

सा स्त्रीराट् पतयालुभिः शितिसितैः स्यादस्य दृक्चामरैः
सस्ने माघमघाभिघातियमुनागङ्गौघयोगे यया ॥ ८९ ॥

ऐन्द्रे गुरुः शशी चैव प्राजापत्ये रविस्तथा ।
पूर्णिमा ज्यैष्ठमासस्य महाज्यैष्ठीति कीर्त्तितेति ॥

पुरुषोत्तमतुल्योऽयं मन्महे जानीमह इति भावः । वाक्यार्थः कर्म । उत्कलदेशे ज्यैष्ठपूर्णिमायां इन्द्रनीलगिरिनिवासिनः श्रीपुरुषोत्तमस्य महोत्सवः क्रियते । तत्र च श्रीकृष्णबलभद्रप्रमुखप्रतिमाधिष्ठिता विरचितसप्तभूमिका मञ्चाः पृथक् निर्गच्छन्तीति तस्य दर्शनं भूयसे श्रेयसे भवतीति पौराणिकाः । यदाहुः ।

दोलारूढं तु गोविन्दं मञ्चस्थं मधुसूदनं ।
रथस्थं केशवं दृष्ट्वा पुनर्जन्म न विद्यते इति ॥

यया । यया स्त्रिया अघाभिघातिनी पातकविनाशिनी यमुना गङ्गा च तयोरोघयोर्योगे सङ्गमे प्रयागाख्ये माघं सस्ने मकरस्थे रवौ माघे मास्यविच्छेदेन स्नानं कृतं सास्य नलस्य पतयालुभिरतिचञ्चलैः शितिसितैः कृष्णधवलैर्दृक्चामरैर्नेत्रैरेव चामरैर्नेत्रव्यापाररूपैश्चामरैस्त्रीराट् स्त्रीराजैव स्यात् भवेत् इति मन्महे । राजा हि कृष्णधवलैश्चामरैर्वीज्यते । प्रयागे माघस्नानजन्यसुकृतात् स्त्री राजत्वं प्राप्नोति तत्र स्नानेन ।

सितासिते तु यैः स्नानं माघमासे युधिष्ठिर ।
न तेषां पुनरावृत्तिः कल्पकोटिशतैरपीति ।

वचनात् स्त्रीषु श्रेष्ठा सैव भवेदिति वचनादित्यर्थः। अयञ्च कटाक्षैर्यां पश्यति सा सर्व्वाभ्योऽप्यधिका सा च भैम्येव नान्या। भैम्या च प्रयागे सकलमाघस्नानफलं लब्धं यतो भैमीसदृशी कापि कुत्रापि नास्तीति भावः। ज्यैष्ठीति। ज्येष्ठानक्षत्रयुक्ता पौर्णमासीति। नक्षत्रेण युक्तः कालः (पा० ४।२।३) इत्यणि वृद्धिः। तद्युक्तमासाभिधायित्वेऽपि सास्मिन् पौर्णमासीत्यादिना (पा० ४।२।२१) ज्यैष्ठी इत्येव भवति। ज्येष्ठीइत्येव पाठे वृद्ध्यभावश्चिन्त्यः। सञ्ज्ञापूर्वस्य विधेरनित्यत्वाद् वृद्ध्यभावः कथञ्चित् समर्थनीयः। स्त्रीराडिति सम्बन्धषष्ठ्या निर्धारणषष्ठ्या वा समासः। स्त्री इति पृथक्त्वा पदं। अत एव सा स्त्री इत्यर्थः। अकर्म्मकधातुभिर्योगे, देशः कालो भावो गन्तव्योऽध्वेत्यादि (पा० १।४।५१। सि० कौ० कारकवार्त्तिकेन माघस्य कालवाचित्वात् कर्म्मकत्वे धातोः सकर्म्मकत्वात् कर्म्मणि विहितेन तङा तस्याभिहितत्वान्माघः सस्त इति प्राप्ते माघमिति द्वितीया चिन्त्या। अत्रार्थे हरदत्तमिश्रैर्गतिबुद्ध्यादिसूत्रे (पा० १।४।५२) अकर्म्मकाणामिति कालभावाध्वदेशव्यतिरिक्तकर्म्मरहितानामित्यर्थो ग्राह्य इति सिद्धान्तितं। एवं कर्म्मणि च (पा० ३।४।६८) इत्यादावपि यत्राकर्म्मकग्रहणं तत्र सर्व्वत्र द्रष्टव्यं। तेनात्र माघस्य कर्म्मत्वेऽपि सस्ने इति भावे लिट् सिद्धो भवति। यद्वा माघ्यं यस्यां क्रियायां यथा तथा स्नाताया मम सर्व्वपापक्षयपूर्व्वकसर्व्वमनोरथसिद्धिर्भवतु इति सङ्कल्प्येत्यर्थः। कलुषं वृजिनैनोघेत्यमरः। यमुनागङ्गेति पूर्व्वनिपातोऽनियमः पूर्व्ववत् परिहरणीयः॥ ८८॥

वैदर्भीविपुलानुरागकलनात् सौभाग्यमत्राखिल-
क्षौणीचक्रशतक्रतौ निजगदे तद्वृत्तवृत्तक्रमैः ।

वैदर्भीति । हे सख्यः तस्य नलस्य सम्बन्धीनि वृत्तान्यधीतानि यानि वृत्तानि पद्यानि तेषां क्रमैः नलविषये कविभिः कृतैः अस्मदादिभिश्च पठितैः काव्यैर्वृत्तैरतीतैः सकलद्वीपाधिपादिराजेन्द्रदेवेन्द्रादिदिक्पालपरित्यागरूपस्य चरित्रक्रमैः परिपाटीभिर्वा कृत्वा वैदर्भ्या भैम्या विपुलस्य नलविषयानुरागस्य कलनात् ज्ञानात् अखिलक्षौणीचक्रे शतक्रताविन्द्रेऽत्रास्मिन्नले स्त्रीसम्बन्धिसकलवरप्रेमास्पदत्वादिलक्षणं सौभाग्यं निजगदे स्पष्टं कथितं । निश्चितमस्माभिरिति यावत् । अतिसुन्दरीयमिन्द्रादीन् परित्यज्य यस्मादेनमवृत तस्मादयमेव सुभगतमो नान्य इति सर्व्वैर्निश्चितमित्यर्थः । भैमीकृतान्नलविषयविपुलानुरागस्याङ्गीकरणाद्धेतोस्तस्या एव वृत्तस्य भूतस्य चक्षुःप्रीत्यादिकामदशाः स्फुटं विरहव्यथानुरूपस्य वृत्तस्य चरित्रस्य क्रमैस्तेऽतिप्रसिद्धा ये वृत्ता वृत्तक्रमास्तैर्वा निगदितं । भैम्या अप्येतद्विषयमहानुरागजनितपूर्व्वविरहव्यथाभिरेवायं सकलसौभाग्यनिधानमिति सर्व्वेषां पुरस्तात् कथितमिति भाव इति मुख्योऽर्थः । वैदर्भ्या विपुलानुरागेण नलस्य वर्णनादिति वा । किञ्चान्यच्च अस्माकमयमास्माकः स चासौ नरेन्द्रश्च भीमस्तस्माद् भवतीति भूर्भैमी तस्याः सुभगता सौभाग्यं तस्याः सम्भूतये उत्पत्तये महासमृद्ध्यर्थं वा देवस्य इन्द्रस्यावरणेन त्यागेन सापत्न्याभा-

किञ्चास्माकनरेन्द्रभूसुभगतासम्भूतये लग्नकं
देवेन्द्रावरणप्रसादितशचीविश्राणिताशीस्तुतिः ॥ ९० ॥
आसुत्राममपासनान्मखभुजां भैम्यैव राजव्रजे
तादर्थ्यागमनानुरोधपरया युक्तार्जि लज्जामृजा ।

देवेन प्रसादितया सन्तोषितया शच्या विश्राणितं दत्तं सुभगा पुत्रवत्यविधवा भवेत्यादिकमाशीर्वचनं लग्नकं प्रतिभूरभूत् । शचीदत्ताशीःसहस्रबलाद्भैम्यपि सुभगेति निश्चितमित्यर्थः । आशीःश्रुतिरिति पाठे आशिषां श्रवणं । अथवा आशिष एव सत्यत्वाच्छ्रुतिर्वेद इत्यर्थः । अयन्तु पाठः साधीयान् । अनयोरन्योन्यमनुरागोचितं सौभाग्यमपि भविष्यतीत्यनुमानम् । वृत्तं । णेरध्ययने वृत्तमिति (पा० ७।२।२६) सिद्धं । आस्माकेति सम्बन्धेऽणि, तस्मिन्नणि चेति (पा० ४।३।२) आस्माकादेशः । लग्नकशब्दो नपुंसकोऽपि । तस्या भैम्या वृत्तानां जातानां वृत्तानां हंसप्रेषणादिचरितानां क्रमाः परिपाट्यस्तैर्निजगदे इति वा ॥ ९० ॥

आसुत्राममिति । भैम्यैव आसुत्राममिन्द्रमभिव्याप्य मखभुजां देवानामपासनात्त्यागाद्धेतोः राजव्रजे विषये लज्जाया मृजा परिमार्जनं युक्ता आर्ज्जि कृता । यत्कृतं तद्युक्तमित्यर्थः । यतः तस्मै इदं तदर्थं तस्य भावस्तादर्थ्यं तेन भैमीनिमित्तेन राज्ञामागमनं यन्निमित्तोऽनुरोधो दाक्षिण्यं तत्र परया । यो हि यदर्थमागच्छति स तस्य दाक्षिण्यं कुर्व्वन् लज्जां मार्ष्टीत्यु-

आत्मानं त्रिदशप्रसादफलतां पत्ये विधायानया
ह्रीरोषापयशःकथानवसरः सृष्टः सुराणामपि ॥ ९१ ॥

चितमेवेत्यर्थः। मदर्थमागतानामेषां मत्प्राप्तिर्नाभूत् लज्जा च जातेत्ययुक्तमेतदिति राजसु समरूपत्वेनेन्द्रादीनपि भैमी नावृणात्। ततश्च यत्रेन्द्रादयोऽपि त्यक्तास्तत्र मानुषाणामस्माकं का कथेति तेषां लज्जामार्जनं भैम्यैव युक्तं कृतमिति भावः। स नलो ऽर्थः प्रयोजनं यस्य तस्य भावस्तादर्थ्यं तेन नलप्रयोजनत्वेन नलवरणार्थं यदागमनं तत्र यः पक्षपातस्तन्निष्ठया नलानुरक्तया अत एव इन्द्रादीनां त्यागः कृत इति वा। तर्हि इन्द्रादीनां लज्जा रोषाऽकीर्त्तिश्च कृतेति देवद्रोहादशुभाशङ्कां परिहरति। अनया भैम्या पत्ये नलायात्मानं त्रिदशप्रसादस्य फलतां वररूपत्वं विधाय सुराणामिन्द्रादीनामपि ह्रीरोषापयशसां कथायाः कथामात्रस्यापि अनवसरः अवकाशाभावः सृष्टः कृतः। अस्मान्नावृणोदिति सजातीयान् क्षत्त्रियांश्च प्रति लज्जा अस्माकं पश्यतां नलमवृणोदिति शेषः। नलं स्वीकृत्य देवानपमानितवतीत्यपयशः। देवैश्च प्रसन्नीभूय वरत्वेन नलाय भैमी दत्ता। एतदर्थमेव ते पृथिव्यामागता न भैम्यभिलाषेणेति लोकप्रतीतेर्यया देवानामपि लज्जादिमार्ज्जनं कृतमिति सर्व्वानुरागादनयोः शुभपरम्परैव भविता नाशुभशङ्कालेशोऽपीति भावः। पत्ये नयत्येति पाठः समीचीनः। आत्मानं त्रिदशप्रसादफलतां नयत्या प्रापयन्त्येत्यर्थः। आसुत्रासं। अत्राभिविधावाङ्। अत्य-

इत्यालेपुरनुप्रतीकनिलयालङ्कारसारश्रिया
ऽहंकुर्व्वत्तनुरामणीयकममूरालोक्य पौरस्त्रियः।
सानन्दं कुरुविन्दसुन्दरकरस्यानन्दनं स्यन्दनं
तस्याध्यास्य यतः शतक्रतुहरित्क्रीडाद्रिमिन्दोरिव॥ ९३॥

यीभावे, अनश्चेति (पा० ५।४।१०८) टच्। मृजा। भिदादित्वादङ् (पा० ३।३।१०४)॥ ९१॥

इतीति। अमूः पौराणां स्त्रिय इति पूर्व्वोक्तप्रकारेण यथास्फूर्ति यथाभिप्रायमन्योन्यमालेपुः संवादं चक्रुः। किम्भूताः। कुरुविन्दवत् पद्मरागवत् सुन्दरौ रक्तौ करौ यस्य तस्य आनन्दनं वेगवत्त्वादिगुणयोगादानन्दकारिणं स्यन्दनं रथमध्यास्य यतो गच्छतस्तस्य नलस्य अनुप्रतीकं प्रत्यवयवं निलयं स्थानं येषां तेषामलङ्काराणां सारश्रिया श्रेष्ठशोभया कृत्वा करसौन्दर्य्यादहमधिकमिति हस्तसौन्दर्य्यं वदति, हस्तसौन्दर्य्यादहमधिकमिति करसौन्दर्य्यमित्येवं प्रत्येकमहं कुर्व्वदहङ्कारं कुर्व्वत् तनुरामणीयकं शरीरसौन्दर्य्यमालोक्य सानन्दा हर्षपराः। कस्येव। पद्मरागवद्रक्तकिरणस्य नन्दनवनमभिव्याप्य मर्य्यादीकृत्य चास्थितं नन्दनसमीपे स्थितं। शतक्रतोर्हरितदिक् प्राची दिक् तस्याः क्रीडाद्रिमुदयाचलमधिष्ठाय गच्छत उदितवरस्येन्दोरिव। तत्स्कायकान्तिं विलोक्य यथा सानन्दा भवन्ति तथेत्यर्थः। चन्द्रोदये स्त्रीणां हर्षः। स्यन्दनमध्यास्य। अधिशीङिति (पा० १।४।४६) त्याधारस्य कर्म्मत्वं। यतः। इण् शतरि रूपं॥ ९२॥

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यं।
यातः पञ्चदशः कृशेतररसस्वादाविहायं महा-
काव्ये तस्य हि वैरसेनिचरिते सर्गो निसर्गोज्ज्वलः॥ १५॥

श्रीहर्षमिति। अर्द्धं पूर्व्ववत्। कृशेतरेणातिभूयसा रसेन स्वादावमृतरूपे नलीयचरिते पञ्चाधिकानां दशानां पूरणः पञ्चदशः। स्वादाविति भाषितपुंस्कं॥ ९३॥

इति श्रीवेदरकरोपनामकश्रीनरसिंहपण्डितात्मजनारायणकृते नैषधीयप्रकाशे पञ्चदशः सर्गः॥ १५॥

षोडशः सर्गः।

श्रीलक्ष्मीनृसिंहौ जयतः।

वृतः प्रतस्थे स रथैरथो रथी
गृहान् विदर्भाधिपतेर्धराधिपः।
पुरोधमङ्गौतममात्मवित्तमं
द्विधा पुरस्कृत्य गृहीतमङ्गलः॥१॥
विभूषणांशुप्रतिबिम्बितैः स्फुटं
मृगावदातैः स्वनिवासिभिर्गुणैः।

वृत इति। अथो रथारोहणानन्तरं रथैः कुन्ताः प्रविशन्तीतिवद्रथिभिर्वृतस्तथा रथी प्रशस्तरथोपेतः स धराधिपो नलः विदर्भाधिपतेर्गृहान् प्रति प्रतस्थे ययौ। किम्भूतः। आत्मवित्तमं ब्रह्मज्ञानिमध्ये श्रेष्ठं गौतमं गौतमसगोत्रं एतन्नामानं वा पुरोधसं द्विधा द्वाभ्यां प्रकाराभ्यां पुरस्कृत्याग्रे कृत्वा सम्पूज्य च विवाहे कार्यभारं तस्मिन्नारोप्य वा गृहीतानि स्वीकृतानि दध्यक्षतपूर्णकलशादीनि मङ्गलानि येन। रथैः सह वर्त्तमानैः पुरुषैर्वा प्रतस्थे। समवप्रविभ्यस्थः (पा॰१।३।२२) इति तङ्॥१॥

विभूषणेति। मृगेक्षणानां चामरधारिणीनां विधुप्रभैश्चन्द्र-

मृगेक्षणानां समुपासि चामरै-
र्विधूयमानैः स विधुप्रभैः प्रभुः ॥ २ ॥
परार्ध्यवेशाभरणैः पुरःसरैः
समं जिहाने निषधावनीभुजि ।

धवलैः तथा विधूयमानैश्चाल्यमानैश्चामरैः स प्रभुर्नलः समुपासि वीज्यते स्म स्फुटमुत्प्रेक्षे । विभूषणानां रत्नखचितनिजमण्डनानामंशुषु किरणेषु प्रतिबिम्बितैः, तथा मृगशावदातैरत्युज्ज्वलैः, स्वस्मिन्निवमन्त्र्येवंशीलैः, श्रुतशीलसौन्दर्यादिभिर्गुणैरिव प्रत्यक्षीभूतैर्नलगुणैरिव चामरैरुपासीत्यर्थः । चामराण्यपि विभूषणांशुप्रतिबिम्बितानि । स्फुटं निश्चितं । ईदृशैश्चामरैरेव गुणैरिति वा ॥ २ ॥

परार्ध्येति । निषधावनीभुजि नले परार्ध्यानि श्रेष्ठानि वेशाभरणानि रूपालङ्कारा येषां तैः पुरःसरैः समं सह जिहाने चलति सति वृत्रशात्रव इन्द्रः सुनासीर इति पदस्याभिधेयतां वाच्यत्वं यदि दधार तर्हि रूढिमात्रं दधार न तु शोभनं नासीरं सेनामुखं यस्येति यौगिकतया । शुद्धवृत्त्या मुख्यया वृत्त्या नले एव दृश्यते न त्विन्द्रे । त्रिविधाः शब्दाः केवलयौगिकाः केवलरूढाः योगरूढिकाश्च । तत्र पाचकादयो यौगिकाः । तैलपायिकादयो रौढिकाः । आतपत्रादयो योगरौढिकाः । तदेवं तादृशाग्रेसराभावादिन्द्रस्य सुनासीरपदवाच्यत्वं यद्यस्ति तर्हि रूढ्यैवास्तु व्युत्पत्त्या तु नल एवोचितमित्यर्थः ।

दधे सुनासीरपदाभिधेयतां
स रूढिमात्राद्यदि वृत्रशात्रवः ॥ ३ ॥
नलस्य नासीरस्पृजां महीभुजां
किरीटरत्नैः पुनरुक्तदीपया।
अदीपि रात्रौ वरयात्रया तया
चमूरजोमिश्रतमिस्रसम्पदा ॥ ४ ॥
विदर्भराजः क्षितिपाननुक्षणं
शुभक्षणासन्नतरत्वसत्वरः।

इन्द्रादप्यधिको नलः। तत्पुरःसराश्चेन्द्रपुरःसरदेवेभ्योऽप्यधिका इति भावः। परार्द्धे भवानि परार्द्ध्यानि परावराधमोत्तमपूर्व्वाच्चेति (पा० ४।३।५) यत्। शत्रुरेव शात्रवः प्रज्ञादित्वात् स्वार्थेऽण्। इन्द्रःश्रवाः सुनासीर इत्यमरः ॥ ३ ॥

नलस्येति। तया भैमीवरस्य नलस्य यात्रया रात्रौ अदीपि शुशुभे। किम्भूतया। नलस्य नासीरस्पृजां सेनायामग्रेसरीभूतानां महीभुजां राज्ञां किरीटरत्नैः स्वैनैवान्धकारनिराकरणात् पुनरुक्ता व्यर्थीकृता दीपा यस्यां तया। तथा चमूरजोभिर्मिश्रा बहुकृता तमिस्रसम्पत्तिभिरसङ्घो यया। महान्धकारेऽपि रत्नदीपप्रकाशैर्भूयिष्ठप्रकाशत्वाददीपीत्यर्थः। महान्धकारे एव हि दीप्यः शोभन्त इत्यर्थः। राज्ञां सेनामुखाग्रवर्त्तित्वेन नलस्य चक्रवर्त्तित्वं सूचितं। अदीपि। भावे लः ॥ ४ ॥

विदर्भेति। विदर्भराजो यान् क्षितिपानेव दूतान् अनुक्षणं

दिदेश दूतान् पथि यान् यथोत्तरं
चमूममुष्योपचिकाय तच्चयः ॥ ५ ॥
हरिद्विपद्वीपिभिरंशुकैर्नभो
नभस्वदाध्मापनपीनितैरभूत् ।

वारंवारं नलाकारणार्थं दिदेश प्राहिणोत् । तेषाञ्च यः पूर्व्व-
मेकः प्रेषितस्तदनन्तरञ्चान्यः । एवमुत्तरोत्तरमनतिक्रम्य पथि
अमुष्य नलस्य चमूमुपचिकाय भूयसीमकृत । किम्भूतः । शुभस्य
चणस्य लग्नस्य समयस्यामन्नतरत्वेन नैकट्येन सत्वरो वेगवान् ।
भूयांसो नृपाः प्रेषिताः । दूता इत्यनेनादरातिशयः सूचितः
॥ ५ ॥

हरीति । तरस्वतां वेगवतां अश्वानां ध्वजिनी सेना, तर-
स्वन्तो ऽश्वा यस्यां सा वा, तस्य ध्वजभूतैरंशुकैर्वस्त्रनिमित्तै-
स्तथा नभस्वता वायुना कृतं यदाध्मापनं परिपूरणं तेन पीनितैः
पुष्टीकृतैः सजीवसिंहादितुल्यैर्हरिभिः सिंहैर्द्विपैर्हस्तिभिर्द्वी-
पिभिर्व्याघ्रैः कृत्वा तत्सेनाया उपरितनं नभस्याकाशं वनं विपि-
नतुल्यमभूत् अजनि । किम्भूतं वनं । विचित्राणि नानावर्णानि
चीनदेशोत्पन्नानि सूक्ष्माणि ध्वजसम्बन्धीनि चाम्बराणि वस्त्रा-
णि तान्येव वल्लयो लतास्ताभिर्वेल्लितं वेष्टितं । वने सिंहादयो
वृचा लताश्च सन्ति । ध्वजपदेन वृचा अपि लच्यन्ते । तर-
स्विनो ऽश्वा यस्य नलस्य तरस्वदश्वा वा या ध्वजिनी प्रकृत-
त्वात्तस्यैव सा ध्वजिनी नभसि नभस्वदाध्मापनपीनितैरंशुकै-

नरखदश्वध्वजिनीध्वजैर्वनं
विचित्रचीनाम्बरवल्लिवेल्लितम् ॥ ६ ॥
भुवाऽऽह्वयन्तीं निजतोरणस्रजा
गजालिकर्णानिलखेलया ततः ।
ददर्श दूतीमिव भीमजन्मनः
स तत्प्रतीहारमहीं महीपतिः ॥ ७ ॥

ध्वजैः पताकाभिः कृत्वा वनमभूत्। किम्भूता। ध्वजिनी हरिभिरश्वैर्हस्तिभिर्द्वीपिभिर्वा द्वीपान्तरवासिभिः सेनाचरीभूतैराजभिरुपलक्षिता। वनमपि सिंहादिभिरुपलक्षितं। विचित्रेति पूर्ववदिति वा। वनपक्षे वनो मृगविशेषः। ऊर्द्धं विस्तृतत्वादम्बरगामिन्यो वल्लयः ॥ ६ ॥

भुवेति। ततः प्रस्थानानन्तरं स महीपतिर्नलस्तस्य भीमस्य प्रतीहारभूमिं भीमजन्मनो भैम्या दूतीमिव ददर्श। किम्भूतां। द्वारे निबद्धा गजास्तेषामालिः पङ्क्तिस्तस्याः कर्णानिलेन कृत्वा खेलति चलतीति खेला तया निजया स्वीयया पुष्पदलरचितया तोरणस्रजा तल्लक्षणया भुवा अनुरागातिशयोत्सुकतया आह्वयन्तीं शीघ्रमागच्छेति भूसंज्ञया आकारयन्तीं। दूत्यपि चलन्त्या भुवाह्वयति। राजगृहद्वारदर्शनेनातिसत्वरोऽभूदिति भावः। स्त्री द्वार्द्वारं प्रतीहार इत्यमरः। पचाद्यच्। प्रतीहारः। उपसर्गस्य घञीति (पा० ६।३।१२२) दीर्घः ॥ ७ ॥

श्लथैर्दलैस्तम्भयुगस्य रम्भयो-
श्चकास्ति चण्डातकमण्डिता स्म सा।
प्रिया सखीवास्य मनस्थितिस्फुरत्-
सुखागतप्रश्निततूर्यनिस्वना ॥ ८ ॥

श्लथैरिति। सा द्वारभूमिः रम्भयोः कदल्योर्द्वारमण्डनार्थं शकुनार्थञ्च रोपितस्तम्भयुगस्य छेदवशाद्वायुवशाद्वा श्लथैः शिथिलैर्दलैः पत्रैः कृत्वा लम्बमानचण्डातकसञ्ज्ञेन वस्त्रेण मण्डिता भूषितास्य नलस्य प्रियाया भैम्याः सखीव चकास्ति स्म। किम्भूता सा। अनुरागवशान्मनसि अन्तःकरणे या नलस्य स्थितिस्तया स्फुरन् सदा चित्तनिवासेनोल्लसन् यः सुखेनागतस्यागमनस्य सम्बन्धी प्रश्नः सुखेनागत इत्येवंरूपः प्रश्नः स कृतः प्रश्नितः सुखागतप्रश्नतां प्रापितस्तूर्यनिस्वनो यया सा। चिरप्रोषिते हि नायके समागच्छति सति प्रेयस्यां त्रपया तूष्णीं स्थितायां चण्डातकमण्डिता तत्सखी सुखागतप्रश्नं करोतीति स्थितिः। अत्र दलानि चण्डातकस्थाने। तूर्यनिस्वनाश्च सुखागतप्रश्नस्थाने। कदलीस्तम्भौ तूरुस्थानीयौ। अर्द्धोरुकं वरस्त्रीणां यच्चण्डातकमंशुकमित्यमरः। नृपाय मुक्तं पुरः पश्चाच्च प्रलम्बि वर्त्तुलभागद्वयं। कदलीसदृशं वस्त्रं नर्त्तकीभिरन्तःपरिधीयमानं चण्डातकं। प्रश्नितेति। तत्करोतीति ण्यन्तान्निष्ठा न तारकादिः ॥ ८ ॥

विनेतृभर्तृद्वयभीतिदान्तयोः
परस्परस्मादनवाप्तवैशसः।
अजायत द्वारि नरेन्द्रसेनयोः
समागमः स्फारमुखारवोद्गमः ॥ ९ ॥
निर्दिश्य बन्धूनित इत्युदीरितं
दमेन गत्वार्द्धपथे कृतार्हणं।
विनीतमाद्वारत एव पद्गतां
गतं तमैक्षिष्ट मुदा विदर्भराट् ॥ १० ॥

विनेत्रेति। नरेन्द्रौ भीमनलौ तयोः सेनयोः समागमो राजगृहद्वारि एवम्भूतोऽजायत जातः। किम्भूतयोः। विनेतृ शासकं नलभीमलक्षणं भर्तृद्वयं तस्माद्भीतिस्तया दान्तयोः शान्तयोः। ताभ्यां नियमिततादृक्कलहादिसंरम्भयोः अत एव परस्परस्मादन्योन्यस्मादनवाप्तमलब्धं युद्धनिमित्तं वैशसं मारणं येन। सैन्यद्वयमेलने हि कलहो भवति परं सौहार्द्दान्नियमितत्वादनयोर्नाभूदित्यर्थः। तथा स्फारोऽतिमहान् मुखारवस्यास्फुटवर्णविशेषस्य मुखध्वनेरुद्गम उदयो यत्र ॥ ९ ॥

निर्दिश्येति। विदर्भराड् भीमः मुदा उचितो जामातेति हर्षेण तमैक्षिष्ट नलमद्राक्षीत्। किम्भूतं। भीमेनैव सम्मुखं गत्वा बन्धून् सुहृदो भ्रातॄन् वा स्वमातापितृसम्बन्धिनो निर्दिश्याज्ञाप्य प्रस्थाप्य इत्यनेन यथा आगम्यतामित्यादिप्रकारैरुदीरितमुक्तं। बन्धुमुखेन ज्ञापितमार्गं तथा दमाख्येन भैमीभ्राता

अथायमुत्थाय विसार्य्य दोर्युगं
मुदा प्रतीयेष तमात्मजन्मनः।
सुरस्रवन्त्या इव पात्रमागतं
धृताभितोवीचिगतिः सरित्पतिः॥ ११॥
यथावदस्मै पुरुषोत्तमाय तां
स साधुलक्ष्मीं बहुवाहिनीश्वरः।

ऽर्हपथे कृताऽर्हणा ऽर्घ्यादिपूजा यस्मै। तथाऽनुद्धतवेशत्वादि-
नीतं। अत एव द्वारत आद्वारसीमामेवावधीकृत्य रथादुत्तीर्य
पद्गतां पादचारित्वं गतं प्राप्तं। दमेनैव बन्धून् पुरः प्रस्थाप्य इत
इत्युदीरितमिति वा। आद्वारतः पदद्वयं पद्गत इति, पादस्य
पदाऽऽज्यातिगोपहतेष्विति (पा० ६।३।५२) पादस्य पत्॥ १०॥

अथेति। अथ नलदर्शनानन्तरं अयं भीम उत्थाय प्रत्यु-
त्थानं कृत्वा आत्मजन्मनो भैम्याः पात्रं योग्यं आगतं तं नलं
दोर्युगं विसार्य्य प्रसार्य्य मुदा प्रतीयेष आलिलिङ्ग। कः कमिव।
सरित्पतिः सुरस्रवन्त्या भागीरथ्या आगतं पात्रं प्रवाहमिव
नौकादिकं वा। किम्भूतः। धृतेऽभितः पार्श्वद्वये वीचीगती तरङ्ग-
परम्परे येन। वीचिततिरित्यपि पाठः॥ ११॥

यथावदिति। अथालिङ्गनानन्तरं महीभृतां राज्ञां पति-
र्बहुवाहिन्या ईश्वरः स्वामी स भीमः सर्व्वविदे सर्व्वविद्याविज्ञाय
शिवाय शुभश्रवणकीर्त्तनायात एव पुरुषोत्तमाय पुरुषश्रेष्ठा-
यास्मै नलाय साधुलक्ष्मीं समीचीनकायकान्तिं अत एव शिवां

शिवामथ स्वस्य शिवाय नन्दिनीं
ददे पतिः सर्व्वविदे महीभृताम् ॥ १२ ॥
असिस्वदद्यन्मधुपर्कमर्पितं
स तद्व्यधात्तर्कमुदर्कदर्शिनां।

शुभरूपां तां भैमीं स्वस्य नन्दिनीं कन्यां यथावद्वेदोक्तविधिना ददे। मधुपर्कात् पूर्व्वं कन्यादानमित्याचारः। मधुपर्कादिविधिपूर्व्वं ददे। दातुमारब्धवानिति वा। अथ बहुनदीश्वरः समुद्रः पुरुषोत्तमाय तां कन्यां लक्ष्मीं यथावदेतत् साधु, तथा पर्व्वतराजो हिमालयः सर्व्वज्ञाय श्रीमहादेवाय स्वपुत्रीं पार्व्वतीं ददे तदपि साधु। यद्वा मैनाकादिपर्व्वतानां पालयिता समुद्रः शिवरूपाय विष्णवे शुभरूपां लक्ष्मीं ददे तत्साधु। अथ वा बहुनदीयुक्तो हिमालयः पुरुषोत्तमरूपाय श्रीहराय पार्व्वतीरूपां लक्ष्मीं लक्ष्मीरूपां पार्व्वतीमिति वा। नलाय पुरुषोत्तमायेव शिवायेव भैमीं लक्ष्मीमिव शिवामिव भीमः समुद्र इव हिमवानिवेत्युपमालङ्कारो व्यज्यते। साधुलक्ष्मीमित्यत्र समासान्तविधेरनित्यत्वात् कवभावः ॥ १२ ॥

इदानीं विवाहविधिमाह असिस्वददिति। स नलः अर्पितं भीमेन दत्तं सहमिश्रितं कांस्यपात्रस्थं दधिमधुघृतरूपं मधुपर्कं यदसिस्वदत् आस्वादितवान् तदास्वादनं उदर्कदर्शिनां विवाहोत्तरफलपरिपाकभूताधरचुम्बनादिविचारिणां लोकानां इति तर्कं ऊहं व्यधात् चक्रे। इति किं। यद्यस्मादेष नलो भीम-

यदेष पास्यन्मधु भीमजाधरं
मिषेण पुण्याहविधिं तदा कृतं ॥ १३ ॥
वरस्य पाणिः परघातकौतुकी
वधूकरः पङ्कजकान्तितस्करः।

जाधररूपं मधु पास्यन् पास्यति तस्मात् तदा मधुपर्कदानावसरे मधुपर्कास्वादनमिषेण पुण्याहविधिं शुभनक्षत्रादियुक्तपुण्यदिनकृत्यं मङ्गलपूर्व्वमुपक्रममकृत। अन्योऽपि शुभकार्य्यं करिष्यन् शुभविवाहदिनादौ तदीयमारम्भं करोति। तथा तेनापि भैम्यधरपाने मुहूर्त्तश्चक्र इति जनेन तर्कितमित्यर्थः। अधरस्यापि स्वादुत्वमुक्तम्। अमिस्वददिति। चौरादित्वात् स्वदेश्चङ्। ये तमपि षोपदेशं मन्यन्ते तैः षत्वाभावश्चिन्त्यः। अषिस्वददिति पाठाभावादर्थस्य दुर्योज्यत्वाच्च चौरादिक एव। पास्यन्। लटः शत्रिति (पा० ३।२।१२४) शता। पुण्यञ्च तदहश्चेति, राजाह इति(पा० ५।४।९१) टचि पुण्यसुदिनाभ्यामह्नःक्लीवतेति पुण्याहं तत्र विधिरिति विग्रहः॥ १३॥

वरस्येति। वरस्य पाणिः परघातकौतुकी शत्रुमारणकुतूहली, वधूकरः पङ्कजकान्तितस्करः कमलश्रीचौरो यस्मात्तस्मात् कारणात् किमु सुराज्ञि राजन्वति तत्र तस्मिन्विदर्भमण्डले विदर्भराज्ये तौ वरवधूकरौ कर्कशैः कुशैः नितरां बद्धौ उभयहस्तयोः कुशबन्धनपूर्व्वकं पाणिग्रहणमभूत्। तत्र कुशबन्धने कारणोत्प्रेक्षा क्रियते। एको हिंस्रोऽपरश्चौर इति सापराधत्वात्

सुराज्ञि तौ तत्र विदर्भमण्डले
ततो निबद्धौ किमु कर्कशैः कुशैः ॥ १४ ॥

विदर्भजायाः करवारिजेन यन्-
नलस्य पाणेरुपरि स्थितं किल।
विशङ्क्य सूत्रं पुरुषायितस्य तद्
भविष्यतोऽस्मायि तदा तदालिभिः ॥ १५ ॥

किमु बद्धावित्यर्थः। अन्यत्रापि सौराज्ये अन्यघातकतस्करौ कठिनतरदोरकैर्बध्यते। पाणिग्रहणं जातमिति भावः। कुशैः पाणिबन्धनमात्रदेशाचारः, यथाक्रमं करयोः शौर्य्यं मार्दवञ्च सूचितं। सुराज्ञि। राजाहसखिभ्यष्टच् (पा० ५।४।९१) इत्यस्य नियततत्पुरुषविषयत्वादत्र बहुव्रीहिविषयत्वाट्टचः प्राप्त्य भावः ॥ १४ ॥

विदर्भेति। विदर्भजायाः करवारिजेन यत् तदा पाणिग्रहणसमये नलस्य पाणेरुपरि स्थितं तदुपरिस्थानं किल निश्चितं विपरीतरतेर्भविष्यतः पुरुषायितस्य पुरुषवदाचरितस्य विपरीतरतस्य इति यावत् सूत्रं सूचनाकारि विशङ्क्य विशेषेण सम्भाव्य कौतुकविलोकनार्थं निकटस्थिताभिस्तदालिभिरस्मायि ईषद्धसितं। विपरीतरते हि स्त्रीपाणिरुपरि भवति विवाहे वधूकरो वरकरस्योपरि भवति। सूत्रञ्च सूचनाग्रन्थ इति विश्वः ॥ १५ ॥

सखा यदस्मै किल भीमसंज्ञया
स यत्तसख्याधिगतं ददौ भवः।
ददे तदेष श्वशुरः सुरोचितं
नलाय चिन्तामणिदाम कामदं॥ १६ ॥

बहोर्दुरापस्य वराय वस्तुन-
श्चितस्य दातुं प्रतिविम्बकैतवात्।
बभौतरामन्तरवस्थितं दधद्
यदर्थमभ्यर्थितदेयमर्थिने॥ १७ ॥

इदानीमित आरभ्य न तेन वाहेष्विति यावद्विवाहोचितं यौतुकं प्रतिपादयति। सखेति। भीमसंज्ञया भीम इति नाममात्रेण सखा स्वस्यापि भीमनामत्वात् किलोत्प्रेक्षायां स भवो महेश्वरः अस्मै भीमाय यक्षेण कुवेरेण सह यत्सख्यं मैत्री तेनाधिगतं प्राप्तं यच्चिन्तामणीनां दाम माल्यं ददौ, एष श्वशुरो भीमः तत्कामदं सकलाभिलषितदायि सुराणामुचितं चिन्तामणिदाम नलाय ददे। उत्प्रेक्षायामेव तात्पर्य्यं। स्रुतोचितमिति पाठे भैस्मुचितम्॥ १६ ॥

तदेव वर्णयति। बहोरिति। यच्चिन्तामणिदाम बभौतरां। किम्भूतं। बहोरपरिमितस्य तस्य तथा दुरापस्य दुर्लभस्य दिव्यस्य वराय जामात्रे दातुं चितस्य पुरः पुञ्जीकृतस्य रत्नहेमवसनादेर्वस्तुनः पदार्थसमूहस्य स्वस्मिन् प्रतिविम्बस्य कैतवाद्व्याजात् अन्तरवस्थितं स्वस्य मध्ये स्थितमर्थिने याचकायाभ्यर्थितं प्रार्थितं

असिं भवान्याः क्षतकासरासुरं
वराय भीमः स्म ददाति भासुरम्।
ददे हि तस्मै धवनामधारिणे
स शम्भुसम्भोगनिमग्नयाऽनया॥ १८॥

सत् तदानीमेव दातुमर्हं अर्थं वस्तुजातं दधत् धारयदिव।
ददाविति पूर्वेण सम्बन्धः। यदा यद्यो यावद्याचिष्यते तदा
तद्वस्तु तस्मै दातव्यमिति बुद्ध्यास्य नाम सार्थकीकर्तुं वस्तुजातं
पुरःस्थापितमेवेत्यर्थः। वद्देवारिति भाषितपुंस्कं॥ १७॥

असिमिति। भीमः क्षतः कासराख्यो महिषाख्योऽसुरो
येन तं भासुरं देदीप्यमानं भवान्या दुर्गाया असिं खड्गं व-
राय ददाति स्म। तस्याः खड्गस्तेन कथं प्राप्त इत्यत आह।
हि यस्मात् स्फुटं वा शम्भुना सह सम्भोगस्तत्र निमग्नया सुरतर-
सासक्तया ऽनया दुर्गया वैरिदलनानन्तरं खस्याः प्रयोजना-
भावात् सुरतासक्तत्वे खड्गधारणस्य रसभङ्गकत्वाच्च धवनामधा-
रिणे भीम इति शिवनामधारकाय शम्भुसेवकाय तस्मै भीमाय
ददे। शम्भौ सम्यगविच्छेदेन निरन्तरं भोगाय निमग्नया दक्षि-
णार्द्धेन प्रविष्टया वा तद्वस्तु तया प्रसादो दत्तः। लुलापो म-
हिषो वाहद्विषत्कासरसैरिभा इत्यमरः। भासुरं। भञ्जभासमिति
(पा० ३।२।१६१) घुरच्॥ १८॥

अधारि यः प्राङ्महिषासुरद्विषा
कृपाणमस्मै तमदत्त कूकुदः ।
अदायि तस्या हि धवार्द्धमज्जिना
स दक्षिणार्द्धेन पराङ्गदारणः ॥ १९ ॥
उवाह यः सान्द्रतराङ्गकाननः
स्वशौर्य्यसूर्य्योदयपर्व्वतव्रतम् ।

अधारीति। महिषासुरद्विषा दुर्गया प्राक् यः खड्गोऽधारि, कूकुदः कन्यादाता भीमः तं कृपाणं खड्गं सत्कारपूर्व्वं सालङ्कारमस्मा अदत्त। कथं तेन लब्ध इत्याशङ्क्याह। हि यस्मादर्धनारीश्वरत्वाद् धवस्य भर्त्तुः शिवस्य अर्द्धमज्जिना अर्द्धप्रविष्टेन तस्याः पार्व्वत्या दक्षिणार्द्धेन दक्षिणशरीरभागेन पराङ्गदारणः स खड्गः अदायि त्यक्तः। मखड्गेन धववामार्द्धं विशता यदीयदक्षिणार्द्धेन तद्विदारिष्यते इति भिया त्यक्तः। अदायीति पाठेऽनर्थो न। तस्या दक्षिणार्द्धेन तस्मै यस्माद्दायीत्यर्थः। अयं पाठः साधीयान्। सत्कृत्यालङ्कृतां कन्यां यो ददाति स कूकुद इत्यमरः ॥ १९ ॥

उवाहेति। यः स्वस्य भीमस्य खड्गस्यैव वा शौर्य्यं प्रतापरूपो यः सूर्य्यस्तस्योदयस्तत्सम्बन्धी पर्व्वत उदयाचलस्तस्य व्रतं नियम सदा सूर्य्योदयकारित्वलक्षणं उवाहाधत्त। किम्भूतः। सान्द्रतराणि अत्यन्ति सूक्ष्माणि अङ्गकानि अङ्गानि मुद्रासुद्गरपत्रीवल्लीरूपाणि तेषां अननं जीवनं यत्र दधार इति

सनिर्झरः शाणनधौतधारया
समूढसन्ध्यः क्षतशत्रुजासृजा ॥ २० ॥
यमेन जिह्वा प्रहितेव या निजा
तमात्मजां याचितुमर्थिना भृशम् ।

यावत् । सान्द्रतराणां वा पूर्वोक्तानामेवाङ्कानां काननं समूहो यत्र । उदयाचलपक्षे सान्द्रतराणि अङ्केषु ऊर्द्धाधोभागेषु वनानि यस्य । तथा शाणनेन लोहकारचक्रघर्षणेन धौतया उज्ज्वलीकरणेन दत्तपानीयधारया कृत्वा सनिर्झरः सप्रवाहः । धारैव निर्झरीभूतेत्यर्थः । उदयाचलोऽपि सनिर्झरो भवति । तथा क्षतेभ्यः खण्डितेभ्यः शत्रुभ्यो जातेनासृजा रक्तेन कृत्वा सम्यक् ऊढा धृता प्रातःसन्ध्या येन । प्रातःसन्ध्यास्थाने रक्तमेव येन धृतमित्यर्थः । सम्यग्धृता सन्ध्यात् सरूपः फलकसन्धिर्येन अतिदृढसन्धिरित्यर्थ इति वा । यद्वा क्षतशत्रुजासृजा समूढः प्राप्तः सन्धिर्यस्य त्सरुफलकसन्धिपर्यन्तं शत्रुशरीरे निमग्न इत्यर्थः । उदयाचलोऽप्यूढप्रातःसन्ध्य उदयाचलतुल्योऽभूदित्यर्थः । तमधत्तेति पूर्वेण सम्बन्धः । अङ्ककेतिपक्षे, अल्पे (पा० ५ । ३ । ८५) इति कः ॥ २० ॥

यमेनेति । स भीमः तामसिपुत्रिकां क्षुरिकामपि अस्मै ददे न केवलं खड्ग इत्यपरार्थः । न केवलं पुत्रीमपि तु क्षुरिकामपि । तां कां । भृशमर्थिना भैम्यनुरागिणा यमेन तं भीमं भैमीं मह्यं देहीति आत्मजां याचितुं दूतीप्रेषणावसरे निजा स्वीया

स तां ददेऽस्मै परिवारशोभिनीं
करग्रहार्हामसिपुत्रिकामपि ॥ २१ ॥
यदङ्कभूमौ बभतुः स्वयोषिता-
मुरोजपत्रावलिनेत्रकज्जले।
रणस्थलस्थण्डिलशायिताव्रते
गृहीतदीक्षैरिव दक्षिणीकृते ॥ २२ ॥

प्रहिता प्रेषिता या जिह्वेव। नियतं प्राणहारित्वाद्यमजिह्वा-
तुल्या अतितीक्ष्णा शौर्येण तुष्टो यमो यां भीमाय दत्तवान्।
किम्भूतां। परिवारशालिनीं चर्मकोशेन शोभमानां। अथ सखी-
लक्षणपरिजनशोभिनीं। करग्रहार्हां हस्तग्रहणयोग्यां साधुमुष्टि-
देशां। पूर्वं यद्यपि भैमी दत्ता तथापि परिवारसाहित्येने-
दानीं दत्तेत्यर्थः। छुरिकां सखीश्च यौतकत्वेन ददाविति भावः।
छुरिका चासिपुत्रिकेत्यमरः। याचिर्द्विकर्मा ॥ २१ ॥

यदिति। यस्याः शस्त्र्या अङ्कभूमौ पट्टिकाधा ऊर्द्धाधोदेशौ
स्वयोषितां स्वस्य स्त्रीणां उरोजपत्रावलिः कस्तूरिकालिखित-
स्तनपत्रवल्ली नेत्रकज्जलञ्च एते इव बभतुः शुशुभाते। किम्भूते।
रणस्थले या स्थण्डिलशायिता व्रतवशाद्यो वेदिकायां शेते स
स्थण्डिशायी तद्भाव एव व्रतं तत्र विषये गृहीता दीक्षा यैः स्वी-
कृतनियमविशेषेण भूपतिभिः शत्रुभिः दक्षिणीकृते व्रताङ्गदक्षि-
णात्वेन शस्त्रे दत्ते। दीक्षोपदेशिने हि स्त्रीणां रम्यमलङ्कारादि
दक्षिणात्वेन दीयते छुरिकयैवं स्वकृतमारणद्वारा शत्रूणां रण-

पुरैव तस्मिन् समदेशि तत्सुता-
भिकेन यः सौहृदनाटिनाग्निना।
नलाय विश्राणयति स्म तं रथं
नृपः सुलंघ्याद्रिसमुद्रकापथं॥ २३॥

स्थलस्थण्डिलशायिताव्रतमुपदिष्टं तस्मात्तस्यैते दत्तिणात्वेन दत्तं पत्रावलीनेत्रकज्जले इव। लोहमुद्गरश्यामवर्णः स्तनपत्रावली-नेत्रकज्जलत्वेनोत्प्रेक्षितैः इयं क्षुरिका निश्चितपरविदारणा वैरिनार्य्यस्तु वैधव्यात्त्यक्तकज्जलपत्रावल्य इति। स्थण्डिलशायी-ति। स्थण्डिलाच्छयितरि व्रते (पा० ४।२।१५) इत्यण्॥ २२॥

पुरेति। तस्य भीमस्य सुतायां अभिकेनानुरागिणा यथा भैमी दातव्येति बुद्ध्यायं न प्रेषितः किन्तु शत्रुभराक्रान्तभूभा-रनिराकरणद्वारा त्वमस्माकं सुहृदिति प्रेषित इति सौहार्द-स्नेहं नाटयति, एवंशीलेनाग्निना पुरैव दूतोप्रेषणावसर एव यो रथः तस्मिन् भीमे समदेशि प्रेषितो दत्तः, नृपो नलाय तं रथं विश्राणयति स्म ददौ। किम्भूतं। सुलंघ्या अनायासेनाति-क्रमणीया अद्रयः अत्युच्चपर्व्वताः समुद्राः कापथा विषमनि-म्नगर्त्तरूपा मार्गास्तु यस्य। सर्व्वत्र सञ्चरणसमर्थं। कदध्वा का-पथः समा इत्यमरः। कापथ इति। कापथ्यक्षयोरिति (पा० ६।३।१०४) कादेशः। ऋगादिना (पा० ५।४।७४) समासा-न्तोऽप्॥ २३॥

प्रसूतवत्ता नलकूबरान्वय-
प्रकाशितास्यापि महारथस्य यत्।

तमेव वर्णयति। प्रसूतेति। अस्यापि भीमेन नलाय दत्त-स्यापि महता जवादिगुणयुक्तस्य रथस्य प्रकृष्टा सूतवत्ता सूतो विद्यते यस्य स सूतवान् तद्भावः सूतवत्ता सारथिमत्ता, प्रकृष्ट-स्वामी सूतश्च तद्वत्ता वा, यस्मान्नलस्य कूबरेण युगन्धरेण सह-योऽन्वयः सम्बन्धः,नलेन सह वा यः कूबरस्यान्वयः, तेन प्रका-शिता प्रकटीकृता शोभिता च,तत्तस्माद्धेतोरेतस्य रथस्य पुष्पक-वत्कामगामि धनदविमानवत् प्रकृष्टता उत्कृष्टगुणयुक्तता पुष्प-कात् सकाशाद्वा जवादिगुणैरधिकत्वात् कुबेरस्य दृष्टान्त उदा-हरणं तस्य बलेन तत्सामर्थ्येनानुमीयते अनुमानजन्यज्ञानस्य विषयीक्रियते। न केवलं कुबेरस्य महारथस्य किन्त्वस्यापीति समुच्चयेन व्याप्तिदर्शनपुरःसरं उपनयन्निगमं सूचयत्यपिशब्दः। कुबेरस्यापि महारथस्यायुतसंख्यायुधसंयुक्तपुष्पकविमानेन कृत्वा प्रकृष्टता प्रकृष्टवस्तुमत्ता प्रकृष्टेन कृता तेनोह्यमानता वा भवति। एवं कुबेरदृष्टान्तबलेनाग्रे एतस्य पुष्पकप्रकृष्टता भविष्यतीत्य-नुमीयते। यतोऽस्यापि कुबेरस्य नलकूबराख्येनान्वयेन सन्ता-नेन पुत्रेण प्रकाशिता प्रकटिता शोभिता प्रसूतवत्ता जनयि-तृता इति साधर्म्यदृष्टान्तः। अपबलेनानुमानन्त्वेवं। विमतो महारथः पुष्पकः प्रकृष्टो भवितुमर्हति नलकूबरान्वयप्रकाशि-तप्रसूतवत्त्वात्। यो यो नलकूबरान्वयप्रकाशितप्रसूतवत्तावान् स पुष्पकः प्रकृष्टः। तथा कुबेर इत्यनुमानवशादेतत् सर्वमुच्यत

कुवेरदृष्टान्तवलेन पुष्पक-
प्रकृष्टतैतस्य ततोऽनुमीयते ॥ २४ ॥
महेन्द्रमुच्चैःश्रवसा प्रतार्य्य य-
न्निजेन पत्या कृतसिन्धुरन्वितम्।
स तद्ददेऽस्मै हयरत्नमर्पितं
पुरानुवद्धुं वरुणेन बन्धुताम् ॥ २५ ॥
जवाद्दवारीकृतदूरदृक्पथ-
स्तथाक्षियुग्माय ददे मुदं नयः।

इति यथा कथञ्चित् श्लोको व्याख्येयः। किन्तु प्रकृष्टः सुतः पुत्र इति वा। पुष्पकस्य नलः सारथिर्नास्ति तेन तत्तुल्यता नास्ति। किन्तु तत्पतिना कुवेरेणेति, अस्य तु नलः सारथिरित्ययं रथो रमणीय इति भावः। कुवेरस्य युगन्धर इत्यमरः॥ २४॥

महेन्द्रमिति। सिन्धुः समुद्रो नाम्ना उच्चैःश्रवसा अश्व चोन्नतकर्णेन सल्लक्षणनाथ च दीर्घकर्णेन दुर्लक्षणनाश्वेन महेन्द्रं प्रतार्य्य यद्धयरत्नं निजेन पत्या स्वस्वामिना वरुणेन अन्वितं युक्तमकृत वरुणायादत्तेत्यर्थः। स भीमस्तदश्वरत्नं अस्मै नलाय ददे। अनेन कथं तमश्वमित्यत आह। किम्भूतं। वरुणेन बन्धुताम-लौकमैत्रीं अनुवद्धुं वर्द्धयितुं पुरा दूतीप्रेषणावसरेऽर्पितं भीमाय दत्तं। उच्चैःश्रवसोऽप्यधिकमश्वं तस्मै ददाविति भावः॥२५॥

जवादिति। योऽश्वो लोकानामक्षियुग्माय नेत्रयुग्माय दिदृक्षायाः स्वीयरूपदर्शनेच्छाया आदरस्तस्य दासतां दासत्वं

ददद्दिदृक्षादरदासतां यथा
तथैव तत्पांशुलकण्ठनालताम् ॥ २६ ॥

ददानः पारवश्यं कुर्वन् जवाद्धेतोः अवारीकृतः अर्वाक्कृतो दूरो बहुयोजनो दृक्पथो नेत्रपथो येन दूरं गतत्वान्नेत्रयोरविषयः सन् यथा नेत्रयुग्माय मुदं प्रीतिं न ददे, दर्शनाभावात्प्रीतिं नोत्पादितवानित्यर्थः, तथा पुनरागमनसमयेऽपि तथैव दिदृक्षादरदासतया तस्य नेत्रयुगस्य पांशुलं रेणुयुक्तं कण्ठनालं यस्य तस्य भावस्तत्ता तां खञ्जणयोत्कण्ठितत्वं ददन्मुदं न ददे। तमश्वं दद इति पूर्वेण सम्बन्धः। यथातथाशब्दौ व्यत्यस्तौ योज्यौ। रूपादिविलोकनकौतुकिभिर्यावदश्वो द्रष्टुमारब्धस्तावद्वेगवशाद् दूरं गतत्वान्न दृष्टः। इदानीं यद्यपि न दृष्टस्तथापि व्याघुट्यागमनेऽवश्यं द्रक्ष्याम इति बुद्ध्या व्यापारान्तरपरित्यागपुरःसरं तद्रूपादिविशेषदर्शनादरान्नेत्रे प्रसार्य तत्रैव यावत् स्थितास्तावत् पुनरागमनसमयेऽपि खुरपुटक्षतक्षोणीरेणुसम्बन्धान्न दृष्टः। तथा चोभयथापि दर्शनाभावादुत्कण्ठाया अपरिपूर्णत्वान्नेत्रयुगस्य हर्षो नाभूदित्यर्थः। अतिजवनोऽश्व इति भावः। जवादप्रतिषिद्धो दूरो दृक्पथो येनातिदूरं नेत्राभ्यामनुगतमार्ग इति यावदेवंभूतो योऽक्षियुगाय दर्शनहर्षं तथाऽनादृत्य यथा दिदृक्षादरदासतां ददानः संस्तथैव तस्य नेत्रयुगस्य द्रष्टुर्वा शुष्ककण्ठत्वं ददे। निरन्तरदर्शनाभावात्तादृशी प्रीतिर्न जाता, किन्तु पूर्वोक्तप्रकारेण नेत्रयोर्द्रष्टुर्वा भूरेणुसम्बन्धात् शुष्ककण्ठ-

युग्मम्

दिवस्पतेरादरदर्शिनादरा-
दढौकि यस्तम्प्रति विश्वकर्मणा ।

त्वमेव जातमित्यर्थः । द्रष्टव्यदर्शनाद्धि दृङ्मार्गस्य प्रतिषेधो भवति अत्र तु वेगातिशयाद्दर्शनाभावात् प्रतिषेधस्तस्येति वा । अथ च जलरहितः सन् दूरे दृष्टिगोचरो यो मार्गः स पिपासोर्नेत्रयुगाय हर्षं ददाति किन्तु जलावलोकने पारवश्यं तथापि पिपासोः शुष्ककण्ठत्वं वेत्युक्तिरिति वा । दासतामिति पाठे दिदृक्षादरस्य दानपात्रं ददावित्यर्थः । दाशृ दाने, दाशृगोघ्नौ सम्प्रदान इति (पा० ३।४।७४) निपातनाद्दयतेऽस्मै इति दानपात्रं । पारावारे परार्वाचीतीरे पात्रमित्यमरः । पक्षे नास्ति वारि यस्मिन्नसाववारिः । पक्षे वारणं वारः ण्यन्तात् घञ् स नास्त्यस्यासौ । अववारशब्दादवारिशब्दाच्च च्विः ॥ २६ ॥

दिवस्पतेरिति । दिवस्पतेरिन्द्रस्य भैम्यनुरागवशाद्भीमं आदरदर्शिना विश्वकर्मणा यः तं भीमं प्रत्युद्दिश्य आदरादढौकि उपदारूपेण प्रेषितः स भीमस्तमेकं महापरिमाणं माणिक्यं तन्मयं तद्रूपं तन्निर्मितं वा महोन्नतमत्युच्चं पतत् ग्राहं पतत् गण्डूषजलताम्बूलोद्गारादि गृह्णातीति ग्रहः तं नलेन प्रयोजनेन ग्राहितवान् अङ्गीकारितवान् नलाय ददावित्यर्थः । प्रभोर्यस्मिन्नादरः तं तदनुजीविनः स्वस्वशक्त्येन सेवन्त इति लोकरीतिः । पतद्ग्राहः पतद्ग्रह इत्यमरः । दिवस्पतेः । तत्पुरुषे कृतीति (पा० ६।३।१४) बाहुलकात् षष्ठ्या अलुकि कस्कादि-

तमेकमाणिक्यमयं महोन्नतं
पतद्ग्रहं ग्राहितवान्नलेन सः॥ २७॥
नलेन ताम्बूलविलासिनोज्झिते-
र्मुखस्य यः पूगकणैर्भृतो न वा।
इति व्यवेचि स्वमयूखमण्डला-
दुदञ्चदुच्चारुणचारुणश्चिरात्॥ २८॥

त्वाद्विसर्जनीयस्य (पा० ८।३।४३) षः। षष्ठ्याः पतिपुत्रेति (पा० ८।३।५३) छन्दोविषयत्वात् लोके गत्यर्थसकर्मकत्वात् कर्मणि चिण्। पतत् गृह्णातीति पतद् ग्रहः। पचाद्यचि (पा० ३।१।१३४) पततो ग्रह इति (पा० ३।३।५८) अप्॥ २७॥

नलेनेति। उदञ्चदुच्चारुणचारुणः उदित्वरोन्नतसूर्यवद्वा सुन्दरादतिरक्तात् ऊर्द्धप्रसरत्किरणोऽतिशयितो यः स्वीयो रूपगुणस्तेन चारोर्वा रक्ततरात् स्वमयूखस्य मण्डलात् सङ्घाद्धेतोः ताम्बूलविलासिना ताम्बूलरसमात्रग्राहिणा पूगनागवल्लीदलखण्डत्यागिना नलेन गृहीतरसत्वात् उज्झितैस्त्यक्तैर्मा-णिक्यशकलसदृशैरुद्गाररूपैः पूगकणैः क्रमुकाल्पशकलैः अयं भृतः पूरितो न वा पूरित इति यः पतद्ग्रहः चिराद्भूयसा कालेन सूक्ष्मेक्षिकया क्रमेण सुक्तसंशयैर्लोकैर्व्यवेचि निश्चितस्तं ग्राहितवानिति पूर्वेण सम्बन्धः। समीपं गत्वा सूक्ष्मेक्षिकयाऽयमिदानीं पूगकणैः भृत इति निश्चितः कदाचित् कदाचिच्च इदानीं न भृत इत्यपि निश्चित इत्यर्थः। भृताभृतत्वसन्देहे रक्तमयू-

मयेन भीमं भगवन्तमर्चता
नृपेऽपि पूजा प्रभुनाम्नि या कृता।
अदत्त भीमोऽपि स नैषधाय तां
हरिन्मणीभोजनभाजनं महत् ॥ २९ ॥
छदे सदैव छविमस्य बिभ्रतां
न केकिनां सर्पविषं प्रसर्पति।

खमण्डलं हेतुः। माणिक्यमयत्वादतिरक्त इत्यर्थः। इदानीं ता-म्बूलस्यानवसराङ्गाविन्युपचारे भूतवदित्युपचारः। यद्वा तस्यै-वारक्तत्वाञ्जनस्योद्गारत्यागभ्रमः। अमी पूगकणाः किंवा कि-रणसमूहा इति सन्देहस्थिरान्निर्णीत इति वा ॥ २८ ॥

मयेनेति। भगवन्तं षड्गुणैश्वर्य्यसम्पन्नं भीमं शिवमर्घादिभिरु-पचारैरर्चता पूजयता शैवेन मयनाम्ना ऽसुरेण प्रभुनाम्नि शिव-नामधारके नृपेऽपि भीमेऽपि या पूजा कृता उपदा अकारि स भीमोऽपि तां पूजां पूजारूपहरिन्मणेर्गारुडमणिसम्बन्धि विषा-पहारसमर्थं अतिविस्तृतं भोजनार्थं भाजनं नैषधायादत्त मयेन तस्मै दत्तं सोऽपि नलायादत्तेति। अपिशब्दः समुच्चयार्थः। अर्चयतिर्भावादिकः ॥ २९ ॥

छद इति। अस्य भोजनपात्रस्य छविं नीलां द्युतिं सदैव छदेऽपि बिभ्रतां केकिनां मयूराणां सर्पविषं न प्रसर्पति तच्छ-रीरं नाक्रामतीत्यर्थः। स भगवान् शिवोऽत्र पात्रे एतदाधार-त्वेन कालकूटञ्चेदभोक्ष्यत् तर्हि नीलकण्ठत्वं नाधास्यत्। अत्र

न नीलकण्ठत्वमधास्यदत्र चेत्
स कालकूटं भगवानभोक्ष्यत् ॥ ३० ॥

विरोध्य दुर्वाससमस्खलद्दिवः
स्रजं त्यजन्नस्य किमिन्द्रसिन्धुरः ।
अदत्त तस्मै स मदक्लात् सदा
यमभ्रमातङ्गतयेव वर्षुकं ॥ ३१ ॥

पात्रे विषभक्षणे कृते सति तज्जीर्णतया नीलकण्ठत्वं न स्यादित्यर्थः । लिङ् निमित्ते लृङ् क्रियातिपत्तौ (पा० ३।३।१३९) इति लृङ् । भुजोऽनवन इति (पा० १।३।६६) तङ् ॥ ३० ॥

विरोध्येति । स भीमस्तस्मै नलाय मदक्लाद् दानजलव्याजात् सदा वर्षुकं वर्षणशीलं यं हस्तिनं अदत्त स दुर्वाससं विरोध्य रोषयित्वा तच्छापादिन्द्रसिन्धुर ऐरावतो दिवः सकाशादस्खलत् पतितः किं। भुवमागत ऐरावणः किमित्यर्थः। विरोधे हेतुः। अस्य दुर्वाससः स्रजं मालां त्यजन् भुवि क्षिपन् । अत्र पौराणिकी कथा। कदाचिदैरावतमारुह्य गच्छते इन्द्राय दुर्वाससा प्रसादेन मन्दारपुष्पमाला दत्ता सा चेन्द्रेण करीन्द्रकुम्भे स्थापिता स तां शुण्डादण्डेनाधश्चिक्षेप ततः कुपितेन मुनिना त्वमपि मालावदधः पतेति शप्तः तन्मूलेयमुत्प्रेक्षा। वर्षुकत्वे पुनरुत्प्रेक्षते। अभ्रमातङ्गतया ऐरावतत्वेनेव। ऐरावतो हि सदा मदजलं स्रवति अयमपि तावत् स्वर्गाद्भ्रष्टः स एवेति सदा दानजलं मुञ्चतीत्यर्थः। अभ्रवन्मातङ्गस्तत्तया वा श्यामत्वात् सजलघनतुल्य

मदान्मदग्रं भवताथवा भिया
परं दिगन्तादपि यात जीवत।
इति स्म यो दिक्करिणः स्वकर्णयो-
र्विनाह वर्णस्रजमागतैर्गतैः ॥ ३२ ॥
बभार वीजं निजकीर्त्तये रदौ
द्विषामकीर्त्त्यै खलु दानविप्रुषः।

इत्यर्थः। अस्य भीमस्य सम्बन्धिलिनास्वलङ्कित्रमिति वा। वर्षुकं लषपतं (पा० ३।२।१५४) त्युकञ् ॥ ३१ ॥

मदादिति। यो गजः स्वकर्णयोरागतैर्गतैरागमनैर्गमनैश्च कृत्वा वर्णस्रजं वर्णमालां विनैव दिक्करिणो दिग्गजान् प्रति इत्याह स्मेव। इति किं। भो दिग्गजाः भवतां बलाभिमानश्चे-दस्ति तर्हि मदाद् युद्धं कर्त्तुं यूयं मदग्रे भवत मम पुरस्तात्ति-ष्ठत। अथवा चेन्मदो नास्ति तर्हि भिया दिगन्तस्था यूयं दिग-न्तादपि परं यात गच्छत। पलायिताश्च सन्तः तत्रैव सुखेन जीवत स्वप्राणान् रक्षत। इयं लुप्तोत्प्रेक्षा ॥ ३२ ॥

बभारेति। यो गजो निजकीर्त्तये रदौ दन्तौ वीजं कारणं ब-भार, द्विषामकीर्त्त्यै दानविप्रुषो दानोदबिन्दूनेव कारणं बभार। खलूत्प्रेक्षायां। दन्ताभ्यां परविदारणात् स्वस्य यशःसमुत्पत्तेस्त-योः कीर्त्तिकारणत्वम्। अथ च कीर्त्तिलक्षणस्य शुभ्रत्वात् कारणे-नापि तादृशेनैव भवितुं युक्तमिति। दन्तौ कीर्त्तिवीजभूतकन्दा-विव मदजलगन्धाघ्राणमात्रेण परगजानां भङ्गात् दानबिन्दूनां

श्रवःश्रमैः कुम्भकुचां शिरःश्रियं
मदे मदस्वेदवतीमुपास्त यः ॥ ३३ ॥
न तेन वाहेषु विवाहदक्षिणी-
कृतेषु सङ्ख्यानुभवेऽभवत् क्षमः।
न शातकुम्भेषु न मत्तकुम्भिषु
प्रयत्नवान् कोऽपि न रत्नराशिषु ॥ ३४ ॥

तदकीर्त्तिलक्षणत्वं। कार्य्यस्य श्यामत्वात् कारणेनापि तादृशेनैव भवितुं युक्तमिति श्यामदानविन्दव एवाकीर्त्तेर्बीजमिवेत्युत्प्रेक्षा। तथा मुहुर्मुहुर्गतागतैः श्रवःश्रमैः कर्णप्रयासैरेव व्यजनचालनैः कृत्वा कुम्भाविव कुचौ यस्यास्तां मदस्वेदवतीं दानरूपघर्मोदकयुक्तां शिरःश्रियं घर्मजलापहरणद्वारा तस्या एव मुदे हर्षाय उपास्त सिषेवे। एवम्भूतं शिरो दधानः प्रीतिमुदपादयदित्यर्थः। कामकेलिखिन्नां कुम्भकुचां कामिनीं स्वेदमपनयन् कामी तालवृन्तचालनेन वीजयतीति मदस्य स्वेदरूपेण शिरःश्रियः स्त्रीत्वरूपणम्। अधत्तेत्यपि पाठः॥ ३३ ॥

नेति। तेन भीमेन नलाय विवाहे दक्षिणीकृतेषु कन्यादानदक्षिणात्वेन दत्तेषु वाहेषु रथादिषु तुरङ्गेषु वा सङ्ख्यानुभवे सङ्ख्याज्ञाने प्रयत्नवानपि कोऽपि कश्चिदपि न क्षमः इयन्तो वा दत्ता इत्येवं सङ्ख्यापरिच्छेदे समर्थो नाभवत्, तथा शातकुम्भेष्वनेकभूषणभूतघटिताघटितकाञ्चनेषु न, तथा मत्तकुम्भिषु गलन्मदमातङ्गेषु न, तथा रत्नराशिषु न क्षमोऽभवदिति। सर्व्वत्र विवाहद-

करग्रहे वाम्यमधत्त यस्तयो
प्रसाद्य भैम्या नु च दक्षिणीकृतः।
कृतः पुरस्कृत्य ततो नलेन स
प्रदक्षिणस्तत्क्षणमाशुशुक्षणिः॥ ३५॥

क्षिणीकृतेष्विति च। बहुतरं यौतुकं दत्तवानीति भावः॥ ३४॥

करेति। य आशुशुक्षणिरग्निस्तयोः करग्रहे विवाहे विषये वाम्यं वक्रत्वं अधत्त भेजे। भैम्यभिलाषान्नलाकारधारणादिद्वारा पूर्वं विरुद्धोऽभूदनु च पश्चान्नलवरणावसरे भैम्या स्तुतिध्यानादिना प्रसाद्य सन्तोष्य दक्षिणीकृतः आनुकूल्यं नीतः सोऽग्निः। ततः पाणिग्रहानन्तरं नलेन पुरस्कृत्योल्लेखनादिसंस्कारपूर्वमग्रे प्रतिष्ठाप्य तत्क्षणं तस्मिन्विवाहसमये प्रदक्षिणः प्रकर्षेणापसव्यः कृतः प्रदक्षिणभागेन वलयाकारेण वेष्टितः। अथ च यः पूर्वं यौतकदानकाले वामभागेऽभूत् पश्चाद्भैम्या फूत्कारादिना प्रबोध्यानुकूलः कृतः। अथ च दक्षिणभागे कृतः सोऽर्चनादिभिः सम्पूज्य नलेन सुतरामनुकूलः कृतः। अथ च प्रकर्षेण दक्षिणभागे कृतः। अन्योऽपि महान् पूर्वं विरोध्यते स विवाहादौ प्रसाद्यानुकूलः क्रियते इत्युक्तिः। अत्र क्वचित् क्वचिद्विधिक्रमभङ्गो देशाचाराच्छाखाभेदात् कुलाचारविशेषाद्वाद्बव्यः। न पुनः श्रीहर्षकवेरज्ञानलेशोऽपि। अत एव पूर्वं यथाविधीति प्रायुङ्क्त। आशुशुक्षणिः। आशाष्टुमिच्छति आङि शुषेः सन्नन्ताच्छन्दसि साधुः। शिष्टप्रयुक्तत्वाद्भाषायामपि साधुत्वं ज्ञेयम्॥ ३५॥

स्थिरा त्वमश्मेव भवेति मन्त्रवा-
गनेशदाशास्य किमाशु तां ह्रिया ।
शिला चलेत् प्रेरणया नृणामपि
स्थितेस्तु नाचालि बिडौजसापि सा ॥ ३६ ॥
प्रियांशुकग्रन्थिनिबद्धवाससं
तदा पुरोधा विदधे विदर्भजां ।

स्थिरेति। हे भैमि दृमभश्मानमारोहेत्युच्चार्य्य त्वं अश्मेव स्थिरा भवेति नलेनोच्चारिता मन्त्ररूपा वाक् तां भैमीमाशास्य शिलावन्निश्चला भवेति तस्यै आशिषं दत्वा आशु अनेशत् अनाशत्। उच्चारिता वर्णा प्रध्वस्ता भवन्ति । तत्रोत्प्रेच्यते ह्रिया किं। किमिति तस्या लज्जेत्यत आह । शिला अल्पतेजसां नृणामपि प्रेरणया करचरणव्यापारमात्रेण चलेत् स्वस्थानादन्यत्र गच्छेत् सा तु भैमी पुनः अतिप्रभाविणा विडौजसा इन्द्रेणापि स्थितेः मनोव्यापारमात्रस्वीकृतनलपतित्वरूपाया मर्यादायाः सकाशान्नाचालि। पतिव्रतामीमा न त्याजितेति स्थिरतरत्वेनाधिकाया भैम्या अहं हीनेति स्वदोषं विचिन्त्य लज्जैव नष्टेत्यर्थः। वैधमश्मारोहणं तेन कान्तिमिति भावः। नश अदर्शने अस्मात्लुङि पुषादित्वादङि नशिमन्योरलिट्येत्वमिति (पा० ६। ४।१२०।वा०२) एत्वे रूपं॥ ३६ ॥

प्रियेति। तदा वह्निसन्निधिकाले पुरोधा गौतमो विदर्भजां प्रियस्य नलस्यांशुकेन सह ग्रन्थिना निबद्धं वासो यस्यास्तामेवं-

जगाद विच्छिद्य पटं प्रयास्यतो
नलादविश्वासमिवैष विश्ववित्॥ ३७॥
ध्रुवावलोकाय तदुन्मुखभ्रुवा
निदिश्य पत्याभिदधे विदर्भजा।

विधां विदधे चकार। उत्प्रेक्षते। पटं विच्छिद्य कर्तित्वाऽरण्ये भैमीं विहाय प्रयास्यतो गमिष्यतो नलात् सकाशादेष पुरोधा अविश्वासं विश्वासाभावं जगादेव। वस्त्रं छित्वा त्वां हित्वाऽयं गमिष्यतीत्येतस्य विश्वासो न कार्य इत्यस्य वस्त्रेण सह स्ववस्त्रस्य ग्रन्थिं दत्त्वैवानेन सह विचरणीयमित्युवाचेत्यर्थः। कथमेतज्ज्ञातमत आह। यतो विश्वं सर्व्वं वेत्तीति कालत्रयज्ञ इत्यर्थः। तस्माद्भविष्यदपि तेन ज्ञातमित्यर्थः। कलिना पराभूतो नलो द्यूतद्वारा हारितसर्व्वस्वः स्वीयैस्त्यक्तो वापरेण कलिना पक्षिरूपेण तद्धारणार्थं विक्षिप्तस्य वस्त्रस्यापहाराद्वस्त्रान्तराभावाद्भैमीवस्त्रार्द्धधारी सन् निद्राणायास्तस्या वस्त्रार्द्धं विच्छिद्य तां महारण्ये तत्याजेति भारते कथा। वैधसुभयवस्त्रग्रन्थिबन्धनं तेन कृतमिति भावः। विदधदिति पाठे कुर्व्वन् सन्निति योजना॥ ३७॥

ध्रुवेति। तस्य ध्रुवस्य दर्शनार्थमुन्मुखी भ्रूर्यस्य तेन पत्या नलेन विदर्भजा निर्दिश्याज्ञाप्य ध्रुवस्यावलोकनार्थं अभिदधे उक्ता। तदुन्मुख्या भ्रुवा कृत्वा संज्ञाप्येति वा। न तु सूक्ष्मस्य ध्रुवस्य स्वयंदर्शनयोग्यत्वात् सा स्वयमेव तं पश्येत्। तेन किमिति

किमस्य न स्यादणिमाक्षिसाक्षिक-
स्तथापि तथ्यो महिमाऽऽगमोदितः॥ ३८॥
ध्रुवेण सादर्शि वधूररुन्धतीं
सतीमिमां पश्य गतामिवाणुताम्।

दर्शनं कारितमित्यत आह। अस्य ध्रुवस्य अणिमा सूक्ष्मप्रमा-णत्वं अक्षिमाक्षिको नेत्रगोचरः किं न स्यादपि तु स्यादेव यद्यपि तथापि स्वयंदर्शनयोग्यत्वेऽपि आगमोदितो महिमा वेदोक्तं गौरवं सत्योऽस्त्विति शेषः। श्रुत्युक्तं हि प्रमाणमित्यर्थः। श्रुतिर्हि ततो वधूं ध्रुवमीक्षयोतेति ध्रुवे दर्शिते ध्रुवं पश्यामि प्रजां विन्देय इति सा ब्रूयात् तस्मात् स्वयं द्रष्टुमशक्यत्वेऽपि नल एवादर्शयदिति युक्तमित्यर्थः। वैधं ध्रुवदर्शनं कारितमिति भावः। एतत् सर्व्वं कविवचः। अथ च यद्यस्याणुत्वं प्रत्यक्षं तथापि ज्यो-तिःशास्त्रोक्तं ध्रुवमण्डलस्य महापरिमाणत्वं सत्यमेव॥ ३८॥

ध्रुवेणेति। सा वधूर्ध्रुवेण नलेन अणुतामतिसूक्ष्मत्वं गता-मिमां सतीं पतिव्रतामरुन्धतीं त्वं पश्येत्युक्ता अदर्शि दर्शिता। तत्राणुत्वे उत्प्रेक्षते। वरणात् पूर्वमेव हृदि कृतस्य मनोरथमा-त्रेण हृदये कृतस्य भूपतेः कृते तृणीकृतस्वर्गपतेः तृणवल्लाघवेन त्यक्त इन्द्रो येनैवंभूताज्जनादिव लज्जयेति शेषः। अहं हि परि-णीता सतीन्द्रं तृणप्रायमकरवं भैमी तु हृदि धारणमात्रादे-वेति। सत्त्वाऽपीयमेवाधिका सतीति भैम्याः सकाशाल्लज्जयेव कृशामित्यर्थः। स्वतः कृशत्वमेव उत्प्रेक्षितं। भूपतेर्जनादिति

कृतस्य पूर्वं हृदि भूपतेः कृते
तृणीकृतस्वर्गपतेर्जनादिति ॥ ३९ ॥
प्रसूनता तत्करपल्लवस्थितै-
रुडुच्छविर्व्योम्नि विहारिभिः पथि।
मुखेऽमराणामनले रदावले-
रभाजि लाजैरनयोज्झितैर्द्युतिः ॥ ४० ॥
तया प्रतिष्ठाकृतिधूमपद्धति-
र्गता कपोले मृगनाभिशोभिताम्।

शब्दद्वयसामान्यवाच्यपि नलभैमीलक्षणे विशेषे पर्यवस्यति। वैध-मरुन्धतीदर्शनं कारितमिति भावः। अदर्शि। एयन्ताच्चिण्। अ-भिवादिदृशोरिति (पा०१।४।५३ वा०१) अणौ कर्त्तुर्णौ कर्मत्वं। तस्य चाभिहितत्वाद् द्वितीयाभावः॥ ३९ ॥

प्रसूनतेति। तस्याः भैम्याः करयोरेव पल्लवयोः स्थितैर्वर्त्त-मानैर्लाजैः प्रसूनता पुष्पत्वं अभाजि प्राप्ता। पल्लवेषु च पुष्पाणि युक्तानि तथा अनया भैम्या उज्झितैः करान्मुक्तैर्व्योम्नि विहर-णशीलैः सद्भिः पथि कराग्रान्तरालरूपे मार्गे उडुच्छविर्नक्षत्र-शोभा भेजे। व्योम्नि नक्षत्राणि युक्तानि। तयाऽमराणां मुखे ऽनले ऽनया कृतैः रदावलेः दन्तपंक्तेर्द्युतिः शोभा भेजे। मुखे दन्तपंक्तिर्युक्ता। वैधो लाजहोमस्तया कृत इति भावः॥ ४० ॥

तयेति। तया भैम्या प्रतिष्ठा करकुड्मलाभ्यां स्वीकृता आ-कृतिधूमपद्धतिः हूयमानलाजादिद्रव्यसम्बन्धिनी धूमपरम्परा

ययौ दृशोरञ्जनतां श्रुतौ श्रिता
तमाललीलामलिकेऽलकायिता ॥ ४१ ॥
अपह्नुतः स्वेदभरः करे तयो-
स्त्रपाजुषोर्दानजलैर्मिलन्मुहुः ।
दृशोरपि प्रस्तुतमश्रु सात्त्विकं
घनैः समाधीयत धूमलङ्घनैः ॥ ४२ ॥

कपोले मृगनाभिशोभितां कस्तूरीशोभां जाता प्राप्ता । तत ऊर्द्ध्वं गच्छन्ती दृशोश्चक्षुषोरञ्जनतां ययौ प्राप । ततोऽप्यूर्द्ध्वं गच्छन्ती श्रुतौ कर्णयोस्तमाललीलावतंसभूते तमालदलसादृश्ये श्रिता । ततोऽप्यूर्द्ध्वतरं गच्छन्ती अलिके ललाटे ऽलकायिता चूर्णकुन्तलवदाचरिता तत्तुल्या जातेत्यर्थः । कपोले कस्तूरी दृशोरञ्जनं श्रुतौ तमालं ललाटे चालका इति युक्तम् । वैधधूमग्रहणं कृतमिति भावः । मृगनाभिशोभीति । कर्तर्युपमान इति (पा० ३।२।७९) णिनौ मृगनाभिशोभिनी तस्या भावस्तत्ता, त्वत्तलोरिति (पा० ६।३।३५ वा० २) पुंवत् ॥ ४१ ॥

अपह्नुत इति । त्रपाजुषोर्लज्जावतोस्तयोः करे वर्त्तमानः स्वेदभरः सात्त्विकघर्मजलसङ्घो दानजलैर्ब्राह्मणेभ्यो दक्षिणादानार्थं उत्सृष्टैः सङ्कल्पजलैः सह मुहुर्वारं वारं मिलन् सम्बन्धं प्राप्नुवन् सन् अपह्नुतः दानजलयोगात् सात्त्विकः स्वेदोऽयमिति लोकेन न ज्ञात इत्यर्थः । करे मुहुर्मिलन् पुनः पुनरुद्भवन् दानजलैरपह्नुत इति वा । तत्रापि कामविकारवशात् स्वेदं लोको

बहूनि भीमस्य वसूनि दक्षिणां
प्रयच्छतः सत्त्वमवेक्ष्य तत्क्षणं ।
जनेषु रोमाञ्चमितेषु मिश्रतां
ययुस्तयोः कण्टककोरकश्रियः ॥ ४३ ॥
बभूव न स्तम्भविजित्वरी तयोः
श्रुतिक्रियारम्भपरम्परात्वरा ।

ज्ञास्यतीति भिया वा। दृशोरपि सम्बन्धि प्रसृतं गलितं सात्त्विकं कामविकारजमश्रु घनैः सान्द्रैर्धूमलङ्घनैर्धूमाक्रमणैः कृत्वा समाधीयत परिहृतं ताभ्यामित्यर्थात् तैरेव कर्तृभिरपलपितं वा। परस्परस्पर्शात्तयोः स्वेदादयः सात्त्विकाः प्रवृत्ता इति भावः॥४२॥

बहूनीति। बहूनि वसूनि दक्षिणां प्रयच्छतो दक्षिणात्वेन ददतो भीमस्य सत्त्वं दानशौण्डत्वमवेक्ष्य तत्क्षणं तस्मिन्नेव क्षणे आश्चर्यातिशयेन रोमाञ्चमितेषु प्राप्तेषु जनेषु मध्ये तयोर्भैमीनलयोरपि कण्टककोरकश्रियः कण्टककलिकाशोभा मिश्रताम् ऐक्यं प्रापुः। सात्त्विकोऽपि रोमाञ्चो ऽन्यजनवदाश्चर्यादयं जात इत्युपलक्षित इति भावः ॥ ४३ ॥

बभूवेति। श्रुतिक्रियाया वेदविहितलाजाहोमाग्निपरिभ्रमणादिकाया आरम्भस्य परम्परा एकस्मादनन्तरमन्यस्यारम्भस्तस्मादनन्तरमन्यस्यैवमव्यवहितो य उत्तरोत्तरभावस्तद्विषयत्वरा वेगिता, तयोरवश्यापेक्षितायामपि कर्मवेगितायां सात्त्विकजनितस्याङ्गस्तम्भनात्मकस्य स्तम्भस्य विजित्वरी जयनशीला

न कम्पसम्पत्तिमलुम्पदग्रतः
स्थितोऽपि वह्निः समिधा समेधितः ॥ ४४ ॥

दमस्वसुः पाणिममुष्य गृह्णतः
पुरोधसा संविदधेतरां विधेः।
महर्षिणेवाङ्गिरसेन साङ्गता
पुलोमजामुद्वहतः शतक्रतोः ॥ ४५ ॥

न बभूव तन्नापललाप। स्तम्भवशात्तौ किमपि कर्म शीघ्रं कर्त्तुं समर्थौ नाभूतामिति भावः। तथा समिधा यज्ञकाष्ठेन समेधितः संवर्द्धितो वह्निरपि अग्रतः स्थितः सन् तयोः कम्पसम्पत्तिं सात्त्विककम्पबाहुल्यं नालुम्पत् न शमयति स्म। शीतजं हि कम्पमग्निः शमयति न तु सात्त्विकं तस्य तत्रासमर्थत्वादित्यर्थः। तयोरन्यः सात्त्विकापलापेऽपि स्तम्भकम्पौ लोकैर्ज्ञाताविति भावः। अवर्त्ततास्तम्भेति पाठे न स्तम्भविजित्वरीति नञ्समासः। अलुम्पत्। शे मुचादीनामिति (पा० ७।१।५८) नुम् ॥ ४४ ॥

दमेति। दमस्वसुः पाणिं गृह्णतोऽमुष्य नलस्य सम्बन्धिनो वैवाहिकस्य श्रौतस्य विधेः साङ्गताऽङ्गसाहित्यं पुरोधसा संविदधेतरां नितरां साकल्येन चक्रे। प्रधानमात्रं नलेन कृतं अङ्गानि तु पुरोधसा कृतानीति भावः। कस्य केनेव। पुलोमजामुद्वहतः शतक्रतोः सम्बन्धिनो विधेः साङ्गता आङ्गिरसेन महर्षिणा बृहस्पतिनेव ॥ ४५ ॥

स कौतुकागारमगात् पुरन्ध्रिभिः
सहस्ररन्ध्रीकृतमोचितुं ततः ।
अधात् सहस्राक्षतनुत्रमित्रता-
मधिष्ठितं यत् खलु जिष्णुनामुना ॥ ४६ ॥
तथाशनाया निरशेषि नो ह्रिया
न सम्यगालोकि परस्परक्रिया ।

स इति । ततः वैवाहिकविधेरनन्तरं स नलः पुरन्ध्रिभिरन्तःपुरनारीभिरोचितुं वधूवरचेष्टादिदर्शनार्थं सहस्ररन्ध्रीकृतं तृणकाष्ठादिरचितं बहुछिद्रगवाक्षं वधूवरसंवेशार्थं रचितशृङ्गारवेदिकं कौतुकागारं कुतूहलावहं दूर्वायवाङ्कुरादिनवमङ्गलद्रव्यसहितं गृहमगात् ययौ । यद्गृहं जिष्णुना जयशीलेनामुना नलेनाधिष्ठितं सत् विलोकितुं नेत्रसहस्रावकाशदायिरन्ध्रसहस्रधारिणा सहस्राक्षस्य कवचेन सह मित्रतां साम्यं अधात् बभार तदपि जिष्णुनेन्द्रेणाधिष्ठीयते खलु उत्प्रेक्षायां निश्चये वा ॥ ४६ ॥

तथेति । वरेण वध्वा चाशनाया बुभुक्षा ह्रिया लज्जया तथा पूर्व्ववत् नो निरशेषि निःशेषिता आतृप्ति न भुक्तमित्यर्थः । तथा परस्परक्रियाऽन्योन्यं चेष्टादिव्यापारोऽपि ह्रियैव सम्यक् सम्मुखदर्शनेन नालोकि न विलोकिता किन्तु इङ्गितमात्रेणेत्यर्थः । तथा त्र्यहं दिनत्रयं यथाविधि मुक्तसम्भोगं त्यक्तसुरतं सस्पृहं सुरतेच्छासहितं यथा तथाऽशायि शयितं । त्र्यहमिति सर्व्वत्र

विमुक्तसम्भोगमशायि सस्पृहं
वरेण वध्वा च यथाविधि त्र्यहम्॥ ४७॥
कटाक्षणाज्जन्यजनैर्निजप्रजाः
क्वचित् परीहासमचीकरत्तराम्।

योज्यं। विध्यतिक्रमभयात् दिनत्रयं ताभ्यां सह भुक्तं अन्योन्यं विलोकितं सहनिद्रितञ्च। परं लज्जयाऽनया च नाद्यापि भुक्तम् नाशेषाङ्गं दृष्टं न च चुम्बनालिङ्गनादिपूर्व्वं शयितमित्यर्थः। एकत्र शयनं त्रिरात्रं ब्रह्मचर्य्यं चेति विधिः। अशनाया। अशनायोदन्यधनाया (पा० ७।४।३४) इति साधुः। त्र्यहं। समाहारे द्विगौ राजादिना (पा० ५।४।९१) इति टच्, न सङ्ख्यादेः समाहार इति (पा० ५।४।८९) अह्नादेशाभावः। गोत्राङ्गाद्याः (पा० २।४।२९) इति पुंस्त्वं। अत्यन्तसंयोगे द्वितीया (पा० २।१।२९। त्र्यहं विमुक्तसम्भोगमिति योजना॥ ४७॥

कटाक्षेति। भोजकुलस्य भीमपूर्व्वजाख्यक्षत्रियवंशस्याङ्कुरो बालो दमः क्वचिद्भीमदृक्पथागोचरे कस्मिंश्चिद्देशे अन्यजनैर्वरयात्रिकैर्वरपक्षीयैः सह निजप्रजाः परिहासपात्रभूतपौरवारस्त्रीमुख्याः ताभिः प्रयोज्याभिरित्यर्थः, कटाक्षणान्नेत्रसञ्ज्ञया परिहासं श्लेषवक्रोक्त्यादिना अर्थान्तरोपदर्शनरूपं उपहासमचीकरत्तरां अतितरां कारयामास। तथा क्वचिच्च वरयात्रया निमित्तेनागतान्नलपक्षीयानन्यान् राजलोकान् धरापरोभिः दासीस्वैरिणीसैरन्ध्रीप्रभृतिभिः पुरसुन्दरीभिर्वाराङ्गनाभिर्-

धराप्सरोभिर्वरयात्रयागता-
नभोजयद्भोजकुलाङ्कुरः क्वचित् ॥ ४८ ॥
स कश्चिदूचे रचयन्तु तेमनो-
पहारमत्राङ्ग रुचेर्यथोचितं ।

भोजयत् भोजनमकारयत् । परिवेशनार्थं काश्चित् सहभोजनार्थं काश्चिदादिष्टवानित्यर्थः । विवाहे कनीयसामेवोपहासकरणयोग्यत्वादङ्कुरपदप्रयोगो युक्तः । कटाचशब्दात् तत्करोतीति (पा० ३।१।२६ वा०१) ण्यन्तात् ल्युट् । निजप्रजाः । हृक्रोरिति (पा० १।४।५३) कर्म्मत्वं । आगतान् । भुजेः प्रत्यवसानार्थत्वात्, गतिबुद्धीति (पा०१।४।५२) कर्म्मत्वं । अभोजयत् । निगरणचलनार्थेभ्यश्चेति (पा०१।३।८७) परस्मैपदं ॥ ४८ ॥

तमेव प्रकारमाह । स इति । स इमः कश्चिन्नलपक्षीयं एवमूचे स्वजनमुखेनेति शेषः । अङ्ग हे वरयात्रिक अत्र पात्रे आसु परिवेषिकासु मध्ये वा काश्चन स्त्रियः तव रुचेरभिलाषस्य यथोचितं उचितमनतिक्रमेण तेमनाख्यस्य व्यञ्जनस्य उपहारं आनयनं रचयन्तु कुर्व्वन्तु यावदभिलाषं तेमनमानयन्तु किमिति प्रश्नः काकुः । एता एवं कुर्व्वन्तु त्वं भुङ्क्ष्वेति भोजनोपदेशो वा । एवमुत्तरत्रापि । तथा पिपासतः तृषालोस्तव पानार्थं सर्व्वतोमुखं जलमपि अर्पयन्त्यां ददतु । तथा ओदनमपि कामं यथेच्छमर्पयन्त्यां ॥ परिहासस्तु अत्र आसु मध्ये विविक्ते स्थाने वा अङ्गरुचेः स्तनजघनाद्यङ्गानां रुचेर्दर्शनाद्यभिलाषस्योचितं

पिपासतः कास्तु न सर्व्वतो मुखं
तवार्पयन्तामपि काममोदनं ॥ ४८ ॥
मुखेन तेऽत्रोपविशत्वसाविति
प्रयाच्य दृष्टानुमतिं खलाहसत् ।

यथा भवति तथा तव मनसः अपहारं अपहरणं रचयन्तु स्तनादिदर्शनादिनान्तःकरणहरणं कुर्व्वन्तु इत्यर्थः। काय-कान्तेर्हेतोः सौन्दर्य्यातिशयान्मनोहरणं कुर्व्वन्त्वित्यर्थः। तथा पिपासतश्चुम्बनेच्छोस्तव सर्व्वतो नेत्रादिचुम्बनस्थाने दर्शनमा-त्रेण कामस्य हर्षकरं मुखमर्पयन्तां। बहूनां चुम्बनस्थानानामे-कत्र मुखे वर्त्तमानत्वान्मुखमेव तव ददत्वित्यर्थः। अथ च का-मस्य मोदनं हर्षकरं वराङ्गमपि चुम्बनार्थमर्पयन्तां। अथ च मुखं पिपासतस्तव सर्व्वदा वराङ्गमेव ददतु। स्यात्तेमनं तु निष्ठान-मित्यमरः। पूर्व्वव्याख्याने तवेत्युभयत्र योज्यं। मुखं सर्व्वत इति, उभसर्व्वतसोरिति द्वितीया (सि॰ कौ॰ ३६।१।प॰)। तव ते इति च सम्बन्धसामान्ये षष्ठी ॥ ४८ ॥

मुखेनेति। काचित् खला वक्रोक्त्यादिभाषिणी हे वरया-त्रिक असौ मत्सखी पुरुषो वाऽत्र स्थाने ते तव मुखेनोपलक्षिता सम्मुखमिति यावत् त्वदुपायेन वा त्वदाज्ञयेति यावत् त्वया सह भोजनार्थं तव पुरस्ताद्वा भोजनार्थं उपविशतु इति प्रयाच्य सम्प्रा-र्थ्य मुखेनोपविशत्विति दृष्टा दत्ताऽनुमतिरनुज्ञा येन तं वरया-त्रिकं पश्चादहसत्। हासे कारणमाह। हि यस्माद्येन साधनेन

वराङ्गभागः स्वमुखं मतोऽमुना
स हि स्फुटं येन किलोपविश्यते ॥ ५० ॥
युवामिमे मे स्त्रितमे इतीरिणो
गले तथोक्त्वा निजगुच्छमेकिका।

किलोपविश्यते स हि वराङ्गभागो गुह्यदेशः अमुना जनेन स्व-स्यात्मनो मुखं स्फुटं निश्चितं अतो मुखेन करणेनोपविशत्वि-त्येवमर्थपरं तद्वचनमज्ञात्वा तेनानुज्ञायां दत्तायां कटिदेशा-धःप्रदेशेन किलोपविश्यत इत्येवं वदता अनेन स्वमुखं वराङ्गत्वेन मतं यस्मात्तस्माद्धास्यं युक्तमित्यर्थः। सर्व्वजनबोधपुरःसरं ज-ह्रामेति वा। अथ च ते मुखेनोपविशतु अपि तु पुरीषोत्सर्गार्थ-मुपविशत्विति प्रयाच्य तदीयं जुगुप्सितमर्थं गृहीत्वा स्पष्टानुमतिं तमस्हमत्। मुखं निःसरणे वक्त्रे प्रारम्भोपाययोरपीति विश्वः ॥५०॥

युवामिति। इमे पुरवर्त्तिन्यौ युवां मे मम स्त्रितमे उत्त-मस्त्रियौ भवादृशे स्त्रीरत्ने न दृष्टे इतीरिणो वदतः स्तुवतः, अथ च मत्सम्बन्धिन्यौ प्रियतमे भवेतां इति परिहासाद्वदतः कस्यचिज्जनस्य वरपक्षीयस्य गले यथा त्वयोच्यते तथेत्युक्त्वा तयोर्द्वयोर्मध्ये एकिका एकैव निजगुच्छं रज्जुस्थाने हारविशे-षमेव इत्युक्त्वा न्यधत्त। इतीति किं। हे जन्य त्वं अदः पूर्व्वोक्तं इमे मे इति शब्दं वदन् तु पुनः छगलः छागो न भासि अपि त्वेवंशब्दं कुर्व्वत छाग एव स्फुरसि। अथ च तुच्छःस्तनशून्यो गलः कण्ठो यस्यैवंभूतो न भासि। अजस्य गले स्तनौ तिष्ठ-

न भास्यदस्तु छगलो वदन्निति
न्यधत्त जन्यस्य ततः पराकृषत् ॥ ५१ ॥
नलाय वालव्यजनं विधुन्वती
दमस्य दास्या निभृतं पदेऽर्पितात्।

तस्त्वन्तु तादृक्शब्दोऽपि स्तनशून्य इति कारणान्न शोभसे। अथ च रज्जुरहितकण्ठो न भासीति रज्जुस्थाने हारं धत्ते स्मेति। उभयतो लम्बमानो हार एव गलस्तनस्थाने भवत्वित्यर्थः। ततः अनन्तरं परा द्वितीया रज्जुवद्धारमेव धृत्वा अजमिव तमाकृष्य कण्ठे बद्धा दूरं निनाय। अजो हि मेमे शब्दं करोति रज्ज्वा कण्ठे बद्धा आकृष्यत इति परिहासः। अथ च रिक्तकण्ठो ग्रासरहितो न भासीति निजगुच्छं स्वहस्तस्थितपुष्पपल्लवस्तवकं गले मुखान्तः न्यधत्त नितरां बलाच्चिक्षेप, द्वितीया च दत्तपल्लवपुष्पग्रासं छागमिव चकर्षेति परिहासः। अथवैवमस्मान् स्तुतिं कुर्व्वन् तुच्छगलो हाररहितकण्ठो न भासीति वदन्ती गले हारं परितोषवशाच्चिक्षेपेति वा। यद्वा अस्मत्प्रेरणा भवत्यो मे प्रियतमे इति वदंस्त्वं शून्यकण्ठो न भासि मयापि त्वं वरणीय इति मालास्थाने हारमेव चिक्षेप। परा च तत्रैव धृत्वा परिहासमिषेण भोगार्थं चकर्षेति भावः। मि मे मे इति परिहासपक्षे युवामिति विन्दुच्युतकेन एवं वदन् युवा तरुणः छाग इति वा योज्यं। अकृष्यत् लुङ्॥ ५१ ॥

नलायेति। नलाय नलार्थं वालव्यजनं मयूरपिच्छतालवृन्तं

अहासि लोकैः सरटात् पटोज्झिनी
भयेन जङ्घायतिलङ्घिरंहसः ॥ ५२ ॥
पुरस्थलाङ्गूलमदात् खला वृसी-
मुपाविशत् तत्र ऋजुर्वरद्विजः ।

चामरं वा विधुलती कम्पयन्ती नलमेवापरा काचित् सुन्दरी दमस्य दास्या निभृतं गुप्तं यथा तथा पश्चादागत्य पदे चरण-समीपे अर्पितान्मुक्तात् सरटात् कृकलासात् भयेन पटमुत्पाट्ये-वंशीला त्यक्तवस्त्रा दिगम्बरी भूता सती लोकैरहासि हसिता जनहासे हेतुरभूदित्यर्थः। किम्भूतात् सरटात्। जङ्घाया आय-तिर्दैर्घ्यं तल्लङ्घयत्येवंशीलं रंहो वेगो यस्य तस्मात्। अत एव भयहेतोः सरटस्योर्ध्वारोहणं जातिस्वभावः ॥ ५२ ॥

पुर इति। काचित् खला धूर्त्ता समागताय कस्मैचिद्द्वि-जाय पुरस्थं अग्रे स्थितं लाङ्गूलं पुच्छं यस्यां क्रियायां तद्यथा तथा कूर्माकारां वृसीं ऋषीणामासनं अदात् दत्तवती। वरः श्रेष्ठः वरस्य नलस्य वा द्विजः तत्र तस्यां पुरस्थलाङ्गूलताया-मेव वृस्यामुपाविशदुपविष्टः। यतो ऋजुः तस्याः कौटिल्यमजा-नानः। सा च खला निजामतेः स्वीयाज्ञानस्य आसनं मया भ्रान्त्या अन्यथा स्थापितमिति वदा वदती स्वाज्ञानं नाटय-न्तीत्यर्थः। तं पुनरुत्थाप्य पश्चात्कृतं पुच्छं यस्याः सा एवम्भूता चासौ सा च वृसी तत्प्रदा तां प्रददाति प्रददती एवम्भूता सती अहसत्। उपविष्टस्योरद्वयमूलान्तरे स्थितमासनपुच्छं शिश्नमिव

पुनस्तमुत्थाप्य निजामतेर्वदा
ऽहसच्च पश्चात्कृतपुच्छतत्प्रदा ॥ ५३ ॥
स्वयं कथाभिर्वरपक्षसुभ्रुवः
स्थिरीकृतायाः पदयुग्ममन्तरा ।
परेण पश्चान्निभृतं न्यधापयत्
ददर्श चादर्शतलं हसन् खलः ॥ ५४ ॥

भविष्यतीति बुद्ध्या मया पुरोलाङ्गूलमासनं क्षिप्तं । मदभिप्राय-मजानानोऽचतुरः पशुतुल्यः पशोश्च पश्चादेव पुच्छेन भवित-व्यमिति ज्ञापयितुं परिहासबुद्ध्यैव तां कूर्मीं पश्चात्पुच्छं ददाना ऽहसदिति भावः । अज्ञया मया उपहासानर्हस्योपहासाय प्रवृत्तमिति निजनिन्दां कुर्व्वन्तीति केचित् । आसनस्थापना-नभिज्ञाया निजायाः स्वसख्या अमतेर्वदेति वा । ऋषीणामा-सनं कूर्मीत्यमरः ॥ ५३ ॥

स्वयमिति। कश्चित् खलः परिहासचतुरः स्वयं स्वेनैव कथा-भिर्हंसदौत्यादिवार्त्ताभिः स्थिरीकृतायाः कथाश्रवणप्रवणीकृता-या वरपक्षसुभ्रुवो नलपक्षीयायाः सुन्दर्या वरस्य पक्षे पार्श्वे स्थितायाः पादयुग्मं अन्तरा चरणद्वयमध्ये परेण स्वसखेन प्रयो-ज्येन निभृतं गुप्तं यथा तथा पश्चाद्भागेनादर्शतलं दर्पणं न्यधाप-यत् अस्थापयत्। हसन् प्रतिबिम्बितानुजघनकामसदनदर्पणं दद-र्श च। भगादिदर्शनादवहासः। पश्चादनन्तरं ददर्शेति वा। पद-युग्मं। अन्तरान्तरेण युक्तेति (पा०२।३।४) द्वितीया ॥ ५४ ॥

अथोपचारोद्धुरचारुलोचना
विलासनिर्वासितधैर्य्यसम्पदः ।
स्मरस्य शिल्पं वरवर्गविक्रिया
विलोककं लोकमहासयन्मुहुः ॥ ५५ ॥

अथेति । अथ कामरहितकेवलपरिहासानन्तरं वरवर्गाणां नलपक्षीयराजमङ्गानां विक्रिया मनोविकारो याभ्यस्तथा यासां सन्दर्शनेन नलपक्षीयानां कामविकारो भवति ता वराङ्गना विलोककं द्रष्टारं लोकं मुहुरहासयन् । तद्रूपादिदर्शनसमुत्पन्नकामविकारं वरलोकं दृष्ट्वा लोकोऽहसदिति भावः । कीदृश्यः । उपचारेण कटाक्षेपादिना स्वानुरागज्ञापिके प्रीतिविलोकने विषये उद्धुराण्युत्सुकानि चारूण्यतिविशालानि चतुराणि विलोचनानि यासां ताः । तथा विलासैः कटाक्षविक्षेपादिभिः कृत्वा निर्वासिता त्याजिता धीराणां विलासिनां धैर्य्यसम्पद् याभिस्ताः । तथा स्मरस्य शिल्पं कृतिरतिसुन्दरं । उपचारे परिवेषणादावुद्धुराश्च ताश्चारुनेत्राश्चेति वा । उपचारोद्धुरचारुलोचनानां विलासैः त्याजिता धैर्यसम्पद्येन तस्य स्मरस्य शिल्पं विलसितं कर्तृ वरवर्गविकारदर्शिनं लोकं मुहुरहासयदिति वा । स्वाशयज्ञापनोत्सुकानि चारूणि नेत्राणि यासु । तथा विलासैः पूर्वोक्तैरेव त्याजिता धैर्यसम्पद्याभिर्यासु वा । तथा कामजनिता वरवर्गस्य विक्रिया विकाराः कर्त्र्यो विलोककं लोकं मुहुरहासयन्निति वा । इदानीं कामचेष्टापुरःसरं परिहासः प्रक्रान्त इति भावः ॥ ५५ ॥

तिरोवलद्दक्कसरोजनालया
स्मिते स्मितं यत् खलु यूनि बालया ।
तया तदीये हृदये निखाय तद्-
व्यधीयतासम्मुखलक्ष्यवेधिता ॥ ५६ ॥
कृतं यदन्यत्करणोचितत्यजा
दिदृक्षुचक्षुर्यदवारि बालया ।

तदेवाह तिर इति । कस्मिंश्चिद्यूनि तरुणे स्मिते सानुरागं हसिते सति कयाचिद्बालया तिरो वक्रं वलद्दक्कसरोजनालया वलतो मुखकमलस्य दण्डो ग्रीवा यया एवम्भूतया सत्या यत् स्मितं ईषद्धासि तया बालया तदीये हृदये हासितुर्वक्षसि तत् स्मितमेव निखाय खनित्वा आरोप्य असम्मुखस्य लक्ष्यस्य वेध्यस्य वेधिता वेधकता व्यधीयत कृता खलूत्प्रेक्षायां । पराङ्मुखलक्ष्य-वेधकत्वं धनुर्विद्यायां निपुणस्य भवति। यः पराङ्मुखः सन् लक्ष्यं विध्यति। पराङ्मुख्यापि तस्मिन्नात्मानुरागो निवेशित इत्यर्थः। स्मितं लज्जा चानुरागसूचिका । मया स्वानुरागद्योतनार्थं हास्ये कृते अनया हास्यपूर्व्वं लज्जितं चेत्तर्हि इयमप्यनुरक्तेति निश्चितवन्तं तत् स्मितमेव कामवाणीभूय अपीडयदिति भावः। बालत्वादेव वलितग्रीवत्वं। प्रौढा तु सम्मुखमेव हसति। स्मिते स्मितमिति कर्त्तरि भावे क्तः। वेधिता विधेस्ताच्छील्ये णिनिः ॥ ५६ ॥

कृतमिति। करणस्य कर्त्तव्यस्य उचितं परिवेषणादि तत्य-

हृदस्तदीयस्य तदेव कामुके
जगाद वार्त्तामखिलां खलं खलु ॥ ५७ ॥
जलं ददत्याः कलितानतेर्मुखं
व्यवस्यता साहसिकेन चुम्बितुम्।

जति तया बालया यदन्यदप्रस्तुतं व्यापारान्तरं कृतं। तथा पुनः पुनर्दिदृक्षुः दर्शनेच्छुः किञ्चिद्दृगन्तमात्रेण द्रष्टुं प्रवृत्तमपि चक्षुर्यदवारि अर्द्धपथात् परावर्त्तितं तदेवान्यन्करणं चक्षुर्वारणरूपं द्वयमेव कामुके विषये तदीयस्य हृदः बालासम्बन्धिनो मनसः अखिलां वार्त्तामाशयं जगाद। यतः खलं सूचकं खलूत्प्रेचितं निश्चितं वा। दुर्ज्जनो ह्यन्यदीयमनोगतमन्यस्मै निवेदयति। लज्जानुभववशादिमयप्यनुरक्तेति सोऽज्ञासीदिति भावः। खले इति पाठे स्वाशयद्योतनपरेङ्गितज्ञानचतुरे इति कामुक विशेषणं ॥ ५७ ॥

जलमिति। कस्मिंश्चित् पिपासुं जलं पाययमानायाः पादप्रक्षालनार्थं वा कस्मैचिज्जलं ददत्याः अत एव कलितानतेः नम्रीभूतायाः कस्याश्चित् सुन्दर्य्याः समीपवर्त्ति मुखं जनमध्ये चुम्बितुं व्यवस्यता कृतोद्यमेनात एव साहसिकेनाविचार्य्यकारिणा केनचित् कामुकेन पतद्वारिणि पदे मन्दपाणिना विलम्बार्थं विरलाङ्गुलिसङ्गगलज्जलपाणिना सता पादप्रक्षालनसलिलपाणिना वा सता अन्यस्यां चुम्बनसामग्र्यां सत्यां एकपङ्क्तिनिविष्टानामन्येषां तत्र विचरतां वा ईक्षणस्य दर्शनस्य ईक्षणानां नेत्राणां वा वञ्चनार्थं प्रतारणार्थमनीक्षणार्थं क्षणोऽवसरः प्रती-

पदे पतद्वारिणि मन्दपाणिना
प्रतीक्षितोऽन्ये क्षणवञ्चनक्षणः ॥ ५८ ॥

युवानमालोक्य विदग्धशीलया
स्वपाणिपाथोरुहनालनिर्मितः ।
श्लथोऽपि सख्यां परिधिः कलानिधौ
दधावहो तं प्रति गाढबन्धताम् ॥ ५९ ॥

क्षितो विलम्बेन गवेषितः । पानपक्षे पानक्षणे पदे चरणे विरलाङ्गुलिभ्यः पतद्वारि यस्मिन्नेवम्भूते । पादप्रक्षालनपक्षे पतद्वारिणि पदे मन्दपाणिनेति योज्यं । अन्यनिरीक्षणावसरं सम्प्रतीक्ष्य तन्मुखं चुचुम्बेति भावः ॥ ५८ ॥

युवानमिति । विदग्धशीलया चतुरया कयाचित् सुन्दर्य्या युवानं कञ्चित्तरुणमालोक्य कलानां सकलविद्याचातुर्य्याणां निधौ स्थानभूतायां स्वाशयज्ञायां प्रियसख्यां अथ च सखीरूपे चन्द्रे स्वपाणिभ्यामेव पाथोरुहनालाभ्यां कमलाभ्यां निर्म्मितो रचितः कण्ठाश्लेषरूपः परिधिः श्लथोऽपि शिथिलसम्बन्धोऽपि तं नेत्रलक्ष्यं युवानं प्रति लक्षीकृत्य गाढबन्धतां दृढबन्धमलं दधौ बभार । अहो आश्चर्य्ये । कलानिधौ च परिवेषो युक्तः श्लथस्य गाढत्वविरोधात् । सख्यां चन्द्रे वा कृतस्यालिङ्गनस्य परिधेस्तन्द्रबन्धनरूपत्वादाश्चर्य्यं । मदालिङ्गनेच्छुरियं स्वाशयज्ञापनाय सखीं आलिङ्गितवती मामेवालिलिङ्गेति तदाशयमज्ञासीदिति भावः ॥ ५९ ॥

नतभ्रुवः स्वच्छनखानुबिम्बन-
च्छलेन कोऽपि स्फुटकम्पकण्टकः ।
पयो ददत्याश्चरणे भृशं क्षतः
स्मरस्य बाणैः शरणे न्यविक्षत ॥ ६० ॥

मुखं यदस्माथि विभज्य सुभ्रुवा
ह्रियं यदालम्ब्य नतास्यमासितम् ।

नतेति। स्मरस्य बाणैर्भृशं क्षतः नितरां पीडितोऽत एव स्फुटो जातः सात्विकः कम्पः कण्टको रोमाञ्चश्च यस्य स कोऽपि कामी स्वच्छनखेषु तदीयेषु अनुबिम्बनच्छलेन प्रतिबिम्बनच्छलेन प्रतिबिम्बव्याजेन पयो दुग्धं जलं वा परिवेषयन्त्याः पाययमानायाः कस्याश्चिन्नतभ्रुवः चरणे एव शरणे रक्षित्र्यौ न्यविक्षत प्राविशत्। कामपीडाशान्त्यर्थं चिरं चरणावलोकनव्याजेन प्रार्थनाप्रणतिसञ्ज्ञामकार्षीदिति भावः । भीतः सकम्पो बाणैः सशल्यः सन् कश्चिच्छरणं विशति क्षत इवेति लुप्तोत्प्रेक्षा । चरणौ ऽस्त्रियामित्यमरोक्तेश्चरणे इति द्वितीया द्विवचनान्तं । चरणाविति च पाठः । शरणमिति पाठे चरणरूपद्वयं रक्षितारमिति व्याख्येयं । न्यविक्षत । नेर्विश इति (पा० १।३।१७) तङ् ॥ ६० ॥

मुखमिति । तयैवान्यया वा सुभ्रुवा मुखं विभज्य वक्रीकृत्य यदस्माथि ईषद्धासि तथापि ह्रियं अवलम्ब्य लज्जामाश्रित्य नतास्यमानम्रमुखं यथा तथा यत् आसितं स्थितं मृदु मञ्जुलं गद्गदमस्पष्टवर्णं यथा तथा च वाक्यार्थः । अवादि युवा तदेव

अवादि वा यन्मृदु गद्गदं युवा
तदेव जग्राह तदाप्तिलग्नकम्॥ ६१॥
विलोक्य यूना व्यजनं विधुन्वती-
मवाप्तसत्त्वेन भृशं प्रसिष्विदे।
उदस्तकण्ठेन मृषोष्मनाटिना
विजित्य लज्जां ददृशे तदाननम्॥ ६२॥
स तत्कुचस्पृष्टकचेष्टिदोर्लता-
चलद्दलाभव्यजनानिलाकुलः।

त्ययं तस्या आप्तिस्तस्या लग्नकं प्राप्तिनिश्चायकमिति जग्राह ज्ञातवानित्यर्थः। स्मिताद्यनुभाववशादियं मया लब्धैवेति निश्चिकायेति भावः। वा समुच्चये॥ ६१॥

विलोक्येति। यूना व्यजनं विधुन्वतीं चालयन्तीं सुन्दरीं अकस्माद्विलोक्य तद्दर्शनादेवाप्तसत्वेन आप्तसात्त्विकभावेन सता भृशं प्रसिष्विदे सात्त्विकः स्वेदः प्राप्त इत्यर्थः। आनन्दोद्रिक्तो मनोविकारः सत्त्वं तमेव प्रस्वेदं निह्नोतुं नाशितुं मृषा अलीकं ऊष्माणं प्रस्वेदनिमित्तं सन्तापं नाटयत्येवंशीलेनाभिनयता स्वेदापाकरणव्याजेनोदस्तकण्ठेनोर्द्धीकृतमुखेन सता लज्जां विजित्य तदाननं तस्या आननं ददृशे, स्वकामपीडाज्ञापनार्थं तथा अपश्यदिति भावः। प्रसिष्विदे। षोपदेशत्वात् षत्वं। प्रसिस्विद इति पाठस्त्वन्यः॥ ६२॥

स इति। स पूर्व्वोक्तो युवा व्यजनं चालयन्त्यास्तस्याः पूर्व्वो-

अवाप नानानलनालशृङ्खला-
निबद्धनीडोद्भवविभ्रमं युवा ॥ ६३ ॥

कायाः स्त्रियः कुचयोः स्पृष्टकाख्यमालिङ्गनं चेष्टते करोत्ये-
वंशीला दोर्लता बाहुवल्ली तस्याः सम्बन्धि चलद्दलाभं चपल-
पर्णतुल्यं व्यजनं तालवृन्तं तस्यानिलेन कम्पनसञ्जातवायुना
आकुलो विवशीकृतः। स्तनस्पर्शिभुजचालितव्यजनविलोकनमात्र
सञ्जातानुरागतरलः सन् नानानलानां अनेकशरकाण्डानां
नालस्य सङ्घस्य नलनालानां नलदण्डानां वा या शृङ्खला नि-
बन्धनहेतुत्वात्तेषां परस्परग्रथननिर्म्मितः पञ्जरस्तया नितरां
बद्धःसङ्कुचितप्रचारीकृतः नीडोद्भवः पक्षी तस्य विभ्रमं पञ्जर-
मध्य एव यद्दिशिष्टं भ्रमणं अथ च तस्य विलासं साम्यं अवा-
प जनसम्मर्देऽप्यनुरागातिशयाद् व्यजनचालनचलद्भुजान्तर्वर्त्ति
तत्कुचयोः परम्परयापि संस्पर्शे सांसर्गिकप्रीत्या साक्षादिव
तत्कुचस्पृष्टकालिङ्गनमनुभवन् जनशङ्कया यथेष्टं चेष्टितुमशक्तः
कामातुरः पञ्जरबद्धपक्षिनिर्बन्धमिवानुभवदिति भावः ।
लतायास्तु चलद्दलत्वं युक्तं । व्यजनचालनव्याजाच्चलतो भुज-
स्यापि स्तनस्पर्शे स्पृष्टकालिङ्गनत्वं युक्तम् । नलजालेति पाठः
समीचीनः । नलनालेति पाठे नानाविधाः कण्टकानां नल-
सम्बन्धिन्यः कण्टबन्धनकारिण्यः शृङ्खला इत्यर्थः ॥ ६३ ॥

आवक्रटा कापि कटाक्षणस्य सा
तथैव भङ्गी वचनस्य काचन ।
यया युवभ्यामनुनाथने मिथः
कृशोऽपि दूतस्य न शेषितः श्रमः ॥ ६४ ॥
पपौ न कश्चित् क्षणमास्यमेलितं
जलस्य गण्डूषमुदीतसम्मदः ।

आवेति। सा कापि वर्णयितुमशक्या भावोल्लसनचतुरा कटाक्षणस्य नेत्रप्रान्तवक्रवीक्षणस्यावक्रटा भङ्गिः परम्परा वा तथैव तदुचितैव सा काचन कापि वक्रोक्त्यादिरूपा वचनभङ्गी रचनापि अभूदिति शेषः। सा का। यया कटाक्षावक्रटया वचनभङ्ग्या च कर्त्र्या युवभ्यां मिथः परस्परं अनुनाथने अन्योन्यप्रार्थने विषये कृशोऽप्यल्पोऽपि दूतस्य श्रमः प्रयासो न शेषितोऽविफलीकृतः। यया कृत्वा युवभ्यां न शेषित इति वा। आत्मनैव चेष्टाविशेषरचनाद्वारा त्वं किमेष्यसि अहं वा गच्छामीत्यादिप्रश्ननिश्चयाद्दूतस्यानवसर इति भावः। यूनोर्वैदग्ध्यं सूचितं। युवतीच युवा चेत्यत्र, पुमान् स्त्रियेत्येकशेषः (पा० १।२।६७) कर्त्तरि तृतीया चतुर्थी वा। शेषितः। तत्करोतीति ण्यन्तान्निष्ठा ॥ ६४ ॥

पपाविति। कश्चित्कोऽपि युवा आस्येन मुखेन मेलितं योजितं करपुटे पानार्थं धृतं जलस्य गण्डूषं पेयं जलं क्षणमात्रं न पपौ। यत उदीतसम्मदः उत्पन्नानुरागः। तथापि किमिति न पपावित्यत आह। तत्राधरसम्पृक्ते करपुटधृते जले प्रतिविम्बितं

चुचुम्ब तत्र प्रतिविम्बितं मुखं
पुरः स्फुरन्त्याः स्मरकार्मुकभ्रुवः ॥ ६५ ॥
हरिन्मणेर्भोजनभाजनेऽर्पिते
गताः प्रकोपं किल वारयात्रिकाः।
मृतं न शाकैः प्रवितीर्णमस्ति व-
स्त्विषेदमेवं हरितेति बोधिताः ॥ ६६ ॥

पुरः स्फुरन्त्या विलसन्त्याः स्मरकार्मुकवद्भ्रुवौ यस्यास्तस्या मुखं चुचुम्ब। उद्दीतमन्मदः सन् वा चुम्बितवान्। जले पीते प्रतिविम्बासम्भवात् पानार्थं गृहीते जले तस्या मुखप्रतिविम्बे प्रतिविम्बजनितमुखचुम्बनदर्शनकौतूहलवशात्तस्या यावदवस्थानं तावन्न पपौ। गतायां तु प्रतिविम्बाभावात् पपाविति भावः। पुरः स्फुरन्त्या जलं ददत्या एव मुखमिति वा ॥ ६५ ॥

हरिदिति। हरिन्मणेर्भोजनार्थं भाजने पात्रेऽर्पिते पुरः स्थापिते सति पत्रावलीभ्रान्त्या शाकपूर्णत्वभ्रान्त्या वा किल स्फुटं प्रकोपं नितरां रोषं प्राप्ता वारयात्रिका वरपक्षीया राजानो भीमसम्बन्धिभिर्लोकैरिति बोधिताः। इति किं। इदं वो युष्मभ्यं प्रवितीर्णं पात्रं शाकैः पलाशादिवृक्षपलाशैर्वास्तुकादिस्थामव्यञ्जनैरेव वा न मृतं तद्रचितं पूर्णं वा किन्त्वोदनादियुक्तमपि हरितनीलया त्विषा मृतं न पत्रावली नापि शाका इत्येवं ज्ञापितास्ततस्तुष्टा इत्यर्थः। वारयात्रिकाः। वरयात्रा प्रयोजनमेषां इत्यर्थे,प्रयोजनमिति (पा०५।१।१०८) ठक् ॥ ६६ ॥

ध्रुवं विनीतः स्मितपूर्व्ववाग् युवा
किमप्यपृच्छन्न विलोकयन्मुखं।
स्थितां पुरस्फाटिककुट्टिमे वधूं
तदङ्घ्रियुग्मावनिमध्यबद्धदृक्॥ ६७॥
अमी लसद्बाष्पमखण्डिताखिलं
वियुक्तमन्योन्यममुक्तमार्द्दवं।
रसोत्तरं गौरमपीवरं रसा-
दभुञ्जतामोदनमोदनं जनाः॥ ६८॥

ध्रुवमिति। विनीतः ध्रुवमाचारवानिव स्मितपूर्व्ववाक् मुखं न विलोकयन् अपश्यन् युवा तस्या अङ्घ्रियुग्मस्यावनिमध्ये भूमिभागे बद्धदृग्योजितनेत्रःसन् पुरः स्फटिकनिबद्धभूमौ स्थितां वधूं किमप्यपृच्छत्। अग्रे स्फटिककुट्टिमप्रतिबिम्बिततदङ्गदर्शनार्थमेव गोष्ठीमिषेण तां स्थिरीचकारेति भावः। अधोदर्शनार्थमेव मुखं न विलोकितं। अयं श्लोकः क्वचित्॥ ६७॥

अमी इति। अमी जनाः रसात् स्वादविशेषानुरागादोदनं अभुञ्जत। किम्भूतं। लसद्बाष्पं विद्यमानाग्राणं ईषत्कदुष्णं। तथा अखण्डितश्चासावखिलः सम्पूर्णश्च पाकेऽपि अविच्छिन्नं तण्डुलमिति यावत्। अभग्नमखिलं स्वरूपं यस्येति वा। तथा पाकसमये नवनीतक्षेपात् अन्योन्यं वियुक्तमसंलग्नमिक्थकं। तथा अमुक्तं अत्यक्तं मार्द्दवं येन सुजातिशालिबीजत्वादतिकोमलं। तथा रसोत्तरं स्वादबहुलं। तथा गौरं चन्द्रधवलं। तथा अपीवरं जीरकादिसुजातिशालिबीजत्वात् सूक्ष्मं दीर्घतण्डुलं अत एवा-

वयोवशस्तोकविकस्वरस्तनीं
तिरस्तिरश्चुम्बति सुन्दरे दृशा।
स्वयं किल स्रस्तमुरस्थमम्बरं
गुरुस्तनी ह्रीणतराऽपराऽऽददे ॥ ६९ ॥

मोदनं हर्षहेतुं। परिमलबाहुल्याद्वा आमोदनं। अचतत्वे गल-द्बाष्पत्वं। मार्दवात्यागे अन्योन्यवियुक्तत्वं। अतःकारणान्मा-र्दवैः परस्परविरोधाभासः ॥ ६८ ॥

वय इति। सुन्दरे जन्यजनं दृशा वयोवशेन निर्गच्छदाग-गच्छच्छैशवतारुण्यपारतन्त्र्येण स्तोकमीषद्विकस्वरौ उन्नमितम-ण्डलौ स्तनौ यस्यास्तां वयःसन्धौ वर्त्तमानां मुग्धां तिरस्तिरो वक्रं वक्रं यथा चुम्बति पश्यति सति सानुरागकटाक्षमात्रेणापि चुम्बनजन्यं सुखमनुभवति गुरुस्तनी तारुण्यभरपीवरदृढतरकु-चाऽपरान्या स्त्री तदनुरागाद्ध्रीणतरा अतिसलज्जा सती यथा-स्थानस्थितमपि स्वयमात्मनैव स्रस्तं किल स्थानच्युतं जातमिवो-रस्थमम्बरं हृदयावरणं बलाद्विगलितं कृत्वा पुनस्तदाच्छा-दनाय आददे अङ्गीचकार। मुग्धां प्रत्यनवरं हृदयावरण-सन्धानं चकार। विदग्धस्त्रीरीतिरीदृशी। अथ च त्वमिमा-मल्पस्तनीं मुग्धां त्वत्सम्भोगसहनाक्षमां किं पश्यसि पक्वमालूर-समानस्तनीं त्वत्सम्भोगक्षमां मां पश्येति स्वाशयज्ञापनायादृष्ट-मपि पीनघनस्तनयुग्ममदर्शयदिति भावः। ह्रीणतरा। तसि-लादिष्विति (पा० ६।३।३५) पुंवद्भावः ॥ ६९ ॥

यदादिहेतुः सुरभिः समुद्भवे
भवेत्तदाज्यं सुरभि ध्रुवं ततः ।
वधूभिरेभ्यः प्रवितीर्य्य पायसं
तदोघकुल्यातटसैकतं कृतम् ॥ ७० ॥
यदप्यपीता वसुधालयैः सुधा
तदप्यदः स्वादु ततोऽनुमीयते ।

यदिति । सुरभिः कामधेनुर्गौर्वा । अथ च सौरभ्ययुक्तः पदार्थः समुद्भवे उत्पत्तिविषये यस्यादिहेतुः दुग्धादिद्वारा परम्परया मूलकारणं ततो ध्रुवं तस्मादिव सौरभ्यधर्म्मयुक्तकारणादिव यदाज्यं सुरभि भवेत् तस्मात् कारणगुणा हि कार्य्ये समवयन्तोऽतिसुरभीभवितुमर्हन्ति, तदाज्यमभ्यो जनेभ्यो वधूभिः प्रवितीर्य्य परिवेष्य पायसं चीरपक्वतण्डुलमन्नं तदोघकुल्यानां घृतप्रवाहरूपाणां कृत्रिमाल्पसरितां तटयोः सैकतं कृतम् । पूर्व्वं पायसं परिवेष्य तस्योपरि धाराप्रवाहरूपे घृते चिप्ते द्विधा भूय घृतमभितः स्थितं पायसं शुभ्रत्वात् घृतकुल्यासैकतमिव शोभते स्मेति भावः । आत्मसौरभ्यवाकुल्यभुक्तम् । यदाज्यमित्येव पाठः ॥ ७० ॥

यदपीति । यदपि वसुधालयैर्मनुष्यैः सुधा अमृतं न पीता तदपि तथापि सुधारसाज्ञानेऽपि अदः आज्यं ततोऽमृतादपि सकाशात् स्वादु मिष्टमित्यनुमीयते । यस्मात् सुधान्धसः अमृतान्ना देवा अपि कृतो उपबुधेन अग्निना दग्धगन्धिने विनाशि-

अपि क्रतुपर्वबुधदग्धगन्धिने
स्पृहां यदस्मै दधते सुधान्धसः ॥ ७१ ॥
अबोधि नो ह्रीनिभृतं मदिङ्गितं
प्रतीत्य वा नादृतवत्यसाविति ।

तस्मै रम्भाय यस्मै घृताय स्पृहां इच्छां दधते । यागे हि हुतं घृत देवा भुञ्जते। यद्यमृतादधिकरम्यं नाभविष्यत्तस्मादमृतादा अपि देवा यागानलविकृतगन्धमप्येतत्सानुरागं कथमभ्यवहरिष्यन् अभ्यवहरन्ति तावत्तस्मादमृतादपि विकृतगन्धमपि घृतमधिकरम्यं। किमुत स्पष्टमोरम्भमिति भावः। मनुष्यैरपि सुधा यस्मान्न पीता सुधान्धसोऽपि विशिष्टायास्मै यस्मात् स्पृहयन्ति तस्मादपि च हेतोरदो घृतं सुधायाः स्वादुतरमनुमीयते। एकोऽन्यरसत्वाद्बुद्धिपूर्व्वममृतं नास्वादयत्येव। अन्ये च नित्यं प्राप्तामृता अपि यस्माद्घृताय स्पृहयन्ति तस्माद्धेतुद्वयादमृतादप्यधिकमेतदनुमीयत इति वा। क्रतुपर्वबुधेन दग्धस्तासैा गन्धश्च सोऽस्त्यस्येति कर्म्मधारयादिनिः। स्पृहेरीप्सित (पा० १।४।३६) इति सम्प्रदानत्वम् ॥ ७१ ॥

अबोधीति। असैा बाला ह्रीनिभृतं बालत्वाल्लज्जावशाद्विस्पष्टं इति च हेतोर्भावसूचकं मदिङ्गितं भ्रूविक्षेपादि मम चेष्टितं नो अबोधि अज्ञासीत् किंवा। अथवा प्रतीत्य ज्ञात्वा ननु रागान्नादृतवती अज्ञातवतीत्येवंरूपां पुनः पुनर्जायमानां यूनो धियं संशयबुद्धिं कियन्तं मार्गं गतापि बाला निवृत्य परावृत्य

लुनाति यूनः स्म धियं कियद्गता
निवृत्य बालादरदर्शनेषुणा ॥ ७२ ॥
न राजिकाराद्धमभोजि तत्र कै-
र्मुखेन सीत्कारकृता दधद्दधि ।
धुतोत्तमाङ्गैः कटुभावपाटवा-
दकाण्डकण्डूयितमूर्द्धतालुभिः ॥ ७३ ॥
वियोगिदाहाय कटूभवत्त्विष-
स्तुषारभानोरिव खण्डमाहृतम् ।

आदरदर्शनं सादरकटाक्षविलोकनं तद्रूपेणेषुणा लुनाति स्म चिच्छेद । तदिङ्गितज्ञानपुरःसरं स्वानुरागं प्रकटीचकारेत्यर्थः । तादृग्विलोकनात् मदिङ्गितं ज्ञात्वा इयमप्यनुरक्तेति युवा निश्चिकायेति भावः । कियद्गता । द्वितीयाश्रितेति (पा० २।१। २४) समासः । कियद्यथातथागतेति क्रियाविशेषणं वा ॥ ७२ ॥

नेति । युग्मं । तत्र भीमगेहे भोजनावसरे वा राजिकाभी-राद्धं साधितं दधि दधत् दधिमिश्रितं व्यञ्जनं तैक्ष्ण्यातिशयात् सीत्कारकृता मुखेन कैर्जन्यजनैर्नाभोजि अपि तु सर्व्वैरपि भुक्तं । किम्भूतैः । कटुभावपाटवात् कटुत्वातिशयात् धुतोत्तमाङ्गैः कम्पितशिरोभिः । तथा भोजनकाले शिरःकण्डूयनस्य स्मार्त्त-वचनैर्निषिद्धत्वादकाण्डे अकाले कण्डूयिते मूर्द्धतालुनी यैः तैः । मुखस्यैव भोजनसाधनत्वे सिद्धेऽपि सीत्कारादिविशिष्टत्वद्योत-नार्थं मुखेनेत्युक्तं । राजिकाराद्धभोजिनामियं जातिः ॥ ७३ ॥

वियोगीति । वियोगिनां स्त्रीपुंसां दाहाय पीडार्थं कटू-

सितं मृदु प्रागथ दाहदायि तत्
खलः सुहृत्पूर्व्वमिवाहितस्ततः ॥ ७४ ॥
नवौ युवानौ निजभावगोपिना-
वभूमिषु प्राग्विहितभ्रमिक्रमम्।
दृशोर्विधत्तः स्म यदृच्छया किल
त्रिभागमन्योन्यमुखे पुनः पुनः ॥ ७५ ॥

अत्रन्त्यस्त्विषो दीप्तयो यस्यामत्युद्दीप्तेस्तुषारभानेश्चन्द्रस्याहृत खण्डमिव सितं श्वेतं तथा प्राक् प्रथमं मृदु प्रथमस्पर्शसमये कोमलं अथ पश्चान्मुखप्रक्षेपानन्तरं तालुजिह्वादेस्तैक्ष्ण्यातिशयाद्दाहदायि दाहकारि आहृतं आनीतं तद्राजिकाराद्धम-भाजीति पूर्व्वेणान्वयः। तुषारभानोः सकाशादाहृतमिति वा। क इव। खल इव। किम्भूतः। पूर्व्वं सुहृदापातरमणीयस्ततो-ऽनन्तरमहितो वैरी। रायी इति कान्यकुब्जभाषायां। मोहरया इति दाक्षिणात्यभाषया राजिकानां नाम ॥ ७४ ॥

नवाविति। वयःसन्धौ वर्त्तमानौ नवावप्रगल्भौ अत एव निजभावगोपिनौ स्वानुरागगोपनपरौ कौचिद् युवानौ अभूमिषु लोकव्यवहारायोग्येषु स्वयोग्येषु वा अनुद्देश्येषु वा वस्तुषु प्राक् पूर्व्वं विहितः कृतः भ्रमैर्निरर्थकभ्रमणस्य क्रमः परम्परा यत्र येन वा एवम्भूतं दृशोर्नेत्रयोस्त्रिभागं तृतीयांशरूपं कटाक्षं अन्योन्यमुखे पुनः पुनः विधत्तः स्म चक्रतुः यदृच्छया किल। अन्यविलोकनवत् स्वेच्छामात्रेण क्रममप्राप्तमन्योन्यमुखविलोकनं

व्यधुस्तमां ते मृगमांससाधितं
रसाददित्वा मृदु तेमनं मनः ।
निशाधवोत्सङ्गकुरङ्गजैरदः
पलैः सपीयूषजलैः किमश्रपि ॥ ७६ ॥
परस्पराकूतजदूतकृत्ययो-
रनङ्गमाराद्धुमपि क्षणं प्रति ।

कुरुतः न त्वनुरागेणेति लोकप्रतीतिर्यथा स्यादेवं वस्त्वन्तरवि लोकनव्याजेनान्योन्यमुखं कटाक्षैर्वीक्षांचक्राते इति भावः । त्रिभागमिति पूर्ववत् समर्थनीयम् ॥ ७५ ॥

व्यधुरिति । ते जन्यजना मृगमांसैः साधितं राद्धं संस्कृतं मृदु तेमनाख्यं व्यञ्जनविशेषं रसात् प्रीत्याऽदित्वा भुक्त्वा इति मनो व्यधुस्तमां नितरां चक्रुः । इति किं । अदः तेमनं निशाधवश्चन्द्रः तस्योत्सङ्गे वर्त्तमानः कुरङ्गो हरिणस्तस्माज्जातैः सपीयूषजलैः अमृतरूपैः जलैः सह वर्त्तमानैः पलैर्मांसैरश्रपि किं अपाचि किं । रसातिशयान्मनसा एवं तर्कितवन्तस्त इत्यर्थः । तेमनस्यातितरां स्वादुत्वमुक्तम् । अश्रपि । श्रा पाके इत्यस्मात् कर्म्मणि चिणि घटादित्वान्मित्वाद्ध्रस्वः ॥ ७६ ॥

परस्परेति । परस्परस्याकूतात् चेष्टाविशेषादेव जातं दूतकृत्यं सम्भोगसम्मतिर्ययोः कयोश्चिद्यूनोः स्त्रीपुंसयोरनङ्गमाराद्धुं सुरतं कर्त्तुं यः क्षणः समयस्तं प्रति उद्दिश्य सदा क्रियमाणनियमापेक्षया कियच्चिरायुषा कियच्चिरं किञ्चिदधिककाल-

निमेषणेनैव कियच्चिरायुषा
जनेषु यूनोरुदपादि निर्णयः ॥ ७७ ॥
अहर्निशा वेति रताय पृच्छति
क्रमोष्णशीतान्नकरार्पणाद्विटे ।
ह्रिया विदग्धा किल तन्निषेधिनी
न्यधत्त सन्ध्यामधुरेऽधरेऽङ्गुलीम् ॥ ७८ ॥

मायुर्वर्त्तमानता यस्यैवंभूतेन कियच्चिरकालस्थायिना निमेषेणैवाक्षिपक्ष्मसङ्कोचेनैव कर्त्रा करणेन वा जनेषु मध्ये बहुजनेषु वर्त्तमानेषु सत्सु अपि निर्णयः निश्चय उदपादि कृतः जातो वा । कदा सम्भोग इति इङ्गितेन पृष्टे सति नेत्रे निमील्य किञ्चित्कालं स्थित्वा जने निद्राणे सति आगन्तव्यमिति रात्रिः सङ्केतसमय इति निरणायीति भावः । उदपादि । चिण्तेपद इति (पा० ३।१।६०) कर्त्तरि कर्म्मणि वा चिण् ॥ ७७ ॥

अहरिति । विटे कामुके रताय आवयोः सम्भोगं कर्त्तुं अहर्निशा वेति उष्णकरघर्म्मोपलक्षितं दिनं वा शीतांशुकरशैत्योपलक्षिता रात्रिर्वा समय इति क्रमेणोष्णशीतयोरन्नयोरुपरि करार्पणादेव चेष्टितात् कामपि पृच्छति सति विदग्धा चतुरा तत्प्रश्नाशयज्ञा ह्रियोपलक्षिता अनक्षरमिङ्गितेनैव तन्निषेधिनी तयोर्दिननिशयोर्निषेधं कुर्व्वाणा सन्ध्यावन्मधुरे रमणीयेऽधरे स्वीयोष्ठेऽङ्गुलीं न्यधत्तास्थापयत् । अनभिमतमर्थं निषेधन्त्यः स्त्रियो मातः किमेवं ज्ञातमित्याद्यभिधायाधरेऽङ्गुलीं स्थाप-

क्रमेण कूरं स्पृशतोऽस्मणः पदं
सिताञ्च शीतां चतुरेण वीक्षिता ।
दधौ विदग्धारुणितेऽधरेऽङ्गुली-
मनौचितीचिन्तनविस्मितं किल ॥ ७९ ॥
कियत् त्यजन्नोदनमानयन् कियत्
करस्य पप्रच्छ गतागतेन यां ।

यन्तीति जातिः । किल प्रसिद्धं । लोकस्य चैवमेव प्रतीतिर्जाता । सा तु तन्निषेधव्याजेन दिने रात्रौ वा अनवसरः सन्ध्यैव रत-समय इत्यकथयदिति भावः । यद्वा दिने सूर्य्यालोकात् रात्रौ चन्द्रालोकात् द्वयमप्यनुचितं । किन्तु महान्धकारमलिना स-न्ध्यैव रन्तुं योग्येति भावः ॥ ७८ ॥

क्रमेणेति । अयं श्लोकः क्षेपकः । कूरं भक्तं सितां शर्करां । किमिदमनेनानुचितं क्रियत इत्यनौचितीचिन्तनेन विस्मितं किल विस्मितेव । अरुणिते यावकेनेवत्यर्थः । भावः स एव ॥ ७९ ॥

कियदिति । कृतसुरतकालनिर्णयः स एव युवा कियदल्पं ओदनं पुरःस्थितां वीक्ष्य त्यजन् पात्रे स्थापयन् कियदोदनं च स्वम्प्रति पुनरानयन् सन् करस्य भक्तपुरस्त्यागवशात् परोगम-नेन स्वम्प्रति भक्तानयनवशादागमनेन च क्रमेण त्वां प्रत्यहं किमेष्यामि त्वं वा मां प्रति किमेष्यसीति यां पप्रच्छ सा आननं नम्रं व्यधत्त लज्जया किल । किलेत्यलीके । लोकप्रतीतौ अनया लज्जया मुखं नम्रीकृतं इति । तत्वतस्तु मुखनम्रीकरणेनाहमा-

अहं किमेष्यामि किमेष्यसीति सा
व्यधत्त नम्रं किल लज्जयाननं ॥ ८० ॥

यथामिषे जग्मुरनामिषभ्रमं
निरामिषे चामिषमोहमूहिरे।
तथा विदग्धैः परिकर्म्मनिर्म्मितं
विचित्रमेते परिहस्य भोजिताः ॥ ८१ ॥

नखेन कृत्वाधरसन्निभां निभाद्
युवा मृदव्यञ्जनमांसफालिकां।

गमिष्यामीति सन्दर्शितवतीति भावः। तं वीक्ष्य मुखं नम्रीकृत्य स्वचरणौ पश्यन्ती त्वमेवागत्य मच्चरणयोर्निपततेति वा भावः। भोजनसमये भोक्ता कियन्तं ओदनं विभज्य स्थापयति कियन्तं दध्यादिना सह भोक्तुं गृह्णातीति जातिः। कियन्तं त्यजन् बहु-त्वात् पुनर्ददानः कियन्तञ्च पुनः पात्रं प्रत्यानयन्निति वा ॥ ८० ॥

यथेति। वारयात्रिका यथा येन प्रकारेणामिषे मांसे अनामिषस्यामिषाद्यन्नस्य भ्रमं जग्मुः, यथा येन प्रकारेण निरा-मिषे मांसलेशवर्जितेऽपि तेमनादौ रूपस्वादादिभिः आमिष-मोहं मांसभ्रमं ऊहिरे तर्कितवन्तः तथा तेन प्रकारेण विद-ग्धैर्नितरां कुशलैःसूपकारैः कर्तृभिः एते वारयात्रिकाः परि-कर्म्मभिः साधनद्रव्यैर्निर्म्मितं चित्रमन्नं परिहस्य पूर्व्वोक्तं भ्रम-निमित्तं परिहासं भोजिताः ॥ ८१ ॥

नखेनेति। कश्चिद् युवा मृद्वीं व्यञ्जनमांसस्य फालिकां खण्डं

ददंश दन्तैः प्रशशंस तद्रसं
विहस्य पश्यन् परिवेषिकाधरं॥ ८२॥
अनेकसंयोजनया तथा कृते-
र्निकृत्य निष्पिष्य च तादृगर्जनात्।
अमी कृताकालिकवस्तुविस्मयं
जना बहु व्यञ्जनमभ्यवाहरन्॥ ८३॥

नखेन कृत्वा निभात् व्याजात् अधरसन्निभां ओष्ठाकारां द्विधा कृत्वा पूर्व्वमधरसदृशीमपि नखेन द्विधा कृत्वा, मध्ये नखेन रेखाकरणान्नितरां मध्यस्थितरेखाधरसदृशीं वा कृत्वा दन्तै-र्ददंश परिवेषिकाधरं मांसव्यञ्जनदायिन्याः अधरं पश्यन् विहस्यैतादृशी स्वादुतरा मांसफालिका कदापि नोपभुक्तेत्यादिप्रकारैस्तस्याः फालिकायाः सुस्वादुतां प्रशशंसाप्तावीच्च। स्वादुतरं त्वदीयाधरमेव दशामीति हसन्नस्मिन्मांसखण्डे तदधरतामारोपयन् स्वाशयं तामज्ञापयदिति भावः॥ ८२॥

अनेकेति। अमी जना वारयात्रिका बहु मूलकन्दपुष्पपत्रफलादिरूपं शाकादिव्यञ्जनमभ्यवाहरन् बुभुजिरे। किं विधं। अनेकेषां नानाविधमरीच्यादिद्रव्याणां संयोजनया सम्बन्धेन तथा कृतेः वस्त्वन्तरस्येव गन्धरसादिकरणात् तादृग्रसादिनिर्माणात् तद्यथा निकृत्य नितरां कर्तित्वा निष्पिष्य चूर्णीकृत्य चाकारमाश्यादिना तादृगर्जनात् वस्त्वन्तरसादृश्यस्य सम्पादनात् रूपान्तरेण गन्धादिकारणाद्धेतोः कृतः आकालिकेऽसम-

पिपासुरस्मीति विबोधिता मुखं
निरीक्ष्य बाला सुहितेन वारिणा ॥
पुनः करे कर्त्तुमना गलन्तिकां
हसात् सखीनां सहसा न्यवर्त्तत ॥ ८४ ॥

यप्रभवे वस्तुनि विस्मय आश्चर्य्यं येन इति क्रियाविशेषणं वा। तथा आकृतेः आकारादिति वा। फलादि कर्त्तित्वा राजिकादध्यादिसंयोगाद्रसान्तरोत्पत्तिस्तथा रूपान्तरापत्तिश्च। गोधूमादि पिष्ट्वा शर्करासम्बन्धाद्रसान्तरोत्पत्तिरित्यादिवैदग्ध्याद् भोक्तॄणां विस्मयोऽधिवासनविशेषाच्चाकालिकभ्रमो युक्तः ॥ ८३ ॥

पिपासुरिति। वारिणा अम्बुना सुहितेन तृप्तेन विटेन मुखं निरीक्ष्याहं पिपासुः पातुमिच्छुरस्मि इति विबोधिता विज्ञापिता बालाऽबुद्धवक्राक्त्याद्यभिप्रायविशेषा अप्रौढा पुनरपि करे गलन्तिकां पात्रं सुवर्णभाजनं कर्त्तुमनाः सती तदाशयज्ञानामतिचतुराणां सखीनां हसाद्धास्याद्धेतोः सहसा झटिति सुप्तप्रबुद्ध इव जलपायनारम्भसम्भ्रमान्न्यवर्त्तत परावृत्ता। सहसा सस्मिता सतीति वा। कर्मान्तरपरित्यागेन सामान्येन पिपासुरस्मीति वदन्नयमेतदीयाधरं पिपासुरस्तीत्येतदाशयमियं न जानातीति सखीभिः कृताद्धास्यादियमपि तदाशयं ज्ञात्वा गलन्तिकां पुनर्नोत्थापयदिति भावः। पूरणगुणेत्यादिना (पा० २।२।११) सुहितार्थयोगे षष्ठीसमासनिषेधादेव वारिणेति तृतीया ॥ ८४ ॥

युवा समादित्सुरमत्रगं घृतं
विलोक्य तत्रैणदृशोऽनुविम्बनं।
चकार तन्नीविनिवेशितं करं
बभूव तच्च स्फुटकण्टकोत्करम्॥ ८५॥
प्रलेहजस्नेहकृतानुविम्बनां
चुचुम्ब कोऽपि श्रितभोजनस्थलः।

युवेति। अमत्रगं पात्रस्थं घृतं समादित्सुर्ग्रहीतुकामः कश्चित् युवा तत्र घृते एणदृशः पुरस्थाया मृगाक्ष्याः परिवेशिकाया अनुविम्बनं प्रतिविम्बं विलोक्य करं स्वहस्तं तस्य विम्बस्य नीविषु भङ्गीनिबद्धनाभिचुम्बितवस्त्रविच्छित्तिषु निवेशनशीलं चकार तत्रास्थापयदित्यर्थः। तच्च तस्याः प्रतिविम्बं स्फुटाः कण्टकोत्करा यस्मिन् सरोमाञ्चमभूदित्यर्थः। स्वप्रतिविम्बनीविग्रन्थिमोचनार्थं नाभिनीविसविधे स्पर्शकारिणस्तत्करस्य चेष्टां दृष्ट्वा तस्य स्वसम्भोगवासनां ज्ञात्वा तदानीमेतस्मिन्ननुरागाद्रोमाञ्चिताभूत् तादृश्याश्च प्रतिविम्बितत्वात् प्रतिविम्बमपि रोमाञ्चितमभूदिति भावः। द्वयोरप्यनुरागस्तुल्यो जात इति भावः॥ ८५॥

प्रलेहेति। कोऽपि विटः लिह्यत इति लेहः प्रकृष्टो लेहः प्रलेहः सूरणादिद्रव्ययुक्तः आर्द्रकादिसंस्कृततक्रादिनिर्म्मितो द्रवद्रव्यविशेषः तस्माज्जाते स्नेहे तैलादौ कृतमनुविम्बनं यया कृतं स्थितमनुविम्बनं यस्या वा एवंविधां पुरस्थां सुन्दरीं, श्रितं

मुहुः परिस्पृश्य कराङ्गुलीमुखै-
स्ततोऽनुरक्तैः स्वमवापितैर्मुखं ॥ ८६ ॥
अराधि यन्मीनमृगाजपत्त्रिजैः
पलैर्मृदु स्वादु सुगन्धि तेमनम्।
अशाकि लोकैः कुत एव जेमितुं
न तत्तु सङ्घ्रातुमपि स्म शक्यते ॥ ८७ ॥

भोजनस्थलं येन एवंविधः सन् प्रतिविम्बितां तामेव कराङ्गुलीमुखैः कराङ्गुल्यग्रैर्मुहुः परिस्पृश्य स्पृष्ट्वा चुचुम्ब। कीदृशैः। स्वमुखं समवापितैस्तथा रक्तैः स्वभावात् उष्णस्य तस्य स्पर्शाद्वा ततोऽनु तस्मादनुरागात् किं। अङ्गुल्यग्रैः रक्तत्वादनुरागाच्चुम्बिता। किमुत्प्रेचा। रिक्तैरिति पाठे मुहुः परिस्पृश्य ततोऽनु तदनन्तरमेव रिक्तैः प्रलेहशून्यैरेव स्वमुखं प्रापितैः कराङ्गुलीमुखैश्चुचुम्बेत्यर्थः। प्रलेहेति। वटकादिनिक्षेपात् तैलादिविन्दवस्तरन्ति तत्र जातं प्रतिमुखं प्रतिविम्बमङ्गुल्या स्पृशति तत्र प्रलेहचलनात् प्रतिविम्बभङ्गभयात् अङ्गुल्यग्रैर्लेहनकत्वात् परम्परया चुम्बितवानिति भावः। तां प्रति स्वानुरागमदर्शयदिति भावः ॥ ८६ ॥

अराधीति। मीनेभ्यः मत्स्येभ्यः चित्रकादिमृगेभ्यः अजेभ्यः छागेभ्यः पत्त्रिभिस्तित्तिरलावकादिभक्ष्यपक्षिभिश्च जातैः पलैर्मांसैर्मृदु स्वादु सुगन्धि पाकेन परिमलविशेषयुक्तञ्च यत्तेमनाख्यं व्यञ्जनं सूपकारैरराधि साधितं तद्वाङ्गल्यात्लोकैः सङ्घ्रा-

कृतार्थनश्चाटुभिरिङ्गितैः परा
परासि यः किञ्चनकुञ्चितभ्रुवा।
क्षिपन्मुखे भोजनलीलयाङ्गुलीः
पुनः प्रसन्नाननयाऽन्वकम्पि सः॥ ८८॥

अकारि नीहारनिभं प्रभञ्जना-
दधूपि यच्चागरुसारदारुभिः।
निपीय भृङ्गारकसङ्गि तच्च तै-
रवर्णि वारि प्रतिवारमीदृशम्॥ ८९॥

तुमपि न शक्यते स्म। जेमितुं तु पुनः कुत एव अशाकि, अपि तु भोक्तुं शक्यं नाभूदेव। जेमितुं। जिमु अदने॥ ८७॥

कृतेति। किञ्चन किञ्चित्कुञ्चिते वक्रीकृत्योत्क्षिप्ते भ्रुवौ यया कयाचित्तदिङ्गितैरञ्जलिबन्धादिचेष्टितैः चाटुभिः प्रियवचनैश्च कृताऽर्थना सम्भोगप्रार्थना येन तथाविधो यो विटः पुरा पूर्वं परासि निरस्तः प्रसन्नाननया सस्मदृष्टिव्यञ्जितप्रसादमुख्या तया भोजनलीलया ग्रासमिषेण मुखेऽङ्गुलीः प्रक्षिपन् अङ्गुली-संस्पर्शेन तां प्रतिदीनत्वं सूचयन् स पुनरन्वकम्पि अनुगृहीतः तद्दैन्यं दृष्ट्वा सम्भोगस्तयाऽनुमत इति भावः॥ ८८॥

अकारीति। यद्वारि प्रभञ्जनात् व्यजनादिवायुसङ्गाद्धेतोः नीहारनिभं तुषारतुल्यमकारि यच्च अगरुसारस्य कृष्णागरो-र्दारुभिरधूपि धूपितभृङ्गारके सुवर्णपानपात्रे सङ्गः स्थितिर्यस्या-स्तीति तद्वारि। तच्च भोजनावसरे भीमगृहे वा निपीय नितरां

त्वया विधातर्यदकारि चामृतं
कृतञ्च यज्जीवनमम्बु साधु तत्।
वृथेदमारम्भि तु सर्व्वतोमुखं
तथोचितः कर्त्तुमिदंपिवस्तव ॥ ९० ॥

पीत्वा तैर्जलैः प्रतिवारं पुनः पुनरीदृशं वक्ष्यमाणप्रकारेणावर्णि अस्तावि। प्रतिवारं निपीयेति वा। अगरुरित्येव पाठः। भृङ्गारः कनकालुकेत्यमरः। अल्पत्वे कन् ॥ ८९ ॥

जलवर्णनमेवाह। त्वयेति। हे विधातः त्वया च अम्बु उदकं यदमृतमज्ञं अकारि यच्च जीवनसञ्ज्ञमकारि तद्द्वयमपि साधु उचितमेव कृतम्। अमृततुल्यरसत्वात्प्राणधारणहेतुत्वाच्चान्वर्थत्वाद्युक्तमेवैतत् तस्य सञ्ज्ञाद्वयमित्यर्थः। तु पुनरिदं सर्व्वतोमुखसञ्ज्ञं वृथाऽऽरम्भि कृतं अन्वर्थत्वाभावान्निरर्थकमेतत् कृतं। यस्मादिदं जलं पिबति इदं पिबोऽस्मदादिपुरुषस्तथा सर्व्वतः सर्व्वदिक्षु मुखानि यस्यैवंविधस्तव कर्त्तुमुचितः अस्मदादेर्बहूनि मुखानि सर्व्वेष्वप्यवयवेषु त्वं चेदकरिष्यत् तर्हि अस्मदादिरिदमा तृप्तिं पातुमशक्ष्यत् न त्वेकेन मुखेनेति। नितरां शैत्यमाधुर्य्यादिगुणयुक्तमेतदिति भावः। तौ तुल्ययोगत्वद्योतकौ। पयःकीलालममृतं जीवनं भुवनं वनं। पुष्करं सर्व्वतो मुखमित्यमरः। इदंपिवः। पाघ्राध्मादिना (पा० ३।१। १३७) शः ॥ ९० ॥

सरोजकोशाभिनयेन पाणिना
स्थितेऽपि कूरे मङ्गरेव याचते।
सखि त्वमस्मै वितर त्वमित्युभे
मिथो न वादाद्ददतुः किलौदनम्॥ ८१॥
इयं कियच्चारुकुचेति पश्यते
पयःप्रदाया हृदयं समावृतम्।

सरोजेति। उभे सख्यौ इति मिथो वादाद् द्वैमत्यात् किलौदनं न ददतुः किलेति व्याजे। इति किं। हे सखि त्वं पात्रमध्ये कूरे ओदने स्थितेऽपि सरोजकोशवदभिनय आकारो यस्य स्तनवराङ्गप्रार्थनासूचकेन पाणिना कूरं याचतेऽस्मै कामुकाय कूरं वितर देहि। द्वितीया वदति त्वं वितरेति। विवदमाने कूरदापनव्याजेन तत्प्रार्थितस्तनवराङ्गदानेऽन्योन्यं प्रवर्त्तयन्त्योर्मध्येऽन्योन्यं लज्जावशादेकतरा रिरंसुरपि नाङ्गीचकारेति भावः। अनुवादादिति पाठे उक्तरूपादनुवादादुभे अपि स्वल्पमोदनं किल न ददतुरित्यर्थः। ओदनदानव्याजेन तत्प्रार्थितदानमङ्गीचक्रुरिति भावः॥ ८१॥

इयमिति। पयःप्रदायाः समावृतं वस्त्राच्छन्नमपि हृदयं इति विचार्य्य पश्यते पृच्छते कामुकाय ध्रुवं निश्चितं मनोज्ञा अथ च पराशयज्ञेव तस्याः करद्वयी भृङ्गारस्य धृतधारणस्य मिषेण यद्यस्मात्तदुत्तरं तदीयप्रश्नस्य प्रतिवचनं व्यतरत् ददौ। इति किं। इयं स्त्री कियन्तौ किम्प्रमाणौ चारू सुन्दरौ च

ध्रुवं मनोज्ञा व्यतरद्यदुत्तरं
मिषेण भृङ्गारधृतः करद्वयी ॥ ९२ ॥
अमीभिराकण्ठमभोजि तद्गृहे
तुषारधाराम्रदितेव शर्करा ।
इयं द्विषद्वष्कयणीपयःसुतं
सुधाह्रदात् पङ्कमिवोद्धृतं दधि ॥ ९३

कुचौ यस्या सति । सुवर्णकलशीपरिमाणौ सुवर्णवर्णौ चैतस्याः कुचाविति तं प्रत्यसूचयदिति भावः । उभावपि मिथोऽनुरागादन्योन्यविलोकनपरावेव तस्थतुरिति भावः । अन्योन्यमभिप्रायज्ञः केनचिन्मिषेण प्रश्नोत्तरं ददाति ॥ ९२ ॥

अमीभिरिति । अमीभिर्जन्यजनैस्तद्गृहे भीमगृहे आकण्ठं अतिबहु यथा शर्कराभोजि भुक्ता । तुषारधारया हिमोदकेन म्रदितेव मिश्रितेव । तथा इयं द्विषन्त्या अश्ववैरिण्या महिष्या बष्कयिण्याः चिरप्रसूतायाः पयो दुग्धं तस्मात् सुतं जातदुग्धपरिणामभूतं दध्यप्यभोजि । सुधाह्रदादमृतस्यागाधजलाशयादुद्धृतं पङ्कमिवेत्युत्प्रेक्षा । शर्कराऽतिसीता शुभ्रा च दध्यप्यमृतवत् स्वादु शुभ्रं घनं चेति भावः । तद्गृहे ऽमीभिर्विशिष्टं दध्यभोजि । तुषारधारया म्रदिता अल्पकरणत्वं प्रापिता शर्करेव सुधाह्रदादुद्धृतं पङ्कमिवेति दधिविषयमेवोत्प्रेक्षा द्वयं वा । दध्नः शैत्यं शौक्ल्यं स्वादुत्वं घनत्वं च सूचितं । एतेन पयः शृतमिति पाठे शर्करा अभोजि । शृतं पक्वं तप्तं महिषीपयश्चाभोजि दधि

तदन्तरन्तः सुषिरस्य बिन्दुभिः
करम्बितं कल्पयता जगत्कृता।
इतस्ततः स्पष्टमचोरि मायिना
निरीक्ष्य तृष्णाचलजिह्वतां धृता॥ ८४॥

चाभोजि इति सम्बन्धः। चिरप्रसूता बष्कयिणीत्यमरः। महिष्या दधि स्वादुतरं भवति। द्विषः शतुर्वेति वचनात् इयं द्विषन्तीति द्वितीयया द्वितीयाश्रितेति (पा० २।१।२४) योगविभागात् समासः। द्विषद्बष्कयिणी। पुंवत्कर्मेत्यादिना (पा० ६।३।४२) पुंवद्भावः। शृतं। शृतं पाके (पा० ६।१।२७) इति साधुः॥ ८३॥

तदन्तरिति। तद्दधि निरीक्ष्य सातिशयात् तृष्णया ग्रासवासनया चला चञ्चला अधरप्रान्तलेहिनी ललज्जला जिह्वा यस्य तस्य भावस्तत्ता तां धृता बिभ्रता, तथा अन्तरन्तर्मध्ये मध्ये सुषिरस्य छिद्रस्य बिन्दुभिः राहोः शिर इतिवदभेदोपचाराच्छिद्ररूपैर्बिन्दुभिः करम्बितं मिश्रितं व्याप्तं तद्दधि कल्पयता कुर्वता जगत्कृता इतस्ततः सर्व्वप्रदेशेभ्यस्तद्दधि स्पष्टमचोरि प्रकटमपहृतं, स्पष्टं सम्भावनायां अपहृतमिवेत्यर्थः। अपहरत्कथं न दृष्ट इत्यत आह। यतो मायिना। अदृश्यतयाऽपहृतमित्यर्थः। सफेनचौरस्य दध्याकारेण परिणामे दधनि छिद्राणि दृश्यन्ते। ब्रह्मणा अदृश्यतया दधनि वर्त्तमानः सारो भोक्तुमिच्छया गृहीतः, अन्यथा छिद्राणि कथं दृश्यन्ते। अन्येन गृहीतुं न शक्यते इति तत्रोत्प्रेक्षा। येन

ददासि मे तन्न रुचेर्यदास्पदं
न यत्र रागः सितयापि किं तया।
इतीरिणे विम्बफलं पलच्छला-
ददायि विम्बाधरयारुचच्च तत्॥ ९५॥

निर्म्मितं तस्य ब्रह्मणोऽपि जिह्वा चाश्चर्य्यनिर्म्माणात् स्वादुतमं दधीति ध्वन्यते॥ ९४॥

ददासीति। विम्बफलतुल्यो ऽधरो यस्यास्तया सुन्दर्य्या पलव्याजात् मांसव्याजाद् विम्बसञ्ज्ञफलं परिवेषितं मांसखण्ड-मेव विम्बाकारं कृत्वा इतीरिणेऽधरचुम्बनवासनया भाषमा-णाय विटाय अदायि दत्तं। तत् विम्बाकारं फलं तस्मा अरु-चच्च स्वदितमित्यर्थः। मदभिप्रायं ज्ञात्वा स्वीकारपुरःसरं पलरूपविम्बव्याजान्निजाधरदानमेव प्रतिज्ञातमिति सन्तुष्टो ऽभूदिति भावः। इति किं। हे विम्बोष्ठि यद्रुचेः प्रीतेरास्पदं यत्र वस्तुनि मम प्रीतिः तन्मे मह्यं त्वं न ददासि। यद्वा यद्रुचे-रास्पदं न भवति तन्मह्यं न ददासि। तया मम यस्यां रागः प्रीतिर्नास्ति तया सितयापि शर्करयापि किं अपि तु न किञ्चित् प्रयोजनं। माधुर्य्यमर्य्यादयापि शर्करयापि प्रयोजनं नास्त्यभि-लाषाभावात्। अन्येन नास्तीति किं वाच्यमित्यपिना सूच्यते। अथ च यत्र लौहित्यं नास्ति तया श्वेतया प्रकरणाच्छर्करयापि किं। तस्मान्मे यत्रानुरागो रक्तिमकान्तिश्च तन्मह्यं देहीति। कृतं तयेति पाठे तया पूर्य्यतां। फलच्छलादिति पाठे फलदान-

समं ययोरिङ्गितवान् वयस्ययो-
स्तयोर्विहायोपहृतप्रतीङ्गिता।
अकारि नाकूतमवारि सा यया
विदग्धयाऽरञ्जि तयैव भाववित्॥ ९६॥

प्रसङ्गव्याजात्। बिम्बाकारोऽधरो यस्या इति सप्तम्युपमानेत्यादिना (पा० २।२।२४।वा० ५) नोत्तरपदलोपो समासः। अरुचत् पुषादित्वादङ् (पा० ३।१।५५)। द्युद्भ्यो लुङीति (पा० १।३।९१) परस्मैपदम्॥ ९५॥

समिमिति। यो ययोर्वयस्ययोः सख्योर्विषये स्वाभिप्रायज्ञापनार्थं समं युगपत् इङ्गितवान् भ्रूक्षेपादिचेष्टितवान् अभूत् स तयोर्मध्ये उपहृतं कृतं प्रतीङ्गितं तदभिलाषस्वीकारसूचकप्रतिचेष्टितं यया तामेकां विहाय स्थितः सन् तयैवारञ्जि द्वितीययैव प्रत्यनुरञ्जितः। तया कया। यया चतुरया विदग्धया आकूतं प्रतीङ्गितं नाकारि प्रतीङ्गितं कुर्व्वाणा सा सखी जनसमक्षमिङ्गितकरणमयुक्तमित्यवारि निषिद्धा। यतो भाववित् वैदग्ध्यस्य वेत्ता। द्वितीयया तदिङ्गितदर्शनात्तस्मिन्ननुरागाज्जित्वा प्रतीङ्गितं नाकरोत् जनसमक्षमेतदनुचितमिति व्याजेन सत्प्रियं प्रतीयमिङ्गितं क्रिमिति करोतीति सापत्न्येर्ष्यया च तां वारितवतीति तस्या वैदग्ध्यं। स च तदीयगूढभावज्ञानाद्भाववित् सहचरीसमक्षमिङ्गितं कुर्व्वाणा इयमपि चतुरा। द्वितीया इङ्गितं नाकरोत्ताञ्च न्यवारयदिति इयमेव चतुरा

सखीं प्रति स्माह युवेङ्गितेक्षणी
क्रमेण तेऽयं क्षमते न दित्सुतां ।
विलोम तद्व्यञ्जनमर्प्यते त्वया
वरं किमस्मै न नितान्तमर्थिने ॥ ९७ ॥

मय्यनुरक्ता चेति स चतुरो द्वितीयस्यामेवानुरक्तोऽभूदिति भावः। विहाय स्थितः सन् इति योजना। अन्यथा हानस्य पुरुषःकर्त्ता रञ्जनस्य स्त्रीतिभिन्नकर्तृत्वात्क्त्वा न स्यादिति। अरञ्जि णयन्ताच्चिण् ॥ ९६ ॥

सखीमिति। यून इङ्गितं चेष्टां ईक्षते एवंशीला काचित् स्वसखीं प्रत्याह स्म इत्यवोचत्। हे सखि यस्मादयं क्रमेण परिपाट्या ते दित्सुतां त्वत्कर्तृकां व्यञ्जनस्य दातुमिच्छुतां न क्षमते तस्मात्त्वया नितान्तमतिचञ्चलतयाऽर्थिने याचकायास्मै यूने वरं श्रेष्ठं अभीष्टं तत्तेमनादि व्यञ्जनं विलोम विपरीतं क्रमरहितं यथा तथा किं नार्प्यते न दीयते अपि तु त्वल्लज्जिकायास्मै युगपत् क्षिप्यतामिति छलोक्तिः। अथवा आलिङ्गनचुम्बनादि वात्स्यरतपरिपाट्या तव वराङ्गदानेच्छुतां न सहते तस्मादतितरलतयाऽर्थिने सम्भोगविलम्बमसहमानायास्मै वरं केवलं श्रेष्ठं वा न विद्यते वरं श्रेष्ठं यस्मात् अवरमधोदेशे वर्त्तमानं वा रोमरहितं तद्भगलक्षणं व्यञ्जनं अवयवः किमिति त्वया नार्प्यते अपि त्वर्पयेत्युपहासः। अतिसम्भोगान्नितरां तान्तं ग्लानमिति व्यञ्जनविशेषणं वा। व्यञ्जनं लाञ्छनं श्मश्रुनिष्ठानावयवेष्वपी-

समाप्तिलिप्येव भुजिक्रियाविधे-
र्दलोदरं वर्त्तुलयाऽऽलयीकृतम्।
अलङ्कृतं चीरवटैस्तदश्नतां
रराज पाकार्पितगैरिकश्रिया ॥ ९८ ॥

त्यमरः। नितरां तातमिति पक्षे अनुनासिकस्य क्वीति (पा० ६।४।१५) दीर्घः ॥ ९७ ॥

समाप्तीति। चीरवटैर्दुग्धमध्यक्षिप्तैर्माषमाधितैर्वटकाख्यैः पक्वान्नविशेषैः सम्बन्धादलङ्कृतं तत्पूर्वोक्तं वटकव्यतिरिक्तव्यञ्जनं वर्त्तुलया वृत्ताकारया पाकेन तप्तस्नेहद्वारकाग्निसंयोगेनार्पितया निर्मितया गैरिकश्रिया शैलरक्तधातोरिव श्रिया वटकानामेव शोभया रराज। विशिष्टवटकसम्बन्धाद् व्यञ्जनान्तरं रेज इत्यर्थः। विशिष्टया श्रियोपलक्षितैः चीरवटैरलङ्कृतं सत् रेज इति वा। किमिव अश्नतां भुञ्जानानां तेषां भुजिक्रियाविधेः भोजनविधेः समाप्तेः। वटकदर्शनमात्रेणान्यत्र रुच्यभावाद् व्यञ्जनान्तरविरतेः सम्बन्धिन्या लिप्या समाप्तिसूचिकया ककाररूपपुष्पिकारूपया आलयीकृतं आस्पदीकृतं दलोदरं श्रीनालादिपत्रमध्यमिवेत्युपमोत्प्रेक्षा वा। वर्त्तुलया वृत्तया समाप्तलिप्या श्रितं। पाकेन बालकेनार्पितया गैरिकश्रियालङ्कृतं दलोदरमिति वा योज्यं। पोतः पाकोऽर्भक इत्यमरः। ग्रन्थलेखनसमाप्तिपत्रे समाप्तिसूचकं ककारादिवर्त्तुलमक्षरं दाक्षिणात्यैः क्रियते गैरिकचिह्नितञ्च क्रियते, एवं भोजनसमाप्तिसूचकं चीरवटकादि इति ॥ ९८ ॥

चुचुम्ब नोर्वीवलयोर्वशीं परं
पुरोऽधिपारि प्रतिविम्बितां विटः ।
पुनः पुनः पानकपानकैतवा-
च्चकार तच्चुम्बनचङ्कृतान्यपि ॥ ९९ ॥
घनैरमीषां परिवेषकैर्जनै-
रवर्षि वर्षोपलगोलकावली ।

चुचुम्बेति । कश्चिद्विटः पुरोऽग्रे अधिपारि पानकरसपूर्णे सुवर्णादिपानपात्रे प्रतिविम्बितां उर्वीवलये उर्वशीमिवातिसुन्दरीं कांचित्परं केवलं चुचुम्बेति न किन्तु पुनः पानकस्य द्राक्षादिसाधितमधुररसप्रधानपेयद्रव्यरूपस्य यत्पानं तस्य कैतवात् प्रतिविम्बितायाः तस्याः चुम्बनस्य सम्बन्धीनि चुङ्कृतानि चुमिति पानकानुकरणशब्दस्तस्य करणान्युच्चारणानि तान्यपि चकार । चुम्बनादिना तस्यां स्वानुरागं प्रकटीचकारेति भावः । झर्झरीबर्बरी पारी पानपात्रकमुच्यत इति चीरस्वामी । सप्तम्यर्थेऽव्ययीभावः । चङ्कृतानि नपुंसके भावे क्तः ॥ ९९ ॥

घनैरिति । घनैर्बहुभिःपरिवेषकैरनेकव्यञ्जनदायिभिर्जनैरथ च तैरेव घनैर्मेघैरमीषां भुञ्जानानां राज्ञां कृते वर्षोपलाः करकास्तत्तुल्यानामेलाकर्पूरशर्करालवङ्गतण्डुलपिष्टैरचितानां गोलकानामतिवृत्तानां लड्डुकाविशेषाणामथ च करकारूपाणां गोलकानामावलीपङ्क्तिरवर्षि वितीर्णा वृष्टा च । कीदृशैः । परिवेषणकर्मवशाच्चलन्त्यो या भुजास्तासां भूषणेषु

चलद्भुजा भूषणरत्नरोचिषा
धृतेन्द्रचापैः श्रितचान्द्रसौरभा ॥ १०० ॥
कियद्वद्ध व्यञ्जनमेतदर्प्यते
ममेति हृष्टैर्वदता पुनः पुनः ।

रत्नानि तेषां रोचिषा कान्त्या हेतुना धृतमिन्द्रचापं यैर्नाना-प्रकारकान्तिभिरित्यर्थः । अथ च तदेवेन्द्रचापो येषु । कीदृशी। श्रितं चान्द्रं कर्पूरसम्बन्धि सौरभं सौगन्ध्यं यया । अथ च चन्द्र एव चान्द्रः सूर एव सौरस्तयोर्भा श्रिता चान्द्रसौरभा यया । सा शीतत्वदीप्तत्वाभ्यां चन्द्रसूर्य्यसदृशीत्यर्थः । रात्रिदिनयोर्जा-यमानत्वाद्वा क्रमेण तत्कान्तिसदृशी। चन्द्रसम्बन्धिनश्चान्द्राश्चन्द्र-कान्ताः एवं सौराः सूर्यकान्तास्तेषां भा श्रिता यया वा । चन्द्र-सम्बन्धि मनोज्ञत्वं सादृश्यं श्रितं ययेति वा। विश्वप्रकाशे सुरभि-शब्दो मनोज्ञवाची ॥ १०० ॥

कियदिति । एतत्तेमनादिव्यञ्जनं मम कियत् किंपरिमाणं बहु अर्प्यते ऽपितु हृष्टा वयमिति नार्पणीयमिति हृष्टैर्हेतोः पुनः पुनर्वदतां तेषां जन्यानां कियत्सङ्ख्यं बह्वेतद्व्यञ्जनमर्प्यते इत्ये-तद्बहुत्वसङ्ख्येयत्ता भवद्भिः पृच्छ्यते किमिति हेतुनाऽमूनि व्यञ्ज-नानि सङ्ख्यातुं गणयितुं असौ गोलकावली भूयसी बहुतरा कठिनी खटिकेव तैः परिवेषकैरढौकि अर्पिता । भवद्भिर्व्यञ्ज-नसङ्ख्या पृष्टा तर्ह्यनया कठिन्या एतानि गणयतेति कठिनी वार्पितेत्युत्प्रेक्षा । इति वदताममूनि सङ्ख्यातुमिव व्याजेनासौ

अमूनि सञ्ज्ञातुमसावढौकि तैः
क्कलेन तेषां कठिनीव भूयसी ॥ १०१ ॥
विदग्धबालेङ्गितगुप्तिचातुरी-
प्रवल्हिकोत्पाटनपाटवे हृदः ।

बहुतरा कठिन्यर्पितेति वा योज्यं। कठिन्या च सञ्ज्ञायते एत-
ल्लाञ्छनममूनीति ममेति वदतामिति चैकवचनबहुवचनानि जा-
तिविवक्षया विज्ञातव्यानि ॥ १०१ ॥

विदग्धेति। कश्चित्कामुको विदग्धायाश्चतुराया बालाया
मुग्धाया इङ्गितगुप्तौ चेष्टितगोपनविषये चातुरी यत्कौशलं सैव
दुर्ज्ञेयत्वात् प्रवल्हिका गुप्ताभिप्रायप्रबन्धविशेषः तस्या उत्पा-
टने भेदने ज्ञानविषये यत्पाटवं सामर्थ्यं प्रावीण्यं तत्र विषये
तदौचितीं विदग्धबालेङ्गितानामानुगुण्यं स्पृशद्भिः गतैस्तदनुरू-
पैराकूतशतैर्बहुभिरिङ्गितैः कृत्वा निजस्य हृदः स्वीयाभिप्रायस्य
टीकां विवरणं प्रबन्धं प्रकर्षेण कृतवान्। गुप्तान्यपि मदिङ्गि-
तानि ज्ञातवानिति चतुरोऽयमनुरक्तश्चेति तदनुगुणैः स्वीयचे-
ष्टितैस्तां स्वाशयं बोधितवानिति भावः। बालाया अपि विदग्ध-
सखीशिक्षया वैदग्ध्यादिङ्गितकरणं सहजमौग्ध्यात् सलज्जतया
तद्गोपनञ्च युक्तं। विदग्धः कश्चन युवा बाला च काचन तयो-
रिङ्गितगुप्तिर्वा। यद्वा विदग्धस्येङ्गितं बालायाश्चार्थादिङ्गितस्यैव
तयोर्विषये या चातुरी तत्प्रवल्हिकोत्पाटनपाटवे विषये तयो-
रौचितीं स्पृशद्भिः। अत्र द्वयोरपि भवतोराशयो मया ज्ञात

निजस्य टीकां प्रवबन्ध कामुकः
स्पृशङ्गिराकूतशतैस्तदौचितीं ॥ १०२ ॥

घृतप्लुते भोजनभाजने पुरः-
स्फुरत्पुरन्ध्रिप्रतिबिम्बिताकृतेः ।
युवा निधायोरसि लड्डुकद्वयं
नखैर्लिलेखाथ ममर्द निर्दयं ॥ १०३ ॥

विलोकिते रागितरेण सस्मितं
ह्रियाऽथ वैमुख्यमिते सखीजने ।

इतीङ्गितैस्तज्ज्ञापनद्वारा अतिचतुरोऽहमेव त्वया भजनीय इति बालां प्रति स्वाशयं ज्ञापितवानिति भावः । अन्योऽपि विदग्धोऽतिगहनायाः प्रवल्हिकाया भेदने विषयेऽनेकैराशयैर्व्याख्यां करोति ॥ १०२ ॥

घृतेति । कश्चिद्युवा घृतप्लुते आज्यपूर्णे प्रसृतघृते वा भोजनभाजने पुरःस्फुरन्त्या विलसन्त्याः पुरन्ध्र्याः प्रतिबिम्बिता या आकृतिस्तस्या उरसि लड्डुकद्वयं मोदकयुग्मं निधाय नखैर्लिलेख, अथ पश्चान्निर्दयं ममर्द यदाऽऽवयोःसंयोगो भावी तदैवं तव कुचावुपचरिष्यामीति त्वत्कुचनखक्षतविमर्देच्छुरस्मीति वा स्वाशयं बोधितवानिति भावः । घृतेन प्लुतं घृतप्लुतं यस्मिन्निति वा । आहिताग्न्यादित्वात् परनिपातः (पा० २।२।३७) ॥ १०३ ॥

विलोकिते इति । रागितरेण केनचित् कामुकेन सखीरूपे जने सस्मितं विलोकिते सति अथ विलोकनानन्तरं ह्रिया

तदालिरानीय कुतोऽपि शार्करीं
करे ददौ तस्य विहस्य पुत्रिकाम् ॥ १०४ ॥

निरीक्ष्य रम्याः परिवेषिका ध्रुवं
न भक्तमेभिरवाप्ततृप्तिभिः ।
अशक्नुवद्भिर्बकभुक्तवत्तया
यदुज्झिता व्यञ्जनपुञ्जराजयः ॥ १०५ ॥

वैमुख्यं पराङ्मुखत्वं इते गते सति तस्य सखीजनस्यालिः सखी कुतोऽपि कस्मादपि स्थानात् शार्करीं शर्करया रचितां पुत्रिकाम् आनीय विहस्य वैमुख्यात् सन्दिहानस्य करे ददौ। अधरादिचुम्बनायाङ्गेषु शर्करातुल्यरसामेनामहमेव दास्यामि स्वहस्तस्थितामेनां जानीहीति सञ्ज्ञां चकारेति भावः। सखीसमूहे वैमुख्यमिते सति तासां सखीनां काचित् सखी तदन्तर्वर्त्तिन्यन्या वा शार्करीं पुत्रिकां ददौ। शर्करा पुत्रिका परिवेषणेन मिषेणाहं त्वां भजामीति स्वदानसञ्ज्ञामकरोदिति भावः इति वा। शार्करीमिति ईकारप्रत्ययः। पुत्रिका। पुत्रात्कृत्रिम इति कन् ॥ १०४ ॥

निरीक्ष्येति। बकभुकवत्तया अत्याहारेणाशक्नुवद्भिर्भोक्तुमसमर्थैरेभिर्वरयात्रिकैः यद्यस्माद्व्यञ्जनपुञ्जानां राजयः परम्परा उज्झितास्त्यक्तास्तस्माद्रम्याः परिवेषिका निरीक्ष्य अवाप्ततृप्तिभिः गतबुभुक्षैरेतैर्भुक्तमेव न इति ध्रुवमहं मन्ये। यावत् तृप्तं तावत् तथैव दर्शनादि यमत्प्रेचा। एता निरीक्ष्यावाप्ततृप्तिभिरेतैः

पृथक् प्रकारेङ्गितशंसिताशयो
युवा ययोदासि तयापि तापितः ।
ततो निराशः परिभावयन् परा-
मपेतयाऽतोषि सरोषयैव सः ॥ १०६ ॥

ध्रुवं निश्चितं नैव भुक्तमिति वा । यथा लोको मन्यत इति शेषः । तथा व्यञ्जनपुञ्जपरम्परास्त्यक्ताः । यथैभिर्न भुक्तमिति लोको मन्यत इत्यर्थ इति वा ॥ १०५ ॥

पृथगिति । पृथक्प्रकारैर्नानाविधैरिङ्गितैश्चेष्टितैः कृत्वा शंसितः कथित आशय अभिप्रायो येन स युवा यया स्त्रिया उदासि उदासीनीकृतः । प्रतीङ्गितेन सम्भावितयोदासीनतया तयापि तापितः व्यथितः । उदासीनो हि दुःखं न जनयति, अनयापि तु तादृश्या अपि दुःखं जनितमिति विरोधार्थो ऽपिशब्दः । ततोऽनन्तरं तस्यां निराशः तस्याः सकाशान्निराशो निर्गताभिलाषः सन् परां तदन्यां परिभावयन्निङ्गितेनानुकूलयन् सानुरागं पश्यन् स युवा सरोषया तयैव पूर्व्वमुदासीनयैव परितोषितो न तु द्वितीययेत्यर्थः । सरोषो हि दुःखं जनयति न तु सुखं तयापि तादृश्यापि सुखं जनितमिति विरोधादाश्चर्य्यं । जनसमक्षमिङ्गितकरणमयुक्तमिति तयेङ्गितं पूर्व्वं न कृतं स तु तदाशयमजानानोऽनुरागेणेयं प्रतीङ्गितं नाकरोदिति बुद्ध्याऽन्यामपश्यत्, ततश्च सा सपत्नीबुद्ध्या सेर्ष्या जातेति मय्यनुरक्तैवेयं पूर्व्वं तु गाम्भीर्य्यादिङ्गितं नाकरोत् सानु-

पयःस्मिता मण्डकमण्डलाम्बरा
वटाननेन्दुः पृथुलड्डुकस्तनी।
पदं रुचेर्भोज्यभुजां भुजिक्रिया
प्रिया बभूवोज्ज्वलकूरहारिणी॥ १०७॥

रागेव च सरोषा भवतीति रोषादनुरागमनुमाय सन्तुष्ट इति भावः। उपेतयेति पाठे रोषात्तदुपसारेणार्थात् समीपमागतयेत्यर्थः॥ १०६॥

पय इति। भुजिक्रिया भोजनक्रिया भोज्यभुजां भक्ष्यं भुञ्जानानां तेषां प्रिया तृप्तिजननी अथ च स्त्री बभूव। किम्भूता। पयो दुग्धमेव स्मितं हासो यस्याः। तथा क्वचिन्मृदुसूक्ष्मा क्वचिदत्यन्ताग्निसंयोगेन शोणविन्दवो मण्डका अपूपा एव पट्टसूत्रादिरचितरूपमण्डनयुक्तानि अलङ्कारभूतानि वा अम्बराणि वस्त्राणि यस्याः। तथा अतितृप्तमाषसाधितवटकरूपकुङ्कुमोद्वर्त्तनरक्तभावेनाह्लादक आननेन्दुर्मुखचन्द्रो यस्याः। तथा पृथुलड्डुकस्तनी स्थूलातिकठिनरूपौ मोदकरूपौ स्तनौ यस्याः सा। तथा उज्ज्वलकूरहारिणी विविक्तशुभ्रौदनरूपमौक्तिकमालावती। अथवोज्ज्वलकूरेण मनोहारिणी। यतो रुचेर्ग्रासाभिलाषस्याथ च कान्तेरनुरागस्य च पदं स्थानं। प्रियापि पूर्वोक्तगुणसहिता रुचेः पदं भवति। यतः प्रियेति वा। भोज्यभुजां। भोज्यं भक्ष्य इति (पा० ७।३।६९) साधुः॥ १०७॥

चिरं युवाकूतशतैः कृतार्थन-
स्थिरं सरोषेङ्गितया च निर्द्धुतः।
सृजन् करचालनलीलयाञ्जलीन्-
न्यषेचि किञ्चिद्विधुताम्बुधारया॥ १०८॥
न षड्विधः खिङ्गजनस्य भोजने
तथा यथा यौवनविभ्रमोद्भवः।

चिरमिति। कयाचित्स्त्रिया कश्चिद्युवा किञ्चिद्विधुतया वक्र-चालितयाम्बुधारया कृत्वा न्यषेचि सिक्तः। किम्भूतः। आकूतश-तैरिङ्गितसहस्रैः कृतार्थनः कृतप्रार्थनः सन् चिरं सरोषं कोपव्य-ञ्जि इङ्गितं यस्यास्तस्या भावस्तत्ता तयैव वारम्वारं निर्द्धुता नि-राकृतः सन्नपि तथा करचालनस्य लीलया व्याजेन प्रसादप्रार्थ-नासूचकानञ्जलीन् करयुगसम्पुटान् सृजन् रचयन्, अञ्जलीनि-ति वचनेन वारम्वारमञ्जलेः करणं सूचितं। वारिधाराकम्पनेन त्वत्प्रार्थना मयाङ्गीकृता करयुगयोजनादिरमेति सूचितं। इयं स्वीकारचेष्टा करचालनं भुजिक्रियासमाप्तिं द्योतयति॥ १०८॥

नेति। षड्विधा मधुराम्ललवणतिक्तकटुकषायास्वादरूप-षट्प्रकारो रसः खिङ्गजनस्य रसिककामुकसङ्घस्य भोजने विषये तथा तोषं न अधत्त उदपादयत्। यथा यौवतं स्त्रीसङ्घस्तस्य विभ्रमो विलासस्तस्मादुद्भवो यस्य स रसो भृशं समुन्मिषन् वर्द्ध-मानः अपारशृङ्गारमयः निर्मर्य्यादानेकविधविभावानुभावव्य-भिचारिसंयोगजन्यशृङ्गाररूपः सप्तमो रसस्तोषमधत्त। सप्तमत्वं

अपारशृङ्गारमयः समुन्मिषन्
भृशं रसस्तोषमधत्त सप्तमः ॥ १०९ ॥
मुखे निधाय क्रमुकं नलानुगै-
रथोज्झि पर्णालिरवेक्ष्य वृश्चिकम्।
दमार्पितान्तर्मुखवासनिर्म्मितं
भयाविलैः स्वभ्रमहासिताखिलैः ॥ ११० ॥
अमीषु तथ्यानृतरत्नजातयो
विदर्भराट् चारुनितान्तचारुणोः।

मधुराद्यपेक्षया ज्ञेयं न त्वाद्यरसापेक्षया। षड्भ्यो रसेभ्योऽन्यस्या-भावाद्भोजने सप्तमरसस्य सद्भावादाश्चर्य्यम् ॥ १०९ ॥

मुख इति। अथ हस्तप्रक्षालनानन्तरं नलानुगैस्तैराजभिः क्रमुकं पूगफलं मुखे निधाय वृश्चिकमवेक्ष्य दमेनार्पिता दत्ता पर्णालिर्नागवल्लीदलपंक्तिरोज्झि त्यक्ता। किम्भूतं वृश्चिकं। अन्तर्मुखवासेन कर्पूरकस्तूरीखदिररसादिरूपेण मुखसौगन्ध्य-कारिणा निर्म्मितं। किम्भूतैः। भयेन दंशनभया आविलैर्व्याप्तैः। अत एव स्वभ्रमेणावृश्चिके वृश्चिकबुद्ध्या हासिता हासं प्रापिता अखिला द्रष्टारो यैः। दमेनार्पितः पर्णमध्ये वर्त्तमानो योऽन्त-र्मुखे वासस्तेन निर्म्मितामिति वा ॥ ११० ॥

अमीष्विति। विदर्भस्य राजा दमो वा क्रमेण चारु सुन्दरं नितान्तं चारु अतिसुन्दरञ्च तयोरिहैतयोस्तथ्यानृतयोः सत्या-सत्ययोः रत्नजातयोर्मध्ये एकं तव प्रियं रत्नजातं त्वं स्वयमेव

स्वयं गृहाणैकमिहेत्युदीर्य्य तद्
द्वयं ददौ शेषजिघृक्षवे हसन् ॥ १११ ॥
इति द्विवारं शुचिमिष्टभोजिनां
दिनानि तेषां कतिचिन्मुदा ययुः ।
द्विरष्टसंवत्सरवारसुन्दरी-
परीष्टिभिस्तुष्टिमुपेयुषां निशि ॥ ११२ ॥

गृहाणेति । अमीषु वारयात्रिकेषु विषये उदीर्य्य कृत्रिमत्वादति-रमणीयकान्तिविशिष्टं अलीकरत्नजातं जिघृक्षवे ग्रहीतुमिच्छवे वारयात्रिकाय हसंस्तदज्ञानहेतोः किञ्चिद्धास्यं कुर्व्वन् तयोः सत्यासत्ययोर्रत्नजातयोर्द्वयं युग्मं तद्रूपं वा द्वयं ददौ । अमीषु मध्ये शेषजिघृक्षव इति वा । इह द्वयोर्मध्ये शेषजिघृक्षव इति वा । शेषजिघृक्षवे । द्वितीयेति (पा० २।१।२४) योगविभागात् समासः ॥ १११ ॥

इतीति । इति पूर्व्वोक्तप्रकारेण द्विःकृत्वो द्विवारं दिवारात्रौ च शुचि अदोषं मिष्टं स्वादु च भोजिनां भुञ्जानानां तेषां वारयात्रिकाणां कतिचित् पञ्चषाणि दिनानि मुदा ययुः पञ्च-षट् दिनानीति सहर्षाः तत्रापुरित्यर्थः । किम्भूतानां । निशि द्विर्द्वौ वारा अष्टौ द्विरष्टौ षोडश सम्वत्सरा यासां ता वारस्य सङ्घस्य सुन्दर्य्यो वेश्या दास्यादयस्तासां परीष्टिभिस्सम्वनादि-सेवाभिः तुष्टिं सन्तोषं उपेयुषां प्राप्तवतां । द्विरष्टेति असुचः कृत्वसुचो वाधकत्वाद् द्विरिति द्विप्राप्तेर्द्विःकृत्व इत्यत्रापवादत्रि-

उवास वैदर्भगृहेषु पञ्चषा
निशाः कृशाङ्गीं परिणीय तां नलः।
अथ प्रतस्थे निषधान् सहानया
रथेन वार्ष्णेयगृहीतरश्मिना॥ ११३॥

परस्य न स्प्रष्टुमिमामधिक्रिया
प्रिया शिशुः प्रांशुरसाविति ब्रुवन्।

षये क्वचिदुत्सर्गस्यापि समावेश इति परिभाषया यथाकथञ्चित् परिहर्त्तव्यम्॥ ११२॥

उवासेति। नलः कृशाङ्गीं तां परिणीय वैदर्भगृहेषु पञ्च षड्वा प्रमाणमासां ता निशा उवास पञ्चषाणि दिनानि तत्र स्थितवानित्यर्थः। अथ सप्तमे दिने अनया भैम्या सह रथेन निषधान् प्रतस्थे। किम्भूतेन। वार्ष्णेयनाम्ना सारथिना गृहीता रश्मयो यस्य। पञ्चषाः। सङ्ख्ययाव्ययेति (पा॰ २।२।२५) समासे बहुव्रीहौ सङ्ख्येय इत्यादिना (पा॰ ५।४।७३) डचि टिलोपः। निशाः। अत्यन्तसंयोगे च (पा॰ २।१।२९) इति द्वितीया॥ ११३॥

परस्येति। इति ब्रुवन् स नलो भैमीं स्वयमात्मनैव रथे अध्यरूरुहदध्यारोपयत्। इति किं। इमां पतिव्रतां भैमीं स्प्रष्टुं स्पर्शनेन्द्रियविषयीकर्त्तुं परस्य मदन्यस्य नाधिक्रिया अधिकारः। प्रिया भैमी शिशुरल्पप्रमाणा असौ रथस्य प्रांशुरुच्चतर इति स्वयमारोढुमसमर्थेति, तत्तस्माद्धेतोः जनैश्चितो लोकैर्वीक्षितः

रथे स भैमीं स्वयमध्यरूरुह-
न्न तत् किलाश्लिक्षदिमां जनेक्षितः ॥ ११४ ॥
इति स्मरः शीघ्रमतिश्चकार तं
वधूं च रोमाञ्चभरेण कर्कशौ।
स्खलिष्यति स्निग्धतनुः प्रियादियं
म्रदीयसी पीडनभीरुदोर्युगात् ॥ ११५ ॥

सन्निमां भैमीं नालिलिङ्ग किलेति व्याजे, तत्त्वतस्तु जनसमच-
मालिलिङ्गैव। किन्त्वेवं ब्रुवन् धार्ष्ट्यं परिजहारेति भावः। क-
र्मत्वस्याविवक्षितत्वाद्रथ इत्यधिकरणे सप्तमी। अध्यरूरुहत्।
णौ चङि (पा० ७।४।१) इत्युपधाह्रस्वत्वे, दीर्घो लघोः (पा० ७।
४।२४) इत्यभ्यासदीर्घः। अश्लिक्षत्। श्लिष आलिङ्गन इति धातुः
कुक्। क्षययोगे च्लः। अश्लिष्यदिति पाठे लुङ् ॥ ११४ ॥

इतीति। इति हेतोः शीघ्रमतिः त्वरितबुद्धिः शीघ्रमुचितो-
पायस्फुरणशीलः तयोरन्योन्यविषयः स्मरः तं नलं वधूं भैमीञ्च
उभौ रोमाञ्चानां भरेण बाहुल्येन कर्कशत्वचौ चकार अन्यो-
न्यसंस्पर्शादुत्पन्नसात्विकरोमाञ्चौ जाताविति भावः। इति किं।
म्रदीयसी स्निग्धा तनुर्नितरां कोमला सस्नेहाङ्गी च इयं भैमी,
अतः प्रियान्नलात् सकाशात् स्खलिष्यति निःसरिष्यति यतः
पीडने निविडधारणे भीरु दोर्युगं बाहुयुगं यस्य तस्माच्छि-
थिलधारिण इति। इतीव शीघ्रमतिः स्मरः ॥ ११५ ॥

तथा किमाजन्मनिजाङ्कवर्द्धितां
प्रहित्य पुत्रीं पितरौ विषेदतुः।
विसृज्य तौ तं दुहितुः पतिं यथा
विनीततालच्चगुणीभवद्गुणं॥ ११६॥

निजादनुव्रज्य स मण्डलावधे-
र्नलं निवृत्तौ चटुलापतां गतः।
तडागकल्लोल इवानिलं तटा-
द्धृताननिर्व्यावबृते विराटराट्॥ ११७॥

तथेति। तौ पितरौ तं दुहितुः पतिं जामातरं नलं वि-
सृज्य सप्रेष्य यथा विषेदतुः विषस्रौ तथा आजन्मप्रभृति निजा-
ङ्कयोः स्वीयोत्सङ्गयोर्वर्द्धितां वृद्धिं प्रापितां पुत्रीं प्रहित्य प्रस्थाप्य
विषेदतुः किं अपि तु नेति वैधर्म्योपमा। किम्भूतं। विनीततया
सविनयत्वेन लच्चगुणीभवन्तः शौर्य्यादयो गुणा यस्य तं। सुता-
वियोगादपि सगुणजामातृवियोगो नितरां तयोर्दुःसहो जात
इत्यर्थः। प्रहित्य। हि गतौ, क्यपि तुक्। विषेदतुः। सदेरेत्वा-
भ्याससलोपौ। सदिरप्रतेरिति (पा० ८।३।६६) षत्वं॥ ११६॥

निजादिति। स विराटराड् भीमो नलमनुव्रज्यानुगम्य नि-
जान्मण्डलावधेः सकाशान्निवृत्तौ परावृत्तिसमये चाटु प्रिय-
वचनं लपति भाषत इति चटुलापस्तद्भावं गतः प्राप्तः प्रिय-
भाषणः धृताङ्गीकृता नतिर्नमस्कारो येन स एवम्भूतः सन् व्याव-
वृते निजगृहान् प्रति परावृत्तः। क इव तडागकल्लोल इव।

पितात्मनः पुण्यमनापदः क्षमा
धनं मनस्तुष्टिरथाखिलं नलः।
अतः परं पुत्रि न कोऽपि तेऽहमि-
त्युदश्रुरेष व्यसृजन्निजौरसीम् ॥ ११८ ॥
प्रियः प्रियैकाचरणाच्चिरेण तां
पितुः स्मरन्तीमचिकित्सदाधिषु।

यथा ऽनिलं वायुमनुव्रज्य तटान्निवृत्तौ चटुला आपो यस्य तद्भावं गतः सन् तीरात् सकाशात् तडागतरङ्गो व्यावर्त्तत इत्युपमा। चटुलाप इत्यत्र कर्म्मण्यण्। (पा० ३।२।१) पक्षे ऋगादिना (पा० ५।४।७४) समासान्तः। स तु तत्पुरुष एवेति कश्चित् तदुपेक्ष्यम् ॥ ११७ ॥

पितेति। इत्युक्का उद्गतान्यश्रूणि यस्य स एष भीमो निजामौरसीं स्वीयक्षेत्रबीजाभ्यामुत्पादितां भैमीं व्यसृजत् प्राहिणोत्। इति किं। हे पुत्रि आत्मनस्तव पुण्यं धर्म्म एव पिता हितकारित्वादहितनिवारकत्वाच्च तथा तव क्षमाःसहनशक्तयः अनापदः न विद्यन्त आपदो याभ्यस्ता आपन्नाशिका इत्यर्थः, तव मनसस्तुष्टिः सन्तोषः अलुब्धत्वमेव धनं। अथानन्तरं अखिलमेव तवेष्टं नल एव, किं बहुना तदतिरिक्तसकलाभीष्टदत्वात् सर्व्वं नल एवेति भावः। अतः परं अद्यतनदिनप्रभृति अहं भीमस्ते कोऽपि सम्बन्धी बान्धवो न भवामीति ॥ ११८ ॥

प्रिय इति। प्रीणाति हर्षं जनयति प्रियो नलः पितुः स्मरन्तीं

शशाम तन्मातृवियोगवाडवो
न तु प्रियप्रेममहाम्बुधावपि ॥ ११९ ॥
असौ महीभृद्बहुधा तु मण्डित-
स्तया निजोपत्यकयेव कामपि।

तां भैमीं प्रियस्य मनीषितस्यैकस्य वस्तुन आचरणात् करणात् मनीषितस्य यदेकं मुख्यं केवलं वा करणं तस्माद्वा आधिषु पितृवियोगजमानसपीडासु सत्सु चिरेण बहुना कालेनाचिकित्सत् उपचचार। कस्यचिदिष्टस्य मेलनात् पितृवियोगदुःखं चिरेणात्याजयदित्यर्थः। चिरकालं पितुः स्मरन्तीमिति वा। स सर्व्वजनप्रसिद्धस्तस्या मातृवियोग एवासह्यतरत्वाद्वाडवो वडवानलः तु पुनः प्रियस्य नलस्य प्रेमा निरुपाधिकस्नेहस्तद्रूपे महाम्बुधौ सत्यपि तथा अप्रच्युतप्राच्यरूप एव तस्थिवान् तस्मिन्नतिप्रियं कुर्व्वत्यपि स शोकमपि न शान्त इत्यर्थः। पितृवियोगदुःखान्मातृवियोगस्य गौरवं सूचितं विशेषतस्तु कन्यानां। अपिरौचित्ये। जलानलयोर्विरोधेऽपि वाडवस्याम्बुधावेव स्थितिर्युक्तेत्यर्थः। शशामेति न तु प्रियेत्यपि च स्पष्टार्थः। पितुः। अधीगर्थेत्यादिना (पा० २।३।५२) षष्ठी। अचिकित्सत्। कित निवासे रोगापनयने चेत्यस्माद् गुप्तिज्किद्भ्य इति (पा० ३।१।५) स्वार्थे सन्। कितस्योदात्तेत्तु पाठात्सन्नन्तादपि परस्मैपदमेव न त्वात्मनेपदमिति सिद्धान्तः॥ ११९ ॥

असाविति। असौ महीभृन्नलः तु पुनर्बहुधा अनेकप्रकारं

भुवा कुरङ्गेक्षणदन्तिचारयो-
र्बभार शोभां कृतपादसेवया ॥ १२० ॥
तदेकतानस्य नृपस्य रक्षितुं
चिरोढया भावमिवात्मनि श्रिया ।
विहाय सापत्न्यमरञ्जि भीमजा
समग्रतद्वाञ्छितपूर्त्तिवृत्तिभिः ॥ १२१ ॥

मण्डितो नानारत्नादिभिरलङ्कृतस्तया भैम्या कामप्यतिशयितां शोभां बभार । किम्भूतया । कुरङ्गवद्धरिणवदीक्षणं विलोकनं दन्तिवद्धस्तिवच्चारो गतिस्तयोर्भुवा स्थानभूतया हरिणाक्ष्या गजगत्या च । तथा कृता पादसेवा यया । कयाक इव । निजोपत्यकया पर्व्वतासन्नभूम्या महीभृत् पर्व्वत इव । बहुभिर्गैरिकादिधातुभिर्मण्डितः । किम्भूतयोपत्यकया । हरिणानामीक्षणस्य हस्तिनां भक्षणस्य गमनस्य वा स्थानभूतया । तथा कृता प्रत्यन्तपर्व्वतानां सेवा श्रयणं यया । कृता प्रत्यन्तपर्व्वतैः सेवा यस्या इति वा ॥ १२० ॥

तदिति । चिरोढया चिरकालं ध्रियमाणया अथ चिरपरिणीतया श्रिया राज्यलक्ष्म्या तदेकतानस्य तदेकनिष्ठस्य भैमीतत्परस्य नृपस्यात्मनि विषये भावमनुरागं रक्षितुं स्थिरीकर्त्तुमिव सापत्न्यमेकभर्तृकस्त्रीद्वयान्योन्येर्ष्यां विहाय समग्राणां तस्या भैम्या वाञ्छितानां पदार्थानां पूर्त्तिः पूरणं तस्यां वृत्तिभिर्वर्त्तनैरुपायैः कृत्वा भीमजाऽरञ्जि प्रीणिता । सम्पद्वैभवेन दुर्लभा-

मसारमालावलितोरणां पुरीं
निजाद्वियोगादिव लम्बितालकां।
ददर्श पथ्यामिव नैषधः पथा-
मथाश्रितोद्ग्रीविकमुन्नतैर्गृहैः॥ १२२॥

न्यपि तद्वाञ्छितानि नलेन पूरितानि ततश्च सा परितुष्टेति भावः। अन्यापि चिरपरिणीता विदुषी नवोढायामनुरक्तस्यात्मनि अनुरागरचणार्थं सापत्न्यं त्यक्त्वा आत्मनो ज्यैष्ठं रचयन्ती सती नवोढाया हितकरणेन प्रीतिं जनयति॥ १२१॥

मसारेति। अथ बङ्गमार्गलङ्घनानन्तरं नैषधः पुरीं प्रियामिव ददर्श। किम्भूतां। मसारमालावलिरिन्द्रनीलपरम्परा अत एवासदलादिरचितमालारूपाणि तोरणानि यस्याः। इन्द्रनीलमालावलियुक्तानि तोरणानि वहिर्द्वाराणि यस्यास्तां तथा। ऽत एव निजाद्वियोगाल्लम्बितालकामिव प्रसारितचूर्णकुन्तलामिव। तथा उन्नतैरत्युच्चैर्गृहैः कृत्वा आश्रिता ऽङ्गीकृता उद्ग्रीविकां ऊर्ध्वीकृतकण्ठतया विलोकनं यथा स्यादेवंपथ्यामिव। विलोकिकामिव उच्चगृहत्वाद्दूरत एव दृष्टवानित्यर्थः। पथामिति पाठे मार्गाणां पथ्यामिव। अन्यापि नायिका प्रोषिते नायके प्रसाधितालङ्कारा सती उद्ग्रीविकया प्रियागमनमार्गान् पश्यति। मसाराणां नीलत्वादलकत्वं। पथामिति कर्तृकर्म्मणोरिति (पा०२।३।६५) कर्म्मणि षष्ठी॥ १२२॥

पुरीं निरीक्ष्यान्यमना मनागिति
प्रियाय भैम्या निभृतं विसर्ज्जितः।
ययौ कटाक्षः सहसा निवर्त्तिना
तदीक्षणेनार्द्धपथे समागमम्॥ १२३॥
अथ नगरधृतैरमात्यरत्नैः
पथि समियाय स जाययाऽभिरामः।

पुरीमिति। अयं मत्प्रियो मनाक् ईषत् पुरीं निरीक्ष्य अन्यमना दुश्चित्त इतिहेतोः अस्मिन्नवसरेऽयं सम्यक् निरीक्षितुं शक्यत इति बुद्ध्या भैम्या प्रियाय प्रियं वीक्षितुं निभृतं गुप्तं यथा तथा विसर्जितः प्रेषितो निजकटाक्षः सकलां पुरीमनवलोक्यैव किञ्चिन्निरीक्ष्य भैम्यनुरागबाहुल्यात् सहसाऽसमय एव पुरीनिरीक्षणान्निवर्त्तिना शीघ्रं परावृत्तेन तदीक्षणेन नलकटाक्षेण सहार्द्धपथ एव समागमं सम्बन्धं ययौ। उभावपि परस्परानुरागेण क्षणमात्रमप्यवलोकनान्तरायं न सहेते स्मेति भावः। नितरामनुरागः सूचितः। पुरीनिरीक्षेति पाठे पुरीनिरीक्षणेऽयमन्यमनाः किमिति बोद्धुं प्रेषितः। रहस्यं ज्ञातुं दूतोऽपि गुप्तं प्रेष्यते। प्रियाय। क्रियार्थोपपदस्येति (पा० २।३ १४) चतुर्थी॥ १२३॥

अथेति। अथ पुरीसमीपप्राप्त्यनन्तरं जायया कृताभिरामः स नलो नगरे धृतैः स्थापितैरमात्यरत्नैः सह पथि समियाय मेलनं प्राप। किम्भूतैः। कुतूहलं भैमीसहितनलदर्शनकौतुके

मधुरिव कुसुमश्रिया सनाथः
क्रममिलितैरलिभिः कुतूहलोत्कैः ॥ १२४ ॥
कियदपि कथयन् स्ववृत्तजातं
श्रवणकुतूहलचञ्चलेषु तेषु।
कियदपि निजदेशवृत्तमेभ्यः
श्रवणपथं स नयन् पुरीं विवेश ॥ १२५ ॥
अथ पथि पथि लाजैरात्मनो बाहुवल्ली-
मुकुलकुलसकुल्यैः पूजयन्त्यो जयेति।

विषये उत्कैः उत्कण्ठितैः। तेन वा उदूर्द्धं कं शिरो येषां ऊर्द्धीकृतशिरोभिः। कः कैरिव। कुसुमश्रिया चम्पकादिपुष्प-शोभया सनाथो रमणीयो मधुर्वसन्तः क्रमेण वसन्तागमपरि-पाट्या मिलितैर्मध्वास्वादकौतुकेनोत्कण्ठितैरलिभिरिव। यथा संयुज्यते तथेत्युपमा ॥ १२४ ॥

कियदिति। स नलः पुरीं विवेश। किं कुर्व्वन्। स्वयम्बरवृ-त्तान्तश्रवणकुतूहलचञ्चलेषु तेषु मन्त्रिप्रवरेषु कियत् स्वमम्व-न्धवृत्तजातं स्वदौत्येन्द्रादिमायाप्रभृतिरूपं प्रवृत्तं वृत्तान्तं सङ्क्षेपेण कथयन्। तथा कियदपि निजदेशवृत्तं स्वराष्ट्रजात-मेभ्योऽमात्येभ्यः सकाशात् श्रवणपथं नयन्नाकर्णयन्। ग्रामगत-जातिः। अमुत्रेति पाठे अदःपरस्मिन्नत्रापीति वचनादमुत्रेत्य-नेन व्यवहितोऽपि स्वयम्बरःपरामृश्यते ॥ १२५ ॥

अथेति। अथ पुरप्रवेशानन्तरं जनानां कुमार्य्योऽकृतविवाहाः

क्षितिपतिमुपनेमुस्तन्दधाना जनाना-
ममृतजलमृणालीसौकुमार्य्यं कुमार्य्यः ॥ १२६ ॥

अभिनवदमयन्तीकान्तिजालावलोक-
प्रवणपुरपुरन्ध्रीवक्त्रचन्द्रान्वयेन ।
निखिलनगरसौधाट्टावलीचन्द्रशालाः
क्षणमिव निजसञ्ज्ञां सान्वयामन्वभूवन् ॥ १२७ ॥

कन्यास्तं क्षितिपतिं उपनेमुः समीपमागत्य नमश्चक्रुः। किम्भूताः। पथि पथि प्रतिमार्गं आत्मनो बाहुवल्लीनां भुजरूपलतानां मुकुलकुलेन कलिकावृन्देन सकुल्यैस्तत्तुल्यैर्लाजैर्मङ्गलद्रव्यतया शकुनदर्शनेन जय सर्व्वोत्कर्षेण वर्त्तस्वेति शब्दपूर्व्वं पूजयन्त्यः। तथा अमृतजलैर्जाताया मृणाल्या बिसस्येव सौकुमार्य्यं मार्द्दवं दधानाः। पुरप्रवेशे शकुनार्थं कुमार्य्य इत्युक्तं। सकुल्यैः। दिगादित्वाद्यत् (पा० ४।३।५४) ॥ १२६ ॥

अभीति। निखिलानां नगरसम्बन्धिनां सौधानां सुधाधवलितगृहाणामट्टावल्य उपरितनगृहविशेषपंक्तयस्तासामप्युपरि चन्द्रशालास्तृतीयशिरोगृहा अट्टावलीनां गवाक्षविवराणि वातायनाख्याः, अभिनवा नवोढा दमयन्ती तस्याः कान्तिजालस्यादृष्टपूर्व्वस्यावलोके प्रवणानामुत्सुकानां पुरस्त्रीणां वक्त्रचन्द्रस्यान्वयेन सम्बन्धेन कृत्वा क्षणमिव क्षणमात्रं यावत्तन्मुखसम्बन्धस्तावत्पर्य्यन्तं निजसञ्ज्ञां स्वीयं नाम मुखचन्द्रसम्बन्धितया सान्वयं चन्द्रयुक्ताः शाला गृहाणि चन्द्रशाला चन्द्राणां

निषधनृपमुखेन्दुश्रीसुधां सौधवाताय-
नविवरगरश्मिश्रेणिनालोपनीताम्।
पपुरसमपिपासापांशुलत्वोत्परागा-
ण्यखिलपुरपुरन्ध्रीनेत्रनीलोत्पलानि ॥ १२८ ॥

वा सम्बन्धिन्यः शाला इति योगसहितामन्वभूवन्। सान्वया-मिवेति वोत्प्रेक्षा। सर्व्वा अपि पुनर्नार्य्यो गवाक्षविवरैर्भैमी-मपश्यन्। तानि च तन्मुखसम्बन्धेन यौगिकत्वेन कविनोत्प्रेक्षि-तानि ॥ १२७ ॥

निषधेति। अखिलानां सकलानां पुरपुरन्ध्रीणां नेत्राण्येव नीलोत्पलानि निषधनृपस्य मुखेन्दुश्रीस्तल्लक्षणां सुधामसृतं पपुः सादरमालोकितवन्ति। किम्भूतां सुधां। सौधवातायनानां विव-रेभ्यश्छिद्रेभ्यो गच्छन्त्योवर्हिर्निर्गच्छन्त्यो रश्मिश्रेणयो नयनकि-रणपंक्तयस्तद्रूपा ये नाला विसयुक्तत्वादन्यजलपानसाधनभूताः कमलनालदण्डास्तैरुपनीतां नेत्रसमीपं प्रापितां। किम्भूतानि नीलोत्पलानि। असमयाऽतुल्ययाऽतिभूयस्या पिपासया पाने-च्छया पांशुलत्वं शुष्कत्वं सोत्कण्ठतरत्वञ्च तेनैव उत्क्षिप्ता उद्ग-च्छन्तो वा परागाः कौसुमरजांसि येषु तानि। गवाक्षविवरैः कृत्वा नलमुखशोभां सर्व्वा अपि सादरं ददृशुरित्यर्थः। कुमा-रीणां समीपगत्या पौरस्त्रीणाञ्च गवाक्षान्तर्गत्या कौतुकमात्रेण दृष्टेरार्जवेन कनीनिकानीलरश्मीनां नानारूपाणामुचिततर-त्वमुक्तं। अन्योऽपि पिपासात्यन्तशुष्ककण्ठो दूरस्थं कूपाद्युदकं

अवनिपतिपथाट्टस्त्रैणपाणिप्रवाल-
स्खलितसुरभिलाजव्याजभाजः प्रतीच्छन्।
उपरि कुसुमवृष्टीरेष वैमानिकाना-
मभिनवकृतभैमीसौधभूमिं विवेश ॥ १२९ ॥
इति परिणयमित्थं यानमेकत्र याने
दरचकितकटाक्षप्रेक्षितं चानयोस्तत्।

सच्छिद्रकमलनालादिना पिबति न त्वेकवारमेव बहु पिबत्य-न्तर्हृदयपीडाभिया ॥ १२८ ॥

अवनीति। स नलोऽभिनवकृतस्य नूतननिर्म्मितस्य भैमीस-म्बन्धिनः सौधस्य शान्तिहोमाद्यलङ्कृतां भूमिं उपरितनीं वा भूमिं विवेश। किं कुर्व्वन्। कौतुकविलोकनार्थं गगने स्थितानां वैमानिकानां देवानां कुसुमवृष्टीः उपरि शिरस्यादरेण प्रती-च्छन् स्वीकुर्व्वन्। किम्भूता वृष्टीः। अवनिपतिपथे राजमार्गे अट्टेषु विपणिस्थेष्वट्टालकेषु वर्त्तमानानां स्त्रैणानां स्त्रीवृन्दानां पाणिप्रवालेभ्यः स्खलिताः सुरभयः पाकजपरिमलविशेषयुक्ता-लाजास्तेषां व्याजं मिषं भजन्ति ताः। शकुनार्थं कीर्य्यमाणानां लाजानां शुभत्वादूर्द्ध्वदेशात् स्रंसनाच्च पुष्पवृष्टित्वं। ता अपि पल्लवेभ्यो निर्गच्छन्ति। वैमानिकाः। चरत्यर्थे ठक् ॥ १२९ ॥

इतीति। दिविषदां देवानामधीशा देवा इन्द्रादयस्तत्वारो देवा नाकं स्वर्गं प्रतिगन्तुं प्रणिदधुरिव गन्तुमचिन्तयन्निव तत्तत्स्थलं विहाय गन्तुं वाञ्छां नास्थ्येवेतीवशब्दः सूचयति।

दिवि दिविषदधीशाः कौतुकेनावलोक्य
प्रणिदधुरिव गन्तुं नाकमानन्दसान्द्राः ॥ १३० ॥
श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।

किम्भूताः। अनयोर्भैमीनलयोः इति पूर्व्वोक्तप्रकारं परिणयं विवाहं इत्थमुक्तरीत्या च एकत्र एकस्मिन् याने रथे यानं स्थित्वा-गमनं तथा दरचकितं ईषत् सभयं सलज्जं यत्कटाक्षैरन्योन्य-विलोकनं तच्चैतत्सर्व्वं दिवि आकाशे स्थित्वा कौतुकेनावलोक्या-नन्देन परमहर्षेण सान्द्राः पूर्णाः। अथेति पाठे तयोर्गेहप्रवे-शानन्तरमित्यर्थः। स्वयम्वरानन्तरमेव देवा विनिर्गता इति चतुर्द्दशे सर्गे यद्यप्युक्तं तथापि भैमीनिर्गत्य नलपुरप्रवेशपर्य्यन्तं नलभैमीकौतुकविलोकनार्थं गगने स्थिता इति दिविपदेन सूचितम् इदानीं पुनः स्वर्गं प्रति निर्गता इत्युक्तेर्न कोऽपि विरोधः। किं वा अनन्तरसर्गसङ्गत्यै कलिनलद्वेषारम्भस्याप्रस्तु-ततां परिहर्त्तुं नलः पुरं प्रविष्टो देवाश्च स्वर्गं जग्मुः। गच्छ-तां च तेषां मध्ये मार्गे कलेरुत्तरप्रत्युत्तरदानादिना प्रसक्ता-नुप्रसक्तावतरणाय युक्तमुक्तम् ॥ १३० ॥

श्रीहर्षमिति। पूर्वार्धः पूर्ववत्। किम्भूते काव्ये चतुर्द्दशतयीं विद्यां विदद्भिः जानद्भिः सरस्वतीजाग्रदधिष्ठानकाश्मीरदेशो-द्भवैरपि विदद्भिः परीक्षापूर्व्वं महिते पूजिते दोषलेशेनापि रहिते सर्व्वगुणपूर्णे। तथा तद्भुवि तस्माच्छ्रीहर्षाद्भवतीति तद्भूः

काश्मीरैर्महिते चतुर्दशतयीं विद्यां विदद्भिर्महा-
काव्ये तद्भुवि नैषधीयचरिते सर्गोऽगमत् षोडशः ॥ १३१ ॥

तस्मादुत्पत्तिर्यस्यैवंविधे वा। नैषधेशेति पाठे नैषधस्यासावी-
शश्चेति व्याख्येयम्। काश्मीरैरिति पूजार्थे, मतिबुद्धीति (पा० ३।
२।८८) इति क्तः, क्तस्य च वर्त्तमान इति (पा० २।३।६७)
षष्ठीविधानात् तृतीया चिन्त्या। पूजितो यः सुरैरपीत्यादि-
शिष्टप्रयोगदर्शनाद्वर्त्तमानार्थे विहितस्य क्तस्य योगे षष्ठी भवति
चकारात् प्रयोजनानुरोधेनान्योऽपि सूत्रार्थो निर्वर्त्त्यः। चतुर्थ्यर्थे
बहुलं छन्दसीत्यतो बहुलग्रहणं वानुवर्त्त्य काश्मीरैः करणभूतै-
र्महः पूजा सञ्जाताऽस्येति महित इति। तारकादेराकृतिगण-
त्वात् इतजान्तत्वाभावं वा सम्पाद्य क्तान्तत्वेऽपि कलहंसानां
महित इत्यादिभट्टिप्रयोगे समासदर्शनात्, मतिबुद्धिपूजार्थेभ्य-
श्चेति चकाराद्भूतेऽपि शिष्टप्रयोगानुसारेण क्तप्रत्ययमङ्गीकृत्य
क्तस्य च वर्त्तमान इति षष्ठीप्राप्त्यभावात् कर्त्तरि तृतीयैवेति
वा यथा कथञ्चित् समर्थनीयं। चतुर्दशतयीं। सङ्ख्यायाः अव-
यव इति (पा० ५।२।४२) तयप्। टिड्ढाणञिति (पा० ४।१।१५)
ङीप्। विद्यां विदद्भिः। न लोकेति षष्ठीनिषेधः। तद्भुवि।
भाषितपुंस्कत्वं नुमभावः। षोडशः पूर्ववत्॥ १३१॥

इति श्रीवेदरकरोपनामश्रीनृसिंहपण्डितात्मजनारायण-
कृते नैषधीयप्रकाशे षोडशः सर्गः॥ १६॥

सप्तदशः सर्गः।

श्रीलक्ष्मीन्टसिंहौ जयतः।

अथारभ्य वृथाप्रायं धरित्रीधावनश्रमं।
सुराः सरस्वदुल्लोललीला जग्मुर्यथागतम्॥ १॥
भैमीमप्राप्य भुवस्तस्मै चिरं चित्ते धृतामपि।
विद्यामिव विनीताय न विपेदुः प्रदाय ते॥ २॥

अथेति॥ सर्गसङ्गतिरुक्तैव। अथ स्वर्गगमनचिन्तनानन्तरं धरित्रीं प्रति धावनेन जनितं प्रयासं वृथैव वृथाप्रायं व्यर्थमिवारभ्य विधाय अगाधत्वेनानुपलक्षितहर्षविषादतया अथ च तटभूमिं प्रति निष्प्रयोजनमागमनेन ततः पुनर्यथागतं व्यावर्त्तनेन च सरस्वतः समुद्रस्य उल्लोलास्तरङ्गास्तद्वल्लीला येषां तत्तुल्याः सुराः आगमनमनतिक्रम्य यथागतं स्वर्गं जग्मुः। भैमीमप्राप्यैव जग्मुरित्यर्थः। भैम्यलाभात् श्रमस्य वैयर्थ्यं। नलभैमीवरदानद्वारात्मगौरवरक्षणात् प्रायःशब्दः प्रायोजि न तु वृथैवेत्युक्तम्। वृथा वृथात्वं प्राप्यते प्राप्नोति वा वृथाप्रायम्। यथागतं अव्ययीभावः। यथागतं तथा जग्मुरिति वा॥ १॥

तदेवाह। भैमीमिति। ते देवाश्चिरं चित्ते धृतामपि

कान्तिमन्ति विमानानि भेजिरे भासुराः सुराः।
स्फाटिकाद्रेस्तटानीव प्रतिबिम्बा विवस्वतः ॥ ३ ॥
जवाज्जातेन वातेन बलाकृष्टबलाहकैः।
श्वसनात् स्वस्य शीघ्रत्वं रथैरेषामिवाकथि ॥ ४ ॥

भैमीं तस्मै भुवः पत्ये नलाय प्रदाय दत्त्वा न विषेदुः पश्चात्तापं न प्राप्ता इत्यर्थः। कस्मै कामिव। विनीताय शिष्याय चिरं चित्ते धृतां अभ्यस्तां विद्यामिव। दत्तापि विद्या चित्ताद्यथा नापगमते तथा तस्मै दत्तापि सा सगुणतया तेषां चित्तान्नापगच्छतीति ॥ २ ॥

कान्तीति। भासुरास्तेजोरूपाः सुराः कान्तिमन्ति रत्नैर्दीप्राणि विमानानि यदृच्छया गामिनो रथान् भेजिरे आरूढाः। के कानिव। विवस्वतः सूर्य्यस्य भासुराः प्रतिबिम्बाः स्फाटिकाद्रेः कैलासस्य तटानीव। प्रतितटं प्रतिफलितत्वात् प्रतिबिम्बानां बहुत्वं। भासुराः। भञ्ज भासेति (पा० ३।२।१६१) घुरच् ॥ ३ ॥

जवादिति। जवात् निजवेगात् जातेन वातेन कृत्वा बलात् आकृष्टाः सहचरीकृता मेघा यैः एषां देवानां रथैः श्वसनात् वायोः सकाशात् स्वस्यात्मनः शीघ्रगामित्वं द्रष्टृणामग्रे अकथीव कथितमिव। आकृष्टबलाहकस्य वायोः पश्चाद्गामित्वात् पुरःस्खलितानां रथानां शीघ्रत्वमित्यर्थः। शीघ्रशब्दोऽत्र धर्म्मिवचनः। वेगजेन वातेन गमनेनेति वा। वाधातोर्भावे क्तः। श्वसनात्। पञ्चमीविभक्ते (पा० २।३।४२) इति पञ्चमी ॥ ४ ॥

क्रमाद् दवीयसां तेषां तदानीं समदृश्यत।
स्पष्टमष्टगुणैश्वर्य्यात् पर्य्यवस्यन्निवाणिमा ॥ ५ ॥
ततान विद्युता तेषां रथे पीतपताकताम्।
लब्धकेतुशिखोल्लेखा लेखा जलमुचः क्वचित् ॥ ६ ॥

क्रमादिति। क्रमाद्गमनाद् दवीयसां दूरतराणां तेषां तदानीं अणिमा अणुत्वं स्पष्टं प्रकटं समदृश्यत। किम्भूत इव। अष्टानां गुणानां अणिमादीनामैश्वर्य्यात् आधिपत्यात् पर्यवस्यन्निव पृथक्कृत इव। सर्व्वेभ्यो महिमादिभ्यो गुणेभ्यः पृथग्भूतत्वादिव स्पष्टं दृष्ट इत्यर्थः। स्थूलमपि वस्तु दूरत्वात् सूक्ष्मं दृश्यते। तेषामष्टौ गुणा वर्त्तन्ते तन्मध्ये अणिमैव तस्मिन् समये स्पष्टो दृष्टो नत्वन्य इत्यर्थः। तस्मिन् काले पर्य्यवस्यन् स्फुटीभवन्निति वा स्पष्टमुत्प्रेक्षते। तेषां रथानामिति वा। देवानामष्टगुणैश्वर्य्यात् तत्सम्बन्धाद्रथेष्वप्यणिमासमागम इति व्याख्येयम्। दवीयसां। अतितरां दूराणां ईयसुनि, स्थूलदूरेति (पा० ६।४।१५६) यणादिपरलोपे पूर्व्वस्य गुणः। अणिमा। पृथ्व्यादिः ॥ ५ ॥

ततानेति। क्वचित् कस्मिंश्चिदाकाशप्रदेशे लब्धकेतुशिखया ध्वजाग्रेणोल्लेखो योगो यया, तत्सम्बन्धात्कृतविद्युत्प्राकट्येति यावत्, एवंविधा जलमुचो मेघस्य लेखा पङ्क्तिस्तेषां देवानां रथे विद्युता कृत्वा पीता पताका यस्य तद्भावं ततान। ध्वजाग्रसम्बन्धात् प्रकटिता विद्युद् ध्वजाग्रे पीता पताकेवाभूदित्यर्थः ॥ ६ ॥

पुनः पुनर्मिलन्तीषु पथि पाथोदपंक्तिषु।
नाकनाथरथालम्बि बभूवाभरणं धनुः॥ ७॥
जज्ञे जलदजालानां वज्रिवज्रानुविम्बनैः।
जाने तत्कालजैस्तेषां जाताऽशनिसनाथता॥ ८॥
स्फुटं सावर्णिवंश्यानां कुलछत्रं महीभुजां।
चक्रे दण्डभृतश्चुम्बन् दण्डश्चण्डरुचिं क्वचित्॥ ९॥

पुनरिति। इतस्ततो गमनवशात् पथि पुनः पुनर्मिलन्तीषु सम्बध्यमानासु पाथोदा मेघास्तेषां पङ्क्तिषु वर्त्तमानं धनुरिन्द्रधनुर्मार्गसम्बन्धवशात् नाकनाथरथमालम्बते एवंशीलं सम्बद्धं सदिन्द्ररथस्येवाभरणं बभूव। इन्द्ररथे वर्त्तमानं धनुरागलन्तीषु मेघपङ्क्तिषु चणं भूषणमभूदिति वा। मेघा हि सेन्द्रचापाः शोभन्ते॥ ७॥

जज्ञ इति। जलदजालानां जज्ञे तस्मिन् काले इन्द्रादिगमनसमये जातैर्वज्रिणो वज्रस्तस्यानुविम्बैः प्रतिविम्बैः कृत्वा तेषां मेघजालानां अशनिना वज्रेण सनाथता सस्वामिकता जातेति जाने। तदाप्रभृति प्रायेण मेघानां सवज्रत्वमित्युत्प्रेचा॥ ८॥

स्फुटमिति। दण्डभृतो यमस्य दण्डः क्वचिदाकाशप्रदेशे चण्डरुचिं सूर्य्यं चुम्बन् स्पृशन् सन् तं सूर्य्यमेव सावर्णिमनोर्वंशे जातानां महीभुजां राज्ञां कुलछत्रं कुलश्रेष्ठं अथ च कुलक्रमायातं राजचिह्नं छत्रं स्फुटमिव चक्रे। स्वयं वृत्तत्वादधो दण्ड-

नलभीमभुवोः प्रेम्णि विस्मितायाः दधौ दिवः ।
पाशिपाशः शिरःकम्पस्रस्तभूषश्रवःश्रियम् ॥ १० ॥
पवनस्कन्धमारुह्य नृत्यत्तरकरः शिखी ।
अनेन प्रापि भैमीति भ्रमञ्चक्रे नभःसदाम् ॥ ११ ॥

सम्बन्धाच्छत्रमिवेत्युपचर्यते । सूर्य्यमण्डलं प्राप्त इति भावः । उदयेऽस्तमये च समानो वर्णो यस्य स सवर्णः सूर्य्यस्तस्यापत्यं सावर्णिः । अत इञ् (पा० ४।१।८५) इतीञ् । वंश्यः । दिगादित्वाद्यत् ॥ ९ ॥

नलेति । पाशिपाशो वरुणपाशो नलभीमभुवोरनन्यतुल्ये प्रेम्णि विषये विस्मिताया दिवो विस्मयवशादेव शिरःकम्पेन स्रस्ता भूषा भूषणं यस्मादेवंविधस्य श्रवसः कर्णस्य श्रियं लक्ष्मीं दधौ । तस्यास्ताटङ्करहितः कर्ण इव शुशुभ इत्यर्थः । अनेन दिवो नायिकात्वं व्यज्यते ॥ १० ॥

पवनेति । पवनस्य चन्द्रसूर्य्याद्याधारेषु आवहादिषु सप्तसु स्कन्धेषु मध्ये ताराचक्राधारभूतं स्कन्धमारुह्य नृत्यन्तरा उद्गच्छन्तः कराः किरणा ज्वालारूपा यस्य स शिखी वह्निः अनेनाग्निना भैमी प्रापि इति नभःसदां देवानां भ्रमं चक्रे । भैमीप्राप्तिहर्षादयं नृत्यति किमिति सर्व्वेषां देवानां भ्रान्तिर्जातेत्यर्थः । अन्योऽपि नववधूलाभे कस्यचिन्मित्रस्य स्कन्धमारुह्य नृत्यत्करो भवति ॥ ११ ॥

तत्कर्णौ भारती दूनौ विरहाद्भीमजागिराम् ।
अध्वनि ध्वनिभिर्वीणैरनुकल्पैर्व्यनोदयत् ॥ १२ ॥
अथायान्तमवैक्षन्त ते जनौघमसित्विषम् ।
तेषां प्रत्युद्गमप्रीत्या मिलद्व्योमेव मूर्त्तिमत् ॥ १३ ॥
अद्राक्षुराजिहानं ते स्मरमग्रेसरं सुराः ।
अक्षाविनयशिक्षार्थं कलिनेव पुरस्कृतम् ॥ १४ ॥

तत्कर्णाविति । भारती वाणी भीमजागिरां भैमीवाणीनां विरहाद् दूनौ सन्तप्तौ तेषां देवानां कर्णौ अध्वनि मार्गेऽनुकल्पैः भैमीवाण्याः सकाशान्न्यूनैः वीणैः वीणासम्बन्धिभिर्ध्वनिभिः व्यनोदयत् सुखिनौ चकार । मुख्याभावे अनुकल्पोऽपि कार्य्यार्थमङ्गीक्रियते । स्तनादीनां द्वित्वनिष्ठा जातिः । प्रायेण गृह्यत इति वचनात् कर्णाविति प्रतिनियतापेक्षं द्विवचनं ॥ १२ ॥

अथेति । अथ वाणीवीणाक्वणितश्रवणानन्तरं ते देवीदेवा असित्विषं खड्गतुल्यकान्तिं आयान्तं सम्मुखमागच्छन्तं जनौघमवैक्षन्त अपश्यन् । उत्प्रेक्षते । तेषां देवानां प्रत्युद्गमनस्य प्रीत्या वाञ्छया मिलद्युज्यमानं मूर्त्तिमच्छरीरं व्योमाकाशमिव । यतः सशरीरस्य क्रियावत्त्वं युक्तम् । जनौघं मषीत्विषमित्यपि पाठः ॥ १३ ॥

अद्राक्षुरिति । ते सुरा अग्रेसरं पुरःसरमाजिहानमागच्छन्तं स्मरं अद्राक्षुः । उत्प्रेक्षते । तज्जनौघस्वामिना कलिना अक्षाणामिन्द्रियाणां अथ च द्यूतपाशकानां सम्बन्धिनोऽविन-

अगम्यार्थं तृणप्राणाः पृष्ठस्थीकृतभीह्रियः ।
शम्भलीभुक्तसर्व्वस्वा जना यत्पारिपार्श्विकाः ॥ १५ ॥
बिभर्त्ति लोकजिद्भावं बुद्धस्य स्पर्द्धयेव यः ।
यस्येशतुलयेवात्र कर्तृत्वमशरीरिणः ॥ १६ ॥

यस्य अविनीतत्वस्य शिक्षार्थं पुरस्कृतमिवाग्रेकृतमिव अथ च पूजितमिव । स्मरो हीन्द्रियवैकृतं कर्त्तुं जानाति इति इन्द्रियार्था अक्षशब्दकृत्वेन द्यूतपाशकेषु विषये नलमविनयं शिक्षयितुं पाशकाज्ञानद्वारा नलं निग्रहीतुं कलिना पूजितः पुरः प्रेषितश्च । प्रायेणेत्युत्प्रेक्षा ॥ १४ ॥

अगम्येति । एवम्भूता जना यस्य कामस्य परितः पार्श्वयोश्चरन्तीति पारिपार्श्विका वयस्या इत्यर्थः सेवका वा । किम्भूताः । गन्तुमशक्यानामनर्हाणाञ्च राजादीनां मात्रादीनाञ्च सम्भोगार्थं तृणमिवानायासत्याज्याः प्राणा येषां ते । अत एव पृष्ठस्थीकृते पश्चात्कृते परित्यक्ते भीह्रियौ यैस्ते वधभयं पापभयं लोकलज्जा चेत्येतत्सर्व्वं यैस्त्यज्यते तादृशा निर्भया निर्लज्जास्तत्यर्थः । तथाऽप्राप्याभेद्यस्त्रीभेदनकृतप्रतिज्ञाभिः शम्भलीभिः कुट्टिनीभिर्भुक्तं सर्व्वस्वं येषां ते । सन्तीति शेषः । पारिपार्श्विकाः पूर्व्ववत् ॥ १५ ॥

बिभर्त्तीति । यः स्मरो लोकान् जयतीति लोकजित् तस्य भावं सर्व्वजनविजयितां बिभर्त्ति । उत्प्रेक्षते । बुद्धस्य स्पर्द्धयेव । जिनो हि मारजित् इतिस्वशत्रुस्पर्द्धयेव मारजिल्लोकजिज्जिन

ईश्वरस्य जगत्कृत्स्नं सृष्टिमाकुलयन्निमाम् ।
अस्ति योऽस्त्रीकृतस्त्रीकस्तस्य वैरमनुस्मरन् ॥ १७

इत्यभिधानात् लोकजित्पदवाच्यत्वं बिभर्त्ति इत्यर्थः । तथा यस्याशरीरिणः शरीररहितस्य दग्धदेहत्वादनङ्गस्यात्र लोके कामिनीमनोविकारं प्रति मैथुनद्वारा सर्व्वजनान् प्रति वा कर्तृत्वं स्पष्टत्वं । अत्राप्युत्प्रेक्ष्यते । विश्वकर्त्तुरीशस्य तुलयेव स्पर्द्धयेव । ईश्वरो हि स्मरहरत्वात् स्मरस्य शत्रुः तस्मात् स्पर्द्धयेव तस्याशरीरकर्तृत्वं स्वयमविनयेनाङ्गीकृतमित्यर्थः । यथाऽशरीरिण एवेश्वरस्य कर्तृत्वमिति न्यायविदः । तथाऽयमप्यनङ्ग एव सन् कार्य्यकारीत्यर्थः । जिनमहेशाभ्यां जितोऽपि लोकजित्वेनाशरीरकर्तृत्वेन च यः पुनस्ताभ्यां सम एवंविधोऽतिबलवानिति भावः ॥ १६ ॥

ईश्वरस्येति । अस्त्रीकृताः शस्त्रीकृताः स्त्रियो येन एवंविधो यः काम ईश्वरस्येमां सृष्टिं ईश्वरेण निर्म्मितं कृत्स्नं जगदाकुलयन्नन्यथावृत्ति चेतः स्ववशं कुर्व्वन् अथच पीडयन्नस्ति । उत्प्रेक्ष्यते । तस्येश्वरस्य देहदाहजनितं वैरं स्मरंश्चिन्तयन्निव । देहदाहो मम अनेन कृतस्तस्मादेतेन रचितमेतदीयं जगत्पीडयिष्यामीति बुद्ध्या ईश्वरस्य किञ्चिदपकर्त्तुमसमर्थः तदीयं जगत् स्त्रीरूपेण शस्त्रेण पीडयंस्तेन सह स्पर्द्धत इत्यर्थः । प्रत्यनीकाग्र आयुधान्निष्कृतोऽस्त्री येनेति स्त्रिया अस्त्रीत्वकरणे विरोधाभासश्च । अथ वा या ईश्वरेणापि त्रिपुरवधे मोहिनी स्त्री शस्त्री-

चक्रे शक्रादिनेत्राणां स्मरः पीतनलश्रियाम्।
अपि दैवतवैद्याभ्यामचिकित्स्यमरोचकम्॥ १८॥

कृता मानेनापि स्त्री अस्त्रीकृता इत्येकविषयतया स्पर्द्धा। शक्तिरूपा हि श्रीविष्णुः त्रिपुरवधे भगवता शरतां नीत इत्यागमः। अनुस्मरन्निति लुप्तोत्प्रेक्षा। सृष्टिशब्दो नियतस्त्रीलिङ्गः। तत्परामर्शात्त्वेमामिति निर्देशः। अस्त्रीकृतेत्यत्रानस्त्रमस्त्रं कृताऽस्त्रीकृतेति च्वौ (पा० ७।४।२६) इति ईकारः। पक्षेऽण्। न स्त्री अस्त्री अस्त्रीकृता स्त्रीयेनेति समासः। न ऋतश्चेति (पा० ५।४। १५३) कप्॥ १७॥

कुलकम्। चक्र इति। स्मरः कामः पीतनलश्रियां आदरदृष्टनलशोभानां शक्रादिनेत्राणामिन्द्राग्न्यादिनेत्राणां दैवतवैद्याभ्यां नासत्याभ्यामपि न चिकित्स्यं प्रतिकर्त्तुं न शक्यं अरोचकं रुच्यभावं चक्रे। अधिकरूपस्य नलस्य दृष्टत्वात्तस्माद्धीनरूपे स्मरे दृष्टे तन्नेत्राणां प्रीतिर्न जाता। न केवलं स्मरं दृष्ट्वा न प्रीतास्ते किन्तु दस्रावपि। तयोरपि नलाद्धीनत्वादित्यर्थः। स्मरदस्रेभ्योऽपि नलोऽधिक इति ध्वन्यते। स्मरमनादृत्य पुरस्त्रलिता इति भावः। अथवा अरोचकं सर्व्वथा अन्नादिरुच्यभावो रोगविशेषः। स कर्म्मजत्वाद्देववैद्याभ्यामपि चिकित्सितुमशक्यः किं पुनर्नृवैद्यैरिति समासोक्तिः। भङ्ग्यन्तरेण नलरूपातिशयप्रकाशतात्पर्य्यमुक्तं। उपमानतिरस्कारात् प्रतीपञ्च पीतनलश्रियामिति तृतीयादिष्विति (पा० ७।१।७४) पुंवद्भावात् नपुंसकह्रस्वत्वाभावान्नुड्भावः।

यत्तत् चिपन्तमुत्कम्पमुत्थायुकमथारुणम्।
बुबुधुर्विबुधाः क्रोधमाक्रोशाक्रोशघोषणं॥ १९ ॥

अचिकित्स्यमिति। शक्यार्थे अचोयदिति (पा० ३।१।९७) यत्। दुश्चिकित्समिति पाठे कर्मणि खल्। दुर्नञर्थः। खलयोगान्न लोकेति (पा० २।३।६९) षष्ठीनिषेधाद्वैद्याभ्यामिति तृतीयाद्विवचनं। अरोचकमिति। रोगाख्यायां ण्वुल्बहुलमिति (पा० ३।३।१०८) ण्वुल्॥ १८ ॥

यत्तदिति। अथ विबुधाः सुराः क्रोधं बुबुधुः ददृशुः। कीदृशं। यत्तत् चिपन्तं यद्यदग्रे पतति तत् चिपन्तमित्यर्थः। पुनः किंविधं। उद्गतः कम्पो यस्य तं उत्कम्पं। तथा उत्थायुकं उत्थानशीलं। तथा अरुणं रक्तं। तथा आक्रोशाक्रोशघोषणं आक्रोशः शापगालिप्रदानादिपुरःसराक्रान्तघोषो यस्य तं। क्रुद्धोऽप्येवंविधो भवति। स्मरदर्शनानन्तरं यत्किञ्चिल्लोष्टपाषाणादि परप्रहारार्थं मुञ्चन्तं नितरां सर्व्वाङ्गकम्पिनं जनैर्वार्य्यमाणमपि आवेशातिशयात् केशाकेशि योद्धुं पौनःपुन्येनोत्तिष्ठन्तं लोहितीभूतसर्व्वाङ्गं क्रोशं मर्य्यादीकृत्याभिव्याप्य वा परनिन्दां वाक्यस्योच्चैर्घुष्टं यस्य। अतिदूरं श्रूयमाणपरुषभाषिणमिति यावत्। एवम्भूतं सशरीरं क्रोधं तत्र जनौघे ते देवा बुबुधिरे। एतैश्चिह्नैः क्रोधोऽयमिति ज्ञातवन्त इत्यर्थः। क्रोधाक्रान्तस्य जातिरियं। आक्रोशभूषणमिति पाठे आक्रोशो भूषणं यस्येत्यर्थः। उत्थायुकमिति उकञ्॥ १९ ॥

यमुपासन्त दन्तौष्ठक्षतासृक्शिघ्यचक्षुषः ।
भ्रुकुटीफणिनीनादनिभनिश्वासफूत्कृतः ॥ २० ॥
दुर्गं कामाशुगेनापि दुर्लङ्घ्यमवलम्ब्य यः ।
दुर्वासोहृदयं लोकान् सेन्द्रानपि दिधक्षति ॥ २१ ॥
वैराग्यं यः करोत्युच्चैरञ्जनं जनयन्नपि ।
सृते सर्वेन्द्रियाच्छादि प्रच्छन्नन्नपि यस्तमः ॥ २२ ॥

यमिति। एवंविधा जना यं क्रोधं उपासन्त सिषेविरे। किंविधाः। दन्तैः कृतं यदोष्ठक्षतं व्रणं तस्मिन् असृक् रुधिरं तस्य शिघ्यभूते चक्षुषी येषां ते दन्तौष्ठक्षतासृक्शिघ्यचक्षुषः। किम्भूतं क्रोधं। भ्रुवोराक्षेपः सङ्कोचो भ्रुकुटी सैव फणिनी तस्या नादः फूत्कारस्तत्तुल्यास्तन्निभा निश्वासा निर्गच्छन्नासावयनानां फूत्कारो येषामेवम्भूता जना यं सेवन्ते तं बुर्बुधिर इति पूर्व्वेण सम्बन्धः। क्रोधवशाद् दन्तैरोष्ठौ दश्यते नेत्रे रक्ते जायेते निश्वासफूत्काराश्च निर्गच्छन्ति। यस्य सेवका एवंविधा इत्यर्थः ॥ २० ॥

दुर्गमिति। यः क्रोधो मदनवाणेनापि लङ्घितुमशक्यमत एव दुर्गमं गिर्यादिविषमदुर्गरूपं एवम्भूतं रुद्ररूपस्य दुर्वाससो मुनेर्हृदयं मानसमाश्रित्य शक्रादिसहितान् सर्वानपि लोकान् शापाग्निना दग्धुमिच्छति। अन्योऽपि क्षुद्रो वाणेनाप्राप्यमतिविषमगिर्यादिदुर्गमाश्रित्य सर्व्वानपि पीडयति। रूपकं समासोक्तिश्च ॥ २१ ॥

वैराग्यमिति। यः क्रोधोऽतितरां मुखादिलौहित्यं कुर्व्वन्

पञ्चेषुविजयासक्तौ भवस्य क्रुध्यतो जयात्।
येनान्यविगृहीतारिजयकालनयः श्रितः॥ २३॥

यावत् स्वकार्य्यं करोति तावदुद्वेगमपि जनयति। तथा नितरां प्रदीप्तोऽतिवृद्धोऽभिभवंश्चक्षुरादीनि सर्व्वाणि बाह्याभ्यन्तरेन्द्रियाणि आच्छादयत्येवंशीलमज्ञानमपि उत्पादयति। प्रसिद्धं तम आलोकाभावाच्चक्षुरिन्द्रियमेवाच्छादयति रूपाग्रहणात्। ननु रसनादीनि तमस्यपि रसगन्धादीनां ग्रहणस्य सर्व्वसाक्षिकत्वात्, इदं तु क्रोधवशान्मनसोऽनवस्थानात् सहकारिसन्निधानाभावाच्चक्षुरादीनां रूपादिस्वविषयग्रहणासामर्थ्यजननात् सर्व्वेन्द्रियाच्छादि एवमाश्चर्य्यजनकं तमस्य यः स्मृत इत्यर्थः। अथ च यः पूर्व्वोक्तप्रकारेण वैराग्यफलभूतं जनयितुं रञ्जनं करोति प्रज्वलितश्च तमो यथा कथञ्चिद्भूतो शत्रो व्याख्येयं। अथ वा अपिर्विरोधार्थः। यो लौहित्यं जनयति यश्च प्रीतिमुत्पादयति स एव अप्रीतिमिति कथं। यश्च प्रकर्षेण दीप्तस्तेजोरूपः सोऽन्धकारं रञ्जनश्च द्वयं कथं स्मृत। तत्रापि सर्व्वेन्द्रियाच्छादनमिति विरोधाभासः। वैराग्यशब्दस्य लौहित्याभावात् प्रीत्यभावार्थश्लेषात्तमःशब्दस्य बाधकार्थश्लेषात्। परिहारस्तूक्तप्रकारेण॥ २२॥

पञ्चेष्विति। पञ्चेषुविजयासक्तौ कामजयविषये ऽभिनिवेशे सति क्रुध्यतो भवस्य कुप्यतो महेश्वरस्य जयात् स्ववशीकरणाद्धेतोः येन क्रोधेन अन्यविगृहीतारिजयकालनयः परेण प्रारब्धविग्रहे शत्रौ स्वजयस्य समयस्तत्पराभवारम्भसमयः स इत्येवंरूपो

हस्तौ विस्तारयन्निभ्ये बिभ्यदर्धपथस्थवाक् ।
सूचयन्काकुमाकूतैर्लोभस्तत्र व्यलोकि तैः ॥ २४ ॥
दैन्यस्तैन्यमया नित्यमत्याहारामयाविनः ।
भुञ्जानजनसाकूतपश्या यस्यानुजीविनः ॥ २५ ॥

नीत्युपदेशः श्रितोऽङ्गीकृतः । अन्यदा यो जेतुमशक्यः सोऽन्येन विगृहीतो यदा भवति तदा जयो भवतीति नीत्युपदेशोऽन्यदा जेतुमशक्यस्य भवः स्मरेण सह विग्रहसमये जितत्वात् जित इवेत्युत्प्रेक्षा । महेश्वरोऽपि येन स्ववशीकृतस्तस्य क्रोधस्य माहात्म्यमशक्यवर्णनमिति भावः । विगृहीतारिजये अयं सप्तमीसमासः । अरेर्जयकाल इति षष्ठीसमासो वा ॥ २३ ॥

पञ्चभिः कुलकं । हस्ताविति । इभ्ये धनिनि विषये हस्तौ द्वावपि पाणी लोभाद् विस्तारयन् प्रसारयन् । दास्यति न वेति हेतोः बिभ्यत् भयं प्राप्नुवन् । अत एव अर्धपथस्थवाक् हृदयान्निर्गत्य कण्ठमागत्य मुखादनिःसरन्ती वाणी यस्यैवम्भूतः । खण्डोक्तिं वदतीति यावत् । तथा आकूतैः काकुं सूचयन्, अङ्गुलीमुखनिक्षेपादिचेष्टितैर्देहि देहीत्यादि भयदैन्यादिविकृतां वाणीं ज्ञापयन् । एवम्भूतो मूर्त्तो लोभस्तत्र जनौघे तैर्देवैर्व्यलोकि दृष्टः । स्खलज्जिह्वः स्खलद्वचा इति पाठे रसास्वादार्थं चञ्चलजिह्वो भयादस्पष्टापूर्णवाक् चेत्यर्थः । लुब्धस्येयं जातिः ॥ २४ ॥

दैन्येति । नित्यं दैन्यस्तैन्यमयाः सदा दीनत्वचौरत्वे प्रचुरे येषु तादृशा दैन्यचौर्य्यरूपा वा । तथा अत्याहारामयाविनः

धनिदानाम्बुवृष्टेर्यः पात्रपाणाववग्रहः।
स्वान् दासानिव हा निःस्वान्विक्रीणीतेऽर्थवत्सु यः॥ २६॥

जाठरवशाननुरूपाहारगौरवादजीर्णरसत्वान्नित्यं दीर्घरोगिणः। तथाऽयमेव सकलं भोक्ष्यते मह्यं भोक्तुं न ददाति समीचीनोऽयमोदनः कीदृग्घृतं दधि मह्यं किं वितीर्य्यमस्मै किमित्यादि दृष्टदृष्ट्याशयादिना भुञ्जानजनसाकूतपश्याः। अभ्यवहरतो लोकस्य साभिप्रायं विलोककाः एवम्भूता यस्य लोभस्य सेवकाः स व्यलोकीति पूर्व्वेण सम्बन्धः। इयमपि जातिः। आमयावीति आमयस्योपसङ्ख्यानं दीर्घश्च (पा०५।२।१२२। वा०१)॥ २५॥

धनीति। पात्रपाणौ सम्प्रदानभूतब्राह्मणहस्ते विषये धनिदानाम्बुवृष्टेः समृद्धधनानां नराणां सङ्कल्पसम्बन्धिजलवर्षणस्य यो लोभः अवग्रहः प्रतिबन्धकः। वृष्टेस्त्ववग्रहः सम्भाव्यते। महाधनिकोऽपि यद्वशात् पात्रपाणौ जलं न वितरतीत्यर्थः। तथा निःस्वान् निर्द्धनान् स्वान् आत्मनः स्वीयान् पुत्रदारादीन् वा अर्थवत्सु धनिकेषु विषये विक्रीणीते निर्गतस्नेहाभिमानिनः। कश्चन विनिमय्य स्ववशवर्त्तिनो दासीपुत्रानिव वितरति। हा खेदे, निःस्वेन च धनलोभवशादात्मा स्वीया वा पुत्रादयो धनिकेषु विक्रीयन्ते। दासा यथा स्वेच्छया धनार्थं क्रीयन्ते तथेत्यर्थः। व्यलोकीति पूर्व्वेण सम्बन्धः॥ २६॥

एकद्विकरणे हेतू महापातकपञ्चके।
न तृणो मन्यते कोपकामौ यः पञ्च कारयन्॥ २७॥
यः सर्व्वेन्द्रियसद्मापि जिह्वां बह्ववलम्बते।
तस्यामाचार्य्यकं याञ्चापटवे वटवेऽर्जितुं॥ २८॥

एकेति। तौ कोपकामौ महापातकपञ्चके ब्रह्मवधादिपञ्च-महापातकमध्ये एकद्विकरणे एकस्य पातकस्य द्वयोश्च करणे क्रमेण हेतू कारणभूतौ यस्मादत एव तयोरल्पकार्य्यकारित्वाद् यो लोभः पञ्च कारयन् तृणतुल्यावपि तौ न मन्यते। यतः स्वयं पञ्चापि महापातकानि नरकादीनि कारयति कोपाच्च योऽपि ब्राह्मणो हन्यते तस्यैकं ब्रह्मवधं प्रति हेतुत्वं कामाद्गुरुतल्पगमनं स्त्रीकामाच्च तद्भर्त्तुर्ब्राह्मणस्य वधश्चेति महापातकद्वयं प्रति तस्य हेतुत्वं। धनादिलोभात्तु ब्रह्मवधः सुवर्ण-स्तेयञ्च रसलोभात् सुरापानं कामलोभात् स्त्रीजातिप्रदर्शित-धनलोभाद्वा गुरुतल्पगमनं। दृष्टसङ्ग्रहलोभादेतैश्चतुर्भिरपि सह संसर्ग इत्येवं लोभस्य पञ्चापि महापातकानि प्रति हेतुत्वादधिकत्वात् कोपकामौ अकिञ्चित्करौ मन्यते। ताभ्यामप्यधिको लोभ इति भावः। एकद्विकरणे इत्यत्र सङ्ख्याया अल्पीयस्या (पा० २।२।३४ वा० ७) इत्येकशब्दस्य पूर्व्वनिपातः। तृणे इति मन्यकर्म्मण्यनादर इत्यादिना (पा० २।३ १७) चतुर्थ्या वैकल्पिकत्वात् पक्षे द्वितीया॥ २७॥

यः सर्व्व इति। यो लोभः सर्व्वेन्द्रियसद्मापि सर्व्वेन्द्रियाणि

पथ्यां तथ्यामगृह्णन्तमेवं बन्धुप्रबोधनां।
शून्यमाश्लिष्य नोज्झन्तं मोहमैक्षन्त हन्त ते ॥ २९ ॥

षडिन्द्रियाणि मग्नानि यस्य एवंविधोऽपि घ्राणं गन्धलुब्धं चक्षू-रूपलुब्धमित्यादिप्रकारेणेत्यर्थः, बहु यथा जिह्वामवलम्बते न तथान्यानीन्द्रियाणि। किं कर्त्तुं। तस्यां जिह्वायां याञ्चापटवे याञ्चापटुर्ब्रह्मचारी शिष्यस्तस्मै वटवे याञ्चाशक्तिकुशलाय आचार्य्यकं गुरुत्वमर्जितुं। लुब्धस्यैषा रीतिः। अयमत्र तात्पर्य्यार्थः। सो लोभो दुर्वाचं प्रति विप्रियवाक्यरचनाय यत्सामर्थ्यं नैपुण्यं तद्विषये गुरुतां विधातुमिव तस्याः सकाशात् प्रियवचनमसम्भाषणाभ्यामं कर्त्तुमिव शिष्यभूतस्तामतितरां सेवत इत्यर्थः। लोभवशात् सर्व्वोऽपि याञ्चाप्रियवाक्यानि ब्रूते इति भावः। याञ्चावटवे पटवे इति पाठे पटवे दृढाय याञ्चावटवे इत्यर्थः। याञ्चाचारुपटुविषये जिह्वायां स्वस्य गुरुतां विधातुमिवेत्युत्प्रेचा। आचार्य्यकमिति पूर्व्ववत् ॥ २८ ॥

पञ्चभिः कुलकम्। पथ्यामिति। पथ्यां हितां तथ्यां सत्यां मातापित्रादिना कृतां बन्धुप्रबोधनां एवं सत्कर्म्म कुरु असम्मा कार्षीरित्यादिरूपां प्रवर्त्तनां अगृह्णन्तमनङ्गीकुर्व्वाणं यतोऽज्ञानबहुलं। तथा शून्यं अलीकं अप्रामाणिकमपि रञ्जितले-नानात्मभूतानि जडान्यपि देहेन्द्रियादीनि अनाद्यविद्याविलासवशादात्मत्वेन आश्लिष्य प्रतिपद्य सहसा विद्यमानमपि नोज्झन्तं न त्यजन्तमेवम्भूतं मोहं ते देवास्तत्र जनौघे ऐक्षन्त

श्वः स्वप्राणप्रयाणेऽपि न स्मरन्ति स्मरद्विषम्।
मग्नाः कुटुम्बजम्बाले बालिशा यदुपासिनः॥ ३०॥

दहृशुः। हितस्य प्रियस्य चानङ्गीकरणात् अनिष्टशून्यापरित्यागाच्च। हन्तेत्याश्चर्ये खेदे वा। मूढस्येयं जातिः॥ २९॥

श्व इति। यदुपासिनः यस्य मोहस्य सेवका बालिशा मूर्खा अथवा स्वयमज्ञत्वाभिमानात् परोपदेशानङ्गीकाराच्च शिशुभूता एवम्भूता जनाः कुटुम्बजम्बाले मग्नाः पुत्रकलत्रादिरूपकुटुम्बरूपे कर्दमे बुडिता अपि मृतोऽयं पुत्रः किं करोमि इदं कलत्रं किंवा करिष्यति अस्य क्षेत्रादेः किं भविष्यति इत्यादिप्रकारेण पुत्रादियोगक्षेममात्रपराः शिश्नोदरपरायणाः सन्तः श्वः परेद्यवि अतिसन्निहित इति यावत् जातस्य हि ध्रुवो मृत्युरित्यादिवचनप्रामाण्यादरात् अपि सन्निहिते प्राणगमने ज्ञाते सति सन्निपातादिना आतुरत्वेऽपि वा श्वः प्राणप्रयाणे निश्चिते सत्यपि संसारसमुद्रतारकं स्मरहरं न ध्यायन्ति किन्तूक्तप्रकारेण मरणसमयेऽपि कुटुम्बचिन्तामेव कुर्वन्तीत्यर्थः। इदमपि मूढलक्षणं। बाल्ये निमग्नोऽन्योऽपि किमपि न स्मरति। श्व श्व इति पाठे वीप्सायां द्विः श्वः। स्वप्राणेति पाठे स्वस्य प्राणानामित्यर्थः। द्विषमिति कर्मत्वविवक्षया द्वितीया। स्मरद्विष इति अधीगर्थेति (पा॰२।३।५२) षष्ठी॥ ३०॥

पुंसामलब्धनिर्वाणज्ञानदीपमयात्मनाम् ।
अन्तर्म्लापयति व्यक्तं यः कज्जलवदुज्ज्वलम् ॥ ३१ ॥
ब्रह्मचारिव्रतस्थायियतयो गृहिणं यथा ।
त्रयो यमुपजीवन्ति क्रोधलोभमनोभवाः ॥ ३२ ॥

पुंसामिति । यो मोहः, न लब्धं निर्वाणं विनाशो येन स ज्ञानरूपो दीपस्तन्मयस्तत्प्रचुर आत्मा मनो येषां ज्ञानिनां वशिष्ठादीनां उज्ज्वलमत्यन्तनिर्मलमत्यन्तःकरणं संज्ञां व्यक्तं प्रकटं म्लापयति मलसहितं करोति । मोहमोहिताः कामाधीनाः सन्तो ज्ञानिनोऽपि विश्वामित्रादयः स्वमनो मेनकादिदेवाङ्गनाप्रवणञ्चक्रुः । पूर्व्वमुज्ज्वलस्यापि मनसो मोहेन मालिन्यं कृतं । ज्ञानिनामपि चेतांसीत्यादिमार्कण्डेयवचः प्रमाणं । न लब्धः साक्षात्कृतो निर्वाणोपयोगी मोक्षोपयोगी ज्ञानदीपरूपः स्वप्रकाशज्ञानरूप आत्मा यैस्तेषां अद्वैतज्ञानरहितानामिति वा । किमिव । कज्जलवत् । यथा मध्यस्थापितस्य दीपस्य कज्जलं सुधाधवलितानां घटादीनां मध्यं मलिनयति ॥ ३१ ॥

ब्रह्मेति । ब्रह्मचारी व्रतस्थायी वानप्रस्थः यतिः सन्न्यासी एते त्रयोऽप्याश्रमिणो गृहिणं गृहस्थं यथा अशनाच्छादनार्थं उपजीवन्ति सेवन्ते,

यस्मात् त्रयोऽप्याश्रमिणो ज्ञानेनान्नेन चान्वहम् ।
गृहस्थैरेव धार्य्यन्ते तस्माज्ज्येष्ठो गृहाश्रमी ॥

जाग्रतामपि निद्रा यः पश्यतामपि योऽन्धता।
श्रुते सत्यपि जाड्यं यः प्रकाशेऽपि च यस्तमः॥ ३३॥
कुरुसैन्यं हरेणेव प्रागलज्जत नार्ज्जुनः।
हतं येन जयन् कामस्तमोगुणजुषा जगत्॥ ३४॥

इति स्मार्त्तवचनात्, तं लचीकृत्य वा प्राणधारणं कुर्व्वन्ति, तथा क्रोधलोभमनोभवा यं मोहं सेवन्ते यं लचीकृत्य वा स्वरूपं लभन्ते। मूढ एव क्रुद्धो लुब्धः कामी च भवति॥ ३२॥

जाग्रतामिति। यो मोहो जाग्रतां सावधानानामपि निद्रा अविवेकरूपं निस्वैतन्यं। तथा यः पश्यतां चाक्षुषज्ञानवतामपि अन्धता चक्षुराच्छादनाद् द्रष्टव्यदर्शनाभावरूपसदसद्वस्तुग्रहणं संसारस्यानित्यदुःखरूपतां जानतामपि तदपरित्यागहेतुत्वा-दज्ञानरूप इत्यर्थः। तथा यः श्रुते वेदशास्त्राधिगमे सत्यपि मूढत्वेन श्रेयाज्ञानरूपं जाड्यं विधिनिषेधाद्यनिर्णयरूप इत्यर्थः। तथा यस्य प्रकाशे सौराग्नेयचाक्षुषाद्यालोके सत्यपि द्रष्टव्य-घटपटाच्छादनरूपतयान्धकाररूपः। प्रकटेऽप्यर्थे प्रतीतिप्रति-बन्धक इत्यर्थः॥ ३३॥

कुर्व्विति। तमोगुणजुषा अज्ञानरूपेण तमोगुणसेविना येन मोहेन हतं जगत् जयन् कामो नालज्जत। क इव। तमोगुणजुषा आश्रिततमोगुणेन हरेण संहारकेण रुद्रेण प्राप्तकालतया प्राक् हतं ग्रस्तं कुरुसैन्यं पश्चाद्विनाशयन् अर्ज्जुन इव। मया हतमि-त्यभिमानेन लज्जां यथा नाप। अन्येन हतस्य पश्चात् स्वेन

चिह्निताः कतिचिद्दैवैः प्राचः परिचयादमी ।
अन्ये न केचनाचूडमेनःकञ्चुकमेचकाः ॥ ३५ ॥
तत्रोद्वृत्त इवार्णोधौ सैन्येऽभ्यर्णमुपेयुषि ।
कस्याप्याकर्णयामासुस्ते वर्णान् कर्णकर्कशान् ॥ ३६ ॥

हनने हि लज्जा युक्ता सा तु कामस्य न जातेत्यर्थः । मूढ एव कामपरवशो भवतीत्यर्थः । ईश्वरः प्राक् कुरुसैन्यं शूलेन हन्ति पश्चादर्ज्जुनः शरेणेति द्रोणपर्व्वकथा ॥ ३४ ॥

कुलकं । चिह्निता इति । अमी कामादयः कतिचित् कतिपयैर्दैवैरिन्द्रादिभिः प्राचः पूर्व्वजातात् परिचयात् पटुतरात् संसर्गात् चिह्निताः चिह्नैर्निश्चिताः ।देवानामपि कामाद्यायत्तत्वात् प्राचीनः परिचयः । अन्ये तदुपजीविनो बौद्धादयः केचन विशेषेण न ज्ञाताः । यत आचूडं शिखामभिव्याप्य मर्य्यादीकृत्य वा एनसा पापरूपेण कञ्चुकेन मेचकाः श्यामवर्णाः । यो हि नीलवस्त्रादिना आवृतदेहः स विशेषतो न लक्ष्यते श्यामत्वाद्बुद्ध इत्यर्थः ॥ २५ ॥

तत्रेति । उद्वृत्ते त्यक्तमर्य्यादे अर्णोधौ समुद्र इवातिगम्भीरे तत्र तस्मिन् काले सैन्ये अभ्यर्णं उपेयुषि सामीप्यं गते सति ते देवाः कस्याप्यनुपलक्षिताकारस्य चार्वाकस्य कर्णकर्कशान् वर्णानाकर्णयामासुः । अभ्यर्णं । अभेश्चाविदूर्य्य इति (पा० ७।२।२५) नेट् । गुरी उद्यमे मर्यादाधारणे च । उद्यमत्यागिनीत्यर्थः ॥ २६ ॥

ग्रावोन्मज्जनवद्यज्ञफलेऽपि श्रुतिसत्यता ।
का श्रद्धा तत्र धीवृद्धाः कामाध्वा यत् खिलीकृतः ॥ ३७ ॥
केनापि बोधिसत्त्वेन जातं सत्त्वेन हेतुना ।
यद्वेदमर्मभेदाय जगदे जगदस्थिरम् ॥ ३८ ॥

तानेव वर्णानाह । ग्रावेति । ग्रावोन्मज्जनवद्ग्रावाणः प्लवन्तीति प्रतिपादितपाषाणतरणवत् ज्योतिष्टोमादियज्ञानां साध्ये स्वर्गादौ फलेऽपि ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादिश्रुतीनां सत्यता यथार्थता ग्रावोन्मज्जनवाक्यस्य प्रत्यक्षबाधितत्वाद्यागानन्तरमेव स्वर्गादेरदृष्टत्वात् ज्योतिष्टोमादियागप्रतिपादिका श्रुतिरपि प्रत्यक्षबाधिता । तथा च यागश्रुतिरप्रमाणं प्रत्यक्षविरुद्धत्वात् ग्रावोन्मज्जनश्रुतिवदिति प्रयोगात् यागश्रुतेरपि स्वर्गादावसत्यतेति च व्याख्येयं। अत्र विरुद्धलक्षणया सत्यत्वेऽप्यसत्येत्यर्थः । एवमन्येषामपि वेदवाक्यानां श्रुतित्वाविशेषादप्रमाणत्वे हे धीवृद्धा बुद्धिमन्तो देवास्तत्र फले श्रुतौ वा युष्माकं का श्रद्धा कथमास्तिक्यं अपि त्वप्रामाणिकेऽर्थे श्रद्धा न कार्य्या। यत् येन कारणेन यदस्मादेदोक्तविध्यतिक्रमभिया कामाध्वा यदृच्छाचारमार्गः खिलीकृतो बद्धस्त्यक्त इत्यर्थः । श्रुतिमात्रस्याप्रमाणत्वाद्यूयं यजमानर्त्विजां कतिचिदहानि यद्ब्रह्मचर्यं तदप्यप्रमाणिकत्वात् त्यजतेति भावः। धीवृद्धा इत्युपहासः । अतिमूर्खा भवन्त इत्यर्थः ॥ ३७ ॥

केनेति । केनाप्यज्ञातनाम्ना बोधिसत्त्वेनातिप्राज्ञेन जिनभ-

अग्निहोत्रं त्रयीतन्त्रं त्रिदण्डं भस्मपुण्ड्रकं ।
प्रज्ञापौरुषनिःस्वानां जीवो जल्पति जीविका ॥ ३९ ॥

द्वारकेण वेदस्य मर्मभेदाय जातमुत्पन्नं । वेदमर्मभेदः कर्त्तुमारब्ध इति यावत् । कथमत आह । यद्यस्मात् सत्त्वेन हेतुना सत्त्वरूपेण लिङ्गेन, यत् सत् तत् चणिकं यथा पट इत्यादिरूपेण, जगदस्थिरं चणिकं जगदे । प्रत्ययादिसत्त्वलिङ्गेन विश्वस्य चणिकत्वसिद्धावुभयलोकानुगतं स्थिरमेककर्त्तारमधिकारिणमाश्रित्य वेदैर्विहितानां विधिनिषेधानां निराश्रयतया वेदस्याप्रामाण्यप्रतिपादनाद्वेदमर्मभेदः कृत इत्यर्थः । बौद्धसिद्धान्तस्तु ग्रन्थान्तराद्बोद्धव्यो विस्तरभयादत्र नोक्तः । अयं वक्ता पूर्वस्माद्भिन्नश्चार्वाक एव वा स्वमतं वेदाप्रामाण्यं बौद्धसंवादेन द्रढयति । केनेति । सत्त्वेन हेतुना यस्माज्जगदस्थिरं जगदे तस्मात् केनापि लोकोत्तरप्रज्ञेन तेनैव चार्वाकेण वेदमर्मभेदाय बौद्धेन जातं । तदीयमताङ्गीकरणात् तद्रूपेणैव जातमित्यर्थः । जगादेति पाठे यद्वाधिसत्त्वं जगदस्थिरं जगादेति व्याख्येयम् । चणिकत्वे सिद्धे येन पापं कृतं स नष्ट एवेति किमिति पापाद्भयमित्यादि प्रकरणाज्ज्ञेयम् ॥ ३८ ॥

अग्नीति । नित्यं काम्यञ्च सायम्प्रातर्होमरूपं अग्निहोत्राख्यं कर्म्म, त्रयी च तन्त्रमीमांसा वेदत्रयसम्बन्धि वा यत्तन्त्रं वेदविहितोऽन्योऽपि कर्म्मकलापः, तथा त्रयो दण्डा यत्र तत्पाशुपतव्रतं, तथा भस्मनः पुण्ड्रस्तिलको यत्रैवंविधं शैवादिव्रतमेतत्

शुद्धिर्वंशद्वयोशुद्धौ पित्रोः पित्रोर्यदेकशः।
तदनन्तकुला दोषाददोषा जातिरस्ति का ॥ ४० ॥

सर्व्वं, प्रज्ञाया बुद्धेः पौरुषेण सामर्थ्येन तीक्ष्णया प्रज्ञया निःस्वानां हीनानां प्रज्ञया पौरुषेण च वा हीनानां, वचनेन चौर्य्येण च बलाद्वा ग्रहीतुमसमर्थानां पुरुषाणां जीविका जीवनोपायः। तद्वेषधारणधर्म्मेण द्रव्यमर्ज्जितुमेव न तु तात्विको धर्म्मः। परलोकसाधनमिव वेदप्रामाण्यवादिनां भवति इति जीवो बृहस्पतिर्जल्पति वदति। वाक्यार्थः कर्म्म। तदुक्तम् तेनैव।

अग्निहोत्रं त्रयो वेदास्त्रिदण्डभस्मपुण्ड्रकं।
बुद्धिपौरुषहीनानां जीविकेति बृहस्पतिः॥

भस्मगुण्ठनमिति वा वचने पाठः। तस्मादग्निहोत्राद्यप्रमाणमेवेति भावः। जीविकेति। धात्वर्थनिर्द्देशे णमुल्॥ ३८॥

इदानीं ब्राह्मणादिजातिधर्म्मानसहमानो जातिं दूषयति। शुद्धिरिति। विशुद्धमातापितृजत्वं हि ब्राह्मणादेर्लक्षणं। सा शुद्धिर्दुर्निरूपा। यद्यस्मात् पित्रोर्मातापित्रोर्यौ पितरौ मातामहपितामहौ मातामहीपितामह्यौ च तयोरेकशः प्रत्येकं वंशद्वयोशुद्धौ सत्यां, एवं तयोरपि पितामहादिमातृपितामहादिमातृपितामह्यादिमातामहमातुःपितामहादिमातामहीमातुःपितामह्यादिशुद्धौ सत्यां एवं ब्राह्मणे यावत् प्रत्येकं शुद्धौ सत्यां शुद्धिः परीक्षणीया। तत्तस्मादनन्तकुला एवमपरिमितवंशभेदात्। अत एव दोषा दुर्विज्ञेयाः। शुद्धसन्तानस्त्रीपुंसयोः पारम्पर्य्यतया शुद्धेः सन्देहात्। इन्द्रादीनामहल्यादीनाञ्च

कामिनीवर्गसंसर्गैर्न कः सङ्क्रान्तपातकः ।

नाश्नाति स्नाति वा मोहात् कामक्षाममिदं जगत् ॥ ४१ ॥

पुराणप्रामाण्येन व्यभिचारदर्शनादशुद्धेर्निश्चयाच्च जातिसङ्कर-रूपाद्दोषात् का जातिरदोषास्ति अपि तु न कापि। यदाहुः।

अप्येकपङ्क्त्यां नाश्नीयात् सम्पन्नैः स्वजनैरपि ।

को हि जानाति किं कस्य प्रच्छन्नं पातकं भवेदिति ॥

तथा। अनादाविह संसारे दुर्वारे मकरध्वजे ।

कुले च कामिनीमूले का जातिः परिकल्पितेति ॥

तस्मात् सङ्कीर्णयोनित्वात् सर्वा अपि जातयो दुष्टा एवेति जातिधर्म्मान् विहाय स्वेच्छाचारं कुरुतेति भावः। यद्वा तस्मा-दाब्राह्मणमनन्तानां कुलानामदोषाभावाद्व्यभिचारादिदोषर-हिता जातिः काप्यस्ति अपि तु न कापि। पूर्व्वपूर्व्वपित्रादिव्यभि-चारादिदोषात् सर्व्वापि जातिर्दुष्टैवेति व्याख्याता। यद्वा तदेति च पाठः सम्यक्। तयोः पित्रोरनन्तकुलानां दोषाभावेन क्वा-ऽदोषा जातिरस्ति अपि तु महति कुले कस्य चिद्दोषसम्भवात् सर्व्वापि जातिर्दुष्टैवेति व्याख्या। यच्छब्दसामर्थ्यात्तच्छब्दाध्या-हारः। एकशः। सङ्ख्यैकवचनादिति (पा० ५।४।४३) शस् ॥ ४० ॥

अन्यदप्याह। कामिनीति।

आहारो द्विगुणः स्त्रीणां बुद्धिस्तासां चतुर्गुणा ।

षड्गुणो व्यवसायश्च कामश्चाष्टगुणः स्मृतः ॥

इति वचनात् पुरुषापेक्षया अष्टगुणकामानां कामिनीनां स्त्रीणां नानाजातीयानां वर्गः संघस्तस्य संसर्गैर्यौनैः सम्बन्धैः क्वा

ईर्ष्यया रक्षतो नारीर्धिक् कुलस्थितिदाम्भिकान्।
स्मरान्धत्वाविशेषेऽपि तथा नरमरक्षतः॥ ४२॥

कः पुरुषः सङ्क्रान्तं प्रविष्टं पातकं यत्र एवंविधो न अपि तु।

संवत्सरात्तु पतति पतितेन सहाचरन्।

इति शास्त्रात् कृतपातकस्त्रीसंसर्गात् सर्व्वोऽपि प्राणी सङ्क्रान्तपातक एव। तस्मात् काम्यत इति कामः फलं तेन वामं रहितं एकादश्युपवासादिव्रतं नियमो यस्य। मदनेन कृत्वा क्षीणं निष्फलं व्रतं यस्य वा तज्जगत् सर्व्वोऽपि लोकः मोहादिचाराभावाद् वृथेति यावत्, नाश्नाति न भुङ्क्ते एकादश्यादौ वृथैव च स्नाति तीर्थादौ हा कष्टम्। स्वयं शुचित्वेऽपि स्त्रीव्यभिचारादिदोषसंसर्गात् स्त्रीणां शुचित्वेऽपि दुष्टसंसर्गात् सर्व्वेषां पातकित्वादुपवासादि वृथैव करोति। केवलं प्रयास एव तस्य भवतीत्यर्थः। तस्मात् स्वेच्छाचार एव कार्य्य इति भावः। चार्वाकमते विधिनिषेधाभावान्नैष दोष इत्यर्थः। तेषां सदोषत्वाज्जातिरपि सर्व्वा सदोषैवेत्युक्तं भवति। अभिलाषेण कृत्वा नष्टं व्रतं यस्य। एकादश्यां भोजनाभिलाषे सत्यपि न भुङ्क्ते, अभिलाषे सत्येवामावास्यादौ स्त्रीनिवृत्तिः, स्नाति च तीर्थादौ, तत्सर्व्वं वृथैव। कामोपहतत्वाद् वहिः शोधयन्नन्तरशुद्धमित्यर्थः। क्षामः। क्षायो म इति (पा० ८।२।५३) मः॥ ४१॥

ईर्ष्येति। ईर्ष्यया असहनत्वमात्रेण हेतुना नारीः रक्षतस्तासां परपुरुषदर्शनमपि कर्त्तुं अप्रयच्छतः कुलस्थितिर्ब्राह्मण्यादिजातेरसाङ्कार्य्येणावस्थानं तद्रूपेण दम्भेन चरन्ति ये तान्

परदारनिवृत्तिर्या सोऽयं स्वयमनादृतः ।
अहल्याकेलिलोलेन दम्भो दम्भोलिपाणिना ॥ ४३ ॥

पुरुषान् स्त्रीरक्षणमेव कुलस्थितिं मन्यमानान् धिक् ते निन्द्याः । निन्द्यत्वे दाम्भिकप्रयुक्तत्वमेव हेतुः । किम्भूतान् । स्त्रियः पुरुषाश्च विवेकशून्या यतोऽतःस्मरान्धत्वस्याविशेषे साधारणे सत्यपि तथा नारीवन्निर्बन्धेन नरमरक्षतः परदारसंसर्गादनिवारयतः । न हि जातिसङ्करो नारीणामेव व्यभिचारेण प्रयुक्तो यतस्ता एव रक्षणीयाः किन्तु पुरुषाणामपि व्यभिचारेण । यदि रक्षणीयं तर्हि द्वयमपि । न चैवं क्रियते । तस्मादन्यतरस्यैव रक्षणे जातिसङ्करस्यैव तावदस्थ्यात् कुलस्थित्यभावान्नारीमात्ररक्षणं तेषां दम्भ एवेत्यर्थः । तस्मादीर्ष्यां त्यक्त्वा नरस्य वेश्यादाविव स्त्रीणामपि नरान्तरे प्रवृत्तिप्रतिषेधं माकुरुध्वमिति भावः । ईर्ष्येत्यनेनेर्ष्यैवात्र हेतुर्न तु धर्म्म इति सूचितं । अथ च स्मरान्धत्वाविशेषेऽपि नारीरक्षतोऽनेकपतिभ्यः किन्त्वेकमेव तस्याः कुर्व्वतः । नरं तु स्त्रीवदरक्षतः । स्त्रिया यथा एक एव पतिस्तथा नरस्यैकैव स्त्रीति न किन्तु ते बह्वीः कुर्व्वन्ति तस्मादपि निन्द्यास्ते अत्रापि ईर्ष्यैव हेतुः ॥ ४२ ॥

परेति । परदारेभ्यो या निवृत्तिः ताः सादरं न द्रष्टव्याः किं पुनः स्प्रष्टव्या इत्येतदर्थप्रतिपादकं शास्त्रं सोऽयं परवञ्चनरूपो दम्भः अहल्यया गौतमस्त्रिया सह केलिः कामक्रीडा तत्र लोलेन तत्परेण दम्भोलिपाणिनेन्द्रेण स्वयमात्मनैवानादृत

गुरुतल्पगतौ पापकल्पनां त्यजत द्विजाः ।
येषां वः पत्युरत्युच्चैर्गुरुदारग्रहे ग्रहः ॥ ४४ ॥

उपेक्षितः । परदारागमनप्रायश्चित्तविभागोऽप्येतेन दूषितः । अन्यं प्रति तन्न कार्य्यमिति उपदिशन्ति स्वयं तु तदेव कुर्वन्तीत्युपहासोऽपि सूचितः । अहल्यासम्भोगलम्पट इन्द्र एव दाम्भिकोऽन्ये परदारपराङ्मुखाः सर्व्वेऽपि दाम्भिका एवेति भावः । वज्रहस्तत्वात् परदारमर्षणं कृतवान् तस्मादयं शास्त्रीयो निषेधो न भवति किन्त्वशक्तत्वाद्दम्भ एवेति ॥ ४३ ॥

अन्यस्त्वाह । गुर्व्विति । भो द्विजा यूयं गुरुतल्पगतौ पित्रादिभार्य्यासम्भोगे विषये पापकल्पनां,

ब्रह्महा मद्यपस्तेनस्तथैव गुरुतल्पगः ।
महापातकिनस्त्वेते तथा विश्वासघातिनः ॥

इत्यादिवचनानुरोधेन महापातकसम्भावनां त्यजत। यस्माद्येषां वो युष्माकं पत्युः स्वामिनो द्विजराजस्य चन्द्रस्य देवानां गुरोर्वेदादिपाठयितुर्वृहस्पतेर्दाराः तेषाङ्ग्रहे सम्भोगे अत्युच्चैरतितरां ग्रहोऽभिनिवेशः, श्रूयत इति शेषः । वेदादिपाठनात् वृहस्पतेर्देवगुरुत्वं।तस्मात् तद्भार्य्यागमने चन्द्रस्य दोषलेशोऽपि न, तत्सेवका यूयमपि गुरुतल्पगमनं कामं कुरुतेति भावः। यथोक्तं।

राज्ञि धर्म्मिणि धर्म्मिष्ठाः पापे पापाः समे समाः ।
राजानमनुवर्त्तन्ते यथा राजा तथा प्रजा इति ॥

अयमप्युपहासः।गुरुशब्दश्लेषेणैवमुक्तं।मह इति पाठे उत्सवः।

पापात्तापा मुदः पुण्यात् परासोः स्युरिति श्रुतिः।
वैपरीत्यं द्रुतं साक्षात्तदाख्यात बलाबले ॥ ४५ ॥

अथ च तेजःसमूहो गुरुतल्पगमनेऽपि प्रत्यक्षमुदेत्येव न तु पतित इत्यर्थः। इन्द्रादिनिकटे वाल्मीकिप्रमुखा द्विजास्तिष्ठन्ति तेषां सम्बोधनं। वृहस्पतेर्भार्य्यायां गर्भमुत्पाद्य तत्सुतस्वीकारार्थं सोद्यमानिन्द्रादीन् प्रति चन्द्रेण महारणारम्भसंरम्भेण तेजः प्रकटितं। अनन्तरं ब्रह्मणा गुरुभार्य्यां त्याजितोऽपि स गर्भजपुत्रं गृहीतवानिति पौराणिकी कथा। तल्पश्च शयनीये स्यात्तल्पं सत्त्वकलत्रयोरिति विश्वः ॥ ४४ ॥

पुण्यो वै पुण्येन कर्म्मणा पापः पापेनेत्यादिश्रुतिं दूषयति। पापादिति। परा गता असवो यस्य मृतस्येत्यर्थः तस्य प्राणिनः इह कृतान्निषिद्धाचरणजात् पापात्तापा दुःखानि पुण्यादिह कृताद्विहिताचरणजाद्धर्म्मान्मुदः सुखानि स्युर्भवन्ति इति श्रुतिराह। साक्षात्प्रत्यक्षेण द्रुतं शीघ्रं वैपरीत्यं दृश्यत इति शेषः। प्रयागादौ प्रातर्माघस्नानं कुर्व्वतो भवदभिमतसुकृतकारिणः पुरुषस्य तदानीमेव दुःखं भवति। भवदनभिमतपरदारसङ्गमादिपापकारिणस्तदानीमेव सुखं भवतीति वैपरीत्यमनुभूयते। अथ चैवं श्रुतिः श्रवणमात्रं न तु तत्र किञ्चित्प्रमाणं। किञ्च मृतस्य किंवा भविष्यतीति को वेद जीवता तावद्वैपरीत्यमनुभूयते तत्तस्मात् श्रुतिप्रत्यक्षयोर्विषये यूयं बलाबले स्वयमेव आख्यात कथयत भवन्त एव विचारयन्त्वित्यर्थः। प्रमाणयोः

सन्देहेऽप्यन्यदेहाप्तेर्विवर्ज्यं वृजिनं यदि।
त्यजत श्रोत्रियाः सत्रं हिंसादूषणसंशयात् ॥ ४६ ॥

परस्परविरोधे सबलत्वेन दुर्बलत्वेन च व्यवस्था क्रियते। ततश्च यथा प्रत्यक्षानुमानविरोधे प्रत्यक्षं बलीयः। तथा श्रुतिप्रत्यक्षविरोधे प्रत्यक्षमेव बलीय इति निश्चित्य पापात् सुखमनुभूयत इति पापं सर्व्वैः कार्य्यमिति भावः। प्रबलदुर्बलत्वव्यवस्थापकस्य न्यायस्याप्ययमुपहासः ॥ ४५ ॥

सन्दिग्धेऽपि परलोके त्याज्यमेवाशुभं बुधैरित्यादिप्रतिवाधादूषयति। सन्देह इति। तच्च तत्र व्यभिचरितत्वाच्छ्रुतिप्रामाण्यानिश्चयात् पापं न कार्य्यं जन्मान्तरे निरयादिदुःखभयादित्येके वदन्ति, अन्ये च येन कृतं स तु दग्धोऽन्यदेहप्राप्तिस्तस्य स्यादित्यत्र का प्रत्याशेति वादिविप्रतिपत्तेस्तस्यान्यदेहाप्तेः सन्देहे सत्यपि पाक्षिकोऽपि दोषः परिहर्त्तव्य इति न्यायेन यदि देहान्तरं स्यात् तर्हि पापफलं दुःखमनुभूयेतेति बुद्धा यदि वृजिनं पापं विवर्ज्यं सर्व्वथा न कार्य्यं तर्हि हे श्रोत्रियाश्छन्दोध्यायिनो वसिष्ठादयो यूयं सत्रं अनेककर्तृकं यागं त्यजत मैवं कुरुध्वं। कुतः। पशुहिंसायाः सम्बन्धिनो दोषस्य संशयात् सन्देहात्। मा हिंस्यात् सर्वा भूतानि, अहिंसा परमो धर्म्म इत्यादि श्रुतिस्मृतिवशाद्यागेऽपि हिंसा न कार्य्येत्येके। विधिबलादशङ्कितपापोत्पत्तिः सा कार्य्यैवेत्यन्ये इति सन्देहे यागीयपशुहिंसा चेत् पापहेतुः स्यात्तदा नेष्टप्राप्तिः किन्त्वनिष्टमेव

यस्त्रिवेदीविदां वन्द्यः स व्यासोऽपि जजल्प वः ।
रामाया जातकामायाः प्रशस्ता हस्तधारणा ॥ ४७ ॥
सुकृते वः कथं श्रद्धा सुरते च कथं न सा ।
तत्कर्म पुरुषः कुर्य्याद्येनान्ते सुखमेधते ॥ ४८ ॥

स्यादिति पाचिकोऽपि दोषः परिहरणीय इत्यनेनैव न्यायेन यागमपि त्यजत न चेदेवं पापमपि कुरुतेति भावः । संश्रयादिति पाठे सम्बन्धादित्यर्थः । कलुषं वृजिनेत्यमरः ॥ ४६ ॥

त्याज्यमेवाशुभं बुधैरित्यपि सव्यभिचारमाह । य इति । यस्त्रिवेदीविदां वेदत्रयवेदिनां वो युष्माकं वन्द्यो नमस्करणीयः स व्यासोऽपि इति भारतादौ जजल्पोक्तवान् । इति किं । जातकामायाः कामार्त्तायाः रिरंसोः रामाया अज्ञातकुलशीलाया अपि रमणाय हस्तधारणा पाणिग्रहणं अङ्गीकरणञ्च प्रशस्ता युक्तैव । न केवलं वाल्मीकिः किन्तु व्यासोऽपीत्यपिशब्दार्थः । तद्वचनं भवद्भिः पूज्यत्वादङ्गीकर्त्तव्यमित्यपि सूच्यते ।

स्मरार्त्तां विकलां दीनां यो न कामयते स्त्रियम् ।
ब्रह्महा स तु विज्ञेयो व्यासो वचनमब्रवीत् ॥

इत्याद्यर्ज्जुनतीर्थयात्राविषये ऊर्व्वश्यादिप्रसङ्गे च भारतादौ रामायणे च शूर्पनखाद्युक्तौ प्रसिद्धं । ततश्च पापवर्ज्यकार्य्यमित्यप्युच्यते । उभयथापि दोष इति भावः । वेदविदामिति कृत्यानामिति (पा॰२।३।७१) षष्ठी ॥ ४७ ॥

प्रकारान्तरेण पूर्व्वोक्तमेवाह । सुकृत इति । सुकृते यागा-

बलात् कुरुत पापानि सन्तु तान्यकृतानि वः ।
सर्व्वान् बलकृतानर्थानकृतान् मनुरब्रवीत् ॥ ४९ ॥

यणादौ वो युष्माकं कथं केन हेतुना श्रद्धा आस्तिकता अपि त्वनुचितमेतत् । सा च श्रद्धा सुरते कामिनीविषये न कथमिति । तया तत्र भवितुं युक्तं । यस्मात् पुरुषस्तत्कर्म्म व्यापारं कुर्य्यात् येन कर्म्मणा कृत्वाऽन्ते कर्म्मावसान एव सुखमेधते वर्द्धतेऽनुभूयते पुरुषेणेत्यर्थः । जन्मान्तरे व्रतादिजन्यं सुखं सन्दिग्धं सुरतजन्यञ्च सर्व्वस्य स्वानुभवसाचिकं । तस्माच्चान्द्रायणादि सुकृतं त्यक्त्वा सुरतमेवाङ्गीकर्त्तव्यमिति भावः । एतेन मासैरष्टभिरह्ना च पूर्व्वेण वयसायुषा । प्राज्ञस्तत्कर्म्म कुर्व्वीत येनान्ते सुखमेधत इत्यादि विडम्बितं । दुरिते चेति पाठे परदारगमनादावित्यर्थः । यतः परदारगमनानन्तरमेव सुखं दृश्यते ॥ ४८ ॥

बलादिति । भो द्विजा यूयं पापानि परस्त्रीगमनादीनि बलादनुमतावसत्यामपि कुरुत तानि पापानि वः सम्बन्धीनि कृतान्यप्यकृतानि सन्तु फलदायीनि मा भवन्त्वित्यर्थः । यतो मनुर्बलेन कृतान् सर्व्वानर्थान् व्यापारान् अकृतानेवाब्रवीत् । मनुवचनप्रामाण्यात् बलाद् पापं कुरुतेत्यर्थः । बलाद्दत्तं बलाद्भुक्तं बलाद्दासीकृतञ्च यदित्यन्यार्थमपि मनुवचनं छलेनार्थान्तरपरिकल्पनया प्रकृते निदर्शयन् प्रतिबन्धो विडम्बयति ॥ ४९ ॥

स्वागमार्थेऽपि मा स्थास्मिंस्तीर्थिका विचिकित्सवः।
तं तमाचरतानन्दं स्वच्छन्दं यं यमिच्छथ ॥५०॥
श्रुतिस्मृत्यर्थबोधेषु क्वैकमत्यं महाधियाम्।
व्याख्या बुद्धिबलापेक्षा सा नोपेक्ष्या सुखोन्मुखी ॥५१॥

स्वागमेति। भोस्तीर्थिकाः सम्प्रदायागतविद्या यूयमस्मिन् पूर्व्वोक्तमनुवचनरूपस्वीयागमप्रतिपाद्येऽर्थेऽप्रमेये आत्मारामः स्यादिति वार्थे विषये विचिकित्सवः संशयालवो मा स्थ भवथ। इदं कार्य्यं न वेति संशयः परित्याज्य इत्यर्थः। मनुना श्रुत्या वा इदं कथं प्रतिपादितमित्युभयत्राप्यनादरपरा वा मा भवत। तर्हि किं कार्य्यमित्यत आह। यूयमानन्देन परदारगमनादि यं यं इच्छथ तं तं स्वच्छन्दं स्वेच्छया निःसंशयमादरेणाचरत। आत्मारामः स्यादिति श्रुतिप्रामाण्यात्, पूर्व्वोक्तस्मृतिप्रामाण्याच्च संशयं परित्यज्य आदरेण यदृच्छया सुखमुपभुङ्ग्ध्वमिति भावः। अस्मदाद्यागमे यद्यपि निन्दापरास्तथापि स्वागमे निन्दा न युक्तेत्यपि सूचितम्। मा निरनुबन्धकस्ततो न लुङ्। तीर्थेनागमेन चरति ठक्। सदुपाध्यायो वा तीर्थं तस्मादस्त्यर्थे ठन् ॥ ५० ॥

पूर्व्वोक्तश्रुतिस्मृतीनामर्थमज्ञात्वा त्वयैवमुक्तं व्याख्यानमप्रमाणमित्याशङ्क्याह। श्रुतीति। श्रुतिस्मृत्यर्थबोधेषु महाधियामप्यैकमत्यमविसम्वादः क्वास्ति अपि तु सर्व्वत्रापि विसम्वाद एव बुद्धिबलेन परस्परविजयात्। एवं सति व्याख्या पदार्थवाक्या-

यस्मिन्नस्तीति धीर्देहे तद्दाहे वः किमेनसा ।
क्वापि किन्तत् फलं न स्यादात्मेति परसाक्षिके ॥ ५२ ॥

र्थनिरूपणं बुद्धिबलं प्रज्ञाबलमपेक्षते एवम्भूता । यथा यस्य स्फुरति स तथा व्याख्याति । अत एवाद्वैतवादिनः श्रुतीरभेद-परत्वेन द्वैतवादिनस्तु भेदपरत्वेन व्याचक्षते । सा व्याख्या सुखो-न्मुखी अनायाससमाध्याऽक्लिष्टा अथ च सुखपर्य्यवसायिनी नोपेक्ष्या नानादरणीया सैवाङ्गीकार्य्येत्यर्थः । श्रुतिस्मृतीनामस्मद्व्याख्यात एवार्थोऽङ्गीकार्य्यः । स्वेच्छाचारमेव कुरुतेति भावः । ऐकमत्यमि-त्यत्र एका समाना अविसम्वादिनी मतिरित्यर्थः, चातुर्वर्ण्या-दित्वात् स्वार्थे ष्यञ् ॥ ५१ ॥

त्वन्मताङ्गीकारे निरयादिप्राप्तिः स्यादित्यत आह । यस्मि-न्निति । यस्मिन् देहे अहमस्मि इति धीः गौरः कृश इत्याद्या-कारः प्रत्ययः तस्य शरीरस्य दाहे सति वो युष्माकमेनसा पापेन किं अपि तु पापेन निरयपातादि किञ्चिदपि न कार्य्यते । अय-माशयः । देह एवात्मा देहातिरिक्तो वा । यद्याद्यः कल्पस्तर्हि येन देहेन पापं कृतं तस्य विनष्टत्वाद्देहात्मवादिनां वः पापेन किं कर्त्तुं शक्यते अपि तु न किञ्चिदित्यर्थः । अथ देहाति-रिक्त एवात्मा देहे विनष्टेऽपि देहान्तरे देशान्तरे कालान्तरे च पुण्यपापफलानां भोक्तास्ति तत्राप्येवं वक्तव्यं, स किं स्वसाक्षिकः परसाक्षिको वा । नाद्यः अहंप्रत्ययस्य देहविषयत्वेनैव सिद्धे-स्तदतिरिक्तालम्बनकल्पनानवकाशात् । ततश्च तद्दाहे वः किमेन

मित्येतदेव पुनरायातं। द्वितीयं दूषयति। परो वेदादिः साक्षी यस्य तस्मिन् देहान्तरे देशान्तरे कालान्तरे च फलभोक्तरि देहातिरिक्ते वेदप्रतिपादिते आत्मनि तस्य पापस्य निरयादि फलं चेत् स चेत् फलस्य भोक्ता तर्ह्यात्मनेति हेतोरात्मत्वाविशेषादिति यावत् तस्मात् क्वाप्यात्मान्तरेऽपि तत् किं न स्यादपि तु भवितव्यमेव। तेन देहेन पातके कृते तदतिरिक्ते नात्मना चेत् फलं भोक्ष्यते तर्हि देवदत्तेन पापे कृतेऽप्यात्मत्वाविशेषाद्यज्ञदत्तेनापि तत्फलमुपभोक्तव्यमित्यप्यापद्यते। किञ्च पापफलदुःखानुभवालम्बनस्य विनाशे तत् पातकफलं देहव्यतिरिक्ते परप्रत्ययवेद्ये आत्मनि चेद्भवेत् तथापि न दोषः। दुःखं ह्युपभुज्यमानं प्रतिकूलं भवति। उपभोक्ता चाहङ्कारास्पदः। देहो विनष्ट आत्मा तु नोपभोक्तेति फलसम्बन्धेऽपि न दोषः। ततश्च पापकारिणो देहस्य विनष्टत्वान्मृतत्वादेव चापवर्गत्वान्न कश्चित् फलभोक्तेति स्वेच्छाचारमेव कुर्विति भावः। यद्वा परश्चासौ साक्षी च परसाक्षी स एव परसाक्षिक आत्मेति आत्मलक्षणपरे देहातिरिक्ते साक्षिणि तटस्थे चेत् तत्फलं तर्हि क्वापि पाषाणादौ वा तत्फलं किं न स्यादपि तु स्यादेवान्यत्वाविशेषात्। तस्माद्देहातिरिक्त आत्मा नास्त्येव देहश्च नष्टः। कस्य पापफलं स्यादिति भावः। यद्वा क्वापि जन्मान्तरीयदेहान्तरे आत्मास्तीति पापफलं चेत् स्यात्तर्हि परो देवदत्ताद्यात्मा साक्षी यस्य तस्मिन्नात्मान्तराधिष्ठिते देवदत्तादिदेहेऽपि परस्य वा देवदत्तादिदेहस्य साक्षिण्या-

मृतः स्मरति जन्मानि मृते कर्म्मफलोर्मयः।
अन्यभुक्तैर्मृते तृप्तिरित्यलं धूर्त्तवार्त्तया॥ ५३॥
जनेन जानतास्मीति कायं नायं त्वमित्यसौ।
त्याज्यते ग्राह्यते चान्यदहो श्रुत्यातिधूर्त्तया॥ ५४॥

तानि किं न स्यादपि त्वविशेषात् स्यादेवेति। अलमतिप्रसङ्गेन॥ ५२॥

पुनरपि देहातिरिक्तात्मवादिनमुपहसति। मृत इति। गतप्राणो नष्टशरीरत्वान्निरन्वयध्वस्तपूर्व्वानुभवसंस्कारोद्वोधोऽपि प्राणी पूर्व्वजन्मानि अनेकजन्मतत्कर्मजात्यादीनि पूर्व्वमहं ब्राह्मणोऽभूवमित्यादीनि स्मरति। मृते च कर्म्मणां सुकृतदुष्कृतरूपाणां फलानि सुखदुःखरूपाणि तेषामूर्म्मयः परम्परा भोगा वा भवन्ति। तदधिकरणा भवन्तीत्यर्थः। तथान्येषां ब्राह्मणानां भुक्तैर्भोजनैः कृत्वा मृते ध्वस्तदेहे प्रेते तृप्तिर्भवतीति धूर्त्तानां परवञ्चनमात्रेण स्वोपजीविनां वार्त्तयाऽप्रामाणिकेन वार्त्तामात्रेण अलं सा न कार्य्या इत्यर्थः। सर्व्वमप्येतद्व्यधिकरणत्वादनुपपन्नं। स्वभोजनादिलाभाय परं प्रतारयति। तस्माद्देह एव आत्मेति भावः। अन्यभुक्तैरित्यत्र अन्येषां ब्राह्मणानां भुक्तैरिति षष्ठीसमासः॥ ५३॥

देहातिरिक्तात्मप्रतिपादिकां श्रुतिमप्युपहसति। जनेनेति। अतिधूर्त्तया नितरां परवञ्चनपरया तत्त्वमसीति, स वा एष महानज आत्मेत्यादिश्रुत्या प्रयोजककर्त्र्या कोऽयमस्मीति अहं-

एकं सन्दिग्धयोस्तावत् भावि तत्रेष्टजन्मनि।
हेतुताङ्गः स्वमन्त्रादीनसाङ्गानन्यथा विटाः ॥ ५५ ॥

प्रत्ययविषयं जानता स्थूलोऽहं कृशोऽहं इत्याद्यहंप्रत्ययविषयो देह एव न तु तदतिरिक्तः कश्चिदिति देहमेवात्मानं जानता जनेन प्रयोज्येनायमस्मीति प्रत्ययविषयस्त्वं न भवसीति असौ देहस्त्यज्यते अहं प्रत्ययविषयत्वं नेति शेषः। लोके देहोऽहंप्रत्ययविषयमात्मलक्षणवस्तु ग्राह्यते अङ्गीकार्य्यते। अहो आश्चर्य्यं कष्टं वा महदनुचितमेतदित्यर्थः। देहे आत्मभावं परित्यज्य तस्मिन्नात्मनि नित्यतां गृहीत्वा दीक्षातपआदिभिर्देहं कर्शयते तदतिरिक्तात्मवेदनं कुर्व्विति श्रुत्या लोक उपदिश्यत इत्यर्थः। विप्रलम्भकवाक्यत्वेन श्रुतिमात्रमप्रमाणं वार्तामात्रमेवास्त्वं मा न कार्य्येत्यर्थः। अन्योऽपि धूर्त्तः अन्येन रत्नादि त्याजयति काचादि ग्राहयति। कर्त्तृहयस्याप्यनभिहितत्वाद्भयत्र तृतीया ॥ ५४ ॥

ननु पुत्रेष्ट्या पुत्रस्य प्रत्यक्षोपलम्भात् ज्योतिष्टोमादेरपि फलस्यानुमानात् श्रुतिमात्रस्य प्रामाण्यात् कथं श्रुतेर्धूर्त्तत्वं इत्याशङ्क्य दूषयति। एकमिति। भावनाभावनाभ्यां सन्दिग्धयोरर्थयोः पुत्रादिलाभालाभयोर्मध्ये एकमिष्टमनिष्टं वा तावन्निश्चितं भावि भविष्यति। तत्र तयोर्मध्ये तया सति वा इष्टस्य पुत्रादेर्जन्मनि लाभे सति विटा धूर्त्ताः परवञ्चनचतुराः स्वमन्त्रादीन् हेतून् कारणभूतानाहुः अस्माभीरुद्रजपादि त्वदर्थं कृतं तेन च त्वया पुत्रादि लब्धमिति वदन्तीत्यर्थः। अन्यथा

एकस्य विश्वपापेन तापेऽनन्ते निमज्जतः।
कः श्रौतस्यात्मनो भीरो भरःस्याद् दुरितेन ते॥ ५६॥

पुत्राद्यलाभे सति तानेव मन्त्रानसाङ्गानङ्गविकलतया फलस्या-साधकान् प्राचीनपुत्रवियोगादिविपरीतफलकारिणश्चाहुः। सामग्रीसाकल्याभावाद्यथोक्तदक्षिणाभावात् फलं न जातं विपरीतञ्च जातमिति धूर्त्ताः परान् वञ्चयन्तीत्यर्थः। तस्माद्दृष्ट-फलपुत्रेष्ट्यादिदृष्टान्तेनादृष्टफलेष्वपि फलकल्पना निरवकाशेति श्रुतिरप्रमाणैवेति भावः॥ ५५॥

श्रुतिप्रामाण्यमभ्युपगमादेवाङ्गीकृत्याप्येकात्मवादिमतमनिष्टापत्त्या दूषयति। एकस्येति। विश्वेषां सर्व्वेषां परदारागमनादिजनितेन पापेन हेतुनाऽनन्तेऽक्षये तापे निरयादिदुःखे निमज्जतः अनन्तदुःखमनुभवतः सतः श्रौतस्य एकमेवाद्वितीयं ब्रह्म, नेह नानास्ति किञ्चन, इत्यादिश्रुतिसिद्धैकस्याद्वितीयस्यात्मनो हे भीरो पापाद्भयशील ते तवैकस्य दुरितेन को भारो गौरवं स्यात् अपि तु पूर्णस्य शकटस्य शूर्प्पेणेव न कश्चिद्भारो भवेत्। एकात्मवादिमते प्रामाणिकस्यैकस्यैवात्मनो यदि सकलशरीरोपाधिकृतपापसम्बन्धस्तदा तत्फलानन्त्यान्निरयादिदुःखानुभवावसरे तवैकस्यैव पापेन कृता पापाचयराशिभूतस्तस्य न कोऽपि भारः स्यात्। किञ्च तैर्यत् पुण्यं कृतं तत्त्वयैव कृतमिति पापे कृतेऽपि तव दोषो नेति यथेच्छं पापं कुर्व्वित्यर्थः। अपि चात्मैक्यात् स्वपरव्यवहाराभावे परदारत्वपरस्वत्वाद्यभा-

किन्ते वृन्तहृतात् पुष्पात् तन्मात्रे हि फलत्यदः ।
न्यस्य तन्मूर्ध्निनन्यस्य न्यास्यमेवाश्मनो यदि ॥ ५७ ॥

वात् परदारागमनादौ पापलेशस्याप्यभावात् स्वेच्छाचारमेव कुर्व्वित्यर्थः । भोगे तात्पर्य्यपर्य्यालोचनया विना भयशीलेत्युपहासः । तस्मादेकात्मश्रुतिरुपासनपरा ज्ञेया न तु तात्त्विकीति भावः ॥ ५६ ॥

देवपूजादिबुद्धिं निराकरोति । किमिति । भो देवपूजक वृन्तात् प्रसवबन्धनात् सकाशात् हृतं अवचितं चम्पकादिकं पुष्पं तस्माद्धेतोस्ते तव किं प्रयोजनं प्रत्युत दोष एवेत्यर्थः । हि यस्माददः पुष्पं तन्मात्रे वृन्ताग्रवृन्त एव वर्त्तमानमेव फलति फलरूपेण परिणमते न तु तेन विना । पुष्पेऽवचिते फलोत्पत्तिप्रतिबन्ध एव भवति न त्वन्यत् फलमित्यर्थः । अथ देवपूजादौ विनियोगात् साफल्यमिति चेत्तदप्यसत् । अश्मनः शालग्रामशिवलिङ्गादेः पाषाणस्यैव मूर्द्धि न्यास्यं यदि चेत्तत्र न्यस्तं सफलीभविष्यति इत्याशयः, तर्हि अनन्यस्य शिलातोऽभिन्नस्य पाषाणस्य मूर्द्धि तत् न्यस्य निधेहि । अनन्यस्यैवेति वा न्यास्यमेवेति वा । किञ्च भवन्मते भेदस्य प्रापञ्चिकत्वात् परमेश्वरस्य सर्व्वत्र सत्त्वाच्छालग्रामादेस्त्वच्छिरसश्चैकाद्देवपूजापि पृथक् वृथेति स्वशिरस्येव पुष्पाणि चिपेत्युपहास इति भावः । न्यास्यं । ह्लन्तत्वात् ण्यत् ॥ ५७ ॥

तृणानीव घृणावादान् विधूनय वधूरनु ।
तवापि तादृशस्यैव का चिरं जनवञ्चना ॥ ५८ ॥
कुरुध्वं कामदेवाज्ञां ब्रह्माद्यैरप्यलङ्घिताम् ।
वेदोऽपि देवकीयाज्ञा तत्राज्ञा काधिकार्हणा ॥ ५९ ॥

वैराग्यजननार्थमन्यदप्याह । तृणानीति । हे पुरुष सुखं श्लेष्मागारं स्तनौ मांसग्रन्थी इत्यादीनि वधूरनु स्त्रीरुद्दिश्य घृणावादान् जुगुप्सावचनानि निःसारत्वेन तृणानीव विधूनय त्यज । यतस्तादृशस्य मांसादिमयस्यैव तवापि गर्हितस्यापि स्त्रियो तेन प्रकारेण निन्द्या इति चिरं का जनवञ्चना लोकप्रतारणा कार्य्येति भावः । स्त्रियो व्यभिचारिण्यः पापनिरता इति निन्दावाक्यानि तवापि व्यभिचारिणो न युक्ता इति वा ॥ ५८ ॥

कुरुध्वमिति । हे अज्ञा मूर्खा ब्राह्मणा यूयं,

अहल्याया जारः सुरपतिरभूदात्मतनयां ।

प्रजानाथोऽयासीत्,

इत्यादि स्मरणात् ब्रह्मविष्णुमहेशादिभिरप्यलङ्घितः काम एव देवस्तस्य स्त्रीपारवश्यलक्षणामाज्ञां कुरुध्वं । यस्माद्वेदोऽपि श्रुतिस्मृती ममैवाज्ञेति श्रीभगवद्वचनाद्देवकीया आज्ञा । अतस्तत्र वेदरूपायां देवाज्ञायां कामाज्ञातोऽधिकार्हणा पूज्या मान्या काऽपि तु देवत्वाविशेषाद्देवाज्ञेव कार्य्या कामाज्ञापि माननीयैवेत्यर्थः । आज्ञाद्वयमपि समानं । तस्मात् कामदेवाज्ञामपि कुरुध्वं न त्वेकत्र पक्षपातः कार्य्य इति भावः । यद्वा

प्रलापमपि वेदस्य भागं मन्यध्वमेव चेत्।
केनाभाग्येन दुःखान्न विधीनपि नथेच्छथ ॥ ६० ॥

तत्र द्वयोराज्ञयोर्मध्ये अधिकमर्हणं यस्याः सा काज्ञा अपि तु पूर्ववदविशेषाद् द्वयमपि सममेवेत्यर्थः। द्वयोर्मध्येऽधिकार्हणा केति यूयमेव कथयतेति। ब्रह्मादिभिरप्यङ्गीकृतत्वाच्छिष्टपरिगृहीतत्वलक्षणप्रामाण्यात् प्रत्यक्षलक्षणसुखहेतुत्वाच्च कामदेवाज्ञैवाधिकार्हणा योग्या। वेदा हि ब्रह्मादीनामेवाज्ञा ब्रह्मादयश्च कामदेवाज्ञाकारिणः। ततश्च यदीयाऽऽज्ञा भवद्भिरनुष्ठीयते तैरपि अनुष्ठीयते या सा भवतां सुतरामनुष्ठेयैवेति भाव इति वा। पक्षपातात् तारतम्याज्ञानाच्च मूर्खत्वं। वेदा हीति च पाठः। कामदेवाज्ञामेव कुरुध्वं यस्माद्वेदोऽपि देवाज्ञा। तत्र वेदेऽधिका का पूज्या अपि तु कामदेवाज्ञैवानुष्ठेया। ब्रह्मादिभिरपि अनुष्ठितत्वादिति वा। का विगर्हणेति पाठे तत्र कामाज्ञायां का निन्दा कोऽनादर इत्यर्थः। देवकीया। गर्हादिषु जनपरयोः कुक् चेत्यत्र देवस्येति वक्तव्यत्वात् (पा० ४।२।१३८) कुक्कः ॥ ५९ ॥

श्लोकत्रयेण मीमांसकान् परिहसति। प्रलापमिति। महता प्रयासेन यस्य प्रामाण्यमुपपादितं तस्य वेदस्यैव कञ्चन भागमंशं सोऽरोदीद्यदरोदीत् तद्रुद्रस्य रुद्रत्वं इत्याद्यर्थवादमन्त्रनामधेयात्मकं प्रलापमिवानर्थकवचोरूपं चेन्मन्यध्वं अङ्गीकुरुध्वं। आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानामित्यादिना पूर्वपक्षसूत्रेण प्रतिपादितस्यानर्थक्यस्य, विधिना त्वेकवाक्यत्वादित्यादिना सिद्धान्तसूत्रेण स्तुत्यर्थवादादेरुपयोगेऽभिहितेऽपि

श्रुतिं श्रद्धत्थ विक्षिप्ताः प्रक्षिप्तां ब्रूथ च स्वयं।
मीमांसामांसलप्रज्ञास्तां यूपद्विपदापिनीम् ॥ ६१ ॥

श्रुतिसार्थक्याभावादतिकृतत्वादर्थवादादि वेदभागमनर्थकवचनप्रायं चेन्मन्यध्वे तर्हि बहुधनव्ययायाससाध्यत्वाद् दुःखजनकान् ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादीन् विधिभागानपि केन भाग्याभावेन तथा प्रलापरूपान् नेच्छथ नाङ्गीकुरुथ अपि तु तानपि प्रलापरूपानेव स्वीकुरुध्वेत्यर्थः। सर्व्वोऽपि वेदो विधिरूपः प्रलापरूपो वास्तु। न त्वर्द्धजरतीन्यायः समाश्रयितुं युक्त इति भावः। वेदत्वाविशेषेऽप्यभाग्यमेव वैषम्यहेतुरित्यर्थः। दुःखशब्दस्य नपुंसकत्वेऽपि दुःखं करोतीति ण्यन्तात् पचाद्यचि दुःखानिति ज्ञेयम् ॥ ६० ॥

प्रकारान्तरेण मीमांसकानुपहसति। श्रुतिमिति। हे मीमांसायां वेदविचारे मांसला परिपुष्टा प्रज्ञा बुद्धिर्येषां ते यूयं श्रुतिं वेदं प्रत्यक्षं श्रद्धत्थ आदरेण स्वीकुरुथ। अक्षरमात्रमपि सार्थकं मन्यध्वे। तथा विक्षिप्ता वादिभिर्निराकृता भ्रान्तचित्ताः पूर्व्वापरानुसन्धानविकलाः सन्तस्तामेव श्रुतिं यूपसम्बन्धिनं द्विपं दापिनीं दापयन्तीं स्वयमात्मनैवाङ्गीकृतप्रामाण्यामपि प्रक्षिप्तां केनचिदस्मकेन खिलरूपां निक्षिप्तास्म ब्रूथ। चकारः पूर्व्वापरविरोधद्योतनार्थः। पूर्व्वापरानुसन्धानविकलत्वाद्वेदविचारचतुरा साध्वी भवतां बुद्धिरित्युपहासार्थं मीमांसेत्यादिसम्बोधनं। मांसलेत्यनेन च स्थूलदृष्टय आपातग्राहिणो यूयं

को हि वेदास्त्यमुष्मिन् वा लोक इत्याह या श्रुतिः।
तत्प्रामाण्यादमुं लोकं लोकः प्रत्येतु वा कथं॥ ६२॥

न तु कुशाग्रबुद्धय इति सूचितं। ऋत्विजो यज्ञमध्ये यजमानं यज्ञसमापनाग्रहशीलं समाप्युत्तरकालभावि स्वाच्छन्द्यं विदित्वा कार्य्यवत्तावेलायामेव स्वयं यूपे यूपे हस्तिनो बद्धा ऋत्विग्भ्यो दद्यादित्येतत्प्रतिपादकानि वेदवाक्यानि यजमानस्य श्रद्धाजननार्थं पठित्वा याचन्ते। प्रत्यक्षश्रुतिर्विहितदृष्टान्तरनिदर्शनव्यामोहितश्च स यजमानः श्रद्दधानतया तथैव प्रतिपद्य तेभ्यः प्रयच्छतीति तैरेवैषा स्मृतिः प्रवर्त्तिता स्यादित्याशङ्क्य नेयं वेदमूलेति लोभपूर्व्वकर्मभिरुक्तमिति वेदवाक्यानामर्थवादत्वमङ्गीकरोति। ततश्च कानिचिद्वेदवाक्यानि प्रधानानि कानिचिदप्रधानानीति श्रर्द्धजरतीयन्यायस्तदवस्थ एवेत्यर्थः। यूपहस्तिनो दानमाचरन्तीति स्मृतेर्मूलभूता श्रुतिरभिधीयते। कल्पितश्रुतिमूलत्वात् स्मृतिरेवाश्रुतित्वेनोच्यते। यूपवदत्युच्चद्विपास्तान् दापयतीति। वाजपेयादौ हि सप्तदशहस्तिनो रथा दास्यश्च दक्षिणा इत्युपलक्षणमेतदित्यन्ये॥ ६१॥

का होति। को हि तद्वेद यद्यमुष्मिन् लोकेऽस्मि वा नवेति दिव्वतीकाशान् करोतीत्यादि या श्रुतिरमुष्मिन् लोके परलोके विषये सुखादिकमस्ति वा नास्तीति वा हि निश्चितं को वेद अपि तु न कोऽपि आह ब्रवीति, तस्याः श्रुतेः प्रामाण्यात् अमुं लोकं परलोकं लोकः परोक्षकोऽस्मदादिः कथं वा कथ-

धर्म्माधर्म्मौ मनुर्ज्जल्पन्नशक्यार्जनवर्जनौ।
व्याजान्मण्डलदण्डार्थी श्रद्दधायि मुधा बुधैः॥ ६३॥

मिव प्रत्येतु विश्वासेन निश्चिनोतु ब्रूहि, अपि तु न कोऽपि। यदीयास्तित्वनास्तित्वयोः श्रुतेरेव सन्देहस्तत्प्रामाण्यात् पामरा भवादृश एव परलोकं मन्यते न तु प्रामाणिकः कश्चिदिति भावः॥ ६२॥

स्मृतिप्रामाण्यमपि दूषयति। धर्म्मेति। बहुधनव्ययायाससाध्यत्वाच्छीतभयात्तीर्थस्नानाद्यशक्तत्वात् अग्नौ चरणसन्तापनादिरूपतया तत्तदिन्द्रियवर्गस्य परिहर्त्तुमशक्यत्वात् सुखानुभवमूलत्वाच्च क्रमेणाशक्यं अर्जनं वर्जनं च ययोस्तौ धर्म्माधर्म्मौ बुद्धिपूर्व्वं जल्पन् बहुधा प्रतिपादयन् मन्वन्तराधिपतिरादिराजो मनुर्मुख्यस्मृतिकर्त्ता ब्रह्मपुत्रः स्वायम्भुवो व्याजाद्धर्म्माधर्म्मोपदेशकस्मृतिप्रणयनमिषेण विधिनिषेधातिक्रमनिमित्तप्रायश्चित्तद्वारा मण्डलस्य राष्ट्रस्य लोकस्यापराधं निमित्तीकृत्य दण्डार्थद्रव्यमभिलाषुको यतस्तस्माद् बुधैः पण्डितमन्यैः मुधा वृथैव श्रद्दधायि आदृतः। अधर्म्माचरणं सुकरमित्यधर्म्ममेव सर्व्वः करोति। ततश्च येन केनाप्युपायेन अर्थग्रहणोपाय एव दण्डो मनुनाभिहितो न धर्म्म इत्यर्थः। अबुधैरिति वा। मनुवचनमूलत्वात्। स्मृतिमात्रस्याप्रामाण्यमुक्तम्॥ ६३॥

व्यासस्यैव गिरा तस्मिन् श्रद्धेत्यद्धा स्थ तान्त्रिकाः ।
मत्स्यस्याप्युपदेश्यान् वः को मत्स्यानपि भाषताम् ॥ ६४ ॥

पुराणप्रामाण्यं दूषयति । व्यासस्येति । दासदारिकाव्यभिचारजातस्य भ्रातृजायायां पुत्रोत्पादनशीलस्य व्यासस्यैव कवित्वरूपया गिरा तस्मिन् धर्मे परलोके व्यास एव वा श्रद्धा भावना आस्तिक्यबुद्धिरित्येतत् तस्माद्धेतोरद्धा निश्चितं यूयं तान्त्रिका युक्तिज्ञा वाक्यविचारचतुराः स्थ भवथ। विरुद्धलक्षणया एवंविगीतेन व्यासेन प्रतिपादिते धर्मे परलोके तस्मिन् वा येषामास्तिक्यबुद्धिस्ते यूयं सुविज्ञतमा इति भावः। अथ च तान्त्रिकाः कुविन्दतुल्या मूर्खा इत्यर्थः। व्यासस्येत्येकवचनेनैवकारेण विगीतत्वं सूचितं। मूलापरिग्रहाच्च भारतादीनां पुराणानाञ्चोपहासः कृतः। मत्स्यपुराणं तु मत्स्यरूपधारिणा विष्णुना मनवे प्रोक्तमिति पृथगुपहसति। मत्स्यस्योपदेश्यान् वा युष्मान् मनुप्रभृतीन् को भाषतां युष्माभिः सह संवादं कः करोतु। यतो मत्स्यानपि को भाषतां। मत्स्या अपि संवादार्हा न भवन्ति तदुपजीविनस्तच्छिष्या भवन्तस्तु दूरे इति। को भाषतां युष्मान् मन्वादीन् मत्स्यान् को वदतु अपि तु न कोऽपि। यतो मत्स्यस्योपदेश्यान् जलस्थलचारिभ्यो ये हीना मत्स्यशिष्यास्तन्निर्देशकारिणः ततश्चोपदेशकापेक्षयोपदेश्यस्य हीनत्वान्मत्स्यशब्देनापि नाभिधेया इति भावः। एवं कूर्म्मपुराणादीनामुपहासः। अथ च मनुसम्बन्धित्वेन सर्व्वेऽपि मानवशब्दवाच्या यथा तथा मत्स्य-

पण्डितः पाण्डवानां स व्यासश्चाटुपटुः कविः ।
निनिन्द तेषु निन्दत्सु स्तुवत्सु स्तुतवान्न किम् ॥ ६५ ॥
न भ्रातुः किन्न देव्यां स व्यासः कामात् समासृजत् ।
दासीरतस्तदासोद्यन्माता तत्राप्यदेशि किम् ॥ ६६ ॥

सम्बन्धिनां मात्स्यशब्दाभिधेयत्वं युक्तं न तु मत्स्यशब्दाभिधेयत्वमिति को मत्स्यानपि भाषतामिति युक्तमुक्तमिति व्याख्येयं । तान्त्रिका इति तन्त्रमधीते वेद तेत्यर्थे वसन्तादेराकृतिगणत्वात् (पा० ४।२।६३) ठक् । मत्स्यस्येति । कृत्यानामिति (पा० २।३। ७१) कर्त्तरि षष्ठी ॥ ६४ ॥

पूर्व्वोक्तमेव व्यासस्याप्रमाणत्वं श्लोकद्वयेनाह । पण्डित इति । पण्डितो बुद्धिमानत एव कविरौत्प्रेक्षिकस्यार्थस्य वर्णकः तथा पाण्डवानां युधिष्ठिरादीनां चाटुनि प्रियवचने पटुः एवम्भूतः स भवद्भिराप्तत्वेनाङ्गीकृतो व्यासस्तेषु दुर्य्योधनादीन् निन्दत्सु न निनिन्द किं? तथा तेषु श्रीकृष्णादीन् स्तुवत्सु सत्सु न स्तुतवान् किं? तेषु निन्दत्सु स्वयमपि निनिन्द तेषु स्तुवत्सु स्वयमपि तुष्टावेति । पूर्व्वविशेषणयुक्तस्यापि व्यासस्य पराधीनत्वात् तत्प्रणीतं भारताद्यप्रमाणमेवेति भावः । अन्योऽपि पण्डितः प्रभुचित्तानुगुणमेव व्यवहरति तद्वदयमपीत्यर्थः ॥ ६५ ॥

नेति । स भवदीयो व्यासो भ्रातुर्विचित्रवीर्य्यस्य देव्यां महिष्यां कामात् स्मरपरवशत्वादनुरागान्न समासृजत् व्यवहरति स्म? किन्तु इति उपहासे श्रुतौ च । अस्मद्बुद्ध्या तावत्

देवैर्द्विजैः कृता ग्रन्थाः पन्था येषां तदादृतौ ।
गां नतैः किं न तैर्व्यक्तं ततोऽप्यात्माऽधरीकृतः ॥ ६७ ॥

कामादेव सङ्गतः । पौराणिकास्तु देवरात् सुतोत्पत्तेर्धर्म्मत्वा-
त्तस्याः सुतोत्पादनार्थं मात्राज्ञप्तस्तस्यां सक्त इति वदन्ति ।
तस्मात्तद्यथा तथास्त्वित्यर्थः । तदा पुत्रोत्पादनोपलक्षिते काले
दास्यां रत आसीदिति यत् प्रसिद्धं तत्र दासीरतेऽपि मात्रा
सत्यवत्याऽदेशि आदिष्टः किं ? कथयतेति प्रश्नः । काकुरुपहा-
सार्थः । अपि तु तत्र तावन्नादिष्टः । तस्मादुभयत्रापि स्मरप-
रवशत्वादेव प्रवृत्तः । एवंविधस्यानायत्तत्वात् तद्वचनमप्रमाण-
मिति भावः । ससासृजत् । दंशसञ्जेति (पा० ६।४।२५) नलोपः
॥ ६६ ॥

इदानीं देवद्विजगोभजनं दूषयति । देवैरिति । देवै-
र्ब्रह्मादिभिः द्विजैर्याज्ञवल्क्यादिभिश्च कृता ग्रन्थाः पुराणानि
स्मृतयश्च त एव येषां भवादृशानां वैदिकानां तदादृतौ तेषां
देवानां द्विजानाञ्चादृतौ आदरे विषये पन्थाः । देवा ब्राह्म-
णाश्चावश्यं भजनीया इत्युपदेशपराः प्रमाणमिति यावत् । स्व-
पूजार्थमेव तैर्ग्रन्था निर्मिताः । तद्वचनग्रन्थप्रामाण्यात् देवादी-
नाद्रियन्त एवम्भूता मूर्खा ये तैर्युष्माभिस्तद्ग्रन्थप्रामाण्यादेव गां
पशुरूपां सुरभिं नतैः भद्भिस्ततः पशोर्गोरपि सकाशात् आत्मा
स्वरूपं व्यक्तं स्पष्टं नाधरीकृतः किं ? नम्रोऽयं च हीनो न कृतः
किं ? अपि तु कृत एव । नमस्कार्य्यापेक्षया नमस्कर्त्तुर्हीनत्वात
पशोरपि सकाशाद्भवन्तो मूर्खतमा इत्यर्थः । व्यक्तं मन्ये इति

साधु कामुकताऽमुक्ता शान्तस्वान्तैर्मखोन्मुखैः ।
सारङ्गलोचनासारां दिवं प्रेत्यापि लिप्सुभिः ॥ ६८ ॥

यावदिति वा । स्वार्थपरवचनस्याप्रामाण्यत्वाद्देवब्राह्मणसुरभिवन्दनं निर्मूलत्वात्त्याज्यमेवेति भावः । देवैर्द्विजैः कृता ये ग्रन्थाः येषां वः पन्थाः प्रमाणं तैर्भवद्भिस्तस्य पथः तेषां देवादीनां वा ग्रन्थादीनां वा आदरणनिमित्तं गां नतैः ततोऽप्यात्मेति पूर्व्ववत् ॥ ६७ ॥

इदानीं परलोकमङ्गीकृत्यापि यज्वनां ब्रह्मचर्य्यादि परिहसति । साध्विति । शान्तविषयभोगपराङ्मुखं स्वान्तं चित्तं येषां तैर्मखोन्मुखैर्गृहीतदीक्षैरपि यज्ञेषु सोत्साहं प्रवृत्तैर्याज्ञिकैः कामुकता सम्भोगलोभिता यदमुक्ता न त्यक्ता तत् साधु युक्तं । यद्वा साध्वी सुखकारिणी सा चासौ कामुकता सा न मुक्ता । शान्तस्वान्तैर्यज्वभिः कामुकता साधु मुक्ता त्यक्ता । साध्विति काक्वा विरुद्धलक्षणया नैव मुक्ता किन्तु सम्भोगैकनिष्ठा एव ते इति व्याख्येयं । सर्व्वत्रापि हेतुगर्भविशेषणमाह । किम्भूतैः सारङ्गलोचनाभिः सुन्दरीभिः सारां श्रेष्ठां तां रसः सारः श्रेष्ठः पदार्थो यस्यां तादृशीं वा दिवं प्रेत्यापि मृत्वापि लिप्सुभिः रम्भादिकाम्ययैव बहुधनव्ययायाससाध्यान् यज्ञानेव कुर्व्वन्ति । तैः कामुकता नैव त्यक्ता । अन्येषान्तु यावज्जीवमेव कामुकत्वं यज्वनां तु मरणानन्तरमपीति प्रेत्यापीत्यनेन सूचितं । तस्माद्दीक्षासमयेऽपि ब्रह्मचर्य्याङ्गीकरणेनात्मा न वञ्चनीय इति भावः, दिवं । न लोकेति (पा० २।३।६९) षष्ठी ॥ ६८ ॥

कः श्रमः क्रियतां प्राज्ञाः प्रियाप्रीतौ परिश्रमः।
भस्मीभूतस्य भूतस्य पुनरागमनं भ्रमः॥ ६९ ॥
उभयी प्रकृतिः कामे सज्जेदिति मुनेर्मतं।
अपवर्गे तृतीयेति भणतः पाणिनेरपि॥ ७०॥

एतदेवोपजीव्याह। क इति। हे प्राज्ञाः प्रकर्षेणाज्ञा भो मूर्खाः तस्माच्छ्रमः शान्तिः कः अपि तु न कोऽपि। शमाङ्गीकरणेन परलोकसाधनेऽपि काम्यमानकमनीयकामिनीसम्भोगफलत्वाद्वृथैव शान्तिस्तस्मान्न कार्य्येत्यर्थः। तर्हि किं कार्य्यमित्यत आह। प्रियायास्तरुणरमणीयरमण्याः प्रीतौ प्रेम्णि तस्याः सुखोत्पादने विषये परिश्रमो भूयान् प्रयासः क्रियतां कर्त्तव्यः। शान्तिः का अपि तु न कापि। भो प्राज्ञा बुद्धिमन्तस्सारतम्यविचारचतुराः प्रियाप्रीतौ प्रयासः कार्य्यः। मद्यःसुखहेतुत्वादिति वा। परस्त्रीगमने लोकान्तरे निरयादि भविष्यतीत्याशङ्क्याह भस्मीभूतस्य मृतस्य देहस्य भूतस्य जातस्य देहिनो वा पुनरागमनं लोकान्तरे क्रिम्यादिदेहप्राप्तिरिति यद् भ्रमः, परलोकस्यैवाभावात्, ततसङ्गानेऽपि चदहस्यैवात्मत्वात्तस्य च भस्मीभूतत्वात् केन नरकादि भुज्यते। तस्माद्यावज्जीवं यथेच्छं सुखं भोक्तव्यमिति भावः। प्रियाप्राप्ताविति च पाठः॥ ६९ ॥

मोक्षाधिकाराभावात् ब्रह्मचर्य्यादिपरित्यागेन काम एव सेवनीय इति शब्दच्छलेन वृद्धसम्मत्या स्वीयं मतं द्रढयति। उभयीति। अपवर्गे तृतीयेति भणतः पाणिनेरपि मुनेः 'उभयी

विभ्रत्युपरि यानाय जना जनितमज्जनाः ।
विग्रच्छायाग्रतः पश्चाद्गत्वरीरभ्रविभ्रमं ॥ ७१ ॥

प्रकृतिः स्त्रीपुंसलक्षणा द्वयोर्व्यक्तिः कामलक्षणे पुरुषार्थे मैथुने धर्म्मे सज्जेत् आसक्ता भवेदिति मतमन्तःकरणाभिप्रायो लक्ष्यत इति शेषः । अयमाशयः । अपवर्गे तृतीयेति वदतः पाणिनेः मैथुनधर्म्मे अशक्तेन नपुंसकेन तीर्थयात्रा ब्रह्मचर्य्यादिद्वारा मोक्षे प्रयतितव्यं स्त्रीपुंसलक्षणा व्यक्तिर्मैथुने शक्तत्वात् कामभोगे अधिकारिणी न तु तीर्थयात्राद्वारा मोक्ष इति । तस्मात् कामाश्चैव कार्य्येत्यर्थः । न केवलमस्मदाचार्य्यस्यैव सम्मतं किन्तु भवदीयस्य पाणिनेरपीत्ययमेवार्थः । अथ चैवं वदतः पाणिनेरप्ययमाशयः । धर्म्मार्थलक्षणा द्वयी व्यक्तिः, अथ च पूर्व्वप्रयोज्यत्वात् प्रकृतिः कामे सम्बद्धा भवेत् । धर्म्मार्थकाममोक्षाः स्युरित्यादौ कामाव्यवहितपूर्व्वत्वेन तस्या उक्तत्वात् । तृतीया तु कामलक्षणा व्यक्तिरथ च पूर्व्वप्रयोज्यप्रकृतिरपवर्गे सम्बद्धुमर्हा । अपवर्गाद्व्यवहितपूर्व्वत्वेन तस्या उक्तत्वात् । तस्मादपवर्गे निमित्ते कामाख्या तृतीयैव व्यक्तिर्युक्ता इत्युक्तत्वात् । मोक्षं प्रति कामस्यैव हेतुत्वात् प्रीतिरेव सुतरां कार्य्येति भावः । अपवर्गः फलप्राप्तिरिमं सूत्रार्थं शब्दकृत्वेन अन्यथोत्प्रेक्ष्य वृद्धसम्मतिः स्वीयमतसमर्थनार्थं दर्शिता । तृतीया प्रकृतिः षण्ढ इत्यमरः । उभयोत्ययजः स्थानिवत्वात्तयप्ग्रहणात् ङीप् । सज्जेत् । अर्हार्थे लिङ् ॥ ७० ॥

गङ्गास्नायिनो दूषयति । उपरियानाय स्वर्गं गन्तुं अथ

एनसानेन तिर्य्यक् स्यादित्यादिः का विभीषिका ।
राजिलोऽपि हि राजेव स्वैः सुखी सुखहेतुभिः ॥ ७२ ॥

चोर्द्धदेशं गन्तुं जनितमज्जनाः कृतगङ्गास्नानाः, अथ च कृताधोगमना जना अग्रतो युद्धाय पश्चाद्गलरः पश्चाद्गमनशीलः उरभ्रो मेषस्तस्य विभ्रमं सादृश्यं बिभ्रति धारयन्ति। मज्जनादूर्द्धगमनं विरुद्धमिति विपरीतार्थकारित्वान्मेषवन्मूर्खा एवेति गङ्गास्नानेन स्वर्गो भवति इति भ्रान्तिर्वर्तत भावः। विग्रहस्येति पाठ उपरि यानाय कृतगङ्गास्नाना मार्गे गच्छतो मेषस्य भ्रान्तिं सादृश्यं धारयन्ति। शीतबाधया नीचग्रीवतया गमनात् शरीरस्याग्रतः शिरोदेशे पश्चात् कटिदेशे च हस्तयोर्धारणात् कृतगङ्गास्नानानां गङ्गास्नानसमयेऽपि मेषतुल्यत्वं। यथा जलमध्येऽघमर्षणे दक्षिणकरेण प्राणानायच्छतः पृष्ठस्थितबाहुर्भवति, तदा नीचग्रीवतया उरभ्रसादृश्यं पश्चात्स्थितहस्तस्य च पुच्छसादृश्यमिति मेषतुल्यास्ते जनाः। उर्द्धर्जिगमीषोर्नीचैर्भावस्य विरुद्धस्य करणादुपहास इति व्याख्येयं। यानाय विग्रहायेति। तुमर्थेति (पा० २।३।१५) चतुर्थी ॥ ७१ ॥

परलोकसङ्गेऽपि देहान्तरप्राप्तावपि च न किञ्चिदनिष्टमित्याह। एनसेति। अनेन लोकैः क्रियमाणेन ब्रह्महत्याद्येनसा पातकेन तिर्य्यक् क्रिमिपक्ष्यादिः स्याद्भवेदित्यादिरित्येवम्प्रकारा का विभीषिका भयोपदर्शनं किं? अपि त्वनिष्टहेतुत्वाभावान्न किञ्चिदेतत्। हि यस्माद्राजिलोऽपि हीनः सर्पविशेषो

हतास्तेऽद्दिवि दीव्यन्ति दैत्या दैत्यारिणा रणे।
तत्रापि तेन युद्ध्यन्तो हता अपि तथैव ते ॥ ७३ ॥

जन्मव्याल्तोऽपि स्वैः स्वीयैः सुखहेतुभिर्भेकभक्षणजलाहारसजातीयतरुणीसम्भोगादिभिः सुखकारणैः राजेव सुखी। स्वजात्यनुगुणाहारविहारसम्भोगादीनि विचित्राण्येव सर्व्वेषां सुखसाधनानि। ततः स्वपापफलभूते तिर्य्यग्योनित्वे जातेऽपि सुखसद्भावान्न किञ्चिदनिष्टमित्यर्थः। समौ राजिलदुण्डुभावित्यमरः। विभीषिका धात्वर्थनिर्देशे ण्वुल्तृचाविति (पा० ३।२।१३३) ण्वुलि, भियो हेतुभये षुगिति (पा० ७।३।४०) षुगागमं प्रत्ययस्थादित्। (पा० ७।३।४४) इतीत्वम् ॥ ७२ ॥

युद्धे हतानां स्वर्गप्राप्तिरित्यादि भारतवचनं दूषयति। हता इति। सङ्ग्रामे हताः सम्मुखं पतिता दिवि दिव्यन्ति क्रीडन्ति इति चेद्यदि तर्हि दैत्यारिणा विष्णुना रणे हताः हिरण्यकशिपुप्रभृतयो दैत्यास्तत्रापि स्वर्गेऽपि तेन सह युद्ध्यन्तो युद्धं कुर्व्वन्तु। यस्माद्धता मारिता अपि दैत्या भवदीयमते तथैव रणे सन्मुखपतनात् स्वर्गे जीवन्त एव। ततस्त यं यं वापि स्मरन् भावमित्यादिवचनप्रामाण्यान्मरणसमयेऽपि दैत्यैर्दैत्यारिणा सह विरोधस्य चित्ते धृतत्वात् स्वर्गप्राप्तावप्यसुरभावस्य तथैव वर्त्तमानत्वात् तत्रापि तेन सह योद्धव्यमेव। तत्रापि युद्ध्यन्त एवेति कुत्रचित् पुराणादौ नाकर्ण्यते। तस्माद्रणे पतितानां मरणादधिकं किञ्चिदपि नास्ति। रणादपलायनात् स्वर्ग

स्वश्च ब्रह्म च संसारे मुक्तौ तु ब्रह्म केवलं।
इति स्वोच्छित्तिमुक्त्युक्तिर्वैदग्धी वेदवादिनाम्॥ ७४॥

इत्यादि चात्रधर्म्मप्रतिपादकं वाक्यजातमप्रमाणमेवेति भावः। हता अपीत्यत्र हतौ अपीति पदेन हतौ हिंसायां कृतायामपि मरणे प्राप्तेऽपि। अन्यत् पूर्ववत्। हतावपीति वा पाठः॥ ७३॥

इदानीं मायावेदान्तसिद्धान्तं दूषयति। स्वमिति। संसारे संसरणावसरे स्वं जीवात्मरूपः प्रपञ्चः, तथा अनाद्यविद्याविलासवासनाविद्यमानभेदं ब्रह्म चेति द्वयमप्यस्ति। तौ ससप्राधान्यबाधनार्थौ। मुक्तौ तु मोक्षे सञ्जाते एनगाविद्यकजीवव्यवहारनिवृत्तेः केवलं स्वप्रपञ्चरहितं ब्रह्मैव वर्त्तते। घटोपाधिनिवृत्तेर्घटाकाशनिवृत्तावाकाशमात्रस्यावस्थानवत् संसारोपाधिनिवृत्तेः स्वनिवृत्तौ एकमेवाद्वितीयं ब्रह्मेति ब्रह्मात्मना सम्पत्तिर्भवतीत्यर्थः। तथापि प्रपञ्चस्य शुक्तिरजतवन्मिथ्यादृश्यत्वादित्थं स्वस्योच्छित्तिरेव मुक्तिस्तस्या उक्तिर्वचनं तत्र वैदग्धी नानारूपोक्तिनिरूपणकौशलं वेदवादिनां वेदान्तमतानुसारिणां। आत्मार्थं सर्व्वं तस्योच्छेदः प्रतिपादित इति महत् कौशलमिति मायावेदान्तमतोपहासः। वेदवादिनामित्यनेन च्छान्दसास्त किञ्चिदपि न जानन्तीति सूचितम्। अपि च संसारे द्वयं मुक्तौ त्वेकं, ततश्च द्वय परित्यज्यात्मोच्छेदपरःसरमेकं मूर्खादन्यः कोऽपि नेहते। तस्मान्मूर्खा एव त इति भावः। वेदवेदिनामिति च पाठः। वेदवेदिनोति पाठे स्वोच्छित्तिमुक्त्युक्तौ

मुक्तये यः शिलात्वाय शास्त्रमूचे सचेतसाम्।
गौतमं तमवेत्यैव यथा वित्थ तथैव सः॥ ७५॥

वैदग्धीरूपा वेदार्थज्ञातता। आत्मविनाशो मुक्तिर्वेदार्थपरिज्ञानं नामेत्युपहासः॥ ७४॥

न्यायवैशेषिकसिद्धान्ताभिमतां मुक्तिं दूषयति। मुक्तय इति। यः सचेतसां चैतन्यवतां सुखदुःखाद्यनुभवाभावात् शिलात्वाय पाषाणावस्थारूपायै मुक्तये मुक्तिं प्रतिपादयितुं शास्त्रमूचे न्यायदर्शनं निर्ममे, तदत्यन्तविमोक्षोऽपवर्ग इत्यनेन सकलविशेषगुणोच्छेदनान् मुक्तिरिति मुक्तस्य शिलातुल्यत्वं प्रत्यपादयत्, यूयं तं स्वयमेवावेत्य विचार्य्यैव गौतमं एतन्नामानं मुनिं यथा वित्थ जानीथ स एव तथा नान्य इत्यर्थः। स गौतम इति यथा युष्माकं सम्मतस्तथा ममापीत्यर्थः। वैशेषिकास्तु तदीयमतानुसारिण इति भावः। अथवा नायं परं नाम्ना गौतमः किन्तु प्रकृत्या गोर्गौतमः पशुरेव। सचेतसां शिलारूपमुक्तिप्रतिपादनादित्यर्थतोऽपि गौतम एवेति भावः। आत्यन्तिकी दुःखनिवृत्तिर्मोक्षः इति सुखमपि दुःखानुषङ्गित्वाद्धेयमिति वदता, सशरीरं वाव सन्तं प्रियाप्रिये न स्पृशत इति च तत्र प्रमाणमुदाहरतां वैशेषिकाणामपीयमेव युक्तिः सम्मतेति न्यायवैशेषिकसिद्धान्तोपहासोऽनेन कृत इति॥ ७५॥

दारा हरिहरादीनां तन्मग्नमनसो भृशम्।
किं न मुक्ताः पुनः सन्ति कारागारे मनोभुवः॥ ७६॥
देवश्चेदस्ति सर्व्वज्ञः करुणाभागवन्ध्यवाक्।
तत्किं वाग्व्ययमात्रान्नः कृतार्थयति नार्थिनः॥ ७७॥

हरिहरादिध्यानान्मुक्तिरिति वचनानि दूषयति। दारा इति। हरिहरादीनां लक्ष्म्यादयो दाराः स्त्रियो भृशं निरन्तरं तेष्वेव मग्नं ध्याननिश्चलं मनो यासां एवंविधा अपि किं कस्माद्धेतोर्मनोभुवः कारागारे सन्ति? सदैव कामपरवशास्तिष्ठन्तीत्यर्थः। तस्मान्न पुनर्मुक्ता इति। एतेन

सकृदुच्चारितं येन शिव इत्यक्षरद्वयं।

तथा।

मय्यर्पितमनोबुद्धिर्यः स मामेति पाण्डव॥

इत्यादिवचनैर्हर्य्यादिध्यानमात्रं मोक्षकारणमिति प्रतिपादयतः शैवादिशास्त्रस्य मुक्त्यभावेन व्यभिचारित्वादप्रामाण्यम्॥ ७६॥

ईश्वरवादिनो नैयायिकादीन् दूषयति। देव इति। भूम्यादि सकर्तृकं कार्य्यत्वाद् घटादिवदित्यादिना विचित्रस्य कार्य्यजातस्यास्मदादिविलक्षणेन कर्त्रा भवितव्यमिति सर्व्वज्ञस्य परमकारुणिकस्य सत्यवचसः सर्व्वकर्त्तुः परमेश्वरस्य साधितत्वात् सर्व्वज्ञः कालत्रयवस्तुविज्ञानवांस्तथा करुणाभाक् कृपावान् तथा अवन्ध्या सत्या वेदरूपा वाक् यस्य, नैयायिकादिमते ईश्वरप्रणीतत्वादाप्तवचनत्वाद्वेदानां प्रामाण्यात् स्वतः प्रामाण्यस्य

भविनां भावयन् दुःखं स्वकर्म्मजमपीश्वरः ।
स्यादकारणवैरी नः कारणादपरेऽपरे ॥ ७८ ॥

दूषितत्वादित्यर्थः। अथ च सफला यथोक्तार्थसाधिका वाग् यस्य स सत्यवाक्। भवत्सिद्धान्तेन देवश्चेदस्ति तर्हि अर्थिनो भुक्तिमुक्त्याद्यभिलाषिणो नोऽस्मान्, भवन्तः प्राप्तमनोरथा भवन्त्विति वाग्व्ययमात्राद् वाग्विसर्गमात्ररूपेण व्ययेन किं कस्मान्न कृतार्थयति। तस्मान्नास्तीति भावः। अनेनाप्युपहासः सूचितः॥ ७७॥

इदानीं कर्म्ममीमांसकमतावलम्बिनार्य्योपालम्भनमाह । भविनामिति। भविनां संसारिणां स्वकर्म्मजं स्वकृतपापजातं पापफलभूतं दुःखं भावयन् कुर्व्वन्, स्वयं भवदपि भावयन् पुनः स्वयं प्रवर्त्तयन् ईश्वरो नोऽस्माकमकारणवैरी दायादत्वादिहेतुं विनैव शत्रुः स्यात्। अपरेऽन्ये परेऽन्ये पुनः कारणाद्दारचौर्य्याद्युपहारबन्धुवधादेव वैरहेतोर्वैरकारिणो भवन्ति। भविनां न इति वा सम्बन्धः।

ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा।

कर्म्मफलदात्रेश्वरेण चेत् कर्म्मानुगुणं फलं भवेत् तर्हि ईश्वरेण कर्त्तव्यं न किञ्चिदस्ति। तादृशात् कर्म्मण एव दुःखोत्पत्तेः। एवं सति स चेदनुभावयति तर्ह्यस्मदादीनां द्वेष एव तेन कृतः स्यात्। तस्मात्तस्य दयालुत्वादयो गुणा गताः। तस्मात् कर्म्मण एव प्राधान्यादीश्वरो नास्त्येवेति भावः। पञ्चमी भयेन (पा० २। १।३७) इत्यत्र पञ्चमीति योगविभागात् कारणाद्वैरीति समासं कृत्वा पश्चान्नञ्समासः॥ ७८ ॥

तर्काप्रतिष्ठया साम्यादन्योन्यस्य व्यतिघ्नताम् ।
नाप्रामाण्यं मतानां स्यात् केषां सत्प्रतिपक्षवत् ॥ ७९ ॥

अन्यदप्याह । तर्केति । प्रमाणानुग्राहकयुक्तिमद्वरूपस्य तर्कस्याप्रतिष्ठा तया पर्य्यवसानेन कृत्वा यत् साम्यं तुल्यत्वं तस्मात् तुल्यत्वाद्धेतोः सुन्दोपसुन्दन्यायेन विनिमयेन अन्योऽन्यं परस्परं व्यतिघ्नतां दूषयतां केषां मतानां प्रमाणत्वेन सम्मतानामनुमानादीनां, अथ च सत्वामनैकात्म्यनानात्म्यमेश्वरत्वानीश्वरत्वादि प्रतिपादयतां दर्शनानामप्रामाण्यं न स्यादपि तु सर्व्वेषामपि तुल्यबलत्वेन परस्परविरोधादप्रामाणत्वमेव स्यात् । किञ्च सत्प्रतिपक्षो विरुद्धसाध्यसाधको हेतुर्यस्य तदनुमानं सत्प्रतिपक्षं तद्वत् । तस्यैवाप्रामाण्यं स्यादिति सम्बन्धः । वैशेषिकादयो यथा कृतकत्वाद्घटवदनित्यं शब्दं वदन्ति । मीमांसका निरवयवत्वादात्मवन्नित्यं शब्दं वदन्ति । तत्रान्तरेण पूर्व्वप्रदर्शितं दोषविशेषं पूर्व्वस्य यथाऽप्रामाण्यं तद्वदित्यर्थः । सत्प्रतिपक्षानुमाने यथाऽप्रामाण्यं द्वयोरपीत्यर्थः, सत्प्रत्यर्थं वृत्तिः, तर्क्यन्ते निश्चीयन्तेऽर्था यैस्ते तर्का अनुमानानि तेषामप्रतिष्ठया समबलत्वाद्वितीयसद्भावेनानिश्चितस्वरूपत्वेनेत्यर्थ इति च व्याख्येयं । गगनं नित्यममूर्त्तद्रव्यत्वादात्मवत् । गगनमनित्यमस्मदादिवाह्येन्द्रियग्राह्यगुणाधारभूतत्वाद्घटवदिति इति सत्प्रतिपक्षानुमानयोरिवेत्यर्थः ॥ ७९ ॥

अक्रोधं शिक्षयन्त्यन्यैः क्रोधना ये तपोधनाः।
निर्द्धनास्ते धनायैव धातुवादोपदेशिनः॥ ८०॥
किं वित्तं दत्थ तुष्टेयमदातरि हरिप्रिया।
दत्त्वा सर्व्वं धनं मुग्धो बन्धनं लब्धवान् बलिः॥ ८१॥

अन्यच्चाह। अक्रोधमिति। क्रोधना अकारणरोषणा ये तपोधनास्तपःसर्व्वस्वाः दुर्वासःप्रभृतयो ये ते क्रोधो बह्वनर्थकारित्वात् सर्व्वथा त्याज्य इति अक्रोधं क्रोधाभावमन्यैः प्रयोज्यैः शिक्षयन्ति, अन्ये क्रोधाभावं शिक्षन्ते तान् क्रोधो न कार्य्य इति प्रयोजयन्ति उपदिशन्तीति यावत्। स्वयन्तु क्रुद्धा यत् किञ्चिदाचरन्ति अन्यांस्त्वेवमुपदिशन्तीत्युपहासः। तथा येऽतिनिर्धनास्ते धनायैव स्वस्य धनप्राप्त्यर्थमेव लोहादिधातूनां सम्बन्धिनं वादं स्पष्टं वचनं अन्योन्यरिपुमित्राभावज्ञानेन धातूनां संयोगात् स्वर्णरूप्यादि मया कर्त्तुं शक्यते मदुपदेशात् त्वमपि कुरु इत्येवं रूपं धातुवादं उपदिशन्तीत्येवंशीला भवन्ति। परन्तु स्वस्मै किञ्चित्तेन दातव्यं इत्येवं परप्रतारणाबुद्ध्यैव न तु तत्त्वतः। यतः स्वयं निर्धना इति हेतुः। तादृक्सामर्थ्यसद्भावे तेषामधनत्वं न युज्यते। ततश्च स्वयमतीर्णः स कथं परांस्तारयति। अनेन धातुवादिनामप्युपहासः। अन्यैः प्रयोज्यकर्त्तुरनभिहितत्वात् कर्त्तरि तृतीया। क्रोधनाः। क्रुधमण्डार्थेभ्यश्चेति (पा० ३।२।१५१) युच्॥ ८०॥

इदानीं दानधर्म्मं दूषयति। किमिति। भो जना यूयं वित्तं

दोग्धा द्रोग्धा च सर्व्वोऽयं धनिनश्चेतसा जनः ।
विहृज्य लोभसंक्षोभमेकदा यद्युदासते ॥ ८२ ॥

स्वर्णादि यज्ञादौ दक्षिणात्वेन पात्रेभ्यः किमिति दत्थ अपि तु कस्मैचिदपि न देयं यस्मादियं हरिप्रिया विष्णोः प्रेयसी सम्पद्रूपा लक्ष्मीः अदातरि अकृतदानोपभोगे कृपणे तुष्टा प्रीतिं प्राप्नोति तत्रैव वसतीत्यर्थः । दाने वाधकमाह । यस्मान्मुग्धो मूर्खो दानव्यसनपरः तयोदर्कविचारशून्यः स्मृतिपुराणादौ श्रद्धावांश्च वलिः सर्व्वं धनं श्रीवामनाय दत्त्वा बन्धनं लब्धवान्, वाक्पाशेन बद्धः सन् पातालप्रवेशरूपं बन्धनं प्राप्तवान् इति पुराणकथा । दानं कर्त्तव्यमित्यत्र स्मृत्यादिकमेव प्रमाणं वलिप्रभृतीनां दानमशुभोदर्कं जातमित्यत्रापि तदेव प्रमाणं । तथा च कर्तृद्रव्यपात्रशुद्ध्यादियुक्तेऽपि दानविधौ सति विरुद्धफलदर्शनाददातरि च लक्ष्म्याः स्थैर्य्यदर्शनादन्वयव्यतिरेकाभ्यां दानधर्म्मः सर्व्वथा त्याज्य एवेत्युक्तमिति भावः । हरिप्रियेत्यनेन श्रीहरिणापि याचकत्वाङ्गीकारात् लक्ष्मीप्रीत्यर्थमदातृत्वमेवाङ्गीकृतमिति च सूचितं ॥ ८१ ॥

पात्राभावाद्दानं न कर्त्तव्यमित्याह । दोग्धेति । अयं प्रत्यक्षग्रहणयोग्यः सर्व्वोऽपि जनो धनिन आढ्यान् नरान् दोग्धा दोहनशीलः स्वामिभक्तदानादिविध्युपदेशादिना येन केनाप्युपायेन धनिकेभ्यो धनमाकर्षतीत्यर्थः । तथा द्रोग्धा मनसा तद्विषये द्रोहकरणशीलश्च, कथमेनं हन्यामेतस्य धनादि च कथं

दैन्यस्यायुष्यमस्तैन्यमभक्ष्यं कुक्षिवञ्चना।
स्वाछन्द्यमृच्छतानन्दकन्दलीकन्दमेककम्॥ ८३॥

गृह्णीयामित्यादिप्रकारेण तद्विषये द्रोहमेव चिन्तयतीत्यर्थः। सर्व्वोऽप्येवमिति कथमुच्यत इत्यत आह। लोभसंक्षोभं द्रव्याद्यभिलाषजनितं मनसो नितरां क्षोभं कर्म्मण्यपारवश्यलक्षणविकारं अभिलाषातिरेकं वा विसृज्य यद्युदासते उदासीना भवन्ति परस्वाकर्षणादेरुपरता भवन्ति तर्ह्येको द्वौ वा न तु तृतीयस्तादृशस्त्वन्यीयांस्तस्माद्युक्तमेवोक्तमित्यर्थः। तस्मात् परप्रतारणप्रयोजनक एव दानार्थं धर्म्माद्युपदेश इति भावः। परप्रतारकत्वात् पात्रत्वाभावाद्दानं कस्मैचिदपि न कर्त्तव्यमित्यर्थः। विसृष्टेति पाठे लोभातिरेकं बलान्निरुध्येत्यर्थः। दोग्धा, द्रोग्धा ताच्छील्ये तृन्। तद्योगे च, न लोकेति (पा० २।३।६९) षष्ठीनिषेधाद्द्रुनिन इति द्वितीया। एको द्वौ वा एक द्वाः। सङ्ख्याव्ययेत्यादिना (पा० २।२।२५) समासे कृते बहुव्रीहौ, सङ्ख्येय इति (पा० ५।४।७३) डच्समासान्तः॥ ८२॥

इदानीं विधिनिषेधजातं दूषयन्नुपसंहरति। दैन्येति॥ अस्तैन्यं चौर्य्याभावो दैन्यस्य निर्द्धनत्वस्यायुष्यं वर्द्धकमित्यर्थः। चौर्य्यं यावन्न क्रियते तावद्दैन्यं नापयाति तस्मात्तत् कर्त्तव्यमेवेति भावः। तथा अभक्ष्यं लशुनगृञ्जनग्राम्यशूकरादि, तद्वर्जनमिति यावत्, तत्कुक्षिवञ्चना, स्वोदरविप्रलम्भनमेव। स्वादूत्तममभक्ष्यमिति परित्यागे जठरवञ्चनैव भवति न तु स धर्म्मः। तस्मात् किं बहुना

इत्थमाकर्ण्य दुर्वर्णं शक्रः सक्रोधतां दधे ।
अवोचदुच्चैः कस्कोऽयं धर्ममर्माणि कृन्तति ॥ ८४ ॥
लोकत्रयीं त्रयीनेत्रां वज्रवीर्यस्फुरत्करे ।
क इत्थं भाषते पाकशासने मयि शासति ॥ ८५ ॥

आनन्दस्य सकलसुखस्य कन्दलो प्ररोहः कन्दं मूलभूतमेककं असहायं केवलं स्वाच्छन्द्यं स्वेच्छाचारित्वं ऋच्छत आश्रयत । श्रौतस्मार्त्तसकलविधिनिषेधान् परित्यज्य सर्व्वदुःखहेतुत्वात् स्वेच्छाचारमेव कुरुतेत्युपदेशानस्मत्समाकर्ण्यतेति शेषः । आयुष्यं । तस्मै हितमिति (पा० ५।१।५) यत् । असेन्यं । सेनशब्दात् सेना-द्यन्नलोपश्चेत्यत्र (पा० ५।१।१२५) सेनादिति योगविभागात् यति, अर्थाभावेऽव्ययीभावः । एवमभक्ष्येत्यत्रापि । विन्दतेति वा । विद्लृ लाभे लोट् ॥ ८३ ॥

इत्थमिति । शक्रः, इत्थं पूर्व्वोक्तं दुर्व्वर्णं वेदादिदूषकचार्वा-कस्य दुष्टवर्णवाक्यमाकर्ण्य सक्रोधतां दधे सकोपोऽभूदित्यर्थः । अनन्तरं उच्चैर्नितरां तारस्वरं इत्यवोचत् । इति किं । एतेषु मध्ये अनिश्चितरूपोऽयं कस्कः श्रुत्यादिमूलानि धर्मरहस्यभू-तानि वेददूषणात् कृन्तति छिनत्ति । कोऽयं कोऽयं एवं भाषत इति वक्तृविशेषनिश्चयाय कोपाभिव्यञ्जकमम्भ्रमोक्तौ कस्कशब्दः कस्कादित्वात् साधुः ॥ ८४ ॥

क्रोधमेव द्योतयन् वेदप्रामाण्यं प्रतिजानीते । लोकेति । पाकशासने पाकासुरमर्द्दिनि मयि त्रयीनेत्रां प्रसिद्धचतुर्दयो-

वर्णासङ्कीर्णतायां वा जात्यलोपेऽन्यथापि वा ।
ब्रह्महादेः परीक्षासु भङ्गमङ्ग प्रमाणय ॥ ८६ ॥

गोचरार्थगोचरीकरणसमर्थवेदत्रयरूपनेत्रां वेदविहिताचरणवेदनिषिद्धवर्जनकारिणीं लोकत्रयीं धर्मस्थापनपूर्वं शासति परिपालयति सति क इत्थमेवं सकलधर्मदूषणप्रकारेण भाषते। किम्भूते। वज्रवीर्येण स्फुरन् प्रकाशमानः करो यस्य तस्मिन्। वज्रेत्यादिना वेदादिनिन्दकस्य कण्ठच्छेदसामर्थ्यं स्वस्य सूचितम्। मयीति करेण हृदयस्पर्शनपूर्वं क्रोधाहङ्काराविष्काराभिनयः। वज्रहस्तः पुरन्दर इत्यादिवाक्यप्रतिपाद्ये मयि प्रत्यक्षदृश्ये सति श्रुतिप्रामाण्यं को वान्यथा कर्त्तुं समर्थ इति। वज्रवीर्येत्यनेन विग्रहवत्त्वं सूचितं। ग्रावाणोऽञ्जनवत्, अग्निहोत्रं त्रयीत्यादि वेदाप्रामाण्यप्रतिपादनं चार्वाकवाक्यं दूषितमिति ज्ञेयं। शासति मयि शासन्तं मामनादृत्येत्यनादरे सप्तमी वा ॥ ८५ ॥

श्लोकद्वयेन शुद्धिर्वंशद्वयीत्यादि यज्जातिदूषणं कृतं तत्परिहरति। वर्णेति। अङ्ग रे चार्वाक ब्राह्मणादिवर्णानामसङ्कीर्णतायां सत्यां अन्योन्ययोनिसङ्कराभावे सति यो जात्यलोपो ब्राह्मणत्वादिजातेर्लोपाभावः सद्व्यवहारविषयत्वं तस्मिन् वा विषये ऽन्यथापि वर्णसङ्कराज्जात्यभावे वा विषये परीक्षासु शुद्धत्वादिज्ञापकेषु स्मृत्याद्युक्तेषु जलादिदिव्येषु विषये ब्रह्महादेर्ब्राह्मणक्षत्रियादिवधकारिणोऽभियोज्यस्य भङ्गं पराजयं

ब्राह्मण्यादिप्रसिद्धाया गन्ता यन्नेक्षते जयम्।
तद्विशुद्धिमशेषस्य वर्णवंशस्य शंसति॥८७॥

प्रमाणय सन्दिग्धस्यार्थस्य कोऽत्यन्तरनिरासेन निश्चायकं कुरु। यदि ब्राह्मणत्वादिशुद्धिर्न स्यात्तर्हि ब्रह्मवधादौ कृतेऽपि ब्रह्महा नाप्नोति प्रतिज्ञातत्वभिङ्गभूतो भङ्गो न स्यात्। भवति च तावत्तस्माद्भङ्गेनैव हन्यमानस्य तत्पित्रादिपरम्परायाश्च सङ्कीर्णत्वाद् ब्राह्मण्यादिजातेरस्तित्वं कथितं। यत्र च सङ्कराज्जातिशुद्धिर्नास्ति तस्य वधादौ कृतेऽपि ब्रह्महत्यादिप्रतिज्ञाकृतो भङ्गो नास्त्येवेति। वर्णसङ्कराज्जातिलोपे व्यतिरेकमुखेन भङ्ग एव प्रमाणं धूम इव वह्न्यभावेऽपीत्यर्थः। अङ्गेति प्राकृत्यद्याति सम्बोधनं। मिथ्यातत्त्वपरीक्षायामभियोक्तुर्भङ्गेऽभियोज्यजातिशुद्धिः पातित्याभावश्च। अभियोज्यभङ्गे तु हन्यमानादेर्जातिशुद्धौ सत्यामपि अभियोज्यस्यैव सङ्कीर्णजातित्वं पातित्यञ्चेति निश्चयसिद्धेर्भङ्गमेव प्रमाणयत्यर्थ इति व्याख्येयं। यथा सति व्याख्या ज्ञातव्या॥८६॥

पूर्व्वोक्तमेव द्रढयति। ब्राह्मण्येति। ब्राह्मण्यमादिर्यस्य क्षत्रियादिजातिविशेषस्य तेन प्रसिद्धायां यद्वा ब्राह्मणी आदिर्यस्याः क्षत्रियादिस्त्रियाः सा ब्राह्मण्यादिः सा चासौ प्रसिद्धा च तस्या इयमुत्तमा ब्राह्मणीत्यादिप्रकारेण रूढयाः स्त्रियः गन्ता कामुकस्तां संभुञ्जानो नरो दिव्ये जयं न ईक्षते पश्यतीति, यत्, न प्राप्नोतीत्यर्थः। तज्जातीयानीक्षणमेव कर्त्तृ अशे-

जलानलपरीक्षादौ संवादो वेदवेदिते।
गलहस्तितनास्तिक्यां धिक् धियं कुरुते न ते॥ ८८॥

यस्य वर्णवंशस्य ब्राह्मणादिवर्णसङ्घस्य मातापित्रादिपरम्परया विशुद्धिर्नितरां निर्दोषत्वं शंसति कथयति। ब्राह्मणोव्यभिचारी नरो ब्राह्मणोऽहं ब्राह्मणीं नागममिति प्रतिज्ञाय यदा दिव्यं करोति तदा स पराजयत एवेति तावत्प्रत्यक्षं। तथा च गम्याया गन्तुश्च पारदार्यादिदोषदूषितत्वेऽपि तन्मातापित्रादि परम्पराया ब्राह्मण्यादिविशुद्धिः तत्पराजयेनैव स्पष्टं कथिता। यदि जातेः शुद्धिर्नाभविष्यत् तर्ह्येवं प्रतिज्ञायां कृतायामपि तयोर्ब्राह्मणत्वाभावाद्भङ्गो नाभविष्यत्। स तु दृश्यत इति भङ्ग एवान्यथानुपपत्त्या जातिशुद्धौ प्रमाणमित्यर्थः। ब्राह्मण्यादिप्रसिद्धायां गन्ता ना पुरुषो यदजयं भङ्गमीक्षते तद्भङ्गेक्षणमिति वा व्याख्या। गन्तेति तृच्। अन्यथा। न लोकेति(पा० २।३।६९।) षष्ठ्यभावः स्यात्। प्रसिद्धायामिति पाठे विषयसप्तमी। अन्या व्याख्या क्लिष्टत्वादुपेक्ष्या॥ ८७॥

इदानीं संवादादपि वेदस्य प्रामाण्यमित्याह। जलेति। हे चार्वाक वेदेन वेदिते बोधिते वेदमूलजलानलयोस्ताभ्यां वा या परीक्षा शुद्धत्वनिश्चयः स आदिर्यस्य तुलादिव्यादेस्तादृशेऽर्थे संवादो यथोक्तदर्शनरूपः स ते तव धियं बुद्धिं गलहस्तितं बलान्निर्वासितं नास्तिक्यं यस्यास्तां न कुरुते धिक्। वाक्यार्थः कर्म। अनुचितमेतदित्यर्थः। जलदिव्ये हि जलमग्नः पुरुष आकर्णपूर्ण-

पुरुषमुक्तशरप्रत्यानयनमपेक्षमाणो यद्यनानीते शरे उन्मज्जति तर्ह्येवाशुद्धः, आनीते तु शुद्ध इति वेदोक्तं जलदिव्यं, तच्च तथैव दृश्यत इति संवादः । वह्निदिव्ये तु तप्तलोहादौ दाहादाहाभ्यामशुद्धिशुद्धी इत्युक्तं वेदेन । तत्रापि संवादः । तस्मिन् प्रामाण्यहेतौ संवादे सत्यपि नास्तिक्यं न जहातीत्याश्चर्य्यम् । मूर्खतरोऽसीति भावः । तव धिग्धियं निन्द्यां बुद्धिं निराकृतनास्तिक्यां न कुरुतेऽपि तु करोत्येव । दूषयतीत्यर्थः । तव धिक् निन्द्यां न करोति अपि तु धिक्करोत्येवेत्यर्थः । धियमिति वा । यतो निराकृतनास्तिक्यामित्युभयत्रापि हेतुगर्भसंवादेन नास्तिक्यापनयात् स्वरूपहानेर्धिक्कार एव कृत इत्यर्थः । जलानलपरीक्षादौ ते तत्रापि यतः संवादः सप्रतिपत्तिरस्ति तेन कारणेन सञ्जातगलहस्तमालिङ्गितकण्ठं नास्तिक्यं यस्यां तां स्वीकृतनास्तिक्यां बुद्धिं त्वं धिक्कुरु इत्यर्थ इति वा । अत्र गलहस्तशब्दः परीरम्भपरः । यतस्तत्रापि संवादोऽस्ति । तेन स्वीयां धिग्धियं नास्तिकवादाद् दुष्टां बुद्धिं दूरीभितनास्तिक्यां कुर्विति वा कुत्सिता रुतिः शब्दो यस्य तत्सम्बोधनं कुरुते करुद । तथा हे अविद्यमानमते अविनीत चार्वाक वैदिके जलानलपरीक्षादौ यस्मात् संवादोऽस्ति तस्मादाश्लिष्टनास्तिक्यां नास्तिकमतिं धिक् मा निन्देत्यर्थः । इति यत्तदोः सम्बन्धमाश्रित्य वा व्याख्येयम् । नास्ति मतिरस्येत्यर्थे, अस्ति नास्ति दिष्टं मतिः (पा० ४।४।६०) इति ठकि नास्तिकः । मतिः परलोकविषया । तद्भावो नास्तिक्यं । ब्राह्मणादित्वात् ष्यञ् ॥ ८८ ॥

सत्येव पतियोगादौ गर्भादेरध्रुवोदयात् ।
आक्षिप्तं नास्तिकाः कर्म्म न किं मर्म्म भिनत्ति वः ॥ ८९ ॥

इदानीं मृते कर्म्मफलोर्मय इत्यादीनि वाक्यानि दूषयति । सतीति । पतियोगः ऋतौ स्त्रिया भर्तृसम्बन्धः शुक्रशोणितसन्निपातलक्षणः, अयुग्मासु गमनं निषिद्धतिथ्यादिवर्जनं एतदादिर्यस्यैतादृशे बीजक्षेपादौ कर्षणजलसेकादौ च वर्त्तमान एव दृष्टकारणसामग्र्यां सर्व्वदा सत्यामपि गर्भादेरध्रुवोदयादनिश्चितादुद्भवात् । कस्मिंश्चित् काले ऽनुत्पत्तेर्हेतोराक्षिप्तमलौकिकस्य परलोकसाधनस्य भावेऽदृष्टकारणसामग्रीत एव सदा स्यात् । न चैवमस्ति । तस्माद्धर्म्माधर्म्मरूपमदृष्टं कारणान्तरमस्तीत्यर्थापत्तिप्रमाणकं कर्म्म शुभाशुभफलकमदृष्टं भो नास्तिका अवैदिकत्वाद्दुष्टमनर्हा वो युष्माकं मर्म्म हृदयं किन्न भिनत्ति अपि तु विदारयत्येव । कुतो हेतोर्न भिनत्तीति वा । एतन्निदर्शनेन सचेतसो हृदयेन विदारितुं युक्तं तन्न जातमित्याश्चर्य्यं । मूर्खतमा भवन्त इत्यर्थः । कर्म्म वो मर्म्म दर्शनरहस्यरूपं न किं दूषयति किन्तु दूषयत्येवेति वा । सर्व्वोद्देशेन नास्तिका इति बहुवचनम् । गृहस्थास्तिचतुरासु पत्नीषु सतीष्वपि पुत्राद्यसम्भवे एवं वदन्ति अस्माभिरपत्यप्राप्तिहेतुकं कर्म्म प्राक् न कृतम् । अजातसम्यक्प्रेतकृत्येनास्मद्वंश्येन केनचित् प्रेतेन प्रतिबन्धः कृतस्तस्मादपत्यं न भवतीत्यादि वा कथयन्ति । तस्माल्लोकप्रवादपारम्पर्य्यादर्थापत्तेरदृष्टं कारणान्तरमङ्गीकर-

याचतः स्वं गयाश्राद्धं भूतस्याविश्य कञ्चन।
नानादेशजनोपज्ञाः प्रत्येषि न कथाः कथम्॥ ९०॥

णीयम्। आदिशब्दाभ्यां कृषिवाणिज्यस्वामिसेवादिव्यवसाया-स्तत्फलावाप्तयश्च व्याख्याताः॥ ८९॥

मृतः स्मरति, अन्यदेहैर्मृते तृप्तिः, मन्देहेऽप्यन्यदेहाप्तेरित्या-देरुत्तरमाह। याचत इति। पापवशादप्राप्तसद्गतेः पिशाचत्वा-दियोनिप्राप्तस्य स्वसम्बन्धिनमुदासीनं वा यं कञ्चनाविश्य सूक्ष्म-रूपेण तच्छरीरमधिष्ठाय स्वसम्बन्धि गयाश्राद्धं निजदुर्गतिं परिजिहीर्षया गयायां श्राद्धं प्रयागे माघस्नानादिजन्यं पुण्यवि-शेषं याचतो मम सद्गतिप्राप्त्यर्थमिदं करणीयमिति प्रार्थय-मानस्य, एवं कृते मोचिष्यामीति वदतः प्रेतस्य, सम्बन्धिनीः नानादेशेभ्य आगता जनास्तेभ्य उपज्ञाः श्रुतास्तैर्या ज्ञाताः सत्यत्वेन सर्व्वेषां सम्मताः कथाः कथं न प्रत्येषि। तासु कथं न विश्वसिषि। अपि तु नानाविधप्रामाणिकजनसंवादसिद्धत्वात् पूर्व्वजन्मकथनात् पूर्व्वं मयाऽत्रैतावत् सुवर्णादि निक्षिप्तं तत् पश्य-तेति निध्यादिदर्शनसंवादाद् देशान्तरकालान्तरप्रवृत्तिकथ-नाद् गयाश्राद्धादौ कृते तस्य सद्गतेरनुमानाच्च ताः सर्व्वथा विश्वसितुं योग्या इत्यर्थः। एतेन तीर्थादिभावविशेषपरलोक-देहान्तरप्राप्तिधर्म्माधर्म्ममूलस्वर्गनरकादिप्राप्तीनां प्रामाण्यं स-मर्थितं। नानादेशजनैन उपज्ञानुभविता यासान्ताः सर्व्वसा-क्षिका इत्यर्थः॥ ९०॥

नीतानां यमदूतेन नामभ्रान्तेरुपागतौ।
श्रद्धत्से संवदन्तीं न परलोककथां कथम्॥ ९१॥
जज्वाल ज्वलनः क्रोधादाचख्यौ चाक्षिपन्नमुं।
किमात्थ रे किमात्थेदमस्मदग्रे निरर्गलम्॥ ९२॥

को हि तद् वेदेत्यादेरुत्तरमाह। नीतानामिति। प्राणापकर्षणार्थं यमेनैव प्रेषितेन यमदूतेन देवदत्तमानयेत्यादिष्टेन समानतया भ्रान्तेर्हेतोः स्थूलशरीराल्लैङ्गिकं शरीरमाकृष्य यो देवेनानायितः सोऽयमानीत इति यमसामीप्यं नीतानां मरणीयादन्येषां जनानामुपागतौ सत्यामानायितो यः सोऽयं न भवति पुनरयं मर्त्यलोकं नेय इत्येतत्सदृशमन्यमानयेति यमचित्रगुप्ताभ्यामुक्ते सति प्रत्यावृत्तौ भौतिकशरीरमध्ये लैङ्गिकशरीरे पुनः प्रविष्टे सति तद्बान्धवैरेतावत् पर्य्यन्तं किं जातं त्वं कुत्र गतः किंवा तत्र दृष्टमित्यादि प्रश्ने कृते यमदूतैर्यमं प्रापितस्तेन च पुनरायुःशेषादत्र पातितोऽहम्। स्वर्गो नरकश्चैवंविध इतिप्रकाशकश्रुतिस्मृतिप्रमाणेषु यथा स्वर्गादिरूपं श्रुतं तादृशस्यैव तस्य कथनात् संवदन्तीं संवादं कुर्व्वन्तीं परलोकसम्बन्धिनीं अखिलकथां कथं कुतो हेतोस्त्वं न श्रद्धत्से परलोकाखिले प्रमाणरूपां न मन्यसे वद। न किञ्चिदविश्वासे कारणमस्ति। तस्मात् परलोकोऽस्त्येवेति भावः॥ ९१॥

जज्वालेति। अथ ज्वलनोऽग्निः क्रोधाज्जज्वाल, अमुं चार्वाकं आक्षिपन् परुषभाषणैरधिक्षिपन्निति आचख्यौ, ऊचे च। इति

महापराक्रिणः श्रौतधर्म्मैकबलजीविनः ।
क्षणाभक्षणमूर्च्छाल स्मरन् विस्मयसेऽपि न ॥ ९३ ॥

किं । रे चार्वाक नीच त्वमस्माकं वैदिकानामग्रे निरर्गलं निर्भयं यथा तथा इदं पूर्व्वोक्तप्रकारं किमात्थ किं ब्रूषे इति। अतः परमेवं चेद्वक्ष्यसि तर्हि तव कण्ठोष्ठमेव कुण्ठयिष्यामीत्यर्थः। क्रोधाविष्टजातिरियं। क्रोधावेशद्योतनार्थमेव वीप्सायां पुनरुक्तिः ॥ ९२ ॥

इदानीं नाश्नाति स्नातीत्यादेरुत्तरमाह। महेति। हे क्षणं क्षणमात्रमभक्षणेनाभोजनेन मूर्च्छालातिविह्वल रे नास्तिक द्वादशादिबहुदिवसोपवासमासाध्यमहापराकाख्यव्रतवतस्तान् ब्रह्मचारिणः श्रौतस्मार्त्तरूपेणैकेन बलेन जीविनः प्राणधारणशीलानेवम्भूतान् मनुष्यान् स्मरंश्चिन्तयन्नपि किं न विस्मयसे। एतावन्ति दिनान्येतेऽभोजनाः कथमासत इत्याश्चर्यं न प्राप्नोषीत्येतन्महच्चित्रम्। क्षणमात्रमप्यभोजनपीडायाः स्वेनैवानुभवे मासोपवासादिकारिणां जीवितधारणस्य प्रत्यक्षदर्शने च सत्यपि भवादृश एव मूर्खो न विस्मयत इत्यर्थः। तस्माच्चिरमभोजनेऽपि जीवितधारणसामर्थ्याद्धर्म्मोऽस्त्येवेति। एकादश्युपवासादिकं धर्म्ममन्वयव्यतिरेकाभ्यां जानीहीति भावः। पराक्रिणः। शेषत्वाविवक्षायां द्वितीयाबहुवचनं। शेषत्वविवक्षया अधीगर्थेति (पा० २।३।५२) षष्ठ्येकवचनं वा। मूर्च्छाल। अस्त्यर्थे सिध्मादिषु क्षुद्रजन्तूपतापाभ्यां चेष्यत इति वचनादुपतापकारित्ववचनादुपकारकारित्वाल्लच्। विस्मयसे न किमिति च पाठः ॥ ९३ ॥

पुत्रेष्टिश्येनकारीरीमुखा दृष्टफला मखाः ।
न वः किं धर्म्मसन्देहमंदेहजयभानवः ॥ ९४ ॥

इदानीं ग्रावोन्मज्जनवत्, एकं सन्दिग्धयोस्तावदित्यादेरुत्तरयति । पुत्रेति । भो नास्तिकाः पुत्रप्राप्त्यर्थं विहितः पुत्रफलको यागः पुत्रेष्टिः, श्येनेनाभिचरन् यजेतेति वेदवाक्यविहितः श्येनसाधनकोऽभिचारफलको श्येनः, तथा कारीरीं निर्वपेत वृष्टिकाम इति वंशाङ्कुरसाधनको वृष्टिफलको यागः कारीरीत्युच्यते, एते यागा मुखमादिर्येषां ते, तथा दृष्टप्रत्यक्षानुभूयमानसुतसम्भूतिवैरिमारणजलवर्षादिरूपं फलं प्रयोजनं येषां ते मखा वो नास्तिकानां युष्माकं धर्म्मोऽस्ति वा नास्ति इति धर्म्मसम्बन्धी सन्देहो वेदवाक्यविहितादृष्टफलकयागादिरूपो धर्म्मस्तत्सम्बन्धी वा, अदृष्टफलकयागादिविधायकवेदवाक्यान्येव वा धर्म्महेतुत्वाद्धर्म्मास्तत्सम्बन्धी वा यः प्रामाण्याप्रामाण्यसन्देह एव सन्देहा सन्ध्याद्वये सूर्य्यग्रामार्थमुत्पद्यमाना षष्टिसहस्रसार्द्धतिस्रः कोटयो राक्षसाः तेषां जये विनाशे भानवः सूर्य्यरूपा विनाशका न किं भवन्ति। एवं दृष्ट्वापि धर्मं न मन्यसे चित्रमित्यर्थः । किं न अपि तु भवन्त्येवेति वा ।

तिस्रःकोट्योऽर्द्धकोटी च मंदेहा नाम राक्षसाः ।
उदयन्तं सहस्रांशुमतियुद्ध्यन्ति ते सदा ॥
गायत्र्या चाभिमन्त्र्योर्द्ध्वं जलञ्जिः सन्ध्ययोः क्षिपेत् ।
तेन शाम्यन्ति ते दैत्या वज्रभूतेन वारिणा ॥

दण्डताण्डवनैः कुर्व्वन् स्फुलिङ्गालिङ्गितं नभः ।
निर्ममेऽथ गिरामूर्म्मीर्भिन्नमर्म्मेव धर्म्मराट् ॥ ९५ ॥
तिष्ठ भोस्तिष्ठ कण्ठोष्ठं कुण्ठयामि हठादयम् ।
अपष्ठु पठतः पाठ्यमधिगोष्ठि शठस्य ते ॥ ९६ ॥

इत्यादिवाक्यप्रामाण्याद्गायत्र्याभिमन्त्रितजलप्रक्षेपेण तन्नाशपुरःसरमेव सूर्य्योदयात् सूर्य्य एव तान् विनाशयतीत्युच्यते । तथा च सूर्य्यो यथा तान्नाशयति तथा मखैरपि भवदीयमन्देहो विनाश्य एवेति प्रामाणिकमेव सर्व्वं जानीहि ॥ ९४ ॥

दण्डेति । अथाऽग्निवचनानन्तरं धर्म्मराड्यमः स्वायुधस्य दण्डस्य ताण्डवनैरितस्ततश्चालनैः नभः स्फुलिङ्गालिङ्गितमग्निकणाकीर्णं कुर्व्वन् रचयन् चार्वाकवाक्शरैर्भिन्नमर्म्मेव विदारितजीवस्थान इवासहमानो गिरामूर्म्मीर्वाक्यपरम्परा निर्म्ममे ऊचे इत्यर्थः । ऊर्म्मिपदेन वाचामप्रतिहतप्रसरत्वं सूचितं । ऊर्म्मिर्वा स्त्रियामिति स्त्रीलिङ्गेऽपि ॥ ९५ ॥

तदेवाह । तिष्ठेति । भो नास्तिक तिष्ठ तिष्ठ क्षणमात्रं सहस्व धर्म्मदूषणाद्विरमेति वा । अयमहं अधिगोष्ठि गोष्ठ्यामिन्द्रादिसभायां अपष्ठु प्रतिकूलं पाठ्यं पठनार्थं वचनं पठतो भाषमाणस्य शठस्य वाक्छलमात्रनिष्ठस्य नास्तिकाधमस्य ते तव कण्ठोष्ठं कण्ठनालमोष्ठौ च हठाद्बलात्कारेणेदानीमेव कुण्ठयामि वर्णोच्चारणाशक्तं करोमि दण्डेन चूर्णयामीत्यर्थः । सर्व्वाणि विशेषणानि दण्डत्वज्ञापने हेतवः । अथ चैवंविधस्य ते

वेदैस्तद्वषिभिस्तद्वत् स्थिरं मतशतैः कृतम्।
परं कस्ते परं वाचा लोकं लोकायत त्यजेत्॥ ६७॥
समज्ञानाल्पभूयिष्ठपान्थवैमत्यमेत्य यम्।
लोके प्रयासि पन्थानं परलोके न तं कुतः॥ ६८॥

अधिगोष्ठि कथामधिकृत्य वाचो युक्त्या कण्ठोष्ठं कुण्ठयामि युक्त्या प्रतिहतत्वादुक्तुमसमर्थं करोमि। सर्व्वमपि भवच्छास्त्रं दूषयिष्यामीत्यर्थः। वाग्व्यापारं प्रति कण्ठोष्ठस्यैव दण्डो युक्तः। अयमपि क्रोधाहङ्काराविष्कारे। तिष्ठ तिष्ठेति क्रोधातिशयद्योतनार्थं पुनरुक्तिः। कण्ठोष्ठं प्राण्यंगत्वादेकवद्भावः। कुण्ठयामि, वर्त्तमानसामीप्ये भविष्यति लट्॥ ६६॥

इदानीं लोकत्रयेण परलोकं धर्म्मञ्च साधयन् को हि वेद, तर्काप्रतिष्ठयेत्येवमादेरुत्तरमाह। वेदैरिति। चतुर्भिः ऋग्वेदादिभिर्वेदैर्यथास्थिरीकृतं तद्वत्तस्य वेदस्य वेषच्छाया तद्युक्तैः तदंशापजीविभिः वेदानुसारिभिर्मतानां शतैः स्मृतिपुराणादिभिः वादिप्रतिवादिभेदैर्मीमांसादिशास्त्रैश्च स्थिर कृतं निश्चयेन व्यवस्थापितं परं श्रेष्ठं अन्यञ्च स्वर्गादिलक्षणं लोकं हे लोकायत नास्तिकाधम परं केवलं ते वाचा निर्युक्तिकेन वचनमात्रेण कोऽपि विद्वान् त्यजेत् अपि तु न। किन्तु सर्व्वैरपि तद्युक्तिभिः परलोकः स्वीकृत एवेत्यर्थः। तदस्तित्व सन्देहापादिनी को हि वेदेत्यादिश्रुतिस्त्वन्यपरेति भावः॥ ६७॥

समेति। एकस्मिन्मार्गादावर्थे समज्ञाना तुल्यमतयोऽल्प

स्वकन्यामन्यसात्कर्त्तुं विश्वानुमतिदृश्वनः।
लोके परत्र लोकस्य कस्य न स्याद्दृढं मनः॥ ९९॥

ऽल्पसङ्ख्या भूयिष्ठा बहुतरसङ्ख्याश्च पान्थास्तेषां वैमत्यं मार्गा-न्यत्वविरोधमेत्य प्राप्य ज्ञात्वा वा इह लोके यं पन्थानं त्वमेव प्रयासि परलोकेऽपि विषये त्वमेव तादृशमेव मार्गं कुतो हेतोर्न गच्छसीति प्रश्नः। अपि तु तमेतमेव गच्छेत्युपदेशो वा। यथा केनचिद्वामो दक्षिणो वा काशीमार्ग इति मार्गं पथिकेषु पृष्टेषु पञ्चषैर्वाममार्गे कथिते सति पञ्चाशद्भिर्दक्षिणमार्गे कथिते "द्वैधे बहूनां वचनं ग्राह्यं इत्यादि" न्यायात् कुशलेन पञ्चाश-दुक्तमार्गेणैव गम्यते, एवं परलोकेऽप्यल्पविमतिं निरस्य बहुमत एव मार्गः किमिति नाश्रियत इत्यर्थः। परलोकमार्गस्य लक्षणया धर्मस्तं कथं न मन्यसे, अपि तु तमेवाङ्गीकुरु। पर-लोकसत्तानिश्चयमपि गन्तव्यग्रामवत् कुर्विति भावः। तर्काप्र-तिष्ठयेत्यस्याप्येतदुत्तरं ज्ञेयं॥ ९८॥

बहुसम्मतिमेव दर्शयति। स्वकन्यामिति। स्वकन्यामात्म-पुत्रीमन्यसात्कर्त्तुमन्यस्मै वराय अधीनां देयां कर्त्तुं विश्वेषां सर्व्वेषां श्रुतिस्मृतिपुराणादीनां लोकानां चानुमतिं सम्मतिं दृष्टवतोऽनुभवतः तथा कुर्व्वतश्च कस्य जनस्य परत्र लोके स्वर्गादौ मनो दृढं निःसन्देहं निश्चलं न स्यादपि तु सर्व्वस्यापि स्यादेव। न केवलमन्यस्यैव किन्तु चार्वाकस्य तवापीत्यर्थः। सर्व्वोऽपि परलोकबाधभिया स्वकन्यामन्यस्मै ददाति। यदि

कस्मिन्नपि मते सत्ये हताः सर्व्वमतत्यजः।
तद्दृष्ट्वा व्यर्थतामात्रमनर्थस्तु न धर्म्मजः॥१००॥

परलोको नाभविष्यत्तर्हि स्वपुत्रीमन्यस्मै कथमदास्यत्। अय-माचारः सर्व्वेषां सम्मतः। स च त्वयाप्यन्यस्मै पुत्रीदानादङ्गीकृत एव। अन्यथा स्वपुत्र्याः स्वेनैव ग्रहणमापद्येत। तस्मादन्येषा-मनुमतिं गृहीत्वैव यथा कन्याऽन्यस्मै दीयते तथा बहुसम्मति-दर्शनात् परलोकमप्यङ्गीकुर्व्विति भावः। अन्यस्मात्। देयेत्राचेति (पा०५।४।५५) त्रातिः। विश्वेति पूर्व्ववत्॥ ९९॥

श्लोकद्वयेन श्रुतिस्मृत्यर्थबोधेषु, तर्काप्रतिष्ठयेत्यादेरुत्तरमाह। कस्मिन्निति। धर्म्मपरलोकादिप्रतिपादनपराणां बहूनां मतानां मध्ये एकस्मिन्नेकस्मिन्नपि मते सत्ये सत्यत्वेनाङ्गीकृते सति सर्व्व-मतत्यजः सर्व्वमतत्यागिनः परस्परविरोधात् सर्व्वमतासत्त्ववा-दिनो नास्तिका यूयं हता मारिताः। तत्रायं सन्धिः। मता-नामसत्यत्ववादिभिः किञ्चिन्मतं सत्यमङ्गीक्रियते न वा, चेद-ङ्गीक्रियते तर्हि कस्यापि कन्यादानादिप्रतिपादकस्य स्वीयम-तस्यैव वा सत्यत्वाङ्गीकारात् सर्व्वमप्रमाणमिति सर्व्वासत्यत्ववा-दिनो व्याघाताय सिद्धान्ताभ्यां दूषिता एवेति वैदिकसिद्धा-न्तो निर्द्दोष इत्यायातं। न वेत्यपि पक्षे नास्तिकमतस्याप्यस-त्यत्वादसत्यभूतस्य दूषकत्वाभावान्निर्द्दोषो वैदिकः पक्षः सिद्ध एवेत्यपि नास्तिका दूषिताः। निर्द्दोषत्वेऽपि वैदिकपक्षानङ्गीकारे स्वपक्षोऽपि तैर्नाङ्गीकार्य्य इत्यादि ज्ञेयम्। एवञ्च तस्यैकस्य मतस्य

क्वापि सर्व्वैरवैमत्यात् पानित्यादन्यथा क्वचित्।
स्थातव्यं श्रौत एव स्याद्धर्म्मे शेषेऽपि तत्कृते॥ १०१॥

दृष्ट्वा सत्यताज्ञानेनोभयवादिसिद्धतया पुत्रेष्ट्यादौ पुत्रजन्मादिफलसिद्धौ सत्यां यत्र क्वचित् फलव्यभिचारस्तत्र कर्म्मणो वैफल्याद् व्यर्थतामात्रं फलसाधनत्वराहित्यमात्रं तु पुनः अधर्म्मः प्राचीनपुत्रवियोगादिर्निरर्थकः। दुःखराशिः धर्म्मजो न, पुत्रेष्ट्यादिधर्म्मजन्यो न भवति, विपरीतं तु धर्म्मेण न जन्यते, किन्तु प्राचीनदुष्कर्म्मनिमित्तमेव। केवलं तु काकतालीयन्यायेन तस्य पुत्रेष्ट्याद्यनन्तरभावित्वं। न च तावतैव तत्कार्य्यत्वमिति व्याप्तेरित्यर्थ इत्यादि ज्ञातव्यम्। कस्मिन्नपि मातृगमनादिनिषेधे स्वकन्यादानादौ विषये च वैदिके मते सत्ये सति तस्मिन्नंशे सत्यत्वेऽङ्गीकृते सति सर्व्वमतमसङ्गतमिति वदन्तो नास्तिका हताः। मातृगमननिषेधादेरंशस्य भवद्भिरपि परिपालनादित्यर्थः। तथा च तद्दृष्ट्या कन्यादानमातृगमननिषेधादिरूपाणां सत्यानां विधिनिषेधांशानां दृष्टान्तेनान्यत्रांशे व्यर्थतामात्रं वचनमात्रेण व्यर्थमित्युच्यते न तु धर्म्मजो वास्तवोऽनर्थः प्रयोजनाभावः। तद्दृष्टान्तेन व्यर्थतामात्रमन्यत्राप्यर्थे भवति चेत्यलमतिप्रसङ्गेन॥ १००॥

उपसंहरति। क्वापीति। सर्व्वैरास्तिकैरपि क्वापि कस्मिन्नपि अहिंसाकन्यादानादौ श्रौते वेदोक्ते एव धर्म्मे स्थातव्यं। कुतः। अवैमत्यात् सर्व्वेषामित्यर्थः। शेषः अन्तानां बौद्धानां माध्यमि-

कानामपि सम्प्रतिपत्तेः । अहिंसादेस्तैरप्यनिषिद्धत्वादङ्गीकृतत्वा-
च्चेत्यर्थः । स्थातव्यमेवेति वा । तथा क्वचिद्वर्णाश्रमाधिकारविहिते
अन्यथा करणे निषिद्धाचरणे च पातित्यदोषाद्विहिताकरण-
निषिद्धाचरणप्रत्यवायभयादपि श्रौत एव धर्म्मे स्थातव्यं। अन्यथा
वैमत्येऽपि श्रौत एव क्वचित् कस्मिंश्चिद्धर्म्मे स्थातव्यं । कुतः । पा-
तित्यात् । यत्तु श्रौते धर्म्मे तेषां विप्रतिपत्तिस्तदनङ्गीकारेऽपि
प्रत्यवायः स्यादित्यङ्गीकार्य्य एवेत्यर्थ इति वा। एवं शेषेऽपि
नित्तनैमित्तिकाभ्यामतिरिक्ते काम्ये ज्योतिष्टोमादावपि स्था-
तव्यं। कुतः । तत्कृते तस्य वेदस्य कृते कारणाद्वेदविहितत्वा-
विशेषादित्यर्थः। यद्वा तत्कृते वेदमूलत्वाच्छेषे स्मार्त्तेऽपि धर्म्मे
स्थातव्यं, सदाचारानुमितस्मृत्या श्रुतेरनुमानात् । स्मार्त्तधर्म्मा
अपि वेदमूला इति तेऽप्यङ्गीकर्त्तव्या इत्यर्थः । एतेन यस्मिन्ना-
स्तीति, जनेन जानतेति, एकस्य विश्वपापेनेति, स्वश्च ब्रह्म चेत्यादेः
सर्व्वस्याप्युत्तरं दत्तम् । धातुवादादि दिकप्रामाणिकमेव। असि-
द्धिस्तु साधनवैगुण्यादिति सर्व्वमपि समर्थितमिति ज्ञेयम्। त-
त्कृतमिति पाठे हेतुगर्भविशेषणं । तस्मान्न मतानामप्रामाण्यं।
श्रुतिस्मृत्योरैकमत्यमप्यविरुद्धमिति श्लोकद्वयतात्पर्य्यार्थः । अ-
हिंसादयः स्मृत्युक्ताः सर्व्वसाधारणधर्म्मास्तेषु क्वापि श्रौतेऽपि
धर्म्मे स्थातव्यं। पातित्यादित्युभयत्रापि हेतुः । सर्व्वेषामनुमते
विहिते चेन्न स्थीयेत तर्हि विहितस्याननुष्ठानादिति स्मृतेः
पातित्यमित्यर्थः । तथा च विहितानां केषाञ्चिद्भवद्भिरनुष्ठा-
नान्निषिद्धानां केषाञ्चिद्भवद्भिरपि वर्जनात् सर्व्वेषां विमते

बभाण वरुणः क्रोधादरुणः करुणोज्झितम्।
किं न प्रचण्डात् पाषण्डपाश पाशाद्विभेषि नः॥ १०२॥
मानवाशक्यनिर्म्माणा कूर्म्माद्यङ्कविला शिला।
न श्रद्धापयते मुग्धास्तैर्थिकाध्वनि वः कथं॥ १०३॥

निषिद्धं चेत् स्मर्यते। तथा निन्दितस्य सेवनादिस्मृतौ पातित्य-मित्यर्थः। तथा चैतद्दृष्टान्तेनान्येष्वपि विधिनिषेधांशेषु तत्स्मृतेः श्रौतत्वाविशेषादेव हेतोः स्मातव्य। तेऽपि प्रामाणिकत्वे स्वी-कार्य्या इति वा व्याख्या इत्यादि ज्ञातव्यम्॥ १०१॥

बभाणेति। क्रोधादरुणो रक्तकायकान्तिः वरुणः करुणया उज्झितं वचो नितरां परुषं यथा बभाण। हे पाषण्डपाश नास्तिकाधम त्वं नोऽस्माकं प्रचण्डाद्दुःसहात्पाशान्न विभेषि किं। कुत्सायां, याप्ये पाशबिति (पा० ५।३।४७) पाशप्प्रत्ययः॥१०२॥

मानवेति। मानवैर्मनुष्यैरशक्यं निर्म्माणं यस्याः तथा कूर्म्मव-राहनरसिंहादयोऽङ्काश्चिह्नानि येषामेवंविध विलस्विवरं यस्याः सा च शिला गण्डकाख्या तीर्थविशेषसम्भवा शालग्रामशिला, सा मुग्धा मूर्खाः तीर्थिकाध्वनि सेश्वरमार्गे वैदिकाध्वनि वा वो युष्माक कथं न श्रद्धापयते आस्तिक्यं न प्रापयति। चित्रमेत-द्भवतां मूर्खतरत्वमित्यर्थः। मनुष्यैरशक्यरचनं सावयवत्वेन कार्य्यं शिलादिस्वनिर्म्माणशक्तमिच्छामात्रेण कर्त्तारं मनुष्यादिविलक्षण-मीश्वरमाक्षिपति। विमत सकर्तृक कार्य्यत्वाद्घटवत्। अनुमाना-स्य बधर्मतावलादिविलक्षणे कर्त्तरीश्वरे सिद्धेऽपि कथमत्राविश्वास

शतक्रतूरुजाद्याख्याविख्यातिर्नास्तिकाः कथम्।
श्रुतिवृत्तान्तसंवादैर्न वश्चमदचीकरत्॥ १०४॥

इत्याशयः। एतेन देवश्चेदस्ति सर्व्वज्ञ इत्यादेरुत्तरं दत्तमिति ज्ञेयम्॥ १०३॥

शतेति। भो नास्तिकाः शतक्रतुश्च श्रीविष्णोरूरुभ्यां अजायत इत्यूरुजो वैश्यः स आदिराद्यो वा येषां ते ब्राह्मणादिवर्णास्व तेषामाख्या शतक्रतुमुखजबाहुज इत्यादीनि नामानि तेषां विशेषेण ख्यातिर्वार्त्ता श्रुतिवृत्तान्तसंवादैः वेदोक्तेतिहासैः करणैः वो युष्मान् कथं न चमदचीकरत् चमत्कारं नाकारयदपि तु आश्चर्य्यं भवतां तयोत्पाद्यं। चमदित्यव्ययमाश्चर्य्ये। शतास्वमेधक्रतुकारीन्द्रो भवति। इन्द्रस्यैव शतक्रतुत्वं वेदेनोक्तम्। लोकेनापीन्द्र एव शतक्रतुत्वेन व्यवह्रियते न तु वज्र्यादिरिति। तथा च ब्राह्मणोऽस्य मुखमासीदित्यादिना श्रुत्या ब्राह्मणक्षत्रियादीनां मुखजत्वबाहुजत्वाद्युक्तं। लोकेनापि ब्रह्मक्षत्रादय एव मुखजत्वबाहुजत्वादिभिर्व्यवह्रियते न तु विपर्य्ययेणेति वेदोक्तेन सह लोकस्यानुभूयमानत्वात्। संवादादपि वेदे यथोक्तं तथैव लोको व्यवहरत्याश्चर्य्यमेतत्। आश्चर्य्यं पूर्व्वं वेदप्रामाण्यं कथं न विश्वसिथेत्यपि तु विश्वनीयं तच्चेत्याशयः। ऊरुजपदं वृत्तानुरोधात् प्रायोजि। तथापि सर्व्वेऽपि वर्णाः संगृहीताः। विख्यातिः प्रयोजिका संवादैः प्रयोज्यैर्वा युष्माकश्चमदाश्चर्य्यं कथं न कारयामासेति वा। शतक्रतुश्च ऊरुजोर्वशी च तदादि वह्निर्मैनके-

तत्तज्जनकृतावेशान् गयाश्राद्धादि याचिनः ।
भूतानननुभवन्तोऽपि कथं श्रद्धत्थ न श्रुतीः ॥ १०५ ॥
नामभ्रमाद्यमं नीतानथ स्वतनुमागतान् ।
संवादवादिनो जीवान् वीक्ष्य मा त्यजत श्रुतीः ॥ १०६ ॥

त्यादि व्याख्या येषां यामाश्च वज्ञ्यादीनां मेनकादीनाञ्च तेषां लोके प्रसिद्धैर्वेदवृत्तान्तसंवादैर्हेतुभिर्युष्माकं कमाश्चर्य्यं नाचीकरत्। लोकवेदप्रसिद्धानिन्द्रादीनुर्व्वश्याद्यप्सरसश्चैतान् सर्व्वान् प्रत्यक्षेणैव पश्यतेत्यर्थः। तथा च वेदस्तन्मूलं परलोकादि च प्रामाणिकमेवेदमिति भाव इति वा। प्रथमव्याख्याने व इति हृक्रोरि (पा०१।४।५३) त्यणौ कर्त्तुर्णौ कर्म्मत्वं, चमदिति च कर्म्मान्तरं। संवादैरिति करणे तृतीया। पक्षान्तरे तु तेनैव सूत्रेणाणौ कर्त्तुः कर्म्मत्वाभावादनभिहिते कर्त्तरि संवादैरिति तृतीया। व इति षष्ठी ॥ १०४ ॥

तदिति। तेषु तेषु जनेषु कृतावेशान् कृतसञ्चारान्, तथा गयाश्राद्धादि याचिनो गयापिण्डदानादिपुण्यं याचतः, प्राप्तप्रेतभावान् भूतान् प्राणिनोऽनुभवन्तोऽपि पश्यन्तोऽपि यूयं श्रुतीः कथं न श्रद्धत्थ सत्यत्वेन मन्यध्व इति पौनरुक्त्यं न शङ्कनीयं भिन्नवक्तृत्वादेवमुत्तरश्लोकेऽपि ज्ञेयम्॥ १०५॥

नामेति। नामभ्रमाद्यमदूतैर्यमं नीतान् प्रापितान् अथ मुक्तत्वात् प्रत्यावृत्य स्वतनुमागतान् प्राप्तान् संवादं चन्द्रः चयीत्यादि वेदसंवादं वदन्त्यवंशीलान् जीवान् वीक्ष्य श्रुतीः वेदान्

संरम्भैर्जम्भजैत्रादेः स्तभ्यमानाद्वलाद्वलन्।
मूर्द्ध्नि बद्धाञ्जलिर्देवानथैवं कश्चिदूचिवान्॥ १०७॥

नापराधी पराधीनो जनोऽयं नाकनायकाः।
कालस्याहं कलेर्वन्दी तच्चाटुचटुलाननः॥ १०८॥

मा त्यजत, अप्रामाणिकान् मा ब्रूत। एवं वेदप्रामाण्योपसंहारात् स्मृत्यादेरपि वेदमूलत्वात् उक्तसर्व्वधर्म्माणां प्रामाण्यं व्यवस्थापितम्॥ १०६॥

संरम्भैरिति। अथ वेदवचनानन्तरं जम्भजैत्रः शक्र आदिर्यस्य, इन्द्रानलादीनां संरम्भैर्भ्रूभङ्गाद्याकारविकारैर्भीतेन कलिना पुरःस्खलितुं स्तभ्यमानान्निषिध्यमानात्। इन्द्रादिसंरम्भान् दृष्ट्वा भयात् तत्सम्मुखं पदमपि चलितुमशक्ताद्बलात् कलिसैन्यात् वलन् पृथग्भवन् किञ्चिद्वार्श्वमवलम्ब्य द्वित्राणि पदानि सम्मुखमागच्छन् दीनत्वद्योतनपुरःसरं शक्रादिनमस्कारार्थं बद्धाञ्जलिः कश्चिदज्ञातनामा पापरूपत्वेनाज्ञातनामा चार्वाकः देवान् एवं वक्ष्यमाणप्रकारेण ऊचे॥ १०७॥

नेति। हे नाकनायका इन्द्रादयः अयं मल्लक्षणो जनोऽपराधी न यतः पराधीनः। तदेवाह। कलेः कलिनाम्नः कालस्याहं वन्दी स्तुतिपाठकः। अत एव तस्य चाटुनि प्रियवचने विषये चटुलं प्रियवादि वावदूकं वा आननं यस्यैवम्भूतः, अयं च कालस्य कृतान्तरूपस्य वन्दिनो हि यमाश्रयन्ति तत्प्रियं वदन्ति न च दण्डार्हाः। तस्मादेतत्प्रियं वैदिकादिदूषणं मया

इति तस्मिन् वदत्येव देवाः स्यन्दनमन्दिरम् ।
कलिमाकलयाञ्चक्रुर्द्वापरञ्चापरं पुरः ॥ १०९ ॥
सन्दर्शोन्नमद्ग्रीवः श्रीवङ्गत्वकृताङ्गुतान् ।
तत्तत्पापपरीतस्तान्नाकीयान्नारकीव सः ॥ ११० ॥

कृतं यदि न करोमि तर्ह्ययं दण्डयिष्यतीति परयुक्तत्वादपराधान्नाहं दण्ड्यः श्रीमद्भिरिति ॥ १०८ ॥

इतीति । देवास्तस्मिंश्चार्वाके इति पूर्व्वोक्तप्रकारेण वदति भाषमाणे सत्येव स्यन्दनमन्दिरं रथं कलिं अपरं द्वितीयं द्वापरञ्च पुरोऽग्रे आकलयाञ्चक्रुर्ददृशुः ॥ १०९ ॥

समिति । तैस्तैः प्रसिद्धैः ब्रह्महत्यादिभिर्मूर्त्तैः पापैस्तत्कारिभिः पुरुषैर्वा परीतः समन्ताद्व्याप्तः, तथा उन्नमन्ती दर्शनार्थमुच्चग्रीवा यस्यैवम्भूतः स कलिः श्रीवङ्गत्वेन कायकान्तिबाहुल्येन भूषणादिसम्पद्बाहुल्येन वा कृताद्भुतान् कृताश्चर्य्यान् अनाकीयान् स्वर्गरहितान् स्वर्गभवान् वा तान् इन्द्रादीन् सन्ददर्श । क इव नारकीव । यथा ब्रह्महत्यादिकारी आकण्ठनरकमग्न ऊर्द्धग्रीवो नरकस्थः पुरुष इव । पापकारित्वादहमेवंरूपः पुण्यत्वाच्चैते दीप्तस्वरूपा इति ज्ञातवांश्च । नरकस्योऽपि देवानां कायकान्तिदर्शनाज्जायमानसुखोऽनुष्ठितपापकृतपश्चात्तापः सुरानार्त्ततया पश्यतीत्युपमा । उन्नतग्रीव इत्यपि पाठः । नाकीयानिति हितार्थे तस्मै हितमिति (पा० ५।१।५) वृद्धत्वाद्भवार्थे वृद्धाच्छ इति (पा० ४।२।११४) वा छः । नारकी । नरकशब्दाद् इनिः ॥ ११० ॥

गुर्व्वीढावलीढः प्रागभून्नमितमस्तकः।
स त्रिशङ्कुरिवाक्रान्तस्तेजसैव विडौजसः॥ १११॥
विमुखान् द्रष्टुमप्येनं जनङ्गम इव द्विजान्।
एष मत्तः सहेलन्तानुपेत्य समभाषत॥ ११२॥

गुर्व्विति। प्राग् दर्शनात् पूर्व्वमिन्द्रादयः केनापि एकद्विकरणे, इत्यादिरूपया गुर्व्या महत्या रीढयाऽवलीढा व्याप्तस्तेषु कृतावज्ञोऽपि दर्शनानन्तरं विडौजस इन्द्रस्य तेजसा आक्रान्तः पराभूतः तिरस्कृततेजस्कः सन् अवज्ञां त्यक्त्वा स कलिः अनमन्नपि बलात् स्वेनैव शक्रतेजसैव वा नमितो नम्रीकृतो मस्तको यस्यैवम्भूतोऽभूत्। इन्द्रादीन्नमस्चकारेत्यर्थः। क इव। त्रिशङ्कुर्नाम सूर्य्यवंश्यो नृप इव। स हि स्वयाजने प्रार्थितेन पुरोधसा वसिष्ठेन निरस्तो गुरोर्वसिष्ठस्य अवज्ञया व्याप्तस्तस्मिन् कृतावज्ञः सन्नभिमानाद्विश्वामित्रेण सर्व्वकामिकं क्रतुं याजितस्तत्प्रभावात् सशरीर एव स्वर्गं गच्छन्निन्द्रेऽपि कृतावज्ञः संस्तत्तेजसा पराभूतः स्वर्गाद्भ्रंशितः। यथा पूर्व्वमिन्द्रे कृतावज्ञः संस्तत्तेजसा पराभूतः स्वर्गाद् भ्रंशित इत्येवं नमितमस्तकोऽभूदितीतिहासः। रीढावमाननावज्ञेत्यमरः॥ १११॥

विमुखानिति। मत्तः सगर्व्व एष कलिः सहेलं सविलासमुपेत्य समीपमागत्य तान् देवान् समभाषत। किम्भूतान्। एनं कलिं द्रष्टुमपि न केवलं भाषितुं स्प्रष्टुं वा किन्तु वीक्षितुमपि विमुखाननर्हान् सावज्ञान्। कः कानिव। मत्तो निर्म्लो मदि-

स्वस्ति वास्तोष्पते तुभ्यं शिखिन्नस्ति न खिन्नता ।
सखे काल सुखेनासि पाशहस्त मुदस्तव ॥ ११३ ॥
स्वयम्वरमहे भैमीवरणाय त्वरामहे ।
तदस्माननुमन्यध्वमध्वने तत्र धाविने ॥ ११४ ॥

गामन्तो वा जनङ्गमश्चण्डालो द्विजानिव । किम्भूतान् एनं चण्डालं द्रष्टुमप्यनर्हान् । चण्डालप्लवमातङ्गदिवाकीर्तिजनङ्गमा इत्यमरः । गमश्चेति (पा० ३।२।४७) खच् । खिलान्तुम् ॥ ११२ ॥

स्वस्तीति । हे वास्तोष्पते इन्द्र ते तुभ्यं स्वस्ति क्षेममस्ति कच्चित् । तथा हे शिखिन्नग्ने ते तव खिन्नता चित्तक्लेशो नास्ति कच्चित् । हे सखे काल यम सुखेनासि किं । हे पाशहस्त वरुण तव मुदः सन्ति कच्चित् । गृहमात्रस्याधिपत्यादसामर्थ्यं वृथैव ज्वालाजटिलत्व कुत्सितरूपत्वमायुधधारणवैयर्थ्यञ्च सम्बुद्धिभिः सूचितं । उत्तमानां कुशलप्रश्नास्तैः सह स्वाम्यन्तेभ्योऽधिकत्वं सूचयति । इन्द्राय स्वस्तिप्रयोगः स्वामिभावं ब्राह्मण्यं वा कलेर्द्योतयति । वर्णमास्मिन यमे सखिशब्दप्रयोगः । अयमेव गर्वोऽवज्ञा चेति ज्ञेयं । स्वस्त्याशीःक्षेमपुण्यादावित्यमरः । वास्तोष्पतिर्गृहमेधाच्छ्चेति लिङ्गात् साधुः । तुभ्यमिति । नमः-स्वस्तीति (पा० २।३।१६) चतुर्थी । इतरत्र तव सम्बन्धनीयम् ॥ ११३ ॥

स्वयमिति । हे देवा वयं स्वयम्वररूपे महे उत्सवे भैमीवरणाय यस्मात् त्वरामहे सवेगाः स्मः तत्तस्मात्तत्र धाविने स्वय-

ते ऽवज्ञाय नमस्योच्चैरहङ्कारमकारणम्।
ऊचिरेऽति चिरेणैनं स्मित्वा दृष्टमुखा मिथः॥ ११५ ॥
पुनर्वक्ष्यसि मामैवं कथमुद्वक्ष्यसे नु सः।
स्रष्टवान् परमेष्ठी यं नैष्ठिकब्रह्मचारिणम्॥ ११६ ॥

स्वरस्थानं प्रति स्वजुगामिनेऽध्वनेऽस्मानमन्यध्वमाज्ञापयत। त्वरावशादन्या गोष्ठी न क्रियते। आज्ञैव दीयतामित्यर्थः। अध्वने। तादर्थ्ये चतुर्थी॥ ११४॥

त इति। ते देवाः पूर्वोक्तमकारणं निर्हेतुकं उच्चैरतिशयितं अस्य कलेरहङ्कारं दर्पमवज्ञाय मिथो ऽन्योन्यं दृष्टमुखाः सन्तः मूर्खः स्वयम्वरवार्त्तां किं करोतीति स्मित्वा हास्यं कृत्वाऽतिचिरेण पापीयसाऽनेन सह कथं वक्तव्यमिति बुद्ध्या भूयांसं कालं विलम्ब्यैनं कलिं प्रत्यूचिरे वक्ष्यमाणं बभाषिरे॥ ११५॥

पुनरिति। हे कले त्वं स्वयम्वरार्थं गमिष्यामीति एकवारमज्ञानादुक्तं तदिदमतःपरं पुनर्मा मा एवं वक्ष्यसि मा मावोचः। यस्मात् परमेष्ठी यं त्वां आमरणं गुरुकुलनिवासिनं नैष्ठिकब्रह्मचर्य्यव्रतचारिणं स्रष्टवान् (स तु पुनस्त्वं कथमुद्वक्ष्यसे परिणेष्यसि कृतयुगादयो निष्कलत्रा एव सृष्टाः) तस्मात्तव स्वयम्वरवार्त्ताऽनुचिताऽवकीर्णित्वापातात्। तस्मादेवं पुनर्मा स्म वोच इत्यर्थः। पापरूपं प्रत्युपहासवचनमेतत्। माशब्दस्य निरनुबन्धकत्वाद्वक्ष्यसीति वचेर्लृट्। मा मेति निषेधविषयार्थं वीप्सायां द्विरुक्तिः। परमे स्थाने तिष्ठति इति इनिः स च कित्।

द्रोहिणं द्रुहिणो वेत्तु त्वामाकर्ण्यावकीर्णिनम्।
त्वज्जनैरपि वा धातुः सेतुर्लङ्घ्यस्त्वया न किम्॥११७॥
अतिवृत्तः सवृत्तान्तस्त्रिजगद्युवगर्व्वनुत्।
आगच्छतामपादानं स स्वयम्वर एव नः॥११८॥

अत आलोपः, अम्बाम्बेति (पा० ८।३।९७) सूत्रेण षत्वं। तत्रैव, परमे वर्हिरिति निपातनादेदन्तत्वं।

नैष्ठिको ब्रह्मचारी तु वसेदाचार्य्यसन्निधौ।
तदभावेऽस्य तनये पत्न्यां वैश्वानरेऽपि च॥ इति स्मृतिः॥११६॥

द्रोहिणमिति। द्रुहिणो ब्रह्मा त्वां पुत्रं अवकीर्णिनं क्षतव्रतं आकर्ण्य निजाज्ञाभङ्गाद् द्रोहिणं गुरुद्रोहकारिणं वेत्तु। एवं त्वया कृते ब्रह्मैवं ज्ञास्यतीति यावत्। अथ वा तेन ज्ञातेऽपि तव किं भयमिति सोपहासमाह। त्वज्जनैस्त्वदुपजीविभिः कामक्रोधादिभिरपि धातुः सेतुर्ब्रह्मकृता धर्म्ममर्य्यादा लङ्घ्यः त्वया पुनः किन्न लङ्घ्यः। त्वदाज्ञया सेवका अपि ब्रह्माज्ञां लङ्घयन्ति त्वं लङ्घयसीति किमाश्चर्य्यमित्यर्थः। यद्वा त्वज्जनैरपि सेतुर्न लङ्घ्यस्त्वया न लङ्घ्य इति किं वाच्यं। त्वदाज्ञालङ्घनमनौचित्यान्न कार्य्यमित्यर्थ इति काका। धाताऽजयोनिर्द्रुहिण इत्यमरः। द्रुह्यत्यसुरेभ्यः, औणादिकः किन्॥११७॥

स्वयम्वरं प्रत्यागमने हेत्वन्तरमपि ब्रूते। अतीति। एकं विना सर्व्वपरित्यागात्त्रिजगत्सु वर्त्तमानानां यूनां तरुणानां सौन्दर्य्यविषयं गर्व्वं नुदतीति नुत नायकः स वृत्तान्तो भैमीस्वय-

नागेषु सानुरागेषु पश्यत्सु दिविषत्सु च।
भूमिपालं नलं भैमी वरं साववरद्वरम्॥ ११९ ॥

स्वरोऽतिवृत्तो ऽतिक्रान्तः सञ्जात इत्यर्थः। भवद्भिः कथं ज्ञात-मित्यत आहुः। स स्वयम्बर एव। आगच्छतां नोऽस्माकमपादानं निश्चलोऽवधिभूतोऽर्थ इत्यर्थः। वयमपि तत्र गतास्तत एव आ-गच्छाम इति सर्व्वोऽपि वृत्तान्तोऽस्माभिर्ज्ञायत इति। अतोऽपि त्वया तत्र न गन्तव्यमिति भावः। विश्लेषे चञ्चलं स्थिरं वा यद्-दासीनं तदपादानमिति वैयाकरणाः॥ ११८॥

कथं यूनां गर्व्वनाशः को वा तया वृत इत्याशङ्कायां-माहुः। नागेष्विति। नागेषु वासुकिप्रभृतिषु सानुरागेषु दि-विषत्सु अस्मदादिषु कौतुकवशादेव पश्यत्सु तान् सर्व्वाननादृत्य सा भैमी नागाद्यपेक्षया वरं सर्व्वगुणाश्रयत्वाच्छ्रेष्ठं भूपालं सार्व्वभौमं नलं नृवरं वरं परिणेतारमववरत् वरयामास। सर्वानादरेण नलवरणात् सर्व्वेषां सौन्दर्य्यगर्व्वो गत इत्यर्थः। पश्यत्सु दिविषत्सु इत्यनेनास्माभिः कौतुकार्थं वरदानार्थमेव च गतं न तु तद्वरणार्थमिति च व्याख्यान्तरेण सूचितमिति ज्ञेयम्। नागेष्वित्यादौ, षष्ठी चानादरे इति (पा० २।३।३८) सप्तमी। अववरत्। वर ईप्सायामिति चुरादावदन्तपाठात् स्वार्थणिजन्ताद्वरयतेश्चाग्लोपित्वात् सन्वल्लघुनीत्यादिना दीर्घत्वाभावः॥ ११९॥

भुजगेशानसद्वेषान् वानरानितरान् नरान् ।
अमरान् पामरान् भैमी नलं वेद गुणोज्ज्वलम् ॥ १२० ॥
इति श्रुत्वा स रोषान्धः परमश्चरमं युगम् ।
जगन्नाशनिशारुद्रमुद्रस्तानुक्तवानदः ॥ १२१ ॥

किमिति ते परित्यक्ता इत्याशङ्कायां कारणमाह । भुजगेशानिति। भैमी भुजगेशान् वासुकिप्रमुखान् फणागणजिह्वाललनादिवैरूप्यादसद्वेषानमनोहरान् वेद जानाति । तथा इतरान् नलादन्यान् नरान् मनुजाधीशान् चापल्यनिर्गुणत्वाभ्यां वानरान् वेद। तथा अमरान् अचतुरत्वात् पामरान्नीचान् वेद। केवलं नलमेव गुणोज्ज्वलं श्रुतवीर्य्यौदार्य्यसौन्दर्य्यादिभिः प्रकाशमानं वेद। सर्व्वगुणाकरत्वान्नल एव तया वृतोऽन्ये तु परित्यक्ता इत्यर्थः । विवर्णः पामरो नीच इत्यमरः । वेदेति इदानीमपि तथैव प्रतीतेः सत्त्वाद्वर्त्तमानता। विभक्तिप्रतिरूपको निपातो वा । तथाऽज्ञासीदित्यर्थः ॥ १२० ॥

इतीति । चरममन्त्यं युगं स कलिः इतीन्द्रादिवचनं श्रुत्वा परमोऽत्युत्कृष्टो रोषान्धः, रोषान्नितरां निर्विचारतया पुरःस्थमपि वस्त्वजानन्, अत एव जगन्नाशसम्बन्धिनी निशा, यस्यां निशि जगन्नाशो भवतीति यावत्, तत्सम्बन्धी प्रलयकाले सकलभूतग्रासलालसासम्पन्नो रुद्रस्तद्वन्मुद्रा आकारो यस्य सः। क्रोधवशान्नितरामाविष्कृताकार इति यावत्। एवम्भूतः संस्तान् सुरानदो वक्ष्यमाणमुक्तवान्॥ १२१ ॥

कयापि क्रीडतु ब्रह्मा दिव्याः स्त्रीर्दीव्यत स्वयम् ।
कलिस्तु चरतु ब्रह्म प्रैतु चातिप्रियाय वः ॥ १२२ ॥

पुनर्वक्ष्यसि मामेवमित्यादेरुत्तरमाह । कयेति । हे देवा ब्रह्मा कयाऽप्यतिसुन्दर्य्या गायत्र्यादिपदवाच्ययाऽज्ञातनामजातिगोत्रया वाऽथ चामरत्वाद् यस्या नामकथनेऽप्यस्माकं लज्जा भवति तया सुतया सह सुखेन क्रीडतु। तथा यूयं स्वयमात्मना दिव्याः स्वर्गभवा रम्भादीः स्त्रीः अहल्यामुख्या वा रमणीर्दीव्यत स्वेच्छया ताभिः सह सुरतक्रीडां कुरुत। प्रजापतिः स्वां दुहितरमभ्यधावदिति श्रुत्या ब्रह्मणः स्वाच्छन्द्याद्भवतां सुतरां स्वाच्छन्द्यमिति स्वयमित्यनेनोक्तम्। कलिस्तु पुनर्ब्रह्मचर्य्याख्यं व्रतं यावज्जीवं चरतु वाऽथवा जीवन् कलिरस्मानुपहसिष्यतीति अनेन न जीवितव्यमिति वो युष्माकमतिप्रियाय नितरां तुष्टये प्रैतु म्रियतां। स्वयं सर्व्वैः स्वेच्छाचारः क्रियते मया तु स्वेच्छाचारो न कर्त्तव्यो मर्त्तव्यमेवेति कीदृशीयं भवतां परप्रद्वेषरीतिरिति लोकरीत्युपहासः। अथ च यूयं ब्रह्मादयः सर्व्वेऽपि स्वेच्छाचारिणः स्वाच्छन्द्यं कुरुत नाम कलिस्तु न तादृगिति ब्रह्मैव चरतु युष्माकमप्यतिप्रियाय भैमीलक्षणाय वस्तुने म्रियतां। भवद्वत्स्वेच्छाचारं न करोमि किन्तु भैमीप्राप्तये प्रवृत्तस्य मम मरणञ्चेत् स्यात्तदप्यस्त्विति भावः। अत्राप्युपहास एव तात्पर्य्यं क्रीडा चेति। दिवः कर्म्म चेति (पा० १।४।४३) करणस्यापि कर्म्मत्वात् स्त्रीभिरित्यर्थे स्त्रीरिति द्वितीया ॥ १२२ ॥

चर्य्यैव कतमेयं वः परस्मै धर्म्मदेशिनाम्।
स्वयं तत् कुर्व्वतां सर्व्वं श्रोतुं यद्बिभितः श्रुती॥ १२३॥
तत्र स्वयम्वरेऽलम्भि भुवः श्रीनैषधेन सा।
जगतो ह्रीश्च युष्माभिर्लाभस्तुल्याभ एव वः॥ १२४॥

उपहासमेव प्रकटयति। चर्य्येति। हे देवाः परस्मै अन्यस्मै जनाय स्वसुतादिगमनं न कार्य्यमिति धर्म्मदेशिनां धर्म्ममुपदिशतां स्वयं तद्ब्रह्महत्यास्वसुतादिगमनं सर्व्वं निषिद्धं कर्म्म कुर्व्वतां वो युष्माकमियं कतमैव कैव चर्य्या आचाररीतिरपि तु न कापीत्याक्षेपः। अचेतने अपि श्रुती कर्णौ यद्भवदीयमहत्यादिगमनं कर्म्म श्रोतुं बिभितः त्रस्यतः। स्वेच्छाचारिणां भवतां परपीडायामेव तात्पर्य्यमिति भावः। चर्य्या। गदमदेति (पा० ३।१।१००) भावे यत्॥ १२३॥

तत्रेति। तत्र स्वयम्वरे नैषधेन भुवः श्रीः सौन्दर्य्याद्भूलक्ष्मीः सा भैमी अलम्भि प्राप्ता। युष्माभिस्तु पुनर्जगतो ह्रीस्त्रैलोक्ये यावती वर्त्तते सा लज्जा जगतः सकाशाद्वा, भैम्याऽनादृतत्वात् या लज्जा सा लब्धेति वो नलस्य युष्माकञ्च लाभोऽपूर्व्ववस्तुप्राप्तिस्तुल्याभ एवाभासते। तुल्याभ एव। शकारहकारमात्रं वैरूप्यं, इतरत्तुल्यमेव। भवद्भिर्लज्जैव लब्धा न तु भैमीति रूपस्य दर्पो वृथैवेति भावः। अयञ्च यूयञ्च यूयं तेषां वः एकशेषः॥ १२४॥

दूरान्नः प्रेक्ष्य यौष्माकी युक्तेयं वक्त्रवक्रणा ।
लज्जयैवासमर्थानां मुखमस्माकमीक्षितुम् ॥ १२५ ॥
स्थितं भवद्भिः पश्यद्भिः कथं भोस्तदसाम्प्रतम् ।
निर्दग्धा दुर्विदग्धा किं सा दृशा न ज्वलत्क्रुधा ॥१२६॥

दूरादिति । आगच्छतो नोऽस्मान् दूराद् दूरत एव प्रेक्ष्य यौष्माकी इयं वक्त्रवक्रणा मुखकौटिल्यकरणं युक्तैव । किम्भूतानां । गुणीभूतस्य विग्रहान्तर्गतस्य युष्मच्छब्दस्य विशेषणं । यतो भैम्यवृतत्वात् सञ्जातलज्जयैव हेतुनाऽस्माकं मुखमीक्षितुमसमर्थानां । लज्जाशीलो ह्यन्यं दूरादेव दृष्ट्वा लज्जया मुखं न दर्शयति सलज्जा भवन्त इति युक्तमेवैतदिति भावः । अयमप्युपहासः । लज्जयैवेति पाठे उत्प्रेक्षा । प्रेक्ष्येति वक्रणापेक्षया समानकर्तृत्वं दूरादेव दृष्ट्वा । यौष्माकीति, तस्येदमिति (पा० ४।३।१२०) अणि, तस्मिन्नणि चेति (पा० ४।३।२) युष्माकादेशः । युष्माकमिति पाठः साधुः । एवमस्माकमित्यत्रापि द्रष्टव्यं । वक्रणेति नामधातोर्युच् ॥ १२५ ॥

स्थितमिति । भो देवास्तन्नलवरणं पश्यद्भिर्भवद्भिः कथं स्थितं औदासीन्येनेति शेषः । असाम्प्रतमनुचितमेतदित्यर्थः । दुर्विदग्धा भवदवज्ञानादचतुरा सा भैमी ज्वलन्ती देदीप्यमाना क्रुत् क्रोधो यस्याः तया दृशा कृत्वा किमर्थं न निर्दग्धा सुतरां न भस्मसात्कृता, अपि तु तादृगसामर्थ्यसद्भावे तस्याश्च सापराधत्वे दग्धुमुचित, तदपि न कृतमित्येतदप्यनुचितमेवेत्यर्थः ।

महावंशाननादृत्य महान्तमभिलाषुका।
स्वीचकार कथं कारमहो सा तरलं नलम्॥ १२७॥
भवादृशैर्दिशामीशैर्मृग्यमाणां मृगेक्षणाम्।
स्वीकुर्व्वाणः कथं सोढः कृतरीढस्तृणं नलः॥ १२८॥

युक्ते द्वे साम्प्रतं स्थाने इत्यमरः। भोरिति प्रत्येकं सम्बुद्धिः॥ १२६॥

महेति। कुलशीलादिना महान्तमुत्कृष्टं नलं अभिलाषुका सा भैमी कश्यपसुतत्वान्महावंशान् दिव्यवस्त्रादिभूषणान् युष्मान् परित्यज्य तरलं चञ्चलस्वभावं अनिश्चितबुद्धिं नलं कथंकारं कथमिव स्वीचकार अहो आश्चर्य्यं। महान्तं कामयमानाया देवपरित्यागेन मनुष्यवरणान्महच्चित्रमित्यर्थः। अथ च या महापरिमाणं वाञ्छति सा विशालान् दृढान् वेणून् परित्यज्य तरङ्गस्पर्शमात्रेणापि चञ्चलं ह्रस्वञ्च नलाख्यं तृणमङ्गीकरोतीति चित्रमेव। अत एव सा किं न भवद्भिर्दग्धेति भावः। अभिलाषुका। लषपत° (पा० ३।२।१५४) इत्युकञ्। महान्तं इति, नलोकेति (पा० २।३।६८)। षष्ठीनिषेधाद् द्वितीया। कथंकारं पूर्व्ववत्॥ १२७॥

इदानीं नलः कथं सोढ इत्याह। भवादृशैरिति। भो देवा दिशामीशैर्महासमृद्धिभिर्भवादृशैर्मृग्यमाणां काम्यमानां मृगेक्षणां भैमीं स्वीकुर्व्वाणः समुद्वहन् अत एव भवत्सु कृतरीढः कृतावज्ञः तृणतुल्योऽतिनिःसारः, अथ च नलशब्दवाच्यत्वात्

दारुणः कूटमाश्रित्य शिखी साक्षी भवन्नपि ।
नावहत् किं तदुद्वाहे कूटसाक्षिक्रियामयम् ॥ १२९ ॥
अहो महःसहायानां सम्भृता भवतामपि ।
त्वमैवास्मै कलङ्काय देवस्यैवाम्रतद्युतेः ॥ १३० ॥

तृणभूतः स नलो भवद्भिः कथं केन प्रकारेण सोढः चान्तः ।
सा भवद्भिरभिलषिता तया तु भवन्तो नादृता इत्युपहासः ।
मृगेक्षणां । न लोकेति (पा० २।३।६९) षष्ठीनिषेधाद्द्वितीया ।
सोढः । तीषसहेति (पा० ७।२।४८) इड्विकल्पात्, यस्य विभा-
षेति (पा० ७।२।१५) निष्ठायां नेट् ॥ १२८ ॥

दारुण इति । अयं शिखी वह्निर्दारुणः कूटं काष्ठराशिं
आश्रित्याग्निसाक्षिके विवाहे साक्षी भवन्नपि साक्षाद्द्रष्टा भव-
न्नपि तत्र प्रकाशमानोऽपि तयोर्भैमीनलयोस्तस्य तस्या वा उद्वाहे
विवाहे विषये कूटसाक्षिणोऽलीकसाक्षिणः क्रियां सत्यापलाप-
लक्षणां किन्नावहत्, अपि त्वेतदप्यनुचितं कृतं । कूटसाक्षी हि
परकीयं वस्त्वन्यस्मै दापयति । तदनेन प्रायशस्तत्र न स्थितमित्य-
ग्निसाक्षिको विवाह एव न भवतीति भैमी नलेन नोढेति भैमी
नलादन्यस्मै भवत्स्वेव मध्ये कस्मैचित् किमिति न दापितेत्यर्थः ।
अथ च दारुणः पापकारित्वादतिक्रूरः पुरुषः कपटमाश्रित्य
व्यवहारे साक्षी भवन्नपि तस्य चित्ते धृतस्य कार्य्यस्योद्वाहे कूट-
साक्षित्वं धत्ते अत्र तु नेत्याश्चर्य्यं ॥ १२९ ॥

अहो इति । हे देवा महःसहायानां तेजस्विनां दिव्यमू-

सा वव्रे यं तमुत्सृज्य मह्यमीर्ष्याजुषः स्थ किम् ।
ब्रूतागःसद्म नस्तस्माच्छद्मनाद्याच्छिनद्मि ताम् ॥ १३१ ॥

क्षीनां भवतामपि क्षमैवास्मै कलङ्काय, इन्द्रादिषु सत्स्वपि भैमी नलं वृतवतीति अपयशसे, अथ च नलकृतानादररूपाय, अथ च लज्जावशादन्यत्रनवीक्षणाशक्तिमुखमालिन्यरूपाय कलङ्काय सम्भूता । अहो महदाश्चर्य्यं । गुणभूतापि क्षमा दोषाय जातेत्यर्थः । महःमहायस्य तेजस्विनो देवस्य दीप्यमानस्यामृतद्युतेश्चन्द्रस्येव । यथा चन्द्रस्य क्षमा भूमिः कलङ्काय जाता भवतामपीत्यपिशब्देन यत्र कलङ्कशङ्कापि नास्तीति सूचितम् । भूश्चन्द्रे कलङ्क इति ज्योतिर्विदः । महःमहायानामपीति वा चन्द्रस्य यथा तथा भवतामपीति समुच्चयार्थो वा । क्षमां परित्यज्य भवद्भिरन्यतरस्य चेद् दण्डो नाकरिष्यत् तर्ह्यपयशो नाभविष्यदिति भावः ॥ १३० ॥

सेति । हे देवाः सा भैमी यं वव्रे तं नलं उत्सृज्य यूयं स्थ मह्यं कलये किमिति ईर्ष्याजुषः अक्षान्तिपराः स्थ भवथ अपराधिनस्तस्यापकर्त्तुमशक्ताः मह्योऽनपराधाय मह्यं किमिति ईर्ष्यायुक्ताः स्थेत्युपहासः । तस्माद्यूयं ब्रूत कथयत । अहं तस्मान्नलात् सकाशाच्छद्मना कपटेन कथमपि वञ्चयित्वा अद्यैव तामाच्छिनद्मि आहरामि । यत आगमो भवदनादररूपापराधस्य सद्माश्रयभूतस्तस्मात् । अविलम्बेनैव तामाहरामि गच्छेति मामनुमन्यध्वमित्यर्थः । अन्येनापराधे कृतेऽन्यस्मै द्रुह्यत इति युक्तमिति लोकरीत्युपहासः । ब्रूत नो युष्माकमस्माकञ्चा-

यतध्वं सहकर्त्तुं मां पाञ्चाली पाण्डवैरिव।
सापि पञ्चभिरस्माभिः संविभज्यैव भुज्यताम्॥ १३२॥
अथापरिवृढा सोढुं मूर्खतां मुखरस्य ताम्।
चक्रे गिरा शराघातं भारती सारतीव्रया॥ १३३॥

गःमह्य अनादरकरणात् अपराधिनीं तां नलादानयामीति वा। मह्यं। क्रुधद्रुहेति (पा० १।४।३७) चतुर्थी। आच्छिनद्मि। वर्त्तमानसामीप्ये लट्॥ १३१॥

यतध्वमिति। यूयं मां सहकर्त्तुं सहकारिणं कर्त्तुं यतध्वं यत्नं कुरुत। भैमीमानेतुमहं गच्छामि यूयं मम सहायार्थमागच्छतेत्यर्थः। तत्र साहाय्ये ऽस्माकं किं फलमित्यत आह। अस्माभिरिन्द्राग्नियमवरुणैर्मया सह पञ्चभिः सा भैम्यपि संविभज्य भोगकालं समानभागमेव कृत्वैवोपभुज्यतां। तथा च भवतामपि फलमस्तीति भावः।कैः केव।पञ्चभिः पाण्डवैः पाञ्चाली द्रौपदीव। पाञ्चालीदृष्टान्तेनैकस्याः पतिव्रताया बहुभिरुपभोगेन दृष्टचरा इत्यलौकिकत्वं परिहृतं। पाण्डवानामग्रभावित्वात् तदानीं दृष्टान्तत्वेन कलेर्योगित्वात् भविष्यदर्थज्ञानसामर्थ्याद्वचनं युक्तम्। जगत्प्रवाहानादितया पाण्डवपाञ्चालीवृत्तान्तानामतीतत्वात्तदुदाहरणीकृत्यैतदुक्तमिति।पाञ्चाली। जनपदवाचिनः क्षत्रियस्याभिधायिनः पञ्चालशब्दः, जनपदशब्दात्क्षत्रियादिति (पा० ४।१।१६८) अपत्ये ऽञ्॥ १३२॥

अथेति। अथ पूर्वोक्तकलिवचनाकर्णनानन्तरं तामुक्तप्र-

कीर्त्तिं भैमीं वरांश्चास्मै दातुमेवागमन्नमी।
न लीढे धीरवैदग्धीं धीरगम्भीरगाहिनी॥ १३४॥

कारां मुखरस्यानुचितभाषणशीलस्य कलेर्मूर्खतां सोढुं चन्तुम-परिवृढाऽसमर्था भारती सरस्वती अर्थगाम्भीर्य्यात् सारया श्रेष्ठया परुषत्वाच्च तीव्रया दुःसहया गिरा कलेः शराघातं वाणव्यथामिव चक्रे वाणवत् पीडाकरं परुषं वचनमूच इत्यर्थः। भारतीव्रयेति पाठे अर्थगाम्भीर्य्येण दुःसहया॥ १३३॥

कीर्त्तिमिति। हे कले अमी देवा अस्मै नलाय भैमीं दातु-मेव, तथा भैमीं कामयमानोऽपि इन्द्राद्यर्थं भैम्या एव दूत्यं कृतवानेवंविधोऽतिधीरः कोऽपि नास्तीति कीर्त्तिं यशः, तथा भैमीञ्च प्रत्यक्षलक्ष्म्यां, तथाऽऽकप्रकारान् वरांश्चास्मै नलाय दातुमेवागमन् स्वयम्वरङ्कृतवन्तो न तु भैमीं वरीतुमिति त्वं नो वेत्सीत्यर्थः। देवा हि केनापि प्रकारेण परीक्ष्य परितुष्टाः सन्तो वरं ददते। कुतोऽहं न वेद्मीत्यत आह। यस्मादगम्भी-रस्य तलस्पर्शस्य गाहिनी स्पर्शिनी गम्भीरार्थग्राहिणी न भवती-त्यर्थः, एवम्भूता मूढानां बुद्धिर्धीराणां महाशयानां वैदग्धीं चातुरीं न लीढे न वेत्तीत्यर्थः। त्वं तु मूर्खत्वादेतेषां अभिप्रा-यमज्ञात्वोपहसितवानिति भावः। अधीरित्यकारप्रश्लेषेण सम्बोध्य, अगम्भीरगाहिनी ते धीर्वैदग्धीमर्थादेतेषां न लीढ इति वा। हे अधीर्बुद्धिरहित मन्दबुद्धे कले अगम्भीरगाहिनी ते धीर-वैदग्धीमचातुर्य्यं नास्वादयत्यपि तु प्राप्नोत्येवेति काक्वा वा

वाग्मिनीं जडजिह्वस्तां प्रतिवक्तुमशक्तिमान् ।
लीलावहेलितां कृत्वा देवानेवावदत् कलिः ॥ १३५ ॥
प्रोञ्छि वाञ्छितमस्माभिरपि तां प्रति सम्प्रति ।
तस्मिन्नले न लेशोऽपि कारुण्यस्यास्ति नः पुनः ॥ १३६ ॥
वृत्ते कर्म्मणि कुर्म्मः किं तदा नाभूम तत्र यत् ।
कालोचितमिदानीं नः शृणुतालोचितं सुराः ॥ १३७ ॥

व्याख्येयं । लीढे । लिहेः स्वरितत्वात्तङ् । क्वचिल्लेढीति पाठः ॥ १३४ ॥

वाग्मिनीमिति । कलिः वाग्मिनीं वाचो युक्तिपरम्पराचतुरां तां देवीं प्रतिवक्तुं प्रत्युत्तरं दातुं अशक्तिमान् असमर्थो यतः प्रत्युत्तरास्फुरणो जडजिह्वः कुण्ठितवदनशक्तिः अत एव तां लीलया विलासव्याजेनावहेलितां कृत्वाऽप्रियं त्वां प्रति वक्तुमयुक्तमित्येवंप्रकारं परिहास्य देवानेवावदत् ॥ १३५ ॥

प्रोञ्छीति । हे देवाः सम्प्रति अस्माभिरपि तां भैमीं प्रति वाञ्छितं अभिलाषः प्रोञ्छि परिमार्जितः त्यक्तमित्यर्थः । नोऽस्माकं पुनः कारुण्यस्य लेशोऽपि तस्मिन्नले नास्ति नलमपकर्त्तुं प्रवृत्तामहे इत्यर्थः । प्रोञ्छि । उञ्छेर्वर्जनार्थात् कर्म्मणि चिण् ॥ १३६ ॥

वृत्त इति । हे देवाः स्वयम्वरलक्षणे कर्म्मणि वृत्ते जाते सति किं कार्य्यं कुर्म्मोऽपि तु किञ्चिदिदानीं कर्त्तुं न शक्यं । पश्चात्तापमात्रं भवति न तु तल्लाभः परदारत्वाद्गतशोको न

प्रतिज्ञेयं नले विज्ञाः कलेर्विज्ञायतां मम।
तेन भैमीञ्च भूमिञ्च त्याजयामि जयामि तम् ॥ १३८॥
नैषधेन विरोधं मे चण्डतामण्डितौजसः।
जगन्ति हन्त गायन्तु रवेः कैरववैरवत् ॥ १३९ ॥

कर्त्तव्य इति च। तस्मात्तां प्रति वाञ्छितं त्यक्तमित्यर्थः। यद् यस्मात्तदा स्वयम्वरसमये वयं तत्र नाभूम स्थिताः। तदानीं चेत्तत्र भविष्यामस्तर्हि तथैवाकरिष्यामस्तन्नाभूदित्यर्थः। हे देवा यूयं इदानीं पुनर्भैम्या नले वृते सत्यपि कालोचितं समयोचितं नोऽस्माकमालोचितं विचारं शृणुत आकर्णयत। नले कृपालेशोऽपि नास्ति इति मयोक्तं तत्प्रकारमाकर्णयतेत्यर्थः। नः। अस्मदोर्द्वयोश्चेति (पा० १।२।५९) बहुत्वं। आलोचितं भावे क्तः ॥ १३७॥

तदेवाह। प्रतिज्ञेति। हे विज्ञाः कलेर्ममेयं प्रतिज्ञा नले विषये विज्ञायतां भवद्भिरिति शेषः। इयमिति किं। अहं तेन नलेन प्रयोज्येन भैमीञ्च भूमिञ्च त्याजयामि शीघ्रं मोचयामि अत एव तं जयामि इति प्रतिज्ञा मम चेतस्येवं वर्त्तत इति भवद्भिर्ज्ञायत एव तथापि स्पष्टं मया कथ्यते, तदाकर्ण्यतामित्यर्थः। कलेर्ममेत्यहङ्कारः सूचितः। तेन। अनुक्ते कर्त्तरि तृतीया। त्याजयामि जयामीति वर्त्तमानसामीप्ये भविष्यति लट् ॥ १३८॥

नैषधेनेति। चण्डतया भूभैमीपरित्याजनद्वाराऽतिपीडा-

द्वापरः साधुकारेण तद्विकारमदीदिपत्।
प्रणीय श्रवणे पाणिमवोचन्नमुचे रिपुः॥ १४०॥

कारित्वान्निर्दयत्वेन मण्डितौजसोऽलङ्कृततेजसो मे मम नैषधेन सह विरोधं जगतीत्रयेऽपि लोका गायन्तु कीर्त्तयन्तु। कस्य किमिव। चण्डतामण्डितौजसो रवेः सूर्य्यस्य कैरवैः कुमुदैः सह वैरवत् विरोधमिव। हन्त खेदे। अयोग्येन हीनतेजसा नलेन सह विरोधारम्भात् त्रैलोक्ये यद्यप्ययशो भविष्यति तथापि किं कुर्म्म इति रे वद। अपयशःसमुदयेऽपि सूर्य्येण कैरववैरवत् मयापि नलवैरं करिष्यत एवेति भावः। एतेन दर्पः सूचितः॥ १३९॥

द्वापर इति। द्वापरस्तृतीययुगरूपः सहचरः तस्य कलेर्विकारं नलेन सह विरोधरूपं साधुकारेण साध्विति शब्दोच्चारणेन अदीदिपत्, साधूचितमेव त्वया विचारितमित्युद्दीपयामास, तस्य प्रोत्साहनं चकारेत्यर्थः। अथ नमुचेर्दैत्यस्य रिपुरिन्द्रो युष्माभिः साहाय्यं कर्त्तव्यमिति कलिनोक्तस्य वचस उत्तरत्वेनैतद्व्यापारमध्येऽस्माभिर्न स्थीयत इति लौकिकाभिनयव्यञ्जनवशाच्छ्रवणे पाणिं प्रणीय यत् त्वया विचारितं तदस्माभिः श्रोतुमप्यनर्हमिति वा पाणिभ्यां कर्णौ पिधाय कलिमवोचत्। अदीदिपत्। दीपेर्ण्यन्ताच्चङि, भ्राजभासभाषदीप (पा० ७।४।३) इत्यादिनोपधाह्रस्वविकल्पः॥ १४०॥

विस्मेयमतिरस्मासु साधु वैलक्ष्यमीक्षसे ।
यद्दत्तेऽल्पमनल्पाय तद्दत्ते ह्रियमात्मने ॥ १४१ ॥

विस्मेयेति । हे कले त्वं विस्मेयाश्चर्य्यहेतुर्मतिर्यस्यैवंविधोऽसि यस्मात्त्वमस्मासु वर्त्तमानं वैलक्ष्यं सलज्जत्वं साधु सम्यक्प्रकारेण ईक्षसे जानासि। पराशयवेदितया तव तीक्ष्णबुद्धित्वाद्वयं विस्मिताः स्म इत्युपहासः। साधूचितं यद्वैलक्ष्यं तद्यस्मादीक्षस इति वा। कथं भवत्सु वैलक्ष्यमुचितमित्याशङ्क्य समर्थयते। पुरुषोऽनल्पाय महते पुरुषायाल्पं अतितुच्छं वस्तु दत्ते इति यत् स पुरुषस्तदल्पवस्तुदानं कर्म्म आत्मने स्वस्मै ह्रियमेव दत्ते। महते यत् अल्पं दीयते तदल्पदानमेव कर्तृ दात्रे पुरुषाय लज्जामेव दत्ते। तेन तस्य लज्जैव भवतीत्यर्थ इति वा। तथा च महते नलाय अस्माभिरल्पमेव दत्तमिति विषादादस्मासु लज्जा युक्तैवेति भावः। अतितरां नलमाहात्म्यं सूचितं। एतेन दूरान्नः प्रेक्ष्येति तस्योत्तरं। यद्यदि तत्तर्हीति वा योज्यं। यद्वा अनल्पाय न विद्यतेऽल्पो यस्मादिति हीनायेत्यर्थः। यदस्मदादिरल्पं कस्कोऽयं धर्म्ममर्म्माणि कृन्ततीत्याद्युपालम्भवचनं दत्ते करोति तत् स्वस्मै ह्रियमेव दत्ते। अधमस्य महोपालम्भयोग्यस्य तवाल्प एवोपालम्भः कृत इति विषादादस्माकं वैलक्ष्यं युक्तमेवेति व्याख्येयम्। अधमायाल्पमपि उपालम्भादि यद्दत्ते तत् स्वस्मै ह्रियं दत्ते। अधमेन सह सम्भाषणनिषेधात् तस्योपालम्भोऽपि न कार्य्यः स त्वस्माभिः कृतः। तथा च पापरूपेण भवता

फलसीमां चतुर्वर्गं यच्छतांशोऽपि यच्छति ।
नलस्यास्मदुपघ्ना सा भक्तिर्भूतावकेशिनी ॥ १४२ ॥

सह सम्भाषणमस्माभिरनुचितं कृतमिति विषादादस्मासु वैलक्ष्यं युक्तमेवेति वा । इयमपि वक्रोक्तिः ॥ १४१ ॥

दानात्मत्वनलमहत्त्वप्रकटनपूर्व्वं वैलक्षण्यस्यौचित्यं समर्थ्यते । फलेति । यस्या नलभक्तेः शतांशोऽपि शततमो भागः फलस्य सीमां मर्य्यादीभूतां निरतिशयफलरूपं चतुवर्गं धर्म्मार्थकाममोक्षरूपं यच्छति नलाय दातुं शक्नोति सास्मदुपघ्नाऽस्मदाश्रयास्मद्विषया नलस्य भक्तिरवकेशिनी फलभूता जाता । यस्या भक्तेः शततमेनांशेन वशीकृतैरस्माभिः सन्तुष्य फलरूपत्वेन चतुर्वर्गोऽपि नलाय दातुं शक्यते तस्या निरतिशयायाः परिपूर्णायास्चतुर्वर्गादधिकतमस्य फलस्याभावादस्माकं दातुमसामर्थ्यात् सा निष्फलैव जातेत्यर्थः । निरतिशयभक्तेर्युक्तत्वान्महते नलाय चतुर्वर्गोऽप्यल्पतरफलत्वाद्दातुमयुक्तः । तादृशाय भैमीलक्षणाल्पतमफलदाने कृतेऽस्माकं लज्जा युक्तैवेति भावः । यच्छततमांशवशीकृतैरस्माभिर्दत्तसामर्थ्यो नलोऽप्यन्यस्मै जनाय फलावधि चतुर्वर्गं दातुं शक्नोतीति यावत् सा भक्तिरपूर्णा निष्फला जातेति वा व्याख्येयम् । सोऽपीति पाठे चतुर्वर्गं ददतामस्माकं स नलोऽपि क्रियमाणकर्म्मफलमर्य्यादां ब्रह्मार्पणं ददाति । तस्याः पुनः प्रत्यर्पणात् अस्माकञ्च साम्यमेव । किन्तु नलस्यास्मद्विषया निरतिशया कर्म्ममात्रस्यापि ब्रह्मणे वार्पणात्

भव्यो न व्यवसायस्ते नले साधुमतौ कले।
लोकपालविशालोऽसौ निषधानां सुधाकरः॥ १४३॥
न पश्यामः कलेस्तस्मिन्नवकाशं क्षमाभृति।
निचिताखिलधर्म्मे च द्वापरस्योदयं वयम्॥ १४४॥

फलाभिसन्धानरहिता भक्तिर्वन्ध्या जाता। तादृशम् भक्तिफलदानेऽस्माकमसामर्थ्यात् तथा च वैलक्षण्यं युक्तमेवेति व्याख्येयम्। यच्छ्रुतां। सम्बन्धे षष्ठी। शतश्चासावंशश्चेति विगृह्य लक्षणया शततमोंऽश इति। उपघ्ना आश्रय इति साधुः॥१४२॥

नलो वैरार्हो न भवतीत्याह। भव्य इति। हे कले रागद्वेषादिराहित्येन साध्वी निर्म्मला मतिर्यस्य तस्मिन्नले विषये ते व्यवसायो वैरकरणोद्यमो भव्यः शुभोदर्को न। किञ्च निषधदेशानामाह्लादकत्वात् सुधाकरश्चन्द्रोऽयं नलः, लोकपाला दिक्पालास्तद्वद्विशेषेण शालते शोभते स्वाभाविकेन शौर्य्यादिना तदंशत्वाद्वा लोकपालवन्महाशयः। अतस्तेन सह वैरं तव शुभोदर्कं न भवतीति न तत् कार्य्यमित्यर्थः। मते इति पाठे, असाध्वी मतिर्यस्येति अकारप्रश्लेषेण कलेर्विशेषणं। मतः कलेरिति पाठे असाधोर्द्वापरादेरनुमत इति व्यवसायविशेषणम्॥ १४३॥

एतदेव स्फुटयति। नेति। वयं तस्मिन् क्षमाभृति राज्ञि नले कलेस्तुर्य्ययुगस्य तवावकाशं प्रवेशावसरं न पश्यामः सम्भावयामः। तथा भवन्मित्रस्य द्वापरस्य च उदयं नलपराभवसामर्थ्यं न

सा विनीततमा भैमी व्यर्थानर्थग्रहैरहो।
कथं भवद्भिर्बाध्या प्रमितिर्विभ्रमैरिव ॥ १४५ ॥

सम्भावयामः यतो नितरां चिता अर्जिता अखिला धर्म्मा येन श्रौतस्मार्त्तधर्म्मानुष्ठानरीतिरुभयत्र हेतुः। तस्य धर्म्ममयत्वाद्-भयोः पापरूपत्वात्तत्रावकाशलेशोऽपि न सम्भाव्यत इत्यर्थः। यद्यपि देवा नलपराभवस्य भविष्यत्तां जानन्ति तथाप्युत्साह-भङ्गद्वारा कलिनिषेध एव तात्पर्य्यात् अवकाशं न पश्याम इत्यूचुः। यद्वा पश्याम इति वर्त्तमानसामीप्ये भविष्यति लट्-प्रयोगात् प्रस्तुतोऽवकाशो नास्ति विलम्बेन भविष्यतीति सूचि-तमिति ज्ञेयम्। अथ च यथासङ्ख्येन तितिक्षाशीले पुरुषे कल-ह्यावकाशो न निश्चितः सकलधर्म्मरहस्ये च सन्देहस्योदयः प्रभ-वतीति युक्तम् ॥ १४४ ॥

भैम्यपि न बाध्येत्याह। सेति। पातिव्रत्यादिधर्म्मनिष्ठत्वा-द्विनीततमा सा भैमी व्यर्था निर्हेतुको वैराचरणलक्षणोऽनर्थ-स्तत्र ग्रहोऽभिनिवेशो येषां तैर्भवद्भिः कथमिव बाध्या पीड-यितव्याऽनुचितमेतत्। अहो कष्टम्। सम्बुद्धिर्वा आश्चर्य्ये वा। कैः केव। विशिष्टैर्भ्रमैर्विपर्य्ययज्ञानैर्विनीतं सुतरामपाकृतं तमो-ऽज्ञानं यथैवम्भूता भ्रान्तिर्ज्ञानविरोधिनी प्रमितिः सम्यगनुभू-तिस्तात्त्विकरजतादिधीरिव। कथं बाध्येत्यर्थः। किम्भूतैर्विभ्रमैः। व्यर्था निष्फलोऽनर्थस्य शुक्तिरजतादेर्ग्रहो ज्ञानं येषां तैः। अ-विनीततम आ इति पदच्छेदः। आः कोपे, नितरामविनीत अधम कले इति वा ॥ १४५ ॥

तन्नासत्ययुगं तौ वा त्रेता स्पर्द्धितुमर्हति ।
एकप्रकाशधर्म्माणं न कलिद्वापरौ युवाम् ॥ १४६ ॥

तन्नेति । उक्तिविशेषेण षड्भिः श्लोकैः पुनरपि तौ न वाध्यावित्याह । तमिति । न असत्यं नासत्यं किन्तु सत्यमेव युगं सत्ययुगं कृतयुगमिति यावत् । तत् तं नलं तां भैमीं वा स्पर्द्धितुं तुलयितुं अर्हति तथा त्रेतायुगमपि स्पर्द्धितुमर्हति न तु जेतुमित्यर्थः । यथा सङ्ख्येन वा योज्यं । यस्मादेको मुख्यः स चासौ प्रकाशधर्म्मा च तं तां च प्रकाशः प्रसिद्धो धर्म्मो यस्य यस्याश्च । पश्चादेकशब्देन कर्म्मधारयः, लोकत्रयस्त्रीपुंसमध्ये तावेव धर्म्मप्रधानौ यतः तस्मात् सत्ययुगस्यापि चतुश्चरणधर्म्मत्वादेकप्रकाशधर्म्मत्वात् सत्ययुगं स्पर्द्धितुमर्हति, त्रेतायास्तु त्रिचरणधर्म्मत्वेऽपि कलिद्वापरापेक्षया धर्म्मबाहुल्यात् कृतयुगसाधर्म्म्यात् एकप्रकाशधर्म्मत्वसम्भवात् सापि स्पर्द्धितुमर्हतीत्यर्थः । कलिद्वापरौ युवां युगे पुनः तौ स्पर्द्धितुं नार्हथ, इति विभक्तिविपरिणामः कार्य्यः । तयोर्द्धर्म्मैकप्रधानत्वात्, युवयोश्चाधर्म्मबाहुल्यात्, युवां तौ तुलयितुमसमर्थौ किं पुनर्जेतुमित्यर्थः । आ सामस्त्येन सत्यं यत्र तदासत्यं तत्र तद्युगं चतुश्चरणाधर्म्मयुक्तं कृतयुगं तत्र त्रेतायुगं तौ स्पर्द्धितुं नार्हतः अपि त्वर्हत एवेति काकुः । उक्तादेव हेतोः नासत्ययुगं कृतयुगं तौ स्पर्द्धितुमर्हति । तत्रैव तयोः सत्त्वाद् धर्म्मप्रधानाच्च । त्रेतायुगञ्च नार्हति । त्रयाणामप्यधर्म्मसंस्पर्शात् । तत्र तयोरसत्त्वाच्चेति वा । कलिद्वापरयोः

पुरुषत्वात् नलेन सह त्रेतायाश्च स्त्रीत्वात् भैम्या सह स्पर्द्धासम्भावनायां पार्थक्येन निषेधो युक्त इति वा। कृतयुगं तं स्पर्द्धितुं नार्हति। युवामपि नार्हथः। सत्ययुगेऽधर्म्मलेशसम्भावनापि सम्भवेन्न तु नले। तथा त्रेतायामपि न तु भैम्यां। तथा चाद्ययुगद्वयं ताभ्यां स्पर्द्धितुमपि न शक्यं, युवां पुनर्न शक्ताविति किं वाच्यमित्यर्थ इति वा। अथ च दस्रयोर्युगं नलं स्पर्द्धितुमर्हति। गार्हपत्याहवनीयदक्षिणाग्नित्रयरूपा त्रेता च भैमीं स्पर्द्धितुमर्हति। यत एकः केवलः प्रकाश उज्ज्वलः प्रसिद्धो वा, धर्म्मस्वभावः सौन्दर्य्यादिगुणो वा, ययोर्भैमीनलयोः प्रकाशशोभालक्षणो धर्म्मो ययोरिति वा। अग्नित्रयपक्षेऽप्येकः केवलः प्रकाशस्तेज एव धर्म्मस्वभावो यस्या इति सौन्दर्य्याद्दीप्तत्वात् पावित्र्याच्च दस्रयुगमग्नित्रयञ्च ताभ्यां तुल्यं भवितुमर्हतीत्यर्थः। कलिद्वापरौ युवां पुनर्न। असुन्दरत्वात् पापप्रधानत्वाच्चेत्यर्थः। अथ चैको विरुद्धधर्म्मरहितः प्रकाशो निश्चितश्च धर्म्मो यत्र तञ्च ताञ्च कलहसन्देहौ स्पर्द्धितुं नार्हतः। विरुद्धधर्म्मत्वे हि कलहसम्भवो विशेषधर्म्मप्रकाशे च सन्देहसम्भवः। तत्र त्वेकधर्म्मत्वात् प्रकाशमानधर्म्मत्वाच्च कलहसन्देहौ न सम्भवत इति युक्तमिति भावः। त्रेताग्नित्रितये युगे, प्रकाशस्तु प्रसिद्धे स्यात्, सन्देहद्वापरौ चाथेत्यमरः। प्रकाशधर्म्मशब्दयोः पूर्व्वं बहुव्रीहौ, धर्म्मादनिच् केवलात् (पा० ५।४।१२४) इति समासान्तः, पश्चात् पूर्व्वेण समासः॥ १४६॥

करिष्येऽवश्यमित्युक्त्वा करिष्यन्नपि दुष्यसि ।
दृष्टादृष्टा हि नायत्ताः कार्य्ये या हेतवस्तव ॥ १४७ ॥

करिष्य इति । हे कलेऽवश्यं निश्चितं करिष्येऽर्थान्नलपराभवं इत्युक्तिः प्रतिज्ञावचो यस्यैवम्भूतस्त्वं करिष्यन्नपि कर्त्तुकामोऽपि दुष्यसि दुष्टो भवसि । अपकारस्य भविष्यत्त्वादिदानीं साक्षात्कायव्यापाराभावेऽपि मनस्यपकारकरणवासनाया वृतत्वाद् वचनेन चानुवादाद्द्विविधबाधकसद्भावाद् ब्रह्महत्याया अकरणेऽपि ब्रह्महत्यां करिष्याम्यादाविवेत्यर्थः। कुर्व्वाणो दुष्टो भविष्यसीति किं वाच्यमित्यपिशब्दार्थः । अथ वा कर्त्ता दुष्यस्येव प्रतिज्ञाभङ्गादिति किं वाच्यमिति । कार्य्यसाधिका दृष्टादृष्टसामग्री तावत्तथा सम्पादयितुमशक्या किन्तु सा तस्य तस्य तत्तत्कर्म्मवशात् स्वयमेव सम्पद्यत इत्यर्थान्तरन्यासः । तथा चैवं त्वया चित्ते धृतेऽनूदिते चेद्द्विविधपातकमेव भवति न तु तं पराभवितुं शक्नोषीति । यद्यपि तं पराभवितुं शक्ष्यसे तथापि नलाय दृष्टादृष्टसामग्र्येव तत्र प्रयोजिका न तु त्वमिति । मयैवं करिष्ये मयैवं कृतमित्यादिरूपां प्रतिज्ञां प्रति स्वमात्रस्य कारणत्वाभावाद् दृष्टादृष्टकारणवैगुण्येन प्रतिज्ञाभङ्गस्यापि शङ्कितत्वादिन्द्रोऽपि कर्त्तुमशक्तस्त्वं तु को नाम वराक इति च भावः । यद्वा दृष्टादृष्टरूपा हेतवः । दृष्टसामग्री यथा कथञ्चित् यद्यपि सम्पादयितुं शक्यते तथाप्यदृष्टसामग्री त्वया न शक्यते । तथा च नलेन यदि परमो धर्म्मः कृतस्तर्हि स त्वया

द्रोहं मोहेन यस्तस्मिन्नाचरेदचिरेण सः।
तत् पापसम्भवन्तापमाप्नुयादनयात्ततः ॥ १४८ ॥
युगशेष तव द्वेषस्तस्मिन्नेष न साम्प्रतं।
भविता न हितायैतद्वैरं ते वैरसेनिना ॥ १४९ ॥

पराभवितुमशक्यः। अथाधर्मः कृतस्तर्ह्यधर्मवशादेव तस्य तादृशी दशा भविष्यति त्वया किं क्रियते इत्युभयथापि दोषात्, मयैवं क्रियते, करिष्यते, कृतमित्यादिवल्गना न कार्य्येति भावः। इत्युक्त्वेति पाठे अवश्यं वश्यं वा करिष्ये इत्युक्त्वाऽकारप्रश्लेषेणाकरिष्यन्नपि दुष्यसि। वाङ्मात्रेणापि पापसिद्धेः किं पुनः करिष्यन्निति। अन्यत् पूर्ववत्। कार्य्यीयाः। तस्येदमित्यर्थः। तस्मै हितमित्यर्थ इति वा ॥ १४७ ॥

द्रोहमिति। यः पुरुषो मोहेनाज्ञानेनापि तस्मिन् पुण्यश्लोकेऽनपकारिणि द्रोहमपकारमाचरेत् स पुरुषस्ततस्तस्मात् अनयादन्यायाद्धेतोरचिरेण तस्मात्तादृशापकरणजातात् पापात् सम्भवो यस्य तं पापं दुःखं आप्नुयात्, बुद्धिपूर्व्वकारी लभत इति किं वाच्यमित्यर्थः। नलद्रोहस्तस्मात् त्वया सर्व्वथा त्याज्य इति भावः। अनेन शापोऽपि दत्त इति ज्ञेयम्। मोहेनेत्यत्रार्थादपिशब्दो योज्यः। मोहसेन स्वामिन् अज्ञानाश्रय मूर्खतर इति वा सम्बोधनं ॥ १४८ ॥

युगेति। हे युगानां सत्यादीनां शेष कले तस्मिन्नले तवैष द्वेषो न साम्प्रतमयुक्तः। यस्माद्वैरसेनिना नलेन सह एतत

तत्र यामीत्यसञ्ज्ञानं राजसं सदिहास्यताम्।
इति तत्र गतो मा गाः राजसंसदि हास्यताम्॥ १५०॥
गत्वान्तरा नलं भैमीं नाक्रमास्त्वं प्रवेक्ष्यसि।
पणाञ्चक्रमसंयुक्तं पद्यमानं ढकारवत्॥ १५१॥

प्रारब्धं वैरं ते तुभ्यं हिताय न भविता शुभोदर्कं न भविष्यति। युगेषु शेष इति निर्द्धारणे सप्तमीसमासः। साम्प्रतमव्ययम्। हितयोगे तुभ्यमिति चतुर्थी॥ १४८॥

तत्रेति। हे कले तत्र नलसमीपे पराभवार्थं यामि गच्छामीति एवम्भूतं राजसं ज्ञानं रजोगुणसहितं विचारासहं अत एवासदशोभनं सद्दर्त्तकानं इहास्मिन् काले देशे वास्यतां त्यज्यतां इति, सद्भद्रमिति वा, इति विचार्य्येति यावत्। इति किं। तत्र राजसंसदि तस्यां नलसभायां गतः सन् हास्यतां परिहासास्पदत्वं मा गाः। एवं विचार्य्य तत्र गतः सन्वैरूपहास्य एव भविष्यसि। न तु नलं पराभवितुं शक्ष्यसीत्येवंविधो विचारः परित्याज्य एवेत्यर्थः। असत्सदिति विरोधाभासः। तत्र यामीति ज्ञानमसत् अयुक्तं यतो राजसं। तर्हि किं कर्त्तव्यं तत्राह। इहास्मिन्नेव देशे आस्यतां स्थीयतां इत एव परावर्त्तनीयमित्यर्थः। इति अस्मदीयं ज्ञानं सद्भद्रमितीतिशब्दमावृत्य व्याख्येयम्। विपक्षे बाधकमाह उत्तरार्द्धेन। तत्र स्वयम्वरे गतो राजसभायां स्वयम्वरे वृत्ते किमर्थमागत इति हास्यतामेव गमिष्यसि॥१५०॥

गत्वेति। हे कले निषधदेशान् गत्वा प्राप्य नलं भैमीमन्तरा

नलभैम्योर्मध्ये अकस्माच्छीघ्रं दुरितलक्षणकारणमन्तरेण वा त्वं न प्रवेच्यसि प्रवेशं कर्त्तुं न शच्यसि। नलस्य पुण्यश्लोकत्वाद्भैम्याश्च पातिव्रत्यादिधर्म्मयुक्तत्वात् तौ पराभवितुं न शक्ष्यसीत्यर्थः। क इव। असंयुक्तं पूर्व्वं सन्धितया पृथक्कृतप्रकृतिप्रत्ययविभागः पश्चात् पच्यमानं संहितया प्रयोगार्हमुच्चार्य्यमाणमिति यावत्, एवम्भूतं षणाञ्चक्रं षणामिति शब्दरूपस्य वर्णवृन्दमन्तरा मध्ये डकारवत् डकारो वर्णो यथाऽकस्माद्विधिमन्तरेण न प्रविश-तीति साधर्म्योपमा। षट्शब्दात् षष्ठीबहुवचने, षट्चतुर्भ्यश्चेति (पा० ७।१।५५) नुटि तत्सहिते आमि, स्वादिष्वसर्व्वनामस्थान इति (पा० १।४।१७) पूर्व्वपदस्य पदत्वात्, झलां जशोऽन्त इति (पा० ८।२।३९) जश्त्वेन टकारस्य डकारे, न पदान्तादिति (पा० ८।४।४२) निषेधस्य, अनाम्नवतीति (पा० ८।४।४२ सू० १ वा०) निषेधात् ष्टुना ष्टुरिति (पा० ८।४।४१) ष्टुत्वेन नाम्नो न-कारस्य णकारादेशे, यरोऽनुनासिक इति (पा० ८।४।४५) डका-रस्यापि अनुनासिकस्य व्यवस्थितविकल्पत्वादनुनासिकस्यात्र नि-त्यत्वेन णकारे जाते सर्व्वथापि न स्वेन रूपेण षणामिति पद-मध्ये डकारो यथा प्रवेशं लभते तथा तयोर्मध्ये त्वमपीत्याशयः। अन्यथा विकल्पत्वात् पक्षे षट्नामिति स्यात्, तन्माभूदित्यत्र व्य-वस्थितविभाषाऽङ्गीकरणीया। षणाञ्चेत्यत्र चकारः पृथक्कृत्य भैमीं चेति योज्यः। तथा च क्रमेण पर्य्यायेण संयुक्तं षणामिति कर्म्मभूतशब्दरूपं अन्तरा डकारो यथा न प्रविशति, असंयुक्ताव-स्थायां यद्यपि स्वेन रूपेणावस्थानं वर्त्तते तथापि संयुक्तावस्थायां

अपरेऽपि दिशामीशा वाचमेनां शचीपतेः।
अन्वमन्यन्त किन्त्वेनां नादत्त युगयोर्युगं ॥ १५२ ॥
कलिं प्रति कलिं देवा देवान् प्रत्येकशः कलिः।
सोपहासं समैर्वर्णैरित्थं व्यरचयन्मिथः ॥ १५३ ॥

नास्तीत्यर्थ इति वा। षणामित्यत्र प्रकृतिप्रत्ययदशायां अक-स्मादागन्तुकादेशरूपतया डकारो यथा प्रविशति तथा त्वं प्रवे-क्ष्यसीति वैधर्म्योपमया व्याख्येयं। टकारवदिति पाठे, वावसाने (पा० ८।४।५६) इत्यवसान एव चर्त्वविकल्पात् खरश्चाभावात् षट्स्वित्यादिवत् षणामित्यत्र खरवसानयोरभावात् टकारो यथा न प्रविशतीति साधर्म्योपमैव। क्षेपकोऽयम्। नलं भैमीं। अन्तरान्तरेणेति (पा० २।३।४) द्वितीया ॥ १५१ ॥

अपर इति। अपरे दिशामीशा वज्ञ्यादयः शचीपतेरेनां पूर्वोक्तां वाचं अन्वमन्यन्त, इन्द्रो युक्तमाज्ञापयतीत्येवमभ्यन-न्दन् किन्तु पुनर्मूर्खं युगयोः कलिद्वापरयोर्युगं एनामिन्द्रगिरं नादत्त नाङ्गीचक्रे। दिगीशानामपि सम्मतायां वाचि तयोर-सम्मतेः किन्तुशब्देन मूर्खतरत्वमायमिहत्वं चोक्तं। एनां। अन्वा-देशे-एनादेशः। आदत्त। अनात्म्यविहरणत्वात्तङ् ॥ १५२ ॥

कलिमिति। देवाः कलिं युगं प्रति लक्षीकृत्य कलिर्देवान् प्रत्येकशः एकैकमुद्दिश्य मिथोऽन्योन्यं समैस्तुल्यैरक्षरैः श्लिष्टैः शब्दैः सोपहासं उपहासवाक्यसहितं कलिं कलहं वाग्युद्धं इत्थं वक्ष्यमाणप्रकारेण व्यरचयन् व्यरचयच्च कृतवन्तः कृतवांश्च-

तवाऽगमनमेवार्हं वैरसेनौ तया वृते।
उद्वेगेन विमानेन किमनेनापि धावता॥ १५४॥

त्यर्थः। अरचयन्। क्रोडादिकस्यादन्तत्वाद्ग्लोपित्वान्न सन्वद्भावः। अररचयदित्यपि पाठः॥ १५३॥

इन्द्रः कलिम्प्रत्याह। तवेति। हे कले तया वैरसेनौ वृते सति तवागमनं गमनाभावः अर्हं युक्तं। उद्वेगेन उत्क्रष्टजवेन अत एव धावता शीघ्रगामिना अनेन प्रत्यक्षदृश्येन विमानेनाकाशगामिना रथेन किं? अपि तु न किञ्चित्प्रयोजनमस्ति, अन्यस्य वृतत्वादित्यर्थः। वैरसेनावुत्तरेण वा सम्बन्धनीयं। अनया नलेऽवृते एव तव स्वपुराद्गमनं युक्तम् नलवरणानन्तरमिदानीं सर्व्वथा गमनं न कार्य्यमित्यर्थ इति वा। एतावत्पर्य्यन्तं किं कृतं इदानीं किमर्थमागम्यत इत्युपहासः। एतदेव वाक्यं कलिरिन्द्रं प्रत्याह॥ हे शक्र भैम्या नले वृते सति तव यथागतमागमनमेवाकृतकार्य्यत्वादिदानीं स्वर्गं प्रत्यगमनमेव युक्तं निर्ल्लज्जत्वमङ्गीकृत्येन्द्राण्यादीनामग्रे कथं मुखं दर्शयिष्यसि अपि त्वनुचितमेतत्, सर्व्वथा स्वर्गं प्रति न गन्तव्यमेव युक्तं इत्यर्थ इति वा। विमानेनाहङ्काररहितेनापिधा तिरोधानं तद्युक्तेन नितराङ्गोपितेनानेन मुखदर्शनानुमितेनोद्वेगेन निर्वेदेन किं? अपि तु तद्गोपनं व्यर्थं धैर्य्यमवलम्ब्य निर्वेदो यद्यपि त्वया गोप्यते तथापि मया ज्ञात एव। अथ च भैमीनलाभ्यां वरदानार्थमेव मयागतमित्यादिव्याजेन निर्वेदगोपनं क्रियते, तथापि स निर्वेदो ज्ञात

पुरा यासि वरीतुं यामग्र एव तया वृते।
अन्यस्मिन् भवतो हास्यं वृत्तमेतत्त्रपाकरं॥ १५५॥

एव। अभिमानशून्यत्वान्न किञ्चिदनेन निर्वेदेन साधयितुं शक्यते। तत्तस्मात् सर्व्वथा दुःखं माकार्षीरित्युपहसितवानित्यर्थः। विमाने नान्यवरणादपमानेन हेतुना य उद्वेगस्तेन प्रकटेन किं? अपि तु न गोपयेति वा। विलुप्तमानानामिन स्वामिन् नितरामभिमानशून्य इन्द्र गोपितेन वानेन निर्वेदेन किमिति वा। उद्वेगेन किं? अनेन धावता विमानेनापि किमिति वा। अपिधा। आतश्चोपसर्गे (पा० ३।३।१०६) इत्यङ्प्रत्ययः॥ १५४॥

वह्निः कलिमाह। पुरेति। हे कले त्वं यां वरीतुं इतोऽपि पुरा यासि गमिष्यसि तयाग्र एव त्वदागमनात् पूर्व्वमेव अन्यस्मिन् वृते एतदिदानीं गमनं त्रपाकरं भवतां हास्यं हास्यकारणं वृत्तं जातं। वर्त्तमानानामपि वृत्तप्रायत्वाद् वृत्तमित्युक्तं। सर्व्वो लोकस्त्वामुपहसिष्यतीत्यर्थः। एतत्तव वृत्तं गमनाचरणं हास्यहेतुभूतं त्रपाकारि च भविष्यतीति शेष इति वा। एतल्लोकैः क्रियमाणं हास्यं तव त्रपयाऽकं दुःखं राति ददाति एवंविधं वृत्तं जातं प्राप्तमेवेति वा। अत्राप्युपहासः॥ इदानीं कलिरग्निमाह। हे वह्ने त्वं यां वरीतुं पुरा यासि अयासीस्तया तव समक्षमेव त्वामनादृत्यान्यस्मिन्नले वृते तवैव प्रत्यक्षदृश्यं वृत्तं वर्त्तनमास्यं मुखं त्रपां आ सामस्त्येन करोति नितरां

पत्यौ तया वृतेऽन्यस्मिन् यदर्थं गतवानसि।
भवतः कोपरोधस्तादक्षमस्य वृथा रुषः॥ १५६॥

लज्जावहं जातमिति शेषः। हा कष्टं। त्रपयाऽकं दुःखं गा-त्यादत्ते। लज्जास्पदं वृत्तं जातमिति वा। हे वक्रे पुरा अस्म-द्गमनात् पूर्व्वं यां वरीतुमयामि त्वया प्रयत्नोऽकारि। स्वय-म्वरं प्रति गतं नलरूपं धृतमिति यावत्। यद्वा स्वस्य गमनात् पूर्व्वं दूतीहस्तनापदाप्रदानादिद्वारा यां वरीतुं प्रयत्नोऽकारि तया तव समक्षमेव नले वृते, एतत् स्वर्गप्रत्यागमनलक्षणमा-चरणं तव त्रपां न करोतीति त्रपाऽकरं लज्जां नावहति। हा कष्टं। एवं वृत्तेऽपि निर्लज्जः सन् स्वगृहं गच्छन् स्वां वनितां मुखं कथं दर्शयिता इति भाव इति। तया विनैव त्वत्स्वर्गमना-चरणं लज्जावहं सत् हास्यं हासयोग्यं। अपि तु सर्व्वैर्हास्यमे-वेति काकुर्वा। मुखं लज्जाकरं वृत्तमाचरणमपि लज्जाकर-मिति वा। यामीति यावत्पुरेति (पा० ३।३।४) भविष्यति लट्। पक्षे, पुरि लुङ् चास्मे (पा० ३।२।१२२) इति भूते लट्। पक्षे यसु प्रयत्ने भावे चिण्॥ १५५॥

यमः कलिमाह। पत्याविति। हे कले त्वं यदर्थं यस्या नि-मित्तेन गतवान् गमनयुक्तोऽसि यां वरीतुमेव गच्छसि तया पूर्व्वमेवान्यस्मिन् पत्यौ वृते स्वभर्तृत्वेनाङ्गीकृते सति भवतः कोपस्य रोधो निवारणं स्तादभवतु। यतोऽक्षमस्यासमर्थस्यात एव वृथा रुट् कोपो निष्फलस्तस्मात्कोपो निवार्य्य इत्यर्थ इति वा॥ कलि-

यासि स्मरं जयन् कान्त्या योजनौघं महार्वता ।
स मूढस्त्वं वृतेऽन्यस्मिन् किन्न क्रोस्टेऽत्र पामर ॥ १५७ ॥

रेतदेव यममाह । हे यम यां वरीतुं गतवानसि तया नले पत्यौ वृते भवतः सकाशादन्योऽधस्तादधरो हीनो न कोऽपि, अपि तु त्वमेव। त्वत्सकाशादन्योऽधो हीनः कः स्यादपि तु त्वमेव हीन इति वा। अपरोऽर्थात्त्वदन्यो भवत उत्पत्तितस्तं ह्युपचयं प्रापयतीति भावः। निरर्थकजन्माऽतएवाधो हीनः कः स्यादपि तु त्वमेव हीन इति वा। सम्बुद्ध्यन्तं वानिरर्थकजन्मन्नित्यर्थः। अक्षमस्य भूम्यर्गरहितस्य देवस्य रुषा वृथा। अस्मादृशानामेव रोषाः सफला न तु भवादृशानामित्यर्थ इति वा। अक्षम असहन असमर्थ यम वृथा निष्कारणमस्मान् प्रति रुषः कोपान् स्य मा कुर्वित्यर्थ इति वा। यस्मै यदर्थं चतुर्थी तदर्थेति (पा० २।१।३६) समासः। गतवान् मतुप्। पत्ये भूते क्तवत्। भवतः। षष्ठी पञ्चमी च दिग्योगे। पत्ये प्रथमा। आतो धातोरिति (पा० ६।४।११०) प्रतिषेधात्, अत्वसन्तस्य चाधातोः (पा० ६।४।१४) इति असन्तत्वेऽपि न दीर्घः। अधस्तादिति दिक्शब्दत्वात् अधरशब्दात्, अस्ताति चेति (पा० ५।३।४०) अस्तातिः, पूर्वाधरा (पा० ५।३।३८) इत्यधरादेशश्च। स्येति षोऽन्तकर्म्मणि ॥ १५६॥

वरुणः कलिमाह। यासीति। हे कले कायकान्त्या स्मरं जयन् विरुद्धलक्षणयाऽतिकुरूपस्त्वं, महान्तोऽर्वन्तोऽश्वा यस्मिन् रथे, तेन कृत्वा योजनौघं चतुःक्रोशरूपयोजनसमूहमतिदूर-

मिदानीमपि यासि स त्वं मूढो मूर्खः। यस्माद्धे पामर नीच भैम्यान्यस्मिन्नले वृते सति अत्रास्मिन्नर्थे वर्त्तमानस्य ते तव ह्रीः किं न अपि तु भविष्यत्येव। भाविनीं वर्त्तमानां वा लज्जामवगणय्यापि गच्छसि तस्मान्मूर्ख एवेत्यर्थः। सेनापुरःसरमतिगौरं कामं कज्जलतुल्यया स्वकायकान्त्या पराभावुकः। तथा जनौघं स्वसेनामसमूहमपि पराभावुकः। प्रसरन्त्या श्यामकायकान्त्या सर्व्वां सेनामग्रसरं स्मरञ्च श्यामीकुर्व्वन्निति कुरूप एवम्भूता रथेन समूढः सम्यग्धृता यस्त्वं, तयान्यस्मिन् वृते सत्यपि यासि, अर्थात् स्वयम्वरं तस्य तेऽत्रार्थे स्वयम्वरे वा ह्रीः किं न भवेदपि तु भवेदेवेति वा॥ एतदेव कलिवर्णनमाह। हे असर देव वरुण कान्त्या दिव्यदेहदीप्त्या योजनौघं दूरदेशं रञ्जयन् दीप्तं कुर्व्वन् जनौघं स्वयम्वरदेशस्थं लोकं समूहं चारञ्जयन् इत्याश्चर्य्यदिव्यरूपदर्शनान्नलाकारधारणाद्वा आत्मनि सानुरागं कुर्व्वन्नतिजवनहययुतेन विमानेन महता श्यामवर्णादिनार्वता हयेन वा समूढः समारूढो यस्त्वं यासि स्म स्वयम्वरमयासीः तस्य तवान्यस्मिंस्तया लक्ष्मसत्त्वं वृते ह्रीः किमिति न भवति? अपत्रप निर्लज्जेति धिक्कारः। अहं तु तदा नासं त्वं तु गतोऽपि न वृत इत्यपमानात्त्रपा भवितुं युक्ता, परं सा न जायत इति चित्रं। अत एव चात्रपस्त्वमित्यर्थः। अत्रप न म्रियस इत्यमर इत्यर्थः। अन्योऽप्येवमनादरे कृते लज्जया म्रियते त्वं तु निर्लज्जो न म्रियस इति चित्रमित्यर्थ इति वा। अत्रपया लज्जाभावेनामरेत्येकं पदं वा। त्रपायां सत्यामप्यमरेति वा। अत्रपया

नलं प्रत्यनपेतार्त्ति तार्त्तीयीकतुरीययोः।
युगयोर्युगलं बुद्ध्वा दिवि देवा धियं दधुः ॥ १५८ ॥
द्वापरैकपरीवारः कलिर्मत्सरमूर्च्छितः।
नलनिग्राहिणीं यात्रां जग्राह ग्रहिलः किल ॥ १५९ ॥

लज्जाभावेनामं रोगं पीडामस्मादृशां यामि ददामि अत्रपा-भर। तत्र निर्लज्जत्वेन वयमतिदुःखिनो भवाम इत्यर्थ इति वा। एते चत्वारोऽपि श्लोका यथाक्रममिन्द्रादिदेववचनत्वेन ज्ञेयाः। कलिकलहस्तु सर्व्वत्रानुस्यूतः। तत्रापि पूर्व्वं देववचः पश्चात्कलिवचः। मघार्वता। अर्व्वणस्त्रसाविति (पा० ६।४।१२७) त्रन्नादेशः। आन्महतः (पा० ६।३।४६) इत्याकारः। यामि स्मेति पचे, लट्स्मे (पा० ३।२।११८) इति भूते लट् ॥ १५७ ॥

नलमिति। देवा इन्द्रादयः तार्त्तीयीकतुरीययोस्तृतीय-चतुर्थयोर्युगयोर्द्वापरस्य कलेश्च युगलं नलं प्रत्युद्दिश्य अनपे-तार्त्ति अनपगतव्यथं सर्व्वथा नलः पीडनीय इति नलेऽनि-वृत्तापकारवाञ्छं बुद्ध्वा दिवि धियं दधुः। युगद्वयमस्मद्वचनं न शृणोति अतः परं यत्किञ्चिद्भवतु किमस्माकमिति विचार्य्य स्वर्गे गन्तुमीषुरित्यर्थः। तार्त्तीयीकः पूर्व्ववत्। तीयादीकक् (पा० ४।२।८।वा० ३)। तुरीयः। चतुरश्छयतावाद्यचरलोप-श्चेति (पा० ५।२।५१।वा० १) यत् ॥ १५८ ॥

द्वापरेति। कामादिसैन्यं परावृत्य द्वापर एवैकसहायो यस्य तथा मत्सरेण नलशुभद्वेषेण मूर्च्छितो विनष्ट इवातिमत्सरेण

नलेष्टापूर्त्तसम्पूर्त्तेर्दूरदुर्गानमुं प्रति।
निषेधन्निषधान् गन्तुं विघ्नः सञ्जघटे घनः॥ १६०॥
मण्डलं निषधेन्द्रस्य चन्द्रस्येवामलं कलिः।
प्राप म्लापयितुं पापः स्वर्भानुरिव सग्रहः॥ १६१॥

प्रवृद्धो वा। तथा ग्रहिलो निवारणस्यानाकर्णनादाग्रहवत् कलिः अवश्यं नलं निग्रहीष्यामीत्येवंरूपां नलनिग्राहिणीं यात्रां जग्राह निषधान् प्रतस्थ इत्यर्थः। किल यस्माद्ग्रहिलस्तस्मात् प्रतस्थे उपहासे वा। एकः परीवारो यस्येति विगृह्य द्वापरेणैकपरीवार इति समासः। परीवारः। उपसर्गस्य घञीति (पा० ६। ३।१२२) दीर्घत्वं। निग्राहिणीं। आवश्यके णिनिः॥ १५९॥

नलेति। नलस्य इष्टापूर्त्तानां यागतडागादिधर्म्माणां सम्पूर्त्तेः सम्पूर्णत्वाद्धेतोः नितरां धर्म्मबाहुल्यात् पापरूपं प्रस्थितममुं प्रति अनु दूरं नितरां दुर्गान् दुर्गमाननेन प्रवेष्टुमशक्यत्वात् निषधान् गन्तुं गमनाय निषेधन् वारयन् घनो महान् निरन्तरश्च विघ्नो वक्ष्यमाणप्रकारेण सञ्जघटे सञ्जज्ञे। धर्म्मबाहुल्यं दृष्ट्वा सहसा तान् प्रवेष्टुं शङ्कित इत्यर्थः। अथ च घनो मेघो जलपूर्त्तेः दुर्गमदेशं गन्तुं विघ्नरूपो भवन्निषेधति। इष्टञ्च पूर्त्तञ्चेति द्वन्द्वे, अन्येषामपि दृश्यत इति (पा० ६।३।१३७) दीर्घः॥ १६०॥

मण्डलमिति। पापः कलिः पापग्रहमध्ये गणितत्वात् पापः स्वर्भानुरिवामलं निष्पापं निषेधेन्द्रस्य मण्डलं राष्ट्रं अमलं परिपूर्ण-

कियतापि च कालेन कालः कलिरुपेयिवान् ।
भैमीभर्त्तुरहंमानी राजधानीं महीभुजः॥ १६२ ॥
वेदानुद्धरतां तत्र मुखादाकर्णयन् पदं ।
न प्रसारयितुं कालः कलिः पदमपारयत्॥ १६३ ॥

प्रकाशं चन्द्रस्य मण्डलं विम्बमिव सग्रहः सम्यगाग्रहात् हठाद्ग्रहणायोगवशाच्च म्लापयितुं विनाशयितुं ग्रसितुञ्च प्राप॥१६१॥

कियतेति। कालो युगलक्षणः समयरूपोऽथ च पापरूपत्वात्कृष्णवर्णोऽथच दारुणत्वात् कृतान्ततुल्यः तथाऽहंमानी नलपीडनेऽहङ्कारवान् कलिः कियतापि भूयसा कालेन भैमीभर्त्तुर्महीभुजो नलस्य राजधानीमुपेयिवान् प्राप्तवान्। पूर्व्वं देशं प्राविशदिदानीन्तु राजधानीमिति चार्थः। भूमिभैमीत्याजने कलेरभिनिवेशोऽभिप्रायो विशेषणद्वयेन सूच्यते। कियताऽल्पीयसेति वा। अहमिति मननमहंमानः सोऽस्यास्तीति सर्व्वकार्य्येष्वहमेवेति मन्यते तच्छील इति वा॥ १६२ ॥

इदानीं पुरप्रवेशविधानाह। वेदानिति। तत्र पुरे वेदान् ऋगादीनुद्धरतां गुणनिकां कुर्व्वतां श्रोत्रियाणां मुखात् पदं पदकारकल्पितसंहिताविभागरूपं पदमन्त्रं आकर्णयन् शृण्वन् कालः समयरूपोऽथ च पापरूपः कलिः पदमेकमपि चरणन्यासं प्रसारयितुं नापारयत् पापरूपत्वादित्यर्थः। एतेन नलपुरस्य धर्म्मपूर्णत्वमुक्तम्। वेदान्। शद्वयोगे, नलोकेति (पा०।२।३।६९) षष्ठीनिषेधः॥ १६३ ॥

श्रुतिपाठकवक्त्रेभ्यस्तत्राकर्ण्ययतः क्रमं।
क्रमः सङ्कुचितस्तस्य पुरे दूरमवर्त्तत ॥ १६४ ॥
तावद्गतिर्धृताटोपा पादयोस्तेन संहिता।
न वेदपाठिकण्ठेभ्यो यावदश्रावि संहिता ॥ १६५ ॥

श्रुतीति। तत्र पुरे श्रुतिपाठका वेदाध्यापयितारस्तेषां वक्त्रेभ्यः सकाशात् क्रमं पूर्व्वपदपरित्यागेनोत्तरपदग्रहणादिक-क्रमसंज्ञं ग्रन्थं आकर्णयतः शृण्वतोऽस्य कलेः क्रमश्चरणो गतिर्वा दूरं नितरां सङ्कुचितः क्रमाकर्णनाद्भयेन पापः पदमपि पुरस्खलितुमशक्तस्ततो देशाद् दूरं निवृत्त इत्यर्थः ॥ १६४ ॥

तावदिति। तेन कलिना वेदपाठिनां कण्ठेभ्यो मुखेभ्यः यावत्संहिता पदक्रमरूपावस्थाद्वयविलक्षणा ऋगादिरूपा नाश्रावि नाकर्णिता तावत्कालं तावद्देशपर्य्यन्तञ्च प्रतिबन्धराहित्याद्धृताटोपा धृतसंरम्भा सत्वरा पादयोर्गतिः संहिता संयोजिता। यावत्कालं यावति च देशे संहिता नाकर्णिता तावत्कालं तावद्देशपर्य्यन्तञ्च प्रतिबन्धराहित्याच्छीघ्रगतिरभूत्। यदा यस्मिंश्च देशे सा श्रुता तदैव तस्य गतिभङ्गोऽभूदित्यर्थः। यावत् संहिता अश्रावि तावत्पदयोः सत्वरा गतिर्योजितानापि तु तावदेव योजिता। संहिताश्रवणपर्य्यन्तमेव सत्वरगतिः सो ऽभूत् नानन्तरमित्यर्थः ॥ १६५ ॥

तस्य होमाज्यगन्धेन नासा नाशमिवाऽगमत्।
तथातत दृशौ नासौ क्रतुधूमकदर्थिते ॥ १६६ ॥
अतिथीनां पदाम्भोभिरिमं प्रत्यतिपिच्छिले।
अङ्गणे गृहिणां तत्र खलेनानेन चस्खले ॥ १६७ ॥
पुटपाकमिव प्राप क्रतुशुश्रमहोष्मभिः।
तत्प्रत्यङ्गमिवाकर्त्ति पूर्त्तामिव्यजनानिलैः ॥ १६८ ॥

तस्येति। तस्य नासा अग्निहोत्रादिहोमाज्यं होमसम्बन्धि घृतं तस्य गन्धेन परिमलेन हेतुना नाशमिव मरणवेदनामिवागमत् अन्वभूदित्युत्प्रेक्षा। इवशब्द एवकारार्थो वा। तथा तेनैव प्रकारेणासौ कलिः क्रतुधूमेन कदर्थिते पीडिते दृशौ नेत्रे ऽपि न अतत न प्रसारितवान्। किञ्चिन्न ददर्शेत्यर्थः। आज्यगन्धक्रतुधूमसम्बन्धमात्रेण विनाश इत्यर्थः। अतत इति तनोतेर्लुङि सिचि, तनादिभ्यस्तथासोरिति (पा० २।४।७९) पाक्षिके सिज्लोपे तकारस्य ङित्वादनुदात्तोपदेशेवनतितनोति (पा० ६।४।३७) इत्यनुनासिकलोपः ॥ १६६ ॥

अतिथीनामिति। तत्र पुरे अनेन खलेन कलिना गृहिणां अङ्गणे चस्खले। यस्मादतिथीनां पदाम्भोभिश्चरणक्षालनोदकैरिमं पापरूपं कलिं प्रत्युद्दिश्य अतिपिच्छिले अतितरां कर्दमयुक्ते। एवंविधमतिपवित्रमङ्गणं प्रवेष्टुं नाशकदित्यर्थः अन्धोऽपि पिच्छिले देशे पतति ॥ १६७ ॥

पटेति। असौ कलिः क्रतुशुश्रा यागसम्बन्धी वह्निस्तस्य

पितॄणां तर्पणे वर्णैः कीर्णाद्वेश्मनि वेश्मनि।
कालादिव तिलात् कालाद् दूरमत्रसदत्र सः ॥१६९॥
स्नातॄणां तिलकैर्मेने स्वमन्तर्दीर्णमेव सः।
कृपाणीभूय हृदयं प्रविष्टैरिव तस्य तैः॥ १७०॥

महोश्मभिः प्रकृष्टतापैः कृत्वा पुटाभ्यां पुटयोर्वा पाकं उभयपार्श्व-योर्यात्रादेशान्तरमग्निसंयोगमिव प्राप प्रतिगृहं यागबाहुल्यात् वामदक्षिणपार्श्वयोर्वह्निकृतापैर्नितरां पीडामन्वभूदित्यर्थः। तथा पूर्त्तानां धार्म्मिकनिर्म्मितवापीकूपतडागादीनां ऊर्म्मयस्तद्रूपा-णि व्यजनानि तेषामनिलैर्वायुभिः तस्य प्रत्यङ्गं सर्व्वाङ्गं अक-र्त्तीव छिन्नमिवाभूत् इत्युत्प्रेक्षा। प्रत्यवयवकर्त्तनेन च पीडा-तिशयाद् वाय्वादितरङ्गवायुस्पर्शमात्रेण नितरां व्यथितोऽभू-दित्यर्थः। वर्हिः शुष्मा कृष्णवर्त्मेत्यमरः॥ १६८॥

पितॄणामिति। अत्र पुरे वेश्मनि वेश्मनि प्रतिगृहं ब्राह्मणा-दिचतुर्वर्णैः पितॄणां तर्पणे जलसमर्पणे विषये कीर्णात् क्षिप्तात् पितृप्रियात् कालात् कृष्णवर्णात् तिलात् सकाशात् स कलिः कालादिव कृतान्तादिव दूरं नितरां अत्रसत् भयमाप। तर्प-णैरिति पाठे तर्पयन्तीति तर्पणैरिति वर्णविशेषणं। तिलात्। इति जातावेकवचनं॥ १६९॥

स्नातॄणामिति। स कलिः स्नातॄणां स्नानं कुर्व्वतां वैदि-कानां तैस्तादृशैर्गोपीचन्दनादिरचितैर्ललाटस्थानादिस्थैर्दीर्घाद-र्शाभैस्तिलकैः कृपाणीभूय खड्गतामङ्गीकृत्य तस्य कलेः हृदयं

पमांसं मुमुदे तत्र विदन् मिथ्यावदावदं।
स्त्रियं प्रति तथा वीक्ष्य तमथ म्लानवानयं॥ १७१॥
यज्ञयूपघनां जज्ञौ स पुरं शङ्कुसङ्कुलां।
जनैर्धर्म्मधनैः कीर्णां व्यालक्रोडीकृताञ्च तां॥ १७२॥

विदार्य्य तैः प्रविष्टैरिव स्वं स्वकीयं अन्तः शरीरमध्यं दीर्णमेव शकलीभूतमेव मेने। कृपाणैर्हि विदारणं भवतीति युक्तम्। खड्गाकारांस्तिलकान् दृष्ट्वा विव्यथ इत्यर्थः॥ १७०॥

पुमांसमिति। तत्र पुरे अयं पुमांसं मिथ्यावदावदं मृषाभाषिणं विदन् जानन् स्वमित्रलाभान्मुमुदे। अथ पश्चात्तदनन्तरं स्वस्त्रियं प्रत्युद्दिश्य तं तथालीकभाषिणं वीक्ष्य ज्ञात्वा मित्रनाशादिव दुःखवशात् म्लानवान् म्लानतां गतः। पत्नीं प्रति क्रीडायाममर्दिति दोषाभावाद्व्यथिताऽभूदित्यर्थः। न नर्मयुक्तं वचनं हिनस्ति स्त्रीपुंसयोरिति भारतादौ। विदन्। विदेः शतुर्वसुः (पा० ७।१।३६) इत्यत्र विकल्पानुवृत्तेर्वसुभावः। एवं चतुर्द्दशतयीविद्याविद्द्भिरित्यत्रापि ज्ञेयम्। वदावदं। चरिचलीत्यादिना (पा० ६।१।१२ वा० ८) द्वित्वमभ्यासस्यालञ्च। म्लानवान् क्तवतोस्तकारस्य संयोगादेरात इति (पा० ८।२।४३) नः॥ १७१॥

यज्ञेति। सः यज्ञयूपैः खादिरोडुम्बरपशुबन्धस्तम्भैः घनां नितरां व्याप्तां तां पुरं शङ्कुभिस्तीक्ष्णाग्रकीलैः सङ्कुलां व्याप्तामिव जज्ञौ मेने। तथा धर्म्मधनैर्जनैः कीर्णां तां पुरं व्यालैः सर्पैः दुष्टश्वापदैर्वा दुष्टगजैर्वा क्रोडीकृतां सर्वत्र पूर्णां व्यालाः क्रोडे

स पार्श्वमशकद्गन्तुं न वराकः पराकिणाम्।
मासोपवासिनां छाया लङ्घने घनमस्खलत्॥ १७३॥
आवाहितां द्विजैस्तत्र गायत्रीमर्कमण्डलात्।
स सन्निदधतीं पश्यन् दृष्टनष्टोऽभवद्भिया॥ १७४॥

मध्ये यस्यास्तामेतादृशीं कृतामिव मेने। कीलसर्पादिभिर्व्याप्तं स्थानं यथा प्रवेष्टुमशक्यं तथा सा पुरी तस्य प्रवेष्टुमशक्या जातेत्यर्थः। व्यालो भुजङ्गमे क्रूरे श्वापदे दुष्टदन्तिनीति विश्वः। रेफान्तो पूःशब्दस्त्रीलिङ्गः। चः समुच्चयार्थ इवार्थो वा॥१७२॥

स इति। वराकः क्वचिदपि स्थानालाभाद्दीनः स कलिः पराकिणां द्वादशरात्रोपवासरूपपराकाख्यकृच्छ्रविशेषव्रतचारिणां पार्श्वं गन्तुं नाशकत्। तथा मासोपवासिनां कायप्रतिच्छायाया अपि लङ्घनेऽतिक्रमणे तस्या अपि समीपे गन्तुं घनं निरन्तरं अस्खलत् भ्रमत्पदोऽभूत्। तच्छायामपि द्रष्टुं नाशकदित्यर्थः। वराकः। जल्पभिक्षेति (पा॰ ३।२।१५५) कन्॥१७३॥

आवाहितामिति। तत्र पुरे स द्विजैस्त्रैवर्णिकैरागच्छ वरदेत्यादिमन्त्रैरावाहितामन्तरर्कमण्डलाद्भिया अतिशयसामर्थ्यात् सूर्य्यबिम्बान्निर्गत्य दिव्यरूपेण सन्निदधतीं तत्समीपमागच्छन्तीं प्रातःसन्ध्याधिदेवतां गायत्रीं पश्यन् गायत्र्याः सकाशाद्भयेन गायत्र्यैवादौ दृष्टः पश्चात्तदानीमेव नष्टोऽदृश्योऽभवत्। सन्ध्यावन्दनं कुर्व्वतो द्विजान् दृष्ट्वा गायत्री मां विनाशयिष्यतीति ततः स्थानात् पलाय्य गत इत्यर्थः। गायत्री सूर्य्य-

स गृहे गृहिणां पूर्णे वने वैखानसैर्वृते ।
यत्याधारेऽमरागारे क्वापि न स्थानमानशे ॥ १७५ ॥
क्वापि नापश्यदन्विष्यन् हिंसामात्मप्रियामसौ ।
स्वमित्रं तत्र न प्रापदपि मूर्खमुखे कलिं ॥ १७६ ॥
हिंसागवीं मखे वीक्ष्य रिरंसुर्धावति स्म सः ।
सा तु सौम्यवृषासक्ता खरं दूरान्निरास तं ॥ १७७ ॥

विम्बस्था इति ध्यानं। अर्कमण्डलादाहितामिति वा। दृष्टनष्टः। पूर्व्वकालैकेति (पा० २।१।४९) समासः ॥ १७४ ॥

स इति। स कलिर्गृहिणां गृहस्थैः पूर्णे गृहे तथा वैखानसैर्वानप्रस्थैर्वृते व्याप्ते वने तथा यतीनां परमहंसानां सन्न्यासिनामाधारे आश्रयभूते तैर्व्याप्ते अमरागारे देवालये स्थानं नानशे आश्रयं न प्राप। क्वापि कस्मिन्नपीति सर्व्वत्र योज्यं। गृहिभिर्गृहे पूर्णे सतीति सप्तमी वा सर्व्वत्र ॥ १७५ ॥

क्वापीति। असौ कलिः तत्र पुरे आत्मनः प्रियां इष्टां निषिद्धां हिंसां अथ च स्त्रियं अन्विष्यन् न क्वापि कस्मिन्नपि देशे नापश्यत्, तथा कलहप्रियत्वान्नामसाम्याच्च स्वस्य मित्रं कलिं कलहं मूर्खाणामपि मुखे सम्भावितस्थले न प्रापत्। मूर्खा अपि तत्र न कलहायन्ते। हिंसाकलहयोरभावात्तत्र स्थितिं न लेभ इत्यर्थः। अन्योऽपि यत्र मित्रस्त्र्याद्यभावस्तत्र क्षणमपि न तिष्ठतीत्युक्तिः ॥ १७६ ॥

हिंसेति। मखे गोमेधाख्ये यज्ञे हिंसागवीं हिंसासम्बन्धिनीं

मौनेन व्रतनिष्ठानां स्वाक्रोशं मन्यते स्म सः ।
वन्द्यवन्दारुभिर्जज्ञौ स्वशिरश्च पदाहतं ॥ १७८ ॥

गवीं वीच्य रिरंसुर्हृष्टचित्तः स कलिः निषिद्धगोहिंसा मत्प्रि-
येति धावति स्म । सा तु हन्यमाना गौः पुनः सौम्ये सोमदेव-
ताकद्रव्यसाध्ये वृषे धर्म्मे आसक्ता तत्सम्बन्धिनी तत्साधिका सती
अभिचारादिदुष्टकर्म्मराहित्यात् सौम्यो रमणीयः पारलौकिको
धर्म्मस्तत्साधिका वा खरं पापरूपत्वाद्दुःसहं रलयोरभेदात्
खलं वा पापरूपं दूरादेव निरास निराचकार । अधर्म्मसाधनं
गोहिंसादि दृष्ट्वा प्रवृत्तः पश्चाद्धर्म्मसाधनमग्नीषोमीयवैदिक-
पशुहिंसादि दृष्ट्वा मत्प्रिया हिंसा न भवतीति दूरात् परा-
वृत्त इत्यन्वयः । मुखे इति पाठे हिंसाप्रतिपादिकां गां वाणीं
यज्वनां मुखे वीच्य श्रुत्वेति यावत्, रिरंसुरधावत् । सा तु वाणी
सौम्यप्रतिपादिका सती तं अखरं अग्नीषोमीयं पशुमित्यादिवा-
क्याकर्णनमात्रेण दुःखवशान्निस्तेजस्कं दूरान्निरासेति वा । अथ
च कामातुरः सुरतेच्छुः खरो गर्द्दभः गां वीच्य यद्यपि धा-
वति तथापि सा रमणीयवृषभानुरक्ता सती विजातीयत्वाद्ग-
र्द्दभं दूरान्निराकरोति । मखे यज्ञप्रारम्भ इति वा । अथ च
[illegible]र्यथा सौम्यं वृषभमनुसरति क्रूरं वृषभं त्यजति । सुकृते वृषभं
वृष इत[illegible]रः । [illegible]गवीति गोरतद्धितेति (पा० ५।४।९२)
टच् ॥ १७७ ॥

मौनेनेति । स कलिः मौनव्रतनिष्ठानां वाग्यमव्रतिनां स-

ऋषीणां स वृसीः पाणौ पश्यन्नाचामतामपः।
मेने घनैरमी हन्तुं शप्तुं मामञ्जिरुद्यताः॥ १७९॥
मौञ्जीधृतो धृताषाढानाशशङ्के स वर्णिनः।
रज्ज्वामी बद्धुमायान्ति हन्तुं दण्डेन मां ततः॥१८०॥

न्ध्यादिजपमौनिनां वा मौनेन वाङ्नियमेन कृत्वा स्वस्यात्मन आक्रोशं गालीप्रदानमेव मन्यते स्म। तथा वन्द्येषु नमस्कारार्हेषु गुर्वादिषु वन्दारुभिः नमस्कुर्वद्भिर्नरैः स्वशिरस्य पदा हतं चरणताडितमिव जज्ञौ अज्ञासीत्। च इवार्थो वा। वन्दारुभिः शृवन्द्योरारुरित्यारुः(पा० ३।२।१७३)।वन्द्यानिति पाठे, तद्योगे,न लोकेति(पा० २।३।६९)षष्ठीनिषेधाद्द्वितीया॥१७८॥

ऋषीणामिति। स कलिः ऋषीणां पाणौ हस्ते वृसीः कुशासनानि पश्यन् अमी ऋषयः घनैर्लोहमुद्गरैर्मां हन्तुमुद्यता इति मेने। तथा आचामतां तेषामेव हस्ते आचमनार्थं गृहीता अपः पश्यन् अमी मामञ्जिरस्य त्वं भस्मसाद्भवेति शप्तुमिवेति प्रतीयमानोत्प्रेक्षा। सकुशानिति पाठे कुशानपश्च पश्यन्नित्यर्थः। अत्र दैर्घ्यात् कुशा एव घनतुल्याः। आचामतां। ष्ठिवुक्लमुचमामिति (पा० ७।३।७५) दीर्घः॥ १७९॥

मौञ्जीति। स कलिः मौञ्जीधृतो मुञ्जतृणमेखलाधारिणः तथा धृत आषाढः पालाशदण्डो यैस्तान् वर्णिनो ब्रह्मचारिणः एवम्भूतानाशशङ्के मेने, अमी पुरुषा रज्ज्वा मां बद्धुं ततो बन्धनानन्तरञ्च दण्डेन मां हन्तुमायान्तीति। मौ..धृतो

दृष्ट्वा पुरः पुरोडाशमासीदुत्त्रासदुर्मनाः।
मन्वानः फणिनीस्तत्र स मुमोचास्रु च स्रुचः॥ १८१॥
मुमुदे मदिरादानं विन्दन्नेष द्विजन्मनः।
दृष्ट्वा सौत्रामणीमिष्टिं तं कुर्वन्तमदूयत॥ १८२॥

धृताषाढा एते ब्रह्मचारिणो न भवन्ति किन्तु मां रज्ज्वा बद्ध्वा दण्डेन हन्तुमायान्तीत्याशशङ्क इति वा। धृताषाढान्नेति पाठे एवम्भूताद् ब्रह्मचारिण इति नाशशङ्के किन्त्वित्युत्तरार्द्धः। पालाशो दण्ड आषाढः। वर्णिनो ब्रह्मचारिण इत्यमरः। मौञ्जी। विकारेऽञ्। वर्णास्त्वेषां ब्रह्मचारिणामिति वर्णिनः॥ १८०॥

दृष्ट्वेति। स तत्र पुरोऽग्रेऽश्वशफमात्रं पुरोडाशं अष्टादशकपालादिसंस्कृतं पशुशरीरावयवं दृष्ट्वा उत्त्रासेनोत्कृष्टभयेन दुर्मना दुःखित आसीत्। तथा स्रुचः सर्पफणाकारपुरोभागा वैकङ्कतादिजुह्वः फणिनीः सर्पिणीर्मन्वानोऽस्रु मुमोच दंशनभिया रुरोदेत्यर्थः। पुरोडाशोऽकारान्तः। पुरोडाशभुजामिष्टमिति माघः॥ १८१॥

मुमुद इति। एष द्विजन्मनो ब्राह्मणस्य मदिरादानं मदिरास्वीकारं विन्दन् जानन् पश्यन् अयं महापातकीति बुद्ध्वा मुमुदे। अनन्तरं च सौत्रामणीमिष्टिं इन्द्रदेवताकं यागं कुर्वन्तं द्विजं दृष्ट्वाऽदूयत। सौत्रामण्यां सोमग्रहान् सुराग्रहांश्च गृह्णातीति श्रुतेर्मदिरादानस्य वैधत्वात्सम्भ्याश्रयविनाशादिव विव्यथ

अपश्यद्यावतो वेदविदो ब्रह्माञ्जलीनसौ ।
उदडीयन्त तावन्तस्तस्यास्ताञ्जलयो हृदः ॥ १८३ ॥
स्नातकं घातकं जज्ञे जज्ञौ दान्तं कृतान्तवत् ।
वाचंयमस्य दृष्ट्वैव यमस्यैव बिभाय सः ॥ १८४ ॥

इत्यर्थः । सौत्रामणीति देवतार्थे सम्बन्धमात्रे वाऽणि अन्निति (पा० ६।४।१६७) प्रकृतिभावः ॥ १८२ ॥

अपश्यदिति । असौ वेदविदां यावतो यावत्संख्याकान् बहून् ब्रह्माञ्जलीन् ब्रह्मयज्ञसमये क्रियमाणान् हस्तस्वरकल्पनार्थं संयोजितान् करपुटान् वा सूर्योपस्थायिनां गायत्रीमन्त्रजपाञ्जलीन्,

व्रतारम्भेऽवसाने च पादौ ग्राह्यौ गुरोः सदा ।
संहृत्य हस्तावध्येयं स हि ब्रह्माञ्जलिः स्मृतः ॥

इति मनूक्तलक्षणान् करसंपुटानपश्यत् तावन्तस्तस्य कलेः हृदः सकाशादस्राञ्जलयो रक्तपूर्णा अञ्जलयः उदडीयन्त उत्पतिता निर्गताः । तद्दर्शनमात्रेण नितरां विदीर्णहृदयोऽभूदित्यर्थः । तदस्रेति वा पाठ उत्प्रेक्ष्यः ॥ १८३ ॥

स्नातकमिति । स विद्याव्रतस्नातकं उभयस्नातकञ्च स्वस्य घातकं विश्वासघातिनं जज्ञे मेने । तथा दान्तं तपःक्लेशसह जितेन्द्रियं नरं कृतान्तवत् यममिव भयहेतुं जज्ञौ ज्ञातवान् । तथा वाचंयमस्य मौनिनो दृष्ट्वैव दर्शनमात्रेण मौनिकर्तृक स्वकर्मकमौनिकर्मदर्शनेनैव वा बिभाय । कस्येव यमस्येव । यम-

स पाषण्डजनान्वेषी प्राप्नुवन् वेदपण्डितान्।
जलार्थीवानलं प्राप्य पापस्तापादपासरत्॥ १८५॥
तत्र ब्रह्महणं पश्यन्नतिसन्तोषमानशे।
निर्वर्ण्य सर्व्वमेधस्य यज्ज्वानं ज्वरति स्म सः॥ १८६॥

कर्तृकस्वकर्म्मकस्वकर्तृकयमकर्म्मकदर्शनेन वा। यमेन दृष्टेन यथा भयं तथा मौनिन इत्यर्थः। स्नातकस्त्वाप्लुतो व्रती। तपःक्लेशसहो दान्त इत्यमरः।

गुरवे तु वरं दत्त्वा स्नायाच्च तदनुज्ञया।
वेदव्रतानि वा पारं नीत्वा ह्युभयमेव वा॥

इति याज्ञवल्क्यः। स्नानीति स्नातकः, याजकादित्वात् साधुः, ण्वुलन्तः। घातकं। हन्तेर्ण्वुलि हनस्तः। जज्ञौ जज्ञे इति जानातेः कर्त्रभिप्राये क्रियाफलाविवक्षायां, शेषात् कर्त्तरीति (पा० १। ३।७८) परस्मैपदं। तद्विवक्षया अनुपसर्गाज्ज्ञः इति (पा० १।३। ७६) तङ्। दृष्ट्वेति भयहेतुत्वाविवक्षायाञ्चापादानत्वं॥१८४॥

स इति। स पाषण्डजनान्वेषी स्वपक्षीयान् वेददूषकान् विचारयन् वेदेषु पण्डितान् श्रौतस्मार्त्तकर्म्मठान् प्राप्नुवन् पश्यन् तापादतिदुःखाद्धेतोः अपासरत् पलायितः। यतः पापरूपः। क इव अनलं प्राप्य जलार्थीव। तृषितो जलं विचिन्वन् अग्निं प्राप्योत्तापाद् दूरं पलायते॥ १८५॥

तत्रेति। स तत्र ब्रह्महणं नरं पश्यन् महापातकित्वादात्माश्रयत्वादतितरां सन्तोषमानशे प्राप। अनन्तरं सर्व्वमेधाख्यस्य

यतिहस्तस्थितैस्तस्य राम्भैरारम्भि तर्जना ।
दुर्जनस्याजनि क्लिष्टिर्गृहिणां वेदयष्टिभिः ॥ १८७ ॥
मण्डलत्यागमैच्छद्वीक्ष्य स्थण्डिलशायिनः ।
पवित्रालोकनादेष पवित्रासमविन्दत ॥ १८८ ॥

यज्ञस्य यज्वानं तं प्रोक्षणावदानादिसंस्कारादिकर्म्मणा निर्वर्त्य निर्द्धार्य्य ज्वरति स्म नितरां तप्तोऽभूत् । सर्व्वमेधे हि तत्तज्जातीयैकैकप्राणिहिंसाधिकाराद्ब्रह्मणे ब्राह्मणमालभेतेति श्रुत्या ब्रह्मवधस्य वैधत्वान्निराश्रयत्वात् सन्तप्त इत्यर्थः । ब्रह्महणं । ब्रह्मभ्रूणेति (पा० ३।२।८७) क्विप् । ज्वरतिर्म्भादिः ॥ १८६ ॥

यतीति । यतीनां सन्न्यासिनां हस्तस्थितैराम्भैर्वैणवदण्डैस्तस्य कलेस्तर्जना भर्त्सना आरम्भि अकारि । तथा गृहिणां गृहस्थानां वेदैरेव यष्टिभिर्दण्डैर्वेदानां क्रमजटारूपाभिर्वा यष्टिभिस्तस्य दुर्ज्जनस्य क्लिष्टिः क्लेशोऽजनि । राम्भयष्टीर्दृष्ट्वा भीत इत्यर्थः । राम्भस्तु वैणव इत्यमरः । रम्भा वेणुस्तस्येदमिति (पा० ४।३।१२०) अण् । क्लिष्टिः । तितुत्रेति (पा० ७।२।८) इट्निषेधः ॥ १८७ ॥

मण्डलेति । एष स्थण्डिलशायिनो वेदिकाशायिनो व्रतचारिणो नरान् वीक्ष्य मण्डलस्य तद्राष्ट्रस्य त्यागमैच्छत् । तथा पवित्राणां यज्ञाद्युपकरणादीनां ग्रन्थिविशेषनिबद्धानां पाणिस्थकुशानां आज्याद्युत्पवनसाधनानामन्तर्गर्भरहितसाग्रानखच्छिन्नदर्भाणामालोकनात् पवर्वज्राद्यस्त्रासस्त्रमविन्दत प्राप । तथा

अपश्यज्जिनमन्विष्यन्नजिनं ब्रह्मचारिणं।
क्षपणार्थी सदीक्षस्य स चाक्षपणमैक्षत ॥ १८९ ॥
जपतामक्षमालासु बीजाकर्षणदर्शनात्।
स जीवाकृष्टिकष्टानि विपरीतदृगन्वभूत् ॥ १९० ॥

महद्व्रतमापेत्यर्थः। अगर्भा मार्गा दर्भाः पवित्रमिति कात्यायनः। स्थण्डिल एव शेते व्रतवशात् स स्थण्डिलशायी, व्रत इति (पा० ३।२।८०) णिनिः ॥ १८८ ॥

अपश्यदिति। स जिनं बौद्धविशेषं स्वमित्रमन्विष्यन् ब्रह्मचारिणं अजिनं कृष्णमृगचर्म्मोत्तरामङ्गमपश्यत्। क्षपणेन दिगम्बरेण देवार्च्चनार्थीव प्रयोजनार्थी तमपि गवेषयत् यज्ञदीक्षया सहितस्य यज्वनोऽक्षपणं दीक्षाङ्गधर्म्मपरित्यागाभावमैक्षत। यद्वा अक्षाभ्यां पाशकाभ्यां पणं क्रीडां पाशकसम्बन्धिजयपराजयदेयं राशीकृतं धनं ददर्श। राजसूये यजमानोऽक्षैर्दीव्यतीतिश्रुतेर्विहितत्वात् तद्द्यूतं युक्तं। वैधं सर्व्वं दुःखदं स्वस्यामित्रमेव ज्ञातवान् न तु मित्रमित्यर्थः। पणः। नित्यं पण इत्यप् (पा० ३। ३।६६) ॥ १८९ ॥

जपतामिति। जपतां नराणां अक्षमालासु पद्माक्षरुद्राक्षादिमणिनिर्म्मितजपमालिकासु वर्त्तमानानां पद्माक्षादिबीजानां जपगणनार्थमाकर्षणं तस्य दर्शनाद्धेतोर्जीवानां प्राणानामाकृष्टिराकर्षणं तया जातानि कष्टानि दुःखानि अन्वभूत्। यस्माद्विपरीतदृक् विरुद्धदर्शी। सर्व्वहितधर्म्मसहितत्वेन

त्रिसन्ध्यं तत्र विप्राणां स पश्यन्नघमर्षणम् ।
वरमैच्छद् दृशोरेव निजयोरपकर्षणम् ॥ १९१ ॥
अद्राक्षीत् तत्र कञ्चिन्न कलिः परिचितं क्वचित् ।
भैमीनलव्यलीकाणुप्रश्नकामः परिभ्रमन् ॥ १९२ ॥

जानानस्तादृग्धर्मदर्शनमात्रेण सद्दुःखमन्वभूदित्यर्थः । अथ च विपरीतदर्शनशीलत्वाद्दीवेत्यत्र व्यञ्जनमात्रव्यत्ययेन जवयोः सावर्ण्येन च जीवेति भवतीति जीवात्कष्टिकष्टानुभवत्वं युक्तं ॥ १९० ॥

त्रिसन्ध्यमिति । स तत्र त्रिसन्ध्यं प्रातर्मध्याह्नसायाह्नरूपं सन्ध्यात्रयमभिव्याप्य विप्राणां स्वकर्तृकाघमर्षणं ऋग्भिर्नासास्पर्शाभिमन्त्रितं चुलुकोदकं तत्प्रक्षेपणादिकं वा पश्यन् निजयोर्दृशोरपकर्षणं उन्मूलनमेव वरं श्रेष्ठमिति ऐच्छत् । मदीयनेत्रे यदि कोऽप्युन्मूलयिष्यत् तर्हीदं दुःखमपूर्वं नाद्रक्ष्यताम् । तस्मान्नेत्रोन्मूलनमेव वरमिति मेने इत्यर्थः । तदपि दृष्ट्वा दुःखितोऽभूदिति भावः । अघमर्षणदर्शनस्पृहया नेत्रापकर्षणस्पृहया तुल्या । त्रिसन्ध्यं । अत्यन्तसंयोगे द्वितीया ॥ १९१ ॥

अद्राक्षीदिति । भैमीनलयोर्व्यलीकस्यानृतस्याणु दोषलेशमपि प्रश्नकामः प्रष्टुं वाञ्छन् अत एव तत्र पुरे कथकस्वमित्रगवेषणार्थं परिभ्रमन् परितो विचरन् स कलिः क्वचिदपि स्थाने कञ्चिदपि स्वस्य परिचितं जिनक्षपणकादिमित्रं नाद्राक्षीत् । नलेन भैम्या वा तत्रत्येन जनेन वा क्वापि क्वचिदपि संपुचि-

तपःस्वाध्याययज्ञानामकाण्डद्विष्टतापसः ।
स्वविद्विषां श्रियं तस्मिन् पश्यन्नुपतताप सः ॥ १९३ ॥
कम्रं तत्रोपनम्राया विश्वस्या वीक्ष्य तुष्टवान् ।
स मम्लौ तं विभाव्याथ वामदेव्याभ्युपासकं ॥ १९४ ॥

दपि महापातकेषु मध्ये किञ्चिदपि परिचितं पातकं नाद्राक्षीत्। त्वया भैमो नलोऽन्यत्र लोकैर्वा स्पृष्टः किमिति कलिः पृच्छति । तदेकमपि पापं नास्त्येवेति भाव इति वा ॥ १९२ ॥

तप इति। पञ्चाग्निसाधनादि तपः, वेदपाठरूपः स्वाध्यायः, देवतोद्देशेन द्रव्यत्यागो यागो यज्ञः, एषां स्वस्य पापरूपत्वाद् विद्विषां वैरिणां तस्मिन् पुरे श्रियं समृद्धिं बाहुल्यं पश्यन् अकाण्डं निष्कारणमेव द्विष्टस्तापसो येन स कलिः उपतताप अतिदाहमापातिदुःखितोऽभूदित्यर्थः । अन्योऽपि स्ववैरिलक्ष्मीं पश्यन्नुपतप्यते। यज्ञापेक्षया स्वाध्यायस्य अभ्यर्हितत्वात् पूर्व्वनिपातः ॥ १९३ ॥

कम्रमिति। स तत्र मुनेः उपनम्राया उपासकस्य समीपमागत्य स्थितायाः स्वजायाया विजातीयाया गम्याया अगम्याया वा विश्वस्याः स्त्रियः कम्रं कामुकं तं सम्भुञ्जानं कञ्चन नरं वीक्ष्यायं महापातकी ममाश्रयो भविष्यतीति बुद्ध्या तुष्टवान्। अथ पश्चाद्विचारणायां क्रियमाणायां तं कम्रं वामदेवेन मुनिना दृष्टं ब्रह्मसाम कयानश्चित्रमित्यादिवामदेव्यं नाम साम तस्य ब्रह्मविद्याया अभ्युपासकं विभाव्य मत्वा मम्लौ दुःखितोऽभूत्।

वैरिणी शुचिता तस्मै न प्रवेशं ददौ भुवि ।
न वेदध्वनिरालम्बमम्बरे विततार च ॥ १९५ ॥
दर्शस्य दर्शनात् कष्टमग्निष्टोमस्य चानशे ।
जुघूर्णे पौर्णमासेच्छो सौमं सोऽमन्यतान्तकं ॥ १९६ ॥

वामदेव्योपासने सर्व्वाः स्त्रिय उपसीदन्तीति श्रुतिः । दृष्टं सामेत्यर्थे, वामदेवाड्ड्यड्डाविति (पा० ४।२।८) ड्यः ॥ १९४ ॥

वैरिणीति । शुचिता लोकानां वाह्याभ्यन्तरशुचिता मनःशुद्धिः गोमयाद्यनुलेपनजनिता च शुचिता भुवि प्रवेशं तस्मै न ददौ । यस्मादशुचेस्तस्य वैरिणी । नगरमध्ये सर्व्वेषां जनानां भूमेश्च शुचित्वात् स्थातुं नाशकदित्यर्थः । तथा वेदध्वनिरम्बरे शब्दाश्रये नगरसम्बन्ध्युपरितनाकाशदेशे आलम्बमाश्रयं न विततार । अम्बरस्य वेदध्वन्याश्रयत्वात् तत्रापि स्थातुं नाशकदित्यर्थः । चः समुच्चये । अन्योऽपि वैरिणे स्थानं न ददाति ॥ १९५ ॥

दर्शस्येति । दर्शस्यामावास्यायागस्य अग्निष्टोमयागस्य च दर्शनात् कष्टं महद्दुःखमानशे प्राप । तथा पौर्णमासं यागमीच्छत एवंशीलः सन् जुघूर्णे बभ्राम । तद्दर्शनेन मुमूर्च्छेत्यर्थः । सोमयागं तु अन्तकमेवामन्यत । तद्दर्शनान्मरणमेवान्वभूदित्यर्थः । अन्यस्यापि ज्वरादिपीडा पश्चान्मूर्च्छा अनन्तरं मरणं भवति ॥ १९६ ॥

तेनादृश्यन्त वीरघ्ना न तु वीरहणो जिनाः ।
नापश्यत् सोऽभिनिर्मुक्तान् जीवन्मुक्तानवैक्षत ॥ १९७ ॥
स तुतोषाश्नतो विप्रान् दृष्ट्वा स्पृष्टपरस्परान् ।
होमशेषीभवल्लोमभुजस्तान् वीक्ष्य दूनवान् ॥ १९८ ॥

तेनेति । तेन कलिना वीरान् शूरान् घ्नन्तीति क्षत्रधर्म्मजीविनो धार्म्मिका अदृश्यन्त । वीरान् श्रेष्ठानाचारवतो घ्नन्तीति वीरहणो जिना न दृष्टाः । शूरा एव यैर्हन्यन्ते न तु सदाचाराः तादृशा महावीरा एव तत्र तेन दृष्टा इत्यर्थः । यद्वा वीरयते शूरो भवति तेजस्वी वह्निस्तं घ्नन्त्युपेक्षया नाशयन्तीति वीरहणो नष्टाग्नयस्ते पुनर्न दृष्टाः । सर्व्वोऽपि गृहस्थः साग्निक एव तत्रेत्यर्थः । तथा स अभिनिर्मुक्तान् येषु सुप्तेषु सूर्य्योऽस्तमेति तादृशान् सूर्य्यास्तसमयसमये निद्रितान् अनाचारांस्तत्र नापश्यत् । किन्तु जीवन्तश्च ते मुक्ताश्च तान् विषयपरित्यागिनो ब्रह्मज्ञानिनोऽवैक्षत । वीरघ्ना वीरहननयोग्या दृष्टा न तु ये वीरान् हतवन्तस्ते दृष्टाः । वीरमारणमपि तत्र राष्ट्रे न क्रियते इत्यर्थ इति वा ।

सुप्ते यस्मिन्नस्तमेति सुप्ते यस्मिन्नुदेति च ।
अंशुमानभिनिर्मुक्ताभ्युदितौ तु यथाक्रमं ॥

इत्यमरः । वीरघ्नाः । मूलविभुजादित्वात् कः ॥ १९७ ॥

स इति । स विप्रान् स्पृष्टं परस्परं यैस्तानन्योन्यस्पर्शिनोऽश्नतो भुञ्जानान् दृष्ट्वा तुतोष । उच्छिष्टानां मिथः स्पर्शनिषेधात्तदतिक्रमकारिणः स्वाश्रयत्वेन सम्भाव्य हृष्ट इत्यर्थः । अनन्तरं होम-

श्रुत्वा जनं रजोदुष्टं तुष्टिं प्राप्नोत् झटित्यसौ।
तं पश्यन् पावनस्नानावस्थं दुःस्थस्ततोऽभवत् ॥ १९९ ॥
अधावत् क्वापि गां वीक्ष्य हन्यमानामयं मुदा।
अतिथिभ्यस्तु तां बद्धा मन्दं मन्दो न्यवर्त्तत ॥ २०० ॥

शेषीभवत्सोमभुजः होमावशिष्टःसोमस्तं भुञ्जते सोमलताचूर्णं भुञ्जानास्तान् वीक्ष्य विचार्य्य दूनवान् व्यथितोऽभूत्। न सोमं नोच्छिष्टो भवतीति श्रुतेः। इत्युद्गते तस्मिन् सोमं नोच्छिष्टं मनुरब्रवीत् इति स्मृतेश्च। सोमभक्षणे ऽनुच्छिष्टत्वादन्यस्य-स्येऽपि पापाभावात् दुःखितोऽभूदित्यर्थः ॥ १९८ ॥

श्रुत्वेति। असौ कश्चन जनं रजोदुष्टं मलिनं श्रुत्वा निषिद्ध-स्त्रीरजःस्पर्शबुद्ध्या खरादिनिषिद्धरजःस्पर्शबुद्ध्या दृष्ट्वा वा स्वाश्र-याशया झटिति शीघ्रं तुष्टिं प्राप्नोत् प्राप्तः। ततोऽनन्तरं विचा-रावसरे पवनसम्बन्धि पवित्रञ्च यद्वारजःस्नानं तत्र तेन वा ऽवस्था स्थितिर्यस्य तत्र वावतिष्ठते तं पश्यन् दुःस्थः दूनोऽभवत्।

वारुणन्तु जलस्नानमापोहिष्ठेति मन्त्रतः।
वायव्यं गोरजःस्नानमाग्नेयं भस्मनोदितम् ॥
यत्तु सातपवर्षेण दिव्यं तदिति पञ्चधा।

इति मनुः॥ पावनस्नानस्य धर्म्मत्वात् दूनोऽभूदित्यर्थः। प्राप्नोत्। लङ्। प्राप्त इति वा पाठः॥ १९९ ॥

अधावदिति। अयं क्वापि यज्ञशालायां गृहे वा हन्यमानां गां वीक्ष्य स्वाश्रयाशया मुदा सन्तोषेणाधावत्। अनन्तरं

हृष्टवान् स द्विजं दृष्ट्वा नित्यनैमित्तिकत्यजं।
यजमानं निरूप्यैनं दूरं दीनमुखोऽद्रवत्॥ २०१॥
आननन्द निरीक्ष्यायं पुरे तत्रात्मघातिनं।
सर्व्वस्वारस्य यज्वानमेनं दृष्ट्वाऽथ विव्यथे॥ २०२॥

पुनस्तां गां अतिथिभ्योऽभ्यागमनार्थं हन्यमानां बुद्ध्वा मन्दो मूर्खोऽसौ दुःखवशान्मन्दं शनैर्न्यवर्त्तत परावृत्तः। क्षणमपि तत्र स्थातुमशक्तः सन् मन्दः शीघ्रं परावृत्त इति वा। महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयेदिति स्मृतेः॥ २००॥

हृष्टवानिति। स द्विजं नित्यानि सन्ध्यास्नानादीनि, नैमित्तिकानि ग्रहणस्नानादीनि त्यजति तमकुर्व्वाणं दृष्ट्वा हृष्टवान् स्वाश्रयाशया जहर्ष। अनन्तरमेनं यजमानं यागे कृतदीक्षं निरूप्य निश्चित्य निराशत्वाद्दीनमुखः सन् अद्रवत् तस्मात् प्रदेशाद्दूरं पलायाञ्चक्रे। दीक्षितो न ददाति न जुहोतीत्यादिश्रुतेः। नित्यनैमित्तिककर्म्मत्यागस्य वैधत्वाद्दोषाभावात् ततोऽपि पलायित इत्यर्थः। नैमित्तिकः। आगतार्थे भवार्थे वा ठक्॥२०१॥

आननन्देति। अयं तत्र पुरे आत्मघातिनं कञ्चन निरीक्ष्याननन्द। सर्व्वत एवात्मानं गोपायेदिति विध्यतिक्रमात् पापकार्य्ययं ममाश्रयः स्यादिति बुद्ध्या जहर्षेत्यर्थः। अथ विचारणायां सत्यां एनमात्मघातिनं नाम्ना सर्व्वस्वारस्य यज्ञस्य यज्वानं यजमानं दृष्ट्वा ज्ञात्वा विव्यथे। आसन्नमरणो ह्यचिकित्स्यरोगार्तस्तत्राधिकारी। सोऽन्त्येष्टौ सर्व्वस्वाराख्ये यज्ञे आत्मानमेव पशु-

क्रतौ महाव्रते पश्यन् ब्रह्मचारीत्वरीरतं।
जज्ञे यज्ञक्रियामज्ञः स भण्डाकाण्डताण्डवं॥ २०३॥
यज्वभार्य्याश्वमेधाश्वलिङ्गालिङ्गिवराङ्गतां।
दृष्ट्वाचष्ट स कर्त्तारं श्रुतेर्भण्डमपण्डितः॥ २०४॥

मन्त्रैः संस्कृतं घातयित्वा यज्ञभागमर्पयतीति श्रुतिः। वैधत्वादात्मघाते दोषाभावात् व्यथित इत्यर्थः। आत्मघातिनं। ताच्छील्ये णिनिः॥ २०२॥

क्रताविति। स महाव्रताख्ये क्रतौ ब्रह्मचारी इत्वरी च तयोरतं मैथुनं पश्यन् यज्ञक्रियां भण्डानामसभ्यभाषणादिव्यापारशीलानामकाण्डताण्डवमसमयोद्धतनृत्यमिव जज्ञे मेने। यतोऽज्ञो मूर्खः। भण्डा यथा बहुजनसमक्षं गुह्यादि प्रकाशयन्ति तथा द्विवैव बहुजनसमक्षमश्लीलव्यापारकरणात् यागकर्म्म भण्डव्यापारतुल्यमिति। यज्वानः सर्व्वेऽप्यसभ्या इति मेने इत्यर्थः। महाव्रते ब्रह्मचारिपुंश्चल्योः सम्प्रवाद इत्युपनिषत। एति तच्छीलेत्वरी स्वैरिणी, इण्नशेति (पा० ३।२।१६३) क्वरपि तुकिच, टिड्ढाणञीति (पा० ४।१।१५) ङीप्॥ २०३॥

यज्वेति। स यज्वनो यजमानस्य भार्य्याया अश्वमेधाख्यस्य यज्ञस्याश्वस्तस्य लिङ्गमालिङ्गत्येवंशीलं वराङ्गं गुह्यं यस्यास्तस्या भावस्तत्ता तां दृष्ट्वा श्रुतेर्वेदस्य कर्त्तारं भण्डमाचष्ट अकथयत् द्वापरस्याग्र इत्यर्थः। उन्मत्तत्वादात्मानं प्रत्येव वा। यतोऽपण्डितः शास्त्रानुसारिपण्डितबुद्धिरहितः।

अथ भीमजया जुष्टं व्यलोकत कलिर्नलं।
दुष्टदृग्भिर्दुरालोकं प्रभयेव प्रभाप्रभुं ॥ २०५ ॥
तयोः सौहार्दसान्द्रत्वं पश्यन् शल्यमिवानशे।
मर्मच्छेदमिवानर्च्छ स तन्नर्मोक्तिभिर्मिथः ॥ २०६ ॥

पुराणं मानवो धर्म्मः साङ्गो वेदश्चिकित्सितम्।
आज्ञासिद्धानि चत्वारि न हातव्यानि हेतुभिः ॥

इति राजाज्ञावन्निर्विचारं वेदार्थोऽनुष्ठेयः। अश्वमेधप्रकरणेऽश्वस्य शिश्नं महिष्या उपस्थे निधत्ते इत्यादि श्रुतेः कर्त्ता भण्ड इति श्रुतिकर्त्तुर्भण्डलाभिधानान्मूर्खः ॥ २०४ ॥

अथेति। अथैवं पुरपरिभ्रमणादनन्तरं कलिर्भीमजया भैम्या जुष्टं प्रीत्या सेवितं नलं व्यलोकत। कमिव। प्रभया संज्ञादेव्या ऽथवा मध्याह्नतेजोजुष्टं प्रभाप्रभुं सूर्यमिव। किम्भूतमुभयं। दुष्टा मत्सरादिदोषोपहता दृग्बुद्धिर्येषां तैः पापलोकैर्दुरालोकं। पुण्यश्लोकत्वात् पतिव्रतया तया च युक्तत्वात् कलिप्रभृतिभिः सुखेन द्रष्टुमशक्यं, काचकामलादिदोषदृग्भिर्दर्शञ्च। प्रकृष्टाभा कायकान्तिर्यस्या इति भैमीविशेषणञ्च प्रकृष्टया कायकान्त्या याधिभिर्दुरालोकं खलु, तद्योगे च न लोकेति (पा० २।३।६९) षष्ठीनिषेधाद् दुष्टदृग्भिरिति तृतीया ॥ २०५ ॥

तयोरिति। स तयोर्भैमीनलयोः सौहार्दसान्द्रत्वं अन्योन्यानुरागोत्कर्षं पश्यन् शल्यमिव हृदि नाराचस्पर्शमिवानशे प्राप। तत्तुल्यदुःखोऽभूदित्यर्थः। तथा मिथोऽन्योन्यं तथा नर्मोक्तिभिः

अमर्षादात्मनो दोषात्तयोस्तेजस्वितागुणात् ।
स्प्रष्टुं दृशाप्यनीशस्तौ तस्मादप्यचलत् कलिः ॥ २०७ ॥
अगच्छदाश्रयान्वेषी नलद्वेषी स निश्वसन् ।
अभिरामं गृहारामं तस्य रामसमश्रियः ॥ २०८ ॥

क्रीडाकल्लोलैः प्रीत्यालिङ्गनचुम्बनादिभिरनुभावैः कृत्वा मर्मच्छेदमिव प्राणहरणशरीरावयवकर्त्तनमिव आनर्च्छ प्राप। सौहार्दमान्द्यत्वस्य कारणत्वादालिङ्गनादिनर्मणश्चैकार्थत्वान्न पौनरुक्त्याशङ्का। सौहार्द्दं। युवादित्वाद्भावे अणि, हृद्भग (पा० ७।३। १९) इत्युभयपदवृद्धिः ॥ २०६ ॥

अमर्षादिति। कलिः अमर्षात् भैमीनलप्रीतिनर्मासहनशीलत्वरूपाद्रोषात्, तथा आत्मनो महापातकादिरूपाद्दोषाद्धार्मिकाश्रयणाशक्तेः, तथा तयोर्भैमीनलयोस्तेजस्वितागुणात् सौन्दर्यातिशयात् चात्रतेजसस्त्वाधर्षणीयत्वरूपाद्गुणादित्येवं हेतुत्रयात् तौ भैमीनलौ न परं मनसा किं दृशापि न पुनरङ्गेनापि स्प्रष्टुमनीशोऽसमर्थः किं पुनर्हस्तादिना। एवम्भूतो यतोऽतस्तस्मान्नलावासात् प्रासादादपि सकाशात् कलिर्निर्गतः। एवंविधौ तौ दृष्ट्वा तत्रापि प्रवेष्टुमशक्तस्ततोऽपि प्रस्थित इत्यर्थः। अन्योऽपि मलिनस्तेजस्विनं दृशा वीक्षितुमशक्तस्ततः पलायते॥ २०७॥

अगच्छदिति। नलद्वेषी नलद्वेषपरः अत एव तत्पराभवार्थं आश्रयान्वेषी निवासं मृगयमाणः कुत्रचिदपि तदलाभाद्दुःखादमर्षेण च निश्वसन् स कलिः रामेण श्रीरामेण समा तुल्या श्रीः शोभा सम्पद् यस्य तस्य नलस्याभिरामं वृक्षादिस-

रक्षिलक्षवृतत्वेन बाधनं न तपोधनैः ।
मेने मानी मनाक् तत्र स्वानुकूलं कलिः किल ॥ २०९ ॥

सृद्धिमत्त्वाद्रमणीयं गृहारामं प्रासादसमीपवर्त्ति क्रीडावनं अगच्छत् गतवान् । समीपे स्थितौ क्रियमाणायां नलदोषविचारः सुकर इति गृहारामं प्राप्तवानित्यर्थः । श्रीरामसाम्ये नलस्य पावित्र्यं सौन्दर्य्यं सम्पदाधिक्यं भाविराज्यपरित्यागश्चेति सूचितं । तदानीं रामस्य भावित्वे कव्यपेक्षया भूतत्वात् प्रवाहस्यानादितया वा भूतत्वादुपमा युक्तैवेति ज्ञेयं ॥ २०८ ॥

रक्षीति । कलिः तत्र पुरे रक्षिणां लक्षं सङ्ख्या तेन यद्वृतत्वं परिवेष्टितत्वं तेन हेतुना प्रवेष्टुमशक्यत्वात्तपोधनैः कृत्वा न बाधयतीति न बाधनमेवम्भूतं मेने विशेषणबलाद्विशेष्याक्षेपात् तमारामं स्वहितं मेन इत्यर्थः । यतो मानी अभिमानवान् । नलपराभवार्थं तत्रैव निवासवाञ्छामदधदित्यर्थः । किल प्रसिद्धौ । रक्षिलक्षवृतत्वेनैव बाधकं न पुनस्तपोधनैर्बाधकमतस्तत्र पुरं तमाराममेव मनाक् स्वहितं मेने इत्यर्थः । रक्षकबाधे सत्यपि अदृश्यतयापि स्वस्य प्रवेष्टुं शक्यत्वान्न तु तपोधन इति मनागित्युक्तं । एवं सङ्कटे किमिति न्यवासीदित्यत आह । यतो मानी । अभिमानवान् साधनीयेऽर्थे सङ्कटमपि मानिनः सहन्त इत्यर्थ इति वा । रक्षकवृतत्वेन मुनिकर्तृकं बाधनं मनागपि तत्रारामे नास्तीति तं स्वानुकूलं तामसानां तत्र प्रवेशाभावात् तापसनिमित्तस्वबाधारहितं अत एव मनागीषत् स्वानुकूलं स्वस्मै हितमेवंविधं मेन इति वा ॥ २०९ ॥

दलपुष्पफलैर्देवद्विजपूजाभिसन्धिना।
स नलेनार्जितान् प्राप तत्र नाक्रमितुं द्रुमान्॥ २१०॥
अथ सर्व्वोद्भिदासत्तिपूरणाय स रोपितं।
विभीतकं ददर्शैकं कुटं धर्म्मेऽप्यकर्म्मठं॥ २११॥
स तं नैषधसौधस्य निकटं निष्कुटध्वजं।
बह्व मेने निजं तस्मिन् कलिरालम्बनं वने॥ २१२॥

दलेति। स कलिः तत्रोद्याने वने दलैः पत्रैः पुष्पैः फलैश्च कृत्वा देवानां अतिथीनाञ्च पूजा तद्विषयेणाभिसन्धिनाऽऽशयेन कृत्वा॰ देवद्विजपूजैवाभिसन्धिराशयो यस्यैवंविधेन वा, दलादिभिर्देवपूजां कर्त्तुकामेन नलेनार्जितानारोपितानाम्रादिद्रुमान् आक्रमितुं आरोढुमाश्रयितुञ्च न प्राप। तेषां धर्म्मोपयोगित्वात् स्वस्य च पापरूपत्वात् तानाश्रयितुं नाशकदित्यर्थः॥ २१०॥

अथेति। अथ स कलिः धर्म्मे धर्म्मकार्य्ये विषयेऽकर्म्मठमकर्म्मशूरमपि पित्रादीनां देवाद्यनुपयोगाद्धर्म्मकार्य्यानर्हमपि सर्व्वेषामुद्भिदां वृक्षाणामासत्तेः सान्निध्यस्य पूरणाय वृक्षलतागुल्मादिजातिमात्रास्तीति कीर्त्तिपूर्त्तिमात्राय तत्रोद्याने नलेन आरोपितमेकं सर्व्ववृक्षासत्तिपूरणस्यैकेनैव कृतत्वादेकसंख्यं विभीतकं कुटं वृक्षं ददर्श। अनोकहः कुटः शाल इत्यमरः। कर्म्मठः। कर्म्मणि घटत इति कर्म्मणि घटोऽठच्। (पा॰ ५।२।३५)। कर्म्मशूरस्तु कर्म्मठः। उद्भिदस्तरुगुल्माद्या इत्यमरः॥ २११॥

स इति। तस्मिन् वने नैषधसौधस्य निकटं समीपवर्त्तिनं

निष्पदस्य कलेस्तत्र स्थानदानाद्विभीतकः।
कलिद्रुमः परं नासीदासीत् कल्पद्रुमोऽपि सः॥ २१३॥
ददौ पदेन धर्मस्य स्थातुमेकेन यत् कलिः।
एकः सोऽपि तदा तस्य पदं मन्येऽमिलत्ततः॥ २१४॥

निष्कुटस्य गृहारामस्य ध्वजं लाञ्छनभूतं अथ चोच्चोच्चतरत्वात् ध्वजमिव तदग्रस्थित्या नलदर्शनवशात्तदीयदोषविचारोपाय-भूतं तं विभीतकं निजं स्वीयमालम्बनमाधारं बहु मेने। गृहा-रामास्तु निष्कुटा इत्यमरः॥ २१२॥

निष्पदस्येति। तत्र पुरे वने च निष्पदस्याश्रयरहितस्य कलेः स्थानदानात् स्वेनैव तदाधारभूतत्वात् स विभीतकः केवलं निवासभूतत्वात् कलिद्रुमः कलिसम्बन्धी द्रुमः परं केवलमा-सीदिति न किन्तु कलिं प्रत्यभिलाषपूरणात् कल्पद्रुमोऽप्यासीत्। अन्योऽपि निराश्रयस्याश्रयदानात् कल्पद्रुमत्वेन व्यपदिश्यते। भूतावासः कलिद्रुम इत्यमरः॥ २१३॥

पापिना कलिना विभीतकं स्थानं प्राप्तमित्यत्र हेतुमुत्प्रेक्षते ददाविति। यद् यस्माद्धेतोः कलिः प्रवाहानादितयाऽतीते कलियुगसमये धर्मस्यैकेन पदेन चतुर्थांशेन पदं स्थानं ददौ तत्तस्मात् तदा नलराज्यसमये कृतयुगे स विभीतकोऽपि एक एव तस्य कलेः पदं चरणोऽथ च स्थानमभिलत् सञ्जात इत्यहं मन्ये। कृतं कर्म युज्यते दाते न्यायेन कालान्तरे यावत् दत्त

उद्भिद्विरचितावासः कपोतादिव तत्र सः।
राज्ञः साग्नेर्द्विजात्तस्मात् सन्त्रासं प्राप दीक्षितात्॥ २१५॥

तावदेव तदानीं तेन लब्धमित्यहं मन्य इत्युत्प्रेक्षा। धर्मस्य सम्बन्धमात्रविवक्षया षष्ठी॥ २१४॥

उद्भिदिति। तत्रोद्याने उद्भिदि वृक्षे विभीतके विरचित आवासः स्थितिर्येन स कलिः साग्नेरग्निहोत्रवतो द्विजात् क्षत्रियात् तथा दीक्षितात् स्वीकृताग्निहोत्रादियागदीक्षादस्माद्राज्ञः अभिषेकादिगुणयुक्तात् नलात् सकाशात् सम्यक्त्रासं महाशापनिग्रहं प्राप। राज्ञो द्विजादित्येताभ्यां स्वाभाविकं निग्रहे सामर्थ्यं सूचितं। साग्नेर्दीक्षितादित्येताभ्याञ्च तपोजनितं शाप सामर्थ्यं सूचितं। एवंविधोऽयं ममोपस्थित मां निश्चयेन ज्ञास्यति शापं दास्यतीत्यन्तर्महद्भयं प्रापेत्यर्थः। अग्निहोत्रिणो नलस्य सम्बन्धिनः कृतयज्ञदीक्षात् तस्मादतिप्रसिद्धाद् द्विजात् ब्राह्मणाद् गोतमाख्यात् पुरोधसः सकाशात् भयं प्राप। नलाग्निहोत्रादिपरिचर्य्यार्थं तत्र वर्त्तमानात् स्वयमग्निहोत्रादिदीक्षायुक्ताच्च गोतमात् पुरोधसः सकाशाद्भीत इत्यर्थ इति वा। कस्मादिव कपोतादिव। यथाऽग्निसहितादङ्गारभक्षिणः तथा ईक्षितात् कपोतनाम्नो द्विजात् पक्षिणः सकाशात् वृक्षे विरचितावासः काकादिः पक्षी पुरुषो वा वृक्षारूढो वृक्षाधःस्थायी वा भयं प्रापत् पूर्वं कदाचित्तथेत्युपमा। स यथा प्राप्नोति तथेत्यर्थः। अग्निः कपोतजठरमन्तःप्रविष्टोऽतएव तद्भक्षिता

विभीतकमधिष्ठाय तथाभूतेन तिष्ठता ।
तेन भीमभुवोऽभीकः स राजर्षिरधर्षि न ॥ २१६ ॥

पाषाणकणिकापि जीर्यत इत्येतिह्यं । साग्निरङ्गारभक्षिणः । कपोतविशेषो ह्यङ्गारान् भक्षयति । उद्भिदा तृणकाष्ठादिना निर्म्मितगृहः पुरुषोऽग्न्युद्गारित्वात् स्वोपवेशनमात्रेण गृहदाहाद्यनिष्टसूचकात् गृहोपरि विलोकनात् कपोतो ह्युलूकपक्षिणः सकाशाद्यथा भयं प्राप्नोति तथाऽसावपि प्राप्तकपोतो हि गृहं प्रविष्टोऽनिष्टसूचकः । एवमद्भुतकर्म्मणोऽपि स्थूलोच्चवृक्षादिरोहिणो दृष्टात् कपोतात्तद्वृक्षवासी पक्षी नरो वा स्वस्यापि भक्षणशङ्कया शाखापतनशङ्कया वा यथा बिभेति तथेत्यर्थः । एवं यथामति व्याख्यातव्यं ॥ २१५ ॥

विभीतकमिति । विभीतकमधिष्ठायाश्रित्य तथाभूतेन तिष्ठता तस्य धर्म्मोपयोगाभावात् भयराहित्येन स्थितवता अथ च तादृशनलदर्शनात् पूर्व्वोक्तप्रकारेण बिभ्यता अत्यन्तास्थिरेण कलिना भीमभुवोऽभीकः भैम्याः कामुकः स राजा चासावृषिश्च राजत्वेऽपि धर्म्मप्रधानत्वान्मुनितुल्यो नलो नाधर्षि न पराभूतः । अपराभवे राजर्षित्वमेव हेतुः । अथ च विभीतकतुल्यं तरुमाश्रित्य तिष्ठता तथाऽतिमहता भूतेन भूतत्वं प्राप्तेन केनचित् प्रेतेन पिशाचेन भीमाया भयानकाया भूमेः रणभूमेर्रुद्रभूमेर्वा हेतोरभीको भयरहितो राजर्षिर्धार्म्मिको न पराभूयत इत्युचितं । भीमां भूमिमनादृत्य निर्भय इत्यर्थः । अनादरे षष्ठी ॥ २१६ ॥

तमालम्बनमासाद्य वैदर्भीनिषधेशयोः ।
कलुषं कलिरन्विष्यन्नवात्सीद्वत्सरान् बहून ॥ २१७ ॥
यथासीत् कानने तत्र विनिद्रकलिका लता ।
तथा नलछलासक्तिविनिद्रकलिकालता ॥ २१८ ॥
दोषं नलस्य जिज्ञासुर्बभ्राम द्वापरः क्षितौ ।
नदोषः कोऽपि लोकस्य मुखेऽस्तीति दुराशया ॥ २१९ ॥

तमिति। कलिः तं विभीतकं आलम्बनमाश्रयमासाद्य प्राप्य वैदर्भीनिषधेशयोः कलुषं पापाचरणमन्विष्यन् गवेषयितुमित्यर्थः, बहून् वत्सरानवात्सीत् दोषसंस्पर्शनेन विना तयोः पराभवेऽशक्तत्वाद्दोषपरीक्षार्थं बहुकालं तत्रैव स्थितवानित्यर्थः। अन्विष्यन्। इतौ शता। अवात्सीत्। वसेर्लुङि, सिचि, वद व्रजेति (पा० ७।२।३) वृद्धौ, सस्यार्द्धधातुक इति(कौ०।भ्वा०।पत्रे१३०।पंक्तिः ८।वा०) तत्वम्। वत्सरान्। अत्यन्तसंयोगे द्वितीया ॥ २१७॥

यथेति। तत्र कानने तस्मिन्नुद्याने यथा येन प्रकारेण विनिद्रकलिका विकसितकोरका लता वल्ली आसीत् तथा तेन प्रकारेण नलस्य छले आसक्तिरभिनिवेशस्तद्वशाद्विगतनिद्रो जागरूकः सावधानः कलिलक्षणः कालः समयो यत्र तद्भावस्तत्ता सापि तत्र वने आसीत्। सदा विकसितकोरकवल्लीसम्बन्धस्तस्योद्यानस्य यथाभूत् तथा सदा कलिसम्बन्धोऽप्यभूदित्येतावन्मात्रेण श्लेषमात्रेण चौपम्यं। नलछलनार्थं नलदोषान्वेषणार्थञ्च जागरूकः स कलिस्तत्रावात्सीदित्यर्थः ॥ २१८ ॥

एवं कलेरवस्थानं निरूप्य द्वापरस्यावस्थानमाह। दोषमिति।

अमुष्मिन्नारामे सततनिपतद्दोहदतया
प्रसूनैरुन्निद्रैरनिशममृतांशुप्रतिभटे ।
असौ बद्धालम्बः कलिरजनि कादम्बविहग-
छद च्छायाभ्यङ्गोचितरुचितया लाञ्छनमृगः ॥ २२० ॥

लोकापवादरूपं अभिशस्तिरूपं वा नलस्य दोषं जिज्ञासुर्द्वापर इत्यघटमानया दुराशया क्षितौ बभ्राम । इति किं । लोकस्य मुखं जनवार्त्तायामदोषो दोषरहितः कोऽपि नरो नास्ति सर्वो जनो यं निर्दोषमाह तादृशः पुरुष एव नास्तीति नलस्यापि किञ्चिद्दोषं कोऽपि वदिष्यतीति । न दोष इति पाठे लोकोक्ता-वन्योऽपि दोषो नास्ति अपि तु प्रायेण भविष्यतीति दुराश-येति काका सम्भावनापरत्वेन व्याख्येयम् । दोषं । न लोकेति (पा० २।३।६८) षष्ठीनिषेधः ॥ २१८ ॥

अमुष्मिन्निति । असौ कलिः श्यामपक्षहंसजातीयाः काद-म्बविहगाः कलहंसाख्यपक्षिविशेषाः तेषां छदाः पक्षाः तेषां छायायाः कान्तेरभ्यङ्गे उचिता योग्या तैलाभ्यङ्गेनेव स्वसंस्पर्श-मात्रेण स्निग्ध्यातिशयकारिणी श्यामतरा रुचिः कान्तिर्यस्य तस्य भावस्तत्ता तया कृष्णवर्णतया वनचन्द्रे लाञ्छनमृगोऽजनि क-लङ्कमृगोऽभूत् । किम्भूतः । सततं सदा निपतन् निक्षिप्यमाणो धूमादिर्दोहदो यत्र तस्य भावस्तता तया अनिशं सदा उन्नि-द्रैर्विकसितैः प्रसूनर्मालत्यादिसितपुष्पैः कृत्वा उज्ज्वलत्वादानन्द-दायित्वाच्चामृतांशोश्चन्द्रस्य प्रतिभटे प्रतिस्पर्द्धिनि चन्द्रतुल्येऽस-

स्फारे तादृशि वैरसेनिनगरे पुण्यैः प्रजानां घनं
विघ्नं लब्धवतश्चिरादुपनतिस्तस्मिन् किलासीत् कलेः ।

श्मिन् पूर्व्वोक्ते आरामे नलोद्याने बद्धः कृत आलम्बो वासो येन सः । चन्द्रे हि कलङ्केन भवितव्यं तत्स्थाने कलिरेवाभूदिति । एतेन निर्दोषे नलोद्याने कलिरेव दूषकोऽभूदित्युक्तम् । तत्र न्यवात्सीदित्यर्थः । पुष्पफलानामाकालिकसमृद्धये वृक्षेषु वृक्षायुर्वेदोक्तो धूपादिदोहदः क्रियते, तथा चम्पके पिण्याकादिजलक्षेपः, वकुले सुन्दरीगण्डूषजलमदिरासेकः, रक्ताशोके च तरुणीचरणप्रताडनमित्यादिः ॥ २२० ॥

स्फार इति । स्फारे विशालतरे तादृशि उक्तप्रकारेण धर्म्मबहुले स्फारत्वेऽपि सर्व्वत्र धर्म्मपूर्णे वैरसेनिर्नलस्तस्य नगरे प्रजानां पुण्यैर्हेतुभिर्घनं भूयांसं विघ्नं लब्धवतः प्राप्तवतो निराश्रयस्य कलेस्तस्मिन् नलोद्याने चिराद् बहुकालं नलदोषगवेषणार्थं उपनतिरवस्थितिः किलाभूत् । किलेति पुराणादौ श्रूयत इत्यर्थः । प्रजानां पुण्यैः स्फारे व्याप्त इत्यर्थ इति वा हेतुगर्भविशेषणम् । एतस्मिन्नन्तरेऽवसरे पुनरन्योन्ययोग्यमेलनादन्तर्मनसि अमितानन्दः प्राप्तनिःसीमहर्षः स प्रसिद्धप्रभावः स्मरो भैमीनलौ आराद्धुं सेवितुं सुतरां पीडयितुं वा धनुःश्रुतिशिखा कर्णाद्धदेशस्तां वन्दारुः स्पर्शिनी चूडा अग्रभागो यस्य एवंविधमाकर्णपूर्णं व्यधित चकार । भैमीनलौ नगरं प्राप्तौ सुरेषु स्वर्गतेषु कलौ च वनालम्बिनि सति इतरेतरानुरागा-

एतस्मिन् पुनरन्तरेऽन्तरमितानन्दः स भैमीनला-
वाराद्धुं व्यधित स्मरः श्रुतिशिखावन्दारुचूडं धनुः ॥ २२१ ॥
श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।
यातः सप्तदशः स्वसुः सुसदृशि छन्दप्रशस्तेर्महा-
काव्ये तद्भुवि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥ २२२ ॥
समाप्तः सप्तदशः सर्गः।

तिशयेन चिरविरहातिसस्पृहौ स्मराराधनं चक्रतुरिति भावः। अनेनोत्तरसर्गे सम्भोगारम्भवर्णनात् सङ्गतिः सूचिता। कलि-कर्तृकपराभवस्य भविष्यत्त्वान्नायकापकर्षस्यावर्णनीयत्वाच्च स नोक्तः॥ २२१॥

श्रीहर्षमिति। पूर्वार्द्धः पूर्ववत्। एककर्तृकत्वात् स्वसुर्भगिन्याः छन्दस्य राजविशेषस्य प्रशस्तेर्वर्णनात् ग्रन्थस्य सुसदृशि तुल्ये तद्भुवि श्रीहर्षरचिते सप्तदशानां पूरणो निसर्गोज्ज्वलः स्वभाव-सुन्दरः सर्गः समाप्तः। छन्दप्रशस्तिरपि ग्रन्थो मया कृत इति सूचितं। सोदर्य्याश्च तुल्या भवन्ति। छन्दःप्रशस्तेरिति पाठे छन्दो बन्धक्रमस्वरूपनिरूपणपरस्य ग्रन्थस्येत्यर्थः। सप्तदश इति तस्य पूरण इति(पा० ५।२।४८) डट्। तद्भुवि। भाषितपुंस्कम्॥२२२॥

इति वेदरकरोपनामकनरसिंहपण्डितात्मजनारायणविर-चिते नैषधीयप्रकाशे सप्तदशः सर्गः॥ १७ ॥